२५	शक्तेरावरणाभावात् भावे वा कर्मैवावरणं, तन्निराकरणादभिव्यक्तिरित्यात्म-शक्तिभ्यां कर्मणो भेदसिद्धिरिति शततमपद्यं तद्विवरणं च ।	१९२–११
२६	अत्रोपाध्यायैर्दर्शितः स्वाभिप्रायः प्रकटितः ।	१९३—१

अङ्काः	विषयाः	पत्र-पङ्क्ती
२७	यद्यात्मशक्तिव्यतिरिक्तं क्रियान्तरनिबन्धनं पापं कर्माभ्युपेयते, एवं पुण्यकर्मापीष्टक्रियाजन्यं किमिति न स्वीक्रियते इत्यर्थक-मेकोत्तरशततमपद्यं तद्विवरणञ्च ।	१९३—७
२८	तत्र यदि पापाभावरूपमेव पुण्यं, तर्हि पुण्याभावरूपं पापमेव किमिति नेष्यते ।	१९३-१७
२९	वासनारूपमदृष्टमित्यप्यन्यसम्बन्धं विना न युक्तं, यतस्तिलादौ पुष्पादिगन्धसम्बन्धवैकल्ये गन्धवासना नेष्यत इति द्व्युत्तरशत-तमपद्यं तद्विवरणञ्च ।	१९३-२४
३०	बोधमात्रातिरिक्तं किञ्चिद्वासकं स्वीकरणीयं, तदेव वस्तु सत् कर्म युष्माकम्, कर्म विना वासना न युक्तेत्यर्थकं त्र्युत्तरशततमपद्यं तद्विवरणञ्च ।	१९४—७
३१	असत्ख्यात्युपनीतादृष्टभेदाग्रहाद्वासना स्यात् किं कर्माभ्युपगमे-नेति न वाच्यं, तत्र प्रमाणाभावात्, अन्यच्छङ्कान्तरमुत्थाप्या-पाकृतम् ।	१९४-१४
३२	बोधमात्रस्य वासनात्वेऽवासितज्ञानाभावात् सदैव मुक्तिः स्यात् केवलस्य बोधस्य वैशिष्ट्यं नेत्यर्थकं चतुरुत्तरशततमपद्यं तद्विवर-णञ्च, तत्र विशेषकस्वीकारे तदेवादृष्टम्, क्षणिकविज्ञानधाराया वासनात्वे बुद्धज्ञानमपि वासना स्यादित्यादि दर्शितम् ।	१९५—५
३३	उक्तप्रकारेणानन्तरोक्तः शक्त्यादिपक्षोऽपि युक्त्या नोपपन्नः शक्त्यादेर्बन्धान्न्यूनत्वेऽधिकत्वे वा बध्यबन्धनीयभावाऽव्यवस्था-प्रसङ्गादित्यर्थकं पञ्चोत्तरशततमपद्यं तद्विवरणञ्च ।	१९५-२५
३४	उक्तहेतोः कर्मादृष्टमात्मभिन्नमात्मयोगि चात्मशक्त्यादिसाधकं स्वीकर्त्तव्यमित्यर्थकं षड्डुत्तरशततमपद्यं तद्विवरणञ्च ।	१९६-१८
३५	उच्छृङ्खलनैयायिकानां मतं तत्खण्डनञ्च विस्तरत उपवर्णितम् ।	१९७—१
३६	योगिनस्तत्त्वज्ञानिनः कायव्यूहद्वाराऽशेषकर्मोपभोगो यथा न स-म्भवति तथा श्रीमद्भिर्यशोविजयोपाध्यायैर्महावीरस्तवप्रकरणे न्या यखण्डव्याख्याख्यवृत्तिसमलङ्कृते दर्शितस्य ग्रन्थसन्दर्भस्योट्टङ्कनम्	२०१—८
३७	न्यायालोकेप्येतत्खण्डनं यदुपाध्यायैः कृतं तदुल्लिखितम् ।	२०२—७

अङ्काः	विषयाः	पत्र-पङ्क्ती
३८	तद्व्याख्यानं श्रीमद्भिर्गुरुत्वैर्यैर्विजयनेमिसूरिभिर्यत् कृतं तदत्रोल्लिखितम् ।	२०२–१५
३९	योगस्य प्रायश्चित्तत्वेऽपसिद्धान्तापत्तिराशङ्क्य निराकृता ।	२०४–१६
४०	प्रकारान्तरेण कर्मसिद्धिरुपवर्णिता ।	२०४–२०
४१	लोकस्थितिसाधनत्वेन कर्मसिद्धिरुपदर्शिता ।	२०४–२२
४२	कर्मणैव धृतेरुपपत्तेर्धृत्येश्वरसाधनमयुक्तं नैयायिकस्य, उदयनाचार्येणोपदर्शितं तदुद्दलितञ्च ।	२०४–२४
४३	यस्माज्जैनोक्तभानोरदृष्टसिद्धिस्ततो दिगन्ताश्रयणं चार्वाकघूकस्य युक्तमित्युपदर्शकमुपाध्यायपद्यमुल्लिखितम् ।	२०५–१७
४४	मतभेदेनादृष्टस्य नामभेदाः, तेषामदृष्टपर्यायाणां कीर्तनात्मकं सप्तोत्तरशततमपद्यं तद्विवरणञ्च, तत्र 'इत्येषा सहकारिशक्तिरसमा' इत्युदयनपद्यमुल्लिखितम् ।	२०५–२०
४५	पूर्वं हिंसानृतादयोऽदृष्टस्य हेतव उक्ताः, तद्वान् अदृष्टेन विचित्रफलदायिना संयुज्यते इत्यर्थकमष्टोत्तरशततमपद्यं तद्विवरणञ्च ।	२०६—७
४६	एवमदृष्टात्मयोगे दृष्टेष्टबाधा न, अनिवारिता सिद्धिश्च, तस्माद्विद्वांसो जैनाभ्युपगतपौद्गलिकादृष्टवादं तत्त्ववादं कथयन्तीत्युपदर्शकं नवोत्तरशततमपद्यं तद्विवरणञ्च ।	२०६–१७
४७	पापोपकारणं लोकायतं ज्ञेयमित्याद्युपदर्शकं दशोत्तरशततमपद्यं तद्विवरणञ्च ।	२०७—५
४८	बृहस्पतिरिन्द्रप्रतारणाय लोकायतमतं कृतवानिति युक्तिशून्यं वचः, यतो नेत्थमिन्द्रः प्रतारितो भवतीत्यर्थकमेकादशोत्तरशततमपद्यं तद्विवरणञ्च ।	२०७–२२
४९	दुष्टाशयकरत्वादिभिरुपेतं नास्तिकदर्शनं धीरैर्वर्ज्यमित्युपदर्शकं द्वादशोत्तरशततमपद्यं तद्विवरणञ्च ।	२०८–२६
५०	उपाध्यायदर्शितो भावार्थोऽत्र दर्शितः ।	२०९–१५
५१	प्रशस्तिपद्यद्वयं शास्त्रवार्तासमुच्चयप्रथमस्तबकस्य ।	२१०—१
५२	प्रथमस्तबकटीकाया द्वे प्रशस्तिपद्ये ।	२१०–११

વ્યાકરણવાચસ્પતિ*કવિરત્ન*શાસ્ત્રવિશારદ*અનુપમવ્યાખ્યાન-સુધાવર્ષી*વિવિધગ્રન્થપ્રણેતા*પરમપૂજ્ય*આચાર્યદેવ*

શ્રીમદ્ વિજયલાવણ્યસૂરીશ્વરજી મહારાજ સાહેબ.

જન્મ–વિ. સં. ૧૯૫૩	દીક્ષા–વિ. સં. ૧૯૭૨	ચડી દીક્ષા–વિ. સં. ૧૯૭૩	પ્રવર્ત્તકપદ–વિ. સં. ૧૯૮૭
ભાદરવા વદ ૫	અષાડ શુદ ૫	માગશર શુદ ૩	કારતક વદ ૨
ખોડાદ (સૌરાષ્ટ્ર)	સાદડી (મારવાડ)	સાદડી (મારવાડ)	અમદાવાદ

અમદાવાદ	(કેળાપોળે) ઉપાશ્રય	(કેળાપોળે) દેવનકાબો	(કેળાપોળે) દેવનકાબો
૪ વર્ષ ૮માસ	૨ વર્ષ ૬ માસ	૦૧ વર્ષ ૬માસ	૮ વર્ષ ૬માસ
સં. ૨૦૨૬	સં. ૨૦૨૮	સં. ૨૦૨૯	સં. ૨૦૩૭

॥ अर्हं ॥

स्याद्वादपञ्चाननो निखिलावनिवनिकायां विलसतितराम् ।

चतुश्चत्वारिंशदधिकचतुर्दशशतमितसूत्रसूत्रणसूत्रधार-याकिनी-
महत्तराधर्मसूनु विरहाङ्काङ्कित-सुगृहीतनामधेय-सूरिपुरन्दर-
श्रीहरिभद्राचार्यभगवता निर्मितः

शास्त्रवार्तासमुच्चयः ।

तदुपरि-

तपोगणगगनाङ्गणगगनमणि-शासनसम्राट्-सूरिचक्रचक्रवर्ति-सर्व-
तन्त्रस्वतन्त्र-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरण-
वाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन
श्रीविजयलावण्यसूरिणा विरचिता

स्याद्वादवाटिका टीका-

आप्तं सर्वज्ञमिज्यं मिति-नयविलसत्तीर्थनिर्माणदक्षं,
ध्यात्वा श्रीवीरमिष्टं जिनवरमभितो योगिगम्यस्वरूपम् ।
नत्वा श्रीनेमिसूरिं गुरुवरममराध्यापकैकावतारं,
शास्त्राभ्यासैकलीनो रचयति किमपि श्रीललावण्यसूरिः ॥१॥ स्रग्धरा ॥

धीमान् श्रीहरिभद्रसूरिरमितज्ञानप्रचारोन्मुखो,
यच्छास्त्रं प्रणिनाय तत्त्वनिचयं स्वोपज्ञटीकान्वितम् ।
शास्त्रव्रातविचारसारममलं तद्धीधनानां मुदे,
श्रीमन्न्यायविशारदेन विवृतं सद्युक्तिपुञ्जैस्ततम् ॥२॥ शार्दूलविक्रीडितम् ॥

इत्थं सत्यपि तं बालाः, शास्त्रवार्तासमुच्चयम् ।
नावधारयितुं शक्ताः, सूक्ष्मज्ञानविवर्जिताः ॥ ३ ॥
तेषां बोधाय मन्दानां, व्याख्येषा शब्दविस्तृता ।
अल्पार्थाऽप्युपयुक्ता स्यादतो यत्नोऽत्र न वृथा ॥ ४ ॥ अनुष्टुब्युग्मम् ॥

साहाय्यं हारिभद्रं वच इह कुरुतात् स्वप्रचारैकसारे,
कान्ता नव्या यशोगीरपि लसतुतरामत्र नव्यप्रबन्धे ।
इत्येवंदृष्टिभाजा जिनवचनसमुल्लासनैकान्तबुद्ध्या,
व्याख्या दग्धा मयेयं न च विगतफला भाविनी मूलनद्धा ॥५॥ स्रग्धरा ॥

सेयमेकान्ततः श्रान्ते, प्रान्तेऽपि प्राणिनि श्रिते ।
स्याद्वादवाटिका टीका, विबुधामोददा तता ॥ ६ ॥
सुमनोरागरमणीया, भव्यालिगानगोचरा ।
निःसीमशमसाम्राज्यं, ददानाऽस्तु दिने दिने ॥ ७ ॥ अनुष्टुब्युग्मम् ॥

स्व-परोपकारप्रवणो भगवान् धीमान् श्रीमानाचार्यो हरिभद्रसूरिर्मोहाद्यान्तरारिनिकरमूलाज्ञानान्धतिमिरावृतज्ञानालोकं लोकमुपचिकीर्षुस्तत्त्वोद्भासनामलनिदानं शास्त्रवार्तासमुच्चयाभिधानं प्रकरणमारभमाणः, "शिष्टाः क्वचिदभीष्टे कर्मणि प्रवर्तमाना मङ्गलकरणपुरस्सरमेव प्रवर्तन्ते" इति शिष्टाचारपरिपालनपरः

"श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥ १ ॥ [ ]

इति प्रकरणस्यास्य प्रारिप्सितस्य सम्यग्ज्ञानहेतुत्वाच्छ्रेयोभूतस्य सम्भाव्यते विघ्नबाहुल्यमिति चाकलयन्, निर्विघ्नग्रन्थपरिसमाप्तये मङ्गलस्यावश्यकर्तव्यत्वमनुसन्दधानः, प्रेक्षापूर्वकारिणः प्रयोजनाद्यनुबन्धचतुष्टयशून्ये न प्रवर्तन्त इति ग्रन्थादौ प्रयोजनादिकमवश्यमेवाभिधेयमित्युपात्तदृष्टिरिष्टदेवपरमात्मप्रणामस्वरूपमङ्गलात्मकं प्रेक्षावत्प्रवृत्त्यनुकूलानुबन्धचतुष्टयप्रतिपादनप्रवणमिमं श्लोकमादावाह—

प्रणम्य परमात्मानं, वक्ष्यामि हितकाम्यया ।
सत्त्वानामल्पबुद्धीनां, शास्त्रवार्तासमुच्चयम् ॥ १ ॥

प्रणम्येति । ननु यद्धर्मावच्छिन्नस्य यद्धर्मावच्छिन्नेन सममन्वय-व्यतिरेकग्रहौ

भवतस्तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नस्य कारणत्वं गृह्यते, यथा दण्डत्वावच्छिन्नस्य घटत्वावच्छिन्नेन समं 'दण्डसत्त्वे घटसत्त्वं, दण्डाभावे घटाभावः' इत्येवमन्वय-व्यतिरेकग्रहौ भवत इति घटत्वावच्छिन्नं प्रति दण्डत्वावच्छिन्नस्य कारणत्वं गृह्यते, प्रकृते तु समाप्तित्वावच्छिन्नस्य न मङ्गलत्वावच्छिन्नेन सममन्वय-व्यतिरेकग्रहौ सम्भवतः, मङ्गलसत्त्वेऽपि कादम्बरीग्रन्थस्य समाप्तेरभावेन तत्सत्त्वे तदभावरूपान्वयव्यभिचारग्रहस्य, मङ्गलाभावेऽपि च नास्तिकनिर्मितग्रन्थस्य समाप्तेर्भावेन तदभावे तत्सत्त्वरूपव्यतिरेकव्यभिचारग्रहस्य चान्वयव्यतिरेकग्रहप्रतिबन्धकस्य भावात् । न चोपदर्शितान्वय-व्यतिरेकव्यभिचारग्रहाभ्यां समाप्तित्वावच्छिन्नं प्रति मङ्गलत्वावच्छिन्नस्य कारणत्वग्रहासम्भवेऽपि स्वसमसङ्ख्यकविघ्नस्थलीयसमाप्तित्वावच्छिन्नं प्रति मङ्गलत्वावच्छिन्नस्य कारणत्वमुररीक्रियते तद्ग्रहस्तु सम्भवत्येव, कादम्बरीग्रन्थे तु यावन्ति मङ्गलानि ततोऽधिकसङ्ख्यका विघ्ना इति मङ्गलसमसङ्ख्यकविघ्नस्थलीयसमाप्तित्वस्वरूपकार्यतावच्छेदकधर्मानाक्रान्तत्वात् कादम्बरीग्रन्थसमाप्तेर्मङ्गलभावेऽभावेऽपि नान्वयव्यभिचारः, नास्तिकग्रन्थस्य समाप्तिं दृष्ट्वा जन्मान्तरीयमङ्गलकल्पनेन तन्मङ्गलसमसंख्यकविघ्नस्थलीयसमाप्तित्वरूपकार्यतावच्छेदकधर्माक्रान्तनिरुक्तसमाप्तिकार्यभावस्य जन्मान्तरीयमङ्गलरूपकारणसद्भावनियतत्वेन न तत्र व्यतिरेकव्यभिचारोऽपीति वाच्यम्, विघ्नाधिकसङ्ख्यकमङ्गलस्थले तत्रत्यग्रन्थसमाप्तेर्निरुक्तकार्यतावच्छेदकधर्मानाक्रान्तत्वेन मङ्गलतस्तदभावप्रसङ्गात् । यदि च मङ्गलसद्भावे भवन्त्या निरुक्तग्रन्थसमाप्तेर्निरुक्तकार्यतावच्छेदकधर्मानाक्रान्तत्वेन न मङ्गलकार्यत्वमिति कारणान्तरत एव तद्भावो मङ्गलं तु तत्राकिञ्चित्करमेव, तर्ह्यन्यत्रापि मङ्गलस्य समाप्तिं प्रति कारणत्वं किमिति कल्पनीयम् ? तदृष्टान्तेनान्यत्रापि मङ्गलातिरिक्तकारणत एव समाप्तेः सम्भवात् । न च स्वानधिकसङ्ख्यकविघ्नस्थलीयसमाप्तित्वमेव कादम्बरीग्रन्थेऽन्वयव्यभिचारपरिहाराय कार्यतावच्छेदकं स्वीक्रियते, विघ्नाधिकसङ्ख्यकमङ्गलस्थले तु समाप्तेर्मङ्गलानधिकसङ्ख्यकविघ्नस्थलीयत्वेन सङ्ग्रहः स्यादेवेति वाच्यम्, यत्र दश विघ्नास्तेषां मध्यात् पञ्च प्रायश्चित्तेन नाशिताः, अथ च पञ्च मङ्गलानि, तत्र समाप्तेर्मङ्गलाधिकसङ्ख्यकविघ्नस्थलीयत्वेन मङ्गलानधिकसङ्ख्यविघ्नस्थलीयसमाप्तित्वलक्षणकार्यतावच्छेदकधर्मानाक्रान्तत्वान्मङ्गलतोऽनुत्पत्तिप्रसङ्गात् । न च तत्र प्रायश्चित्तनाश्याः पञ्च

विघ्नाः पञ्च च मङ्गलनाश्या इति प्रायश्चित्ताद्यनाश्यस्वानधिकसंख्यविघ्नस्थलीय-समाप्तित्वस्य कार्यतावच्छेदकतयाऽऽश्रयणे तत्सङ्ग्रहः स्यादेवेति वाच्यम्, यत्र बलवानेक एव विघ्नो बहुभिरपि मङ्गलैर्न नाशयितुं शक्यस्तत्र ग्रन्थसमाप्तिर्न मङ्गलैरुपजायते, तत्र मङ्गलसत्त्वेऽपि निरुक्तकार्यतावच्छेदकाक्रान्तायाः समाप्तेरभावेनान्वयव्यभिचारात्; यत्र च बलवदेकमेव मङ्गलं बहून् विघ्नान् नाशयति तत्र मङ्गलतो ग्रन्थसमाप्तिर्भवति तस्यां समाप्तौ मङ्गलकार्यभूतायां प्रायश्चित्ताद्यनाश्यस्वाधिकसङ्ख्यविघ्नस्थलीयत्वेन निरुक्तसमाप्तित्वस्याभावेन मङ्गलनिरूपित-कार्यतान्यूनवर्तिनस्तस्य तादृशकार्यतावच्छेदकत्वासम्भवादन्यूनानतिरिक्तवृत्ति-धर्मस्यैवावच्छेदकत्वमिति नियमात् । अपि च, समाप्तौ तादृशविघ्न-स्थलीयत्वं किं निरुक्तविघ्नविशिष्टत्वं किं वा निरुक्तविघ्नोपलक्षितत्वम् ? नाद्यः–विशेषण-विशेष्ययोर्भाव एव विशिष्टस्वभाव इति मङ्गलतो विशिष्ट-समाप्तिभावे विशेषणीभूतस्य विघ्नस्यापि भावापत्तेरिति विघ्नध्वंसार्थं क्रियमाणं मङ्गलं विघ्नमेव जनयेदिति तथाऽभ्युपगन्तुर्महदनिष्टमापादितम्; तथा यदा समाप्तिस्तदा तत्प्रतिबन्धकदुरितविशेषोऽपीत्युन्मत्तादन्यो नैवमभ्युपगन्तुं शक्तः; नान्त्यः–नियतोपलक्ष्यतावच्छेदकाभावात्, यद्धि उपलक्ष्यं भवति तत्रोपलक्षण-स्योपलक्ष्यतावच्छेदकं नियतम्, यथा 'काकवन्तो देवदत्तस्य गृहाः' इत्यत्रोपल-क्षणस्य काकवत्त्वस्य देवदत्तगृहत्वमुपलक्ष्यतावच्छेदकं नियतम्, प्रकृते तु प्राय-श्चित्ताद्यनाश्यमङ्गलानधिकसङ्ख्यकविघ्नस्योपलक्षणतयाऽभिमतस्योपलक्ष्यतावच्छेदकतयाऽभिमतं सामान्यतः समाप्तित्वं न नियतम्, तस्य मङ्गलाधिकसङ्ख्यक-दुर्बलविघ्नस्थलीयसमाप्तौ मङ्गलं विनोत्पद्यमानतयाऽऽरेकितसमाप्तावपि च सत्त्वात्, तस्य कार्यतावच्छेदकत्वं व्यभिचाराच्च सम्भवति, यच्च मङ्गलमात्रप्रभव-समाप्तिगतं तन्न किञ्चिदस्ति यस्योपलक्ष्यतावच्छेदकत्वं सम्भाव्येतापीति मङ्गलस्य समाप्तिमात्रे हेतुत्वमिति प्राचीनमतं न सङ्गतम् ।

यदपि नव्यानामिदं मतम्–यदुत, "कार्यमात्रे प्रतिबन्धकाभावस्य कारण-त्वमिति कार्यविशेषे समाप्तौ प्रतिबन्धकाभावविशेषस्य विघ्नध्वंसस्य कारणत्वमा-वश्यकमेव, प्राच्योऽपि मङ्गलस्य व्यापारतया विघ्नध्वंसस्य समाप्तिं प्रति कारण-त्वमुशन्तीत्यावश्यकत्वाद् विघ्नध्वंस एव मङ्गलफलम्, समाप्तिस्त्वसति प्रति-बन्धके बुद्धि-प्रतिभादिस्वकारणकलापादेव भवति, यथा वृष्टिकामपुरुषकृत-

कारीरीतो वृष्टिप्रतिबन्धकावग्रहनिवृत्तौ स्वकारणकलापादेव वृष्टिर्भवतीति । ननु विघ्नध्वंसो जायतामितीच्छया न मङ्गलाचरणं किन्तु प्रारब्धं कर्म निर्विघ्नं परिसमाप्यतामिति कामनयैवेति विघ्नध्वंसपूर्वकसमाप्तीच्छया मङ्गलाचरणात् समाप्तिरेव मङ्गलफलम्, यद् यदिच्छया क्रियते तस्य तत् फलमिति नियमस्य स्वर्गेच्छया क्रियमाणे दर्शादियागे स्वर्गफलकत्वदर्शनेनावधारणादिति चेद् ? न-कारीरीमन्तरेणापि वृष्टेरन्यत्र दर्शनेन वृष्टीच्छया क्रियमाणस्यापि कारीरीयागस्य न वृष्टिः फलं किन्त्ववग्रहनिवृत्तिरेव फलमित्युक्तनियमस्य प्रायिकत्वेन "विशेष्ये बाधे सति सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः" इति न्यायात् 'निर्विघ्नं परिसमाप्यताम्, इति कामनाया विघ्नध्वंसमात्रावगाहित्वस्यैवावधारणेन विघ्नध्वंसफलकत्वस्यैव न्याय्यत्वाद्" इति, तदपि न विदुषामानन्दकन्दोल्लासायालम्-मङ्गलं विनाऽपि प्रायश्चित्तादितो विघ्नध्वंसस्य भावेन व्यतिरेकव्यभिचारेण विघ्नध्वंसत्वावच्छिन्नं प्रत्यपि मङ्गलस्य कारणत्वासम्भवात् । न च प्रायश्चित्ताद्यनाश्यविघ्नध्वंसत्वं मङ्गलकार्यतावच्छेदकम्, तस्य प्रायश्चित्तादिनाश्यविघ्नध्वंसेऽभावेन नोक्तव्यभिचार इति वाच्यम्, तथा सति मङ्गलजन्यविघ्नध्वंसे व्यभिचारेण प्रायश्चित्तादीनामपि न विघ्नध्वंसत्वावच्छिन्नं प्रति कारणत्वं किन्तु मङ्गलानाश्यविघ्नध्वंसत्वावच्छिन्नं प्रति प्रायश्चित्तादीनां कारणत्वं वाच्यम्, तत्र च प्रायश्चित्तादिनाश्यत्वग्रहे प्रायश्चित्ताद्यनाश्यविघ्नध्वंसत्वावच्छिन्नं प्रति मङ्गलस्य कारणत्वग्रहः, तस्मिन् सति मङ्गलानाश्यविघ्नध्वंसत्वावच्छिन्नं प्रति प्रायश्चित्तादेः कारणत्वम्, इत्येवमन्योन्याश्रयस्य जागरूकत्वात् ।

यदपि "विघ्नो मा भूदिति कामनया मङ्गलाचरणे प्रवृत्तेर्विघ्नप्रागभाव एव मङ्गलफलम्" इति मतम्, तदपि न रमणीयम्-प्रागभावमात्रस्यानादित्वेन विघ्नप्रागभावस्याप्यनादितया मङ्गलजन्यत्वासम्भवात् । अप्राप्तस्य प्राप्तिलक्षणो यो योगस्तदात्मकजन्यत्वस्याभावेऽपि प्राप्तस्य संरक्षणात्मकक्षेमात्मकजन्यत्वं तस्यापि सम्भवतीति योग-क्षेमसाधारणमङ्गलजन्यत्वं विघ्नप्रागभावस्य मङ्गलफलत्वमित्यपि न समीचीनम्, स्वत आगन्तुकसमयविशेषस्वरूपसम्बन्धात्मकस्य विघ्नप्रागभावपरिपालनलक्षणक्षेमस्यापि स्वत एव भावेन मङ्गलासाध्यत्वात् ।

शिष्टाचारपरिपालनं मङ्गलफलमित्यपि न युक्तम्, यतः शिष्टाचारपरिपालनेन धर्मविशेष उत्पद्यते, तेन चाभीप्सितसिद्धिरित्येवं शिष्टाचारपरिपालनस्यादृष्टद्वाराऽभीप्सितसिद्धिहेतुत्वकल्पनापेक्षया वरं मङ्गलस्यैवाऽदृष्टद्वाराऽभीप्सित-

सिद्धिहेतुत्वम्; तथा शिष्टाचारपरिपालनजन्यधर्मविशेषोऽपि नाभीष्टसिद्धिप्रतिबन्धकविघ्नमविनाश्याभीष्टसिद्धिहेतुरिति समाप्तिहेतुतया विघ्ननाशस्यावश्यकत्वे तस्यैव मङ्गलफलत्वस्यौचित्याच्च । अपि च, शिष्टाचारपरिपालनं न मङ्गलफलं किन्तु तज्जनकम्, यतो मङ्गलं विधिबोधितकर्तव्यताकं शिष्टाचारविषयत्वादित्येवं शिष्टाचारेण विधिबोधितकर्तव्यत्वमनुमाय मङ्गले प्रवृत्तिरेव शिष्टाचारपरिपालनम्, मङ्गलविधेयकप्रवृत्तिरूपशिष्टाचारपरिपालनेन च मङ्गलमाचरितं भवतीति मङ्गलजनकं तत् कथं मङ्गलफलमिति । न च शिष्टैः सर्वत्रेष्टकर्मणि मङ्गलमाचर्यत इति मङ्गलाचरणमाचारप्राप्तमिति तदनाचरणमाचारप्राप्तातिलङ्घनम्, तत्र प्रत्यवायो भवतीति प्रत्यवायित्वपर्यवसन्नाशिष्टत्वशङ्कानिरास एव शिष्टाचारपरिपालनम्, तच्च मङ्गलफलमेवेति वाच्यम्, ग्रन्थादौ मङ्गलस्याकर्तायं ग्रन्थकर्ता शिष्टो न वेति शङ्कातः शिष्याणां तत्कर्तृकग्रन्थाध्ययनावधानाभावेऽपि समाप्तिप्रतिबन्धाभावेन तथाविधशिष्टाचारपरिपालनस्य प्रकृतानुपयुक्तत्वात्, यदकरणे प्रत्यवायस्मरणं तस्य नित्यकर्मण एव शिष्टाचारप्राप्तातिलङ्घने प्रत्यवायित्वपर्यवसन्नाशिष्टत्वशङ्कोदेति, मङ्गलं तु कामनाविशेषनियतकर्तव्यताकं काम्यं कर्म, तच्च कामनाविशेषादेवानुष्ठीयत इति कामनाविशेषाभावे तदकरणेऽपि न प्रत्यवाय इति विशेषदर्शनेन निरुक्ताशिष्टत्वशङ्कानिरास उपजायत इति तल्लक्षणशिष्टाचारपरिपालनस्य मङ्गलफलत्वासम्भवाच्च ।

तस्मात् सम्भाव्यमानफलानां मङ्गलफलत्वस्योक्तदिशाऽसम्भवादन्यत्र च मङ्गलफलत्वस्य केनापि वादिनाऽनभ्युपगमादिति यावत्फलविशेषशून्यत्वान्निष्फलं मङ्गलं ग्रन्थादौ नाऽचरणीयमिति चेत्? अत्रोत्तरं स्याद्वादनिष्णाता इदं प्रकटयन्ति, तथाहि-विघ्नध्वंसत्वावच्छिन्नं प्रति मङ्गलं कारणमिति मङ्गलस्य विघ्नध्वंस एव फलम्, यच्च मङ्गलाभावेऽपि प्रायश्चित्तादितो विघ्नध्वंसस्योत्पादेन व्यतिरेकव्यभिचारान्न मङ्गलं विघ्नध्वंसकारणमिति तन्न सङ्गतम्, प्रायश्चित्तादीनामपि मङ्गलत्वेन मङ्गलाभावे कुत्रापि विघ्नध्वंसस्य भावाभावात्; यदि प्रारीप्सितप्रतिबन्धकदुरितनिवृत्त्यसाधारणकारणत्वं मङ्गलत्वमित्येवं पराभिमतं मङ्गललक्षणं स्यात् तर्हि प्रारीप्सितप्रतिबन्धकदुरितनिवृत्तिकारणे प्रायश्चित्तादौ मङ्गलत्वं न भवेदपि, यदा तु स्याद्वादवादिभिर्लाघवाद् दुरितनिवृत्त्यसाधारणकारणत्वमेव मङ्गलत्वं स्वीक्रियते तदा निरुक्तलक्षणं मङ्गलत्वं प्रायश्चित्तादेरपि सुसङ्गतम्; अत एव स्वाध्यायादेरपि मङ्गलत्वमामनन्ति देवसूरयः, उक्तं चाकरे-"स्वाध्यायादेरपि

मङ्गलत्वाविरोधात्" इति । ननु लाघवाद् दुरितनिवृत्त्यसाधारणकारणत्वरूपत्वेऽपि मङ्गलत्वस्य न तदात्मना तेन विघ्नध्वंसं प्रति कारणत्वम्, दुरितनिवृत्तिं प्रति दुरितनिवृत्तिकारणत्वेन कारणत्वे दुरितनिवृत्तिकारणत्वस्यैव दुरितनिवृत्तिकारणत्वस्यावच्छेदकत्वेनावच्छेदकाऽवच्छेद्ययोरेकत्वेनात्माश्रयप्रसङ्गात्, किन्तु मङ्गलत्वावान्तरधर्मेण नतित्वादिना प्रातिस्विकरूपेणैव मङ्गलस्य विघ्नध्वंसं प्रति कारणत्वं वाच्यम्, तच्च नतिमन्तरेणापीष्टदेवादिस्मरणेन विघ्नध्वंसस्य भावेन व्यतिरेकव्यभिचाराच्च सम्भवतीति चेत्? न-निश्चयनयेनाऽऽत्मनः परिणतिविशेषस्य भावविशेषस्यैव मङ्गलत्वमिति नत्याद्यभिव्यङ्ग्यस्य तस्यैव दुरितक्षयं प्रति कारणत्वेन तस्य यत्र यत्र दुरितक्षयस्तत्र सर्वत्र सत्त्वेन व्यभिचाराप्रसक्तेः, अपवर्तनीयविघ्नध्वंसं प्रत्येव च भावविशेषलक्षणस्यापि मङ्गलस्य कारणत्वम्, अतो भावविशेषलक्षणमङ्गलसद्भावेऽप्यनपवर्तनीयस्य निकाचितकर्मस्वरूपस्य बलवतो विघ्नस्य न ध्वंस इति न तत्रान्वयव्यभिचारः । वस्तुतो व्यवहारनये शब्दाद्यात्मकनत्यादीनामपि मङ्गलत्वमिति नतित्वादिना प्रातिस्विकरूपेण मङ्गलस्य विघ्नध्वंसं प्रति कारणत्वमेव, व्यभिचारस्तु नत्यव्यवहितोत्तरविघ्नध्वंसं प्रति नतेः, स्मरणाव्यवहितोत्तरविघ्नध्वंसं प्रति स्मरणस्य कारणत्वमित्येवं कार्यतावच्छेदककोटौ तत्तत्कारणाव्यवहितोत्तरत्वस्य निवेशाद् वारणीय इति ।

परे तु-"विघ्नध्वंस-विघ्नप्रागभावपरिपालन-समाप्तिप्रचयगमन-शिष्टाचारपरिपालनानां सर्वेषामेव विनिगमनाविरहान्मङ्गलफलत्वम्, मङ्गलं विघ्नध्वंसफलकं विघ्नध्वंसकामनया शिष्टैराचरितत्वात्, मङ्गलं विघ्नप्रागभावपरिपालनफलकं विघ्नप्रागभावपरिपालनकामनया शिष्टैराचरितत्वात्, मङ्गलं समाप्तिप्रचयगमनफलकं समाप्तिप्रचयगमनकामनया शिष्टैराचरितत्वात्, मङ्गलं शिष्टाचारपरिपालनफलकं शिष्टाचारपरिपालनकामनया शिष्टैराचरितत्वात्, यद्धि यत्कामनया शिष्टैराचरितं तत् तत्फलकं यथा दर्शपूर्णमासादिकं स्वर्गफलकामनया शिष्टैराचरितं स्वर्गफलकमित्यनुमानमत्र प्रमाणम्, शिष्टाचारानुसारेण "विघ्नध्वंसकामो मङ्गलमाचरेत्, विघ्नप्रागभावपरिपालनकामो मङ्गलमाचरेत्, समाप्तिप्रचयगमनकामो मङ्गलमाचरेत्, शिष्टाचारपरिपालनकामो मङ्गलमाचरेत्" इत्येवं श्रुतयोऽप्यत्र कल्पनीया भवन्ति, ता अप्युक्तार्थे प्रमाणम्, तदुक्तम्-"अनुमानव्यवस्थानात् तत्संयुक्तं प्रमाणं स्यात्" [जैमि० १.३.१५.] इति न्यायेन यथाचार-

मेव श्रुतिकल्पनात्" इति, यथाचारमेवेत्यत्रैवकारोपादानात् यत्फलकामनया मङ्गलं न शिष्टैराचरितं तत्फलकामपुरुषकर्तव्यतया मङ्गलस्यावबोधिका श्रुतिर्न कल्पयितुं शक्येत्यावेदितम्। न च मङ्गलस्यैकस्यापि विघ्नध्वंसादिसर्वफलत्वे एकमङ्गलप्रयोगादपि विघ्नध्वंसाद्यनेकफलापत्तिर्युगपदेव स्यादिति वाच्यम्, श्रुतावेकस्यानेकफलकत्वस्यावबोधनेऽपि सर्वफलसाहित्यस्याविवक्षणात्, अनेकफलावबोधकश्रुतौ सर्वफलसाहित्यस्य विवक्षितत्वे "सर्वेभ्यो दर्श-पूर्णमासौ" [ ] इति श्रुतावप्युद्देश्यफलसाहित्यविवक्षातो दर्श-पूर्णमासाभ्यां युगपत् सर्वफलावाप्तिः प्रसज्येत; एवं चैकस्य मङ्गलस्य विघ्नध्वंसाद्यनेकफलकत्वेऽपि यत्फलकामनया यत्र यन्मङ्गलं क्रियते तन्मङ्गलात् तत्र तदेव फलं भवतीति कादम्बर्यादौ समाप्तिकामनया मङ्गलं कृतमित्यत्र प्रमाणाभावेन तत्रान्यफलकामनयैव मङ्गलं कृतमतोऽन्यदेव विघ्नध्वंसादि ततो जातं न समाप्तिः" इत्याहुः।

एकोद्देशेन क्रियमाणादप्यनेकफलकात् कर्मण उद्देश्या-ऽनुद्देश्य-प्रधानाप्रधान-बहुविधफलोत्पत्तेर्दर्शनेन समाप्युद्देशेनाक्रियमाणात् समाप्तिफलकादपि मङ्गलात् कादम्बर्यादौ समाप्तिर्न जातेति मननं न युक्तमित्यन्ये।

"सीसमइमंगलपरिग्गहत्थमेत्तं तदभिहाणं" [शिष्यमतिमङ्गलपरिग्रहार्थमात्रं तदभिधानम्। गाथा–३०] इति विशेषावश्यकभाष्यादिदमत्र ज्ञायते– यदुत, समग्रमेव शास्त्रं मुक्तिफलकतत्त्वज्ञाननिमित्तत्वाच्छ्रेयोभूतं मङ्गलम्, अथापीष्टदेवनत्यादिलक्षणस्य मङ्गलस्य शास्त्रघटकतया यदादौ गुम्फनं तच्छिष्याणां मङ्गलमवश्यं कर्तव्यमिति बुद्ध्यर्थम्, अन्यथा शास्त्रघटकानामशेषाणामपि वाक्यानां मङ्गलवाक्यत्वेन नत्यादिलक्षणमङ्गलवाक्यस्य शास्त्राघटकत्वेऽविशेषाद् वाक्यान्तराणामपि शास्त्राघटकत्वप्रसङ्गे शास्त्रं चरमवर्णमात्रमेव प्रसज्येतेति, तस्मात् सफलत्वाद् ग्रन्थकारस्य ग्रन्थादौ मङ्गलाचरणं युक्तमेवेति।

तदत्र इष्टदेवतास्तुतिस्वरूपं **प्रणम्य परमात्मेति** भावमङ्गलं विघ्नविनायकौघोपशान्तये, **वक्ष्यामी**त्यादिचरणत्रयेण प्रयोजना ऽधिकारि-सम्बन्धा-ऽभिधेय-स्वरूपानुबन्धचतुष्टयस्योक्तिः, अनुबन्धत्वं च प्रवृत्तिप्रयोजकज्ञानविषयत्वम्। अक्षरार्थस्तु–**प्रणम्य** सम्यग् मनो वाक्-कायैर्नत्वा, नमस्कारे सम्यक्त्वं च भक्ति-श्रद्धातिशयकरणकत्वम्, भक्तिश्रद्धातिशयकरणकस्येष्टदेवनमस्कारस्य विघ्नध्वंसजननद्वाराऽभीष्टसिद्धिप्रदत्वेन समीचीनत्वं स्यादेवेति; नमस्कारश्च

स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारः, निरुक्तज्ञानं च मत्त उत्कृष्टोऽयमित्याकारकम् । **परमात्मानमिति** च नमस्कारकर्मोपदर्शकम्, परमश्चासावात्मा परमात्मा तमिति व्युत्पत्तिः, द्वितीयार्थस्तु विशेष्यत्वम्, तत्र प्रकृत्यर्थस्य परमात्मन आधेयत्वसम्बन्धेनान्वयः, विशेष्यत्वस्य च नमस्कारघटके ज्ञाने निरूपकत्वसम्बन्धेनान्वयः; आत्मनि परमत्वं च यद्यपि सकलकर्मरहितत्वं तथापि तद्विवक्षणे सिद्धस्यैव नमस्कारकर्मत्वं स्यान्न तु तीर्थकृताम्, तेषां नमस्कारोऽपि हितावह इत्यतः क्षीणघातिकर्मत्वं तदिहाभिप्रेतम्, स च देवानामिन्द्रादीनामन्यपूज्यानामपि पूज्य इति देवाधिदेवमित्यर्थः । तं प्रणम्य किमिति समानकर्तृकोत्तरक्रियापेक्षायामाह-**वक्ष्यामीति**-अभिधास्य इत्यर्थः, अत्र कर्माकाङ्क्षया **शास्त्रवार्तासमुच्चयमित्यन्वेति**, शास्त्राणां-बौद्ध वैशेषिकादिदर्शनानां या वार्ताः-सिद्धान्तप्रवादास्तासां समुच्चयम्-एकत्र संकलनम्, "कृदभिहितो भावो द्रव्यवत् प्रकाशते" [ ] इति न्यायाश्रयणात् समुच्चिताः शास्त्रवार्तास्ता इत्यर्थः, तेन वैशेषिकादिप्रवादानामेवाभिधानकर्मत्वं न तु तत्समुच्चयस्येति तत्कर्मकत्वस्याभिधानक्रियायामन्वयासम्भवेऽपि न क्षतिः, द्रव्यपरकृदर्थेन समुच्चितशास्त्रवार्तारूपेणान्वितस्य द्वितीयार्थकर्मत्वस्य तदुत्तरपदार्थेऽभिधानेऽन्वयस्योपपत्तेः । न चैवं "प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" [ ] इति नियमविरोधः, प्रकृते द्वितीयारूपप्रत्ययस्य समुच्चयरूपप्रकृत्यर्थातिरिक्तशास्त्रवार्तारूपार्थान्वितस्वार्थकर्मत्वबोधकत्वाश्रयणादिति वाच्यम्, "तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः" [न्यायसू०४.१.] इत्यत्र नामूढस्येतरोत्पत्तेरित्यस्यामूढस्येतरोत्पत्त्यभावादित्यर्थस्येतरोत्पत्तिप्रकृतिकस्य पञ्चमीप्रत्ययस्येतरोत्पत्तिरूपप्रकृत्यर्थातिरिक्तनञर्थाभावान्वितस्वार्थबोधकत्वत एव सम्भवेनोक्तनियमस्य दूषितत्वात्; "पाणिपादं वादय" इत्यत्र समाहारे द्वन्द्वस्य समाहारार्थकत्वानुरोधेन पाणिपादमित्यस्य पाणिपादसमाहाररूपार्थस्य प्रत्ययार्थे कर्मत्वे यथा स्वाश्रयनिरूपितवृत्तित्वसम्बन्धेनान्वयस्तथा प्रकृतेऽपि शास्त्रवार्तासमुच्चयरूपप्रकृत्यर्थस्याभिधानकर्मत्वे प्रत्ययार्थे स्वाश्रयनिरूपितवृत्तित्वसम्बन्धेनान्वय इति प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्य न विरोध इति त्वनुभवानारूढत्वादुपेक्ष्यम् । कथं वक्ष्यामीत्याकाङ्क्षायामाह-**हितकाम्ययेति**-अनुग्रहेच्छयेत्यर्थः । केषां हितकाम्ययेत्यपेक्षायामाह-**सत्त्वानामिति**-प्राणिनामित्यर्थः, तत्त्वबुद्धीनां

विशिष्टबुद्धीनां वा प्राणिनां माध्यस्थ्य-प्रमोदविषयत्वाच्च तेषु प्रेक्षावतो हितकाम्यया प्रवृत्तिर्घटत इति सत्त्वानामित्यस्य विशेषणम्–अल्पबुद्धीनामिति–असङ्क्लिततत्तच्छास्त्रार्थग्रहणाप्रवणमतीनामित्यर्थः । शास्त्रबहिर्भूतमङ्गलकरणतः स्वशास्त्रसिद्धावपि यत् प्रणम्य परमात्मानमित्येवमाद्यचरणेन मङ्गलनिबन्धनं तच्छ्रोतृणामनुषङ्गतोऽपि मङ्गलोपपत्त्यर्थम् । वक्ष्यामि हितकाम्यया सत्त्वानामल्पबुद्धीनामित्यनेन कर्तुरनन्तरं प्रयोजनमुपदर्शितम्, परम्परप्रयोजनं तु कर्मक्षयान्मुक्तिरेव, शास्त्रवार्तासमुच्चयमित्यनेन समुचितशास्त्रवार्तालक्षणोऽभिधेय उक्तः, एतावता शास्त्रवार्ताधिगमकामा बालबुद्धयोऽधिकारिणोऽर्थादावेदिताः, तत एव चोक्तग्रन्थस्य शास्त्रवार्तालक्षणाभिधेयेन समं प्रतिपाद्य-प्रतिपादकभाव-लक्षणसम्बन्धोऽप्यावेदित एवेति ॥ १ ॥

सामान्यतोऽल्पबुद्धिहितलक्षणस्यावान्तरप्रयोजनस्य वक्ष्यामि हितकाम्ययेत्यादिनोक्तत्वेऽपि विशेषप्रयोजनानुबन्धितया नामग्राहं तन्निर्देष्टुं शास्त्रवार्तासमुच्चयं स्तौति—

यं श्रुत्वा सर्वशास्त्रेषु प्रायस्तत्त्वविनिश्चयः ।
जायते द्वेषशमनः, स्वर्ग-सिद्धिसुखावहः ॥ २ ॥

यं श्रुत्वेति—यं–शास्त्रवार्तासमुच्चयम्, श्रुत्वा–तात्पर्यतः परिज्ञाय,

"वेदान्तानामशेषाणामादि-मध्या-ऽवसानतः ।
ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत् ॥ १ ॥" [ ]

इत्यादिनाऽन्येनापि तात्पर्यतोऽर्थावधारणस्यैव श्रवणत्वेन व्यपदेशात् । सर्वशास्त्रेषु वैशेषिक बौद्धादिसकलदर्शनेषु । प्रायः बाहुल्येन । तत्त्वविनिश्चयः उपादेय-तद्भावावगमोऽर्थात् प्रामाण्याप्रामाण्यविवेकः, अनेकान्तवाद्युक्ततत्त्वनिर्णयः प्रमाणम्, एकान्तवाद्युक्ततत्त्वनिर्णयोऽप्रमाणमिति यावत् । जायते भवति । कथम्भूतस्तत्त्वविनिश्चयो भवतीत्यपेक्षायामाह—द्वेषशमन इति–मत्सरनाशन इत्यर्थः, अनेन विशेषणेनेतरदर्शनेष्वप्रामाण्यज्ञानात् तत्रानिष्टसाधनत्वज्ञाने द्वेषोदयात् संसारानुबन्ध्येव बहुशास्त्रज्ञानमित्याशङ्काऽपहस्तिता भवति, यतः प्रामाण्यनिश्चय उपादेयेऽर्थे निष्कम्पप्रवृत्तिजनकतयैवोपयुज्यते, अनुपादेयेऽर्थे प्रवृत्तिप्रतिबन्धकतयैवानुपादेयैकान्तनिश्चयेऽप्रामाण्यनिश्चयस्तूप-

युज्यते, प्रामाण्या-ऽप्रामाण्यनिश्चयशाली स्याद्वादी तु मध्यस्थो माध्यस्थ्यप्रतिबन्धादेव न तत्र द्वेषभाग् भवतीति। अत एव स तत्त्वविनिश्चयः स्वर्ग-सिद्धि-सुखावह इति-ज्ञानोपशमाभ्यां दान-संयमादौ शुद्धप्रवृत्त्या च स्वर्ग-सिद्धिसुखावहः—स्वर्गमुक्तिसुखप्रापक इत्यर्थः।

ननु सुखत्वावच्छिन्नं प्रति धर्मस्य धर्मत्वेन कारणत्वमवधृतमिति स्वर्गसुखभोक्तरि जीवे धर्मस्य सत्त्वात् स्वर्गे सुखमवश्यं भावीति न तत्र विप्रतिपत्तिः, अशेषविशेषगुणोच्छेदे सत्येव मुक्तिरिति मुक्ते जीवे धर्मात्मकस्य विशेषगुणस्याप्यत्यन्तमुच्छेदाद् धर्मात्मककारणाभावादेव न मुक्तिसुखसम्भवः; न च सुखत्वावच्छिन्नं प्रति धर्मत्वावच्छिन्नं कारणमित्येवं सामान्यतः सुख-धर्मयोः कार्यकारणभाव एव नेष्यते, किन्तु विजातीयसुखं प्रति विजातीयादृष्टं कारणमिति विशिष्यैव कार्यकारणभावः, विशिष्यैव वा दर्शादिकर्मणामदृष्टरूपव्यापारसम्बन्धेन विजातीयसुखं प्रति कारणत्वमिति मुक्तिसुखस्य तत्तदृष्टजन्यतावच्छेदकधर्मानाक्रान्तत्वाददृष्टाभावेऽपि तदुत्पत्तिरविरुद्धेति वाच्यम्, तथा सति मुक्तिसुखं प्रति न किञ्चिद् विशिष्यकारणमिति विशेषसामग्रीविरहादेव तदुत्पत्त्यसम्भवात्; ननु मुक्तिसुखं नित्यमेव, न च नित्यस्य कारणाभावादभावप्रसङ्गेन सम्भवति, प्रमाणं च तत्र "नित्यं विज्ञानमानन्दं ब्रह्म" [ ] इति श्रुतिरेव, न चानित्यसुखस्य नित्यब्रह्माभिन्नत्वासम्भवान्नित्यसुखे सिद्धे सति तत्र ब्रह्माभेदबोधनं ब्रह्माभेदबोधने च नित्यसुखसिद्धिरित्यन्योन्याश्रय इति वाच्यम्, यथा स्वर्गत्वस्य दुःखासम्भिन्नसुखविशेषत्वलक्षणस्य सुखत्वावान्तररूपस्य वा पूर्वमसिद्ध्या तदवच्छिन्नं प्रति यागस्य कारणत्वबोधनासम्भवेऽपि स्वर्गत्वमुपलक्षणीकृत्य सुखविशेषे यागस्य कारणता श्रुत्या बोध्यते तथा सुखत्वमुपलक्षणीकृत्य सुखविशेषे ब्रह्माभेदबोधनस्य श्रुत्या सम्भवात्, यद्वा नित्यं सुखं बोधयित्वा तत्र ब्रह्माभेदोऽपि श्रुतिर्बोधयति, न चैवं नित्यं सुखमस्ति, तच्च ब्रह्माभिन्नमित्येवं विधेयभेदाद् वाक्यभेदोऽनुपज्यत इति वाच्यम्, परस्परनिराकाङ्क्षबोधद्वयजनकत्वे सत्येव वाक्यभेदोऽत्र तु परस्परसाकाङ्क्षबोधजनकत्वलक्षणवाक्यैकवाक्यत्वेन वाक्यभेदाभावात्, न च सुखबोधकस्यानन्दशब्दस्य पुल्लिङ्गत्वमित्यत्रानन्दशब्दस्य सुखवाचकत्वे नपुंसकलिङ्गत्वमनुपपन्नमित्यानन्दोऽस्यास्तीत्यर्शआदित्वादच्प्रत्ययविधानतः सिद्धमानन्दं सुखवदित्यर्थकमेव नपुंसकलिङ्गमिति

वाच्यम् ,सुखवाचकस्याप्यानन्दशब्दस्य च्छान्दसत्वादेव नपुंसकलिङ्गत्वोपपत्तेः, न च "आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्" [ ] इत्यत्र आनन्द-ब्रह्मणोर्भेदावगतये ब्रह्मण इति षष्ठी घटते, अभेदे तु भेदबोधिकायास्तस्या अनुपपत्तिरिति वाच्यम्, राहु-शिरसोरभेदेऽपि 'राहोः शिरः' इत्यभेदे षष्ठीदर्शनेन प्रकृतेऽप्यभेदे षष्ठीसम्भवादिति चेत्? न-जीवमात्रस्य ब्रह्मात्मकत्वे सत्येव ब्रह्मसुखाभेदप्रतिपादकस्यागमस्य जीवाभिन्नसुखप्रतिपादकत्वम्, एवं चात्मनोऽनुभूयमानत्वेन तदभिन्नस्य नित्यसुखस्य संसारदशायामप्यनुभूयमानत्वं स्यात्, न चात्मनोऽनुभवे तदभिन्नतया सुखमप्यनुभूत एव, देहात्माऽभेद-भ्रमवासनादोषादात्यन्तिकदुःखोच्छेदरूपव्यञ्जकाभावाद्वा सुखत्वं तु तत्र नानुभूयत इति वाच्यम्,

"व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥ १ ॥" [ ]

इति वचनात् तुल्यत्वस्य जातिसमनियतत्वस्य जातिभेदबाधकत्वेनात्मसुख-योरभेदे सुखत्वस्यात्मत्वसमनियततत्वेनात्मत्वान्यजातित्वासिद्ध्या संसारदशाया-मात्मन्यात्मत्वानुभूत्या सुखत्वाननुभवस्य वक्तुमशक्यत्वात्; किञ्च सुखस्य ब्रह्माभिन्नत्वेन ब्रह्माभिन्नजीवाभिन्नत्वाभ्युपगमे "सर्वं ब्रह्ममयं जगत्" [ते०नि० ६.३८.] 'ब्रह्मैवेदं सर्वम्" [नृसिंहो०७.३.] इत्यादिवचनात् सर्वस्य ब्रह्मा-भिन्नत्वेन दुःखमपि ब्रह्माभिन्नत्वात् सुखं स्यात्, यदि च "आम्नायस्य क्रियार्थत्वा-दानर्थक्यमतदर्थानाम्" [ ] इति जैमिनिसूत्रप्रामाण्यात् क्रियार्थकस्यैव वेदस्य प्रामाण्यं क्रियाभिन्नार्थकस्य तु सिद्धार्थत्वेन न प्रामाण्यमिति "ब्रह्मैवेदं सर्वम्" [नृसिंहो० ७.३.] इति वेदस्य सिद्धार्थत्वेन न प्रामाण्यमतो न दुःखस्य ब्रह्मात्मकत्वम्, तर्हि "नित्यं विज्ञानमानन्दं ब्रह्म" [ ] इति वेदस्यापि न प्रामाण्यमतो न सुखस्य ब्रह्मात्मकत्वमिति मुक्तौ नित्यसुखे मानाभाव एवेति चेत्?

अत्र स्याद्वादनिष्णाताः—यदि मुक्तौ सुखं न भवेत् तर्हि प्रेक्षावतां तत्र प्रवृत्तिरेव न स्यात्, प्रवर्तन्ते च प्रेक्षावन्तः सुखार्थिनो मुक्ताविति प्रेक्षावत्प्रवृ-त्त्यन्यथानुपपत्तिरेव मुक्तिसुखे प्रमाणम् । ननु सुखं यथा पुरुषार्थस्तथा दुःखा-भावोऽपि पुरुषार्थः, अत एव क्षुदादिदुःखनिवृत्त्यर्थमन्नपानादौ प्रवर्तन्ते लोकाः, एवं च मुक्तौ सुखाभावेऽपि दुःखाभावरूपपुरुषार्थस्य सद्भावात् तदर्थितया

प्रेक्षावतां मुक्तौ प्रवृत्तिरुपपन्नेति न प्रेक्षावत्प्रवृत्त्यन्यथानुपपत्तिर्मुक्तिसुखे प्रमाणमिति चेत्? न-अन्नपानादावपि लोकानां सुखार्थितयैव प्रवृत्तेः, यदि लोका अन्नपानादौ क्षुदादिदुःखनिवृत्त्यर्थमेव प्रवर्तन्ते तर्हि स्वाद्वन्नपानादित इवास्वाद्वन्नपानादितोऽपि क्षुदादिदुःखनिवृत्तिः स्यादेवेति किमिति ते अस्वाद्वन्नादिकं परित्यज्य स्वाद्वन्नादिकमुपाददते इत्यस्वादुपरित्याग-स्वादूपादानान्यथानुपपत्तिरेव तेषामपि सुखार्थितयैवान्न-पानादौ प्रवृत्तिरित्यत्र प्रमाणम्; यदि अस्वाद्वन्नपानादितो यादृशी क्षुदादिदुःखनिवृत्ति ततोऽन्यादृशी क्षुदादिदुःखनिवृत्तिः स्वाद्वन्नपानादितो भवेत् तर्हि विशिष्टक्षुदादिदुःखनिवृत्तये अस्वादुपरित्यागेन स्वादूपादानं युज्येतापि, न चैवम्, क्षुदादिदुःखनिवृत्तेरभावरूपतया तत्र विशेषाभावेन कारणविशेषस्याप्रयोजकत्वात्, न च चिकित्सायां यथा रोगजन्यदुःखनिवृत्त्यर्थमेव प्रवृत्तिस्तथा मोक्षेऽपि दुःखनिवृत्त्यर्थमेव प्रवृत्तिरिति वाच्यम्, तत्रापि दुःखध्वंसनियतागामिसुखार्थितयैव प्रवृत्तेः; अपि च, मोक्षे दुःखाभावेऽपि सुखस्यानभ्युपगमे सुखहानेरनिष्टत्वप्रतिसन्धानस्य प्रवृत्तिप्रतिबन्धकस्य सद्भावात् तदानीं सुखं नास्तीति ज्ञाने सति प्रवृत्तिरेव न स्यात्, न च विरक्ताः सुखमपि हातुमिच्छन्तीति वैराग्यात् सुखहानेरनिष्टत्वं न प्रतिसन्धीयत इति वाच्यम्, वैषयिकसुखस्य दुःखानुविद्धत्वेन तद्धानेरनिष्टत्वप्रतिसन्धानाभावेऽपि प्रशमप्रभवस्य दुःखाननुविद्धतया सर्वथा काम्यत्वेन तद्धानेरनिष्टत्वप्रतिसन्धानस्यावश्यम्भावात्, अनुभवसिद्धे चास्मिन् न विप्रतिपत्तव्यम्, किञ्च, दुःखनाशे सति सुखं मे भविष्यतीति प्रतिपन्धानतः सुखेच्छयैव दुःखनाशे प्रवर्तन्ते लोकाः, न तु दुःखे द्वेषमात्रात् तन्नाशार्थं प्रवर्तन्ते, अन्यथा मूर्च्छादितोऽपि दुःखनाशोऽवश्यं भवतीति दुःखद्वेषान्मूर्च्छादावपि तेषां प्रवृत्तिः प्रसज्येत; जायत एव बहुदुःखप्रस्तानां मरणादावपि दुःखद्वेषमात्रात् प्रवृत्तिरिति तु बालानां वचनमनादेयम्, विवेकिप्रवृत्तिरेव सुखेच्छामन्तरेण न सम्भवतीत्यत्राधिकृतत्वात्, दुःखप्रस्तास्तु मरणकामनावन्तोऽविवेकिन एवेति; अत एव–

"दुःखभावोऽपि नावेद्यः पुरुषार्थतयेष्यते।"
"नहि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः॥" [ ]

इत्यत्र सुधीरित्युक्तम्, मुक्तौ त्वशेषगुणोच्छेदाभ्युपगमे तदानीं दुःखाभावस्यावेद्यस्यैव पुरुषार्थत्वं परानुमतम्, तच्च न युक्तमित्युक्तवचनाभिप्रायः।

ननु दुःखं मा भूदित्याकारकदुःखप्रागभावविषयकेच्छया प्रवृत्तेर्दुःखप्रागभाव एव पुरुषार्थः, तज्ज्ञानं त्विदानीं सदप्यन्यथासिद्धत्वाद्भवदप्यनीहितमेवेति चेत्? सत्यम्–अवेद्यस्य दुःखप्रागभावस्य ज्ञानादिहानिरूपानिष्टानुबन्धित्वेन प्रवृत्त्यनिर्वाहकत्वात्, अनिष्टाननुबन्धीष्टसाधनत्वज्ञानस्यैवेच्छाद्वारा प्रवृत्तिजनकत्वात्, एतेन 'यद्यपि दुःखनिवृत्तिर्यदा जायते तदानीमशेषविशेषगुणोच्छेदाद्दुःखनिवृत्तिज्ञानं मा भवतु, किन्तु पूर्वदुःखनिवृत्तिज्ञानं भाविदुःखनिवृत्तिविषयकमासीदेवेति तदव्यवहितपूर्वकालीनतद्विषयत्वतो वेद्यत्वं तस्य सम्भवति, वर्तमानोऽप्यचिरमनुभूयते' इति निरस्तम्, स्वसत्ताकाललक्षणवर्तमानकालवृत्तिज्ञानविषयत्वस्वरूपवेद्यत्वस्यैव पुरुषार्थत्वोपयुक्तत्वात्, पूर्वकालीनज्ञानविषयत्वलक्षणवेद्यत्वस्य पुरुषार्थत्वप्रयोजकत्वे मूर्च्छाकाले मम दुःखनिवृत्तिर्भविष्यतीति ज्ञानविषयत्वस्य मूर्च्छाकालीनदुःखनिवृत्तावपि सम्भवेन तथावेद्यतया मूर्च्छाद्यवस्थायामपि प्रवृत्त्यापत्तेः। यदपि–"अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" [छान्दो०८. १२.१] इति श्रुतेर्मुक्तौ सुखाभावः सिध्यति, द्वित्वनिष्ठप्रकारतानिरूपितविशेष्यत्वाभिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताकत्वे सति द्वित्वनिष्ठप्रकारतानिरूपितविशेष्यत्वाभिन्नप्रतियोगित्वसम्बन्धावच्छिन्नदुःखत्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताकस्य बोधस्य तत्राभ्युपगमेन द्वित्वेनोपस्थितयोः प्रियाऽप्रिययोः प्रत्येकं निषेधान्वयस्य वक्तुं शक्यत्वाद्" इति, तदपि न समीचीनम्–'अभावबोधो हि विशिष्टवैशिष्ट्यमर्यादां नातिशेते' इति नियमेन द्वित्वस्य प्रतियोग्यंशे प्रकारत्वमात्रलक्षणस्योपलक्षणत्वस्याभावेन प्रतियोगितावच्छेदकत्वस्यावश्यम्भावेन प्रियाप्रियोभयत्वावच्छिन्नप्रतियोगिताकाभावस्यैवोक्तश्रुत्या प्रतिपादनात्, आख्यातार्थस्पर्शनकर्तृत्वान्वितनञर्थाभावप्रतियोगिप्रियाप्रियगामित्वेनैव द्वित्वस्योपपन्नत्वात्, एवं चैकसत्त्वेऽपि द्वयं नास्तीति प्रतीतेरशरीरेऽप्यात्मनि सुखसत्त्वेऽपि दुःखस्याभावतः सुखदुःखोभयाभावस्य सम्भवेनोक्तश्रुत्या तादृशाभावबोधनेऽपि न तदानीं सुखाभावसिद्धिः। यदि च मुक्तौ सुखं नास्त्येवेत्युररीक्रियते, तदा—

"सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम्।
तं वै मोक्षं विजानीयाद् दुष्प्रापमकृतात्मभिः॥ १॥ [ ]

इत्यादिवचनविरोधः कथं परिहरणीयः? न चावच्छेदकतासम्बन्धेन सुखा-

दिकं प्रति तादात्म्यसम्बन्धेन शरीरं कारणम्, तथा समवायसम्बन्धेन सुखं प्रति समवायसम्बन्धेन धर्मः कारणमिति शरीरादिरूपकारणाभावान्मुक्तौ सुखस्य नोत्पत्तिरिति सैव मुक्तिसुखे बाधिकेति साम्प्रतम्, शरीरादेर्जन्यात्मविशेषगुणत्वावच्छिन्नं प्रत्येव कारणत्वात्, कार्यतावच्छेदककोटौ प्रविष्टं जन्यत्वं च नोत्पत्तिमत्त्वं किन्तु ध्वंसप्रतियोगित्वमेव, तच्च यथेश्वरज्ञानादितो व्यावृत्तं तथा मुक्तिकालीनसुखादितोऽपि व्यावृत्तम्, मुक्तिकालीनसुखादेरुत्पद्यमानत्वेऽपि विनाशित्वाभावादिति शरीरादिकं विनाऽपि मुक्तिसुखं स्यादेवेति तत्त्वविनिश्चयस्य स्वर्गसिद्धिसुखावहत्वं युक्तमेवेति ॥ २ ॥

शास्त्रवार्तासमुच्चयस्य सप्रयोजनत्वेन वक्तव्यत्वे व्यवस्थिते यस्यां शास्त्रवार्तायां न कस्यापि विप्रतिपत्तिस्तामुपदर्शयति—

दुःखं पापात् सुखं धर्मात्, सर्वशास्त्रेषु संस्थितिः ।
न कर्तव्यमतः पापं, कर्तव्यो धर्मसंचयः ॥ ३ ॥

दुःखमिति—दुःखं पीडालक्षणम्, तत् पापाद् अधर्माद् भवति; सुखम् आह्लादलक्षणम्, तद् धर्मात् प्रवृत्तिनिवृत्तिरूपाद् भवति; इयं सर्वशास्त्रेषु सकलदर्शनेषु, संस्थितिः सम्यग् व्यवस्था समीचीना मर्यादा, समीचीनत्वमत्राविप्रतिपत्तिविषयत्वम् । यत एवम् अतः दुःखहेतुत्वात्, पापम् अशुभकर्महेतुं, न कर्तव्यम्, किं तर्हि कर्तव्यं? कर्तव्यो धर्मसञ्चयः सुखहेतुतया सञ्चितः साङ्गो धर्मः कर्तव्यः ॥ ३ ॥

पापहेतुपरिहार-धर्महेत्वासेवनाभ्यां पापहेतोरकरणं धर्महेतोः करणं च भवतीति क्रमेण पाप-धर्महेतूनाह—

हिंसाऽनृतादयः पञ्च, तत्त्वाश्रद्धानमेव च ।
क्रोधादयश्च चत्वार इति पापस्य हेतवः ॥ ४ ॥
विपरीतास्तु धर्मस्य, एत एवोदिता बुधैः ।
एतेषु सततं यत्नः, सम्यक् कार्यः सुखैषिणा ॥ ५ ॥

हिंसाऽनृतादय इति-अत्र "हिंसानृतादयः पञ्च हिंसाऽनृत-स्तेयाब्रह्म-परिग्रहाः, आदिशब्दादवरोधेऽप्यनृतग्रहणं प्राधान्यख्यापनार्थम् । तत्त्वाश्रद्धानमेव च मिथ्याऽभिनिवेश इति भावः । क्रोधादयश्च चत्वारः

क्रोध-मान-माया-लोभाः । इति एते एवंप्रकारा वा । पापस्य हेतवः अशुभकर्मबन्धजनका इत्यर्थः" इति हरिभद्रसूरिव्याख्यानम् ।

न्यायविशारदस्यात्र चेत्थं व्याख्यानम्—प्रमादयोगेन प्राणव्यपरोपणं हिंसा, धर्मविरुद्धं वचनमनृतम्, आदिपदाद् धर्मविरोधेन स्वामि-जीवाद्यननुज्ञातपरकीयद्रव्यग्रहणमदत्तादानम्, स्त्रीपुंसव्यतिकरलक्षणमब्रह्म, सर्वभावेषु मूर्च्छालक्षणः परिग्रहश्च परिगृह्यते, अत्र च "आदिशब्दादवरोधेऽप्यनृतग्रहणं प्राधान्यख्यापनार्थम्" इति [हरिभद्रपादाः] वदन्ति, तत्ख्यापनं च प्रभृति-प्रधानार्थकयोरादिशब्दयोः कृतैकशेषयोर्बलादेवेति प्रतिभाति "आद्ये परोक्षम्" [तत्त्वार्थ० १. ११] इत्यत्रेवोत्तरत्रयापेक्षमत्राद्यत्वमित्याक्षेपादेवानृतस्य प्राधान्यं लभ्यत इत्यपरे । एते पञ्चाऽविरतिरूपाः । तत्त्वस्य-यथाऽवस्थितवस्तुनोऽश्रद्धानं यस्मादिति बहुव्रीह्याश्रयणात् तत्त्वाश्रद्धानं मिथ्यात्वम् । एवकारः प्रसिद्ध्यर्थः । चः पुनरर्थः । क्रोधादयः क्रोध-मान-माया लोभाश्च, चत्वारः । इति एतावन्तः, योगानां साधारण्येनाग्रहणात्, विषय-प्रमादाऽऽर्तरौद्रादीनां चात्रैवान्तर्भावात् । इति एवंप्रकारा वा । पापस्य अशुभकर्मणः । हेतवः कारणानि ॥ ४ ॥

विपरीतास्त्विति—विपरीताः हिंसाऽनृतादीनां विपरीता विरुद्धधर्माध्यस्ता अहिंसा ऽस्तेय ब्रह्मा-ऽपरिग्रह सम्यग्दर्शन-क्षान्ति-मार्दवा ऽऽर्जवा-ऽनीहा-लक्षणाः । तु विशिनष्टि एत एव गुणाः । बुधैः अर्हद्वचनानुसारिगीतार्थैः । धर्मस्य शुभाशयलक्षणस्य, हेतव उदिताः उक्ताः । अत एतेषु धर्महेतुषु । सततं निरन्तरम्, यत्नः प्रयत्नः । सम्यग् विधिना, कार्यः । केनेत्याह—सुखैषिणा कल्याणकामेन, सुखोपाये प्रवृत्तित एव सुखोत्पत्तिर्भवति नान्यथेत्यतः सुखसाधनधर्महेतुषु प्रयत्नस्य निरन्तरकरणीयत्वमुपदिष्टम् । स्वभावतः सुखेच्छा-दुःखद्वेषवतामपि प्राणिनां सुखोपाये धर्मेऽनिच्छा दुःखोपाये चाधर्मे एवेच्छा खलु महामोहराजाज्ञाचेष्टितम्, यदुक्तम्—

"धर्मस्य फलमिच्छन्ति, धर्मं नेच्छन्ति मानवाः ।
फलं नेच्छन्ति पापस्य, पापं कुर्वन्ति सादराः ॥ १ ॥" [ ]

इति । उक्तेषु धर्महेतुषु प्रवृत्त्या चाहिंसादिनाऽविरतेः, सम्यग्दर्शनेन च

मिथ्यात्वस्य, क्षमादिना च क्रोधादीनां निवृत्तेस्तन्मूलकदुःखविरहादनिवारितः सुखावकाशः।

"अहिंसया क्षमया क्रोधस्य, ब्रह्मचर्येण वस्तुविचारेण कामस्य, अस्तेयापरिग्रहरूपेण सन्तोषेण लोभस्य, सत्येन यथार्थज्ञानरूपेण विवेकेन मोहस्य, तन्मूलानां च सर्वेषां निवृत्तिः" [ ] इति तु पातञ्जलानुसारिणः।

तत्रेदं विभावनीयम्—अहिंसादिना मूलगुणघातिक्रोधादिनिवृत्तावपि संज्वलनादिरूपक्रोधादिनिवृत्तिः क्षमाद्युत्तरगुणसाम्राज्यादेवेति विशेषः समुपदर्शितः श्रीमद्भिर्यशोविजयोपाध्यायैरिति ॥ ५ ॥

सम्यक्करणोपायमहिंसादिसम्पत्तिनिमित्तमुपदर्शयति—

साधुसेवा सदा भक्त्या, मैत्री सत्त्वेषु भावतः।
आत्मीयग्रहमोक्षश्च, धर्महेतुप्रसाधनम् ॥ ६ ॥

साधुसेवेति—साधुसेवा-ज्ञानादिगुणवृद्धोपासना। **सदा** सर्वदा। **भक्त्या** बहुमानेन। तथा **मैत्री** प्रत्युपकारनिरपेक्षा प्रीतिः। **सत्त्वेषु** प्राणिषु। **भावतः** परमार्थतः, निश्चयत इति यावत्। तथा **आत्मीयग्रहमोक्षः** आत्मीयमिति ग्रहणमात्मीयग्रहो ममत्वपरिणामः, तस्य मोक्षः-परित्यागो, यस्माद् बाह्यसङ्गत्याग इत्यर्थः। एतत्त्रितयं **धर्महेतुप्रसाधनं** धर्महेतूनामहिंसादीनां प्रकृष्टं फलायोगव्यवच्छिन्नं साधनम्, साधुसेवा-मैत्र्यात्मग्रहमोक्षाणां बहूनां विशेष्यत्वात् तद्विशेषणबोधकस्य धर्महेतुप्रसाधनशब्दस्य बहुवचनान्तत्वस्य युक्तत्वेऽपि यदेकवचनान्तत्वं तेनोक्तसाधनानां स्वेतरसकलकारणनियतत्वं व्यञ्जितं भवतीति ॥६॥

तत्र साधुसेवाफलमुपदर्शयति—

उपदेशः शुभो नित्यं, दर्शनं धर्मचारिणाम्।
स्थाने विनय इत्येतत्, साधुसेवाफलं महत् ॥ ७ ॥

उपदेश इति-उपदेशः-मौनीन्द्रवचनमेतत्, यदुत-अहिंसादिकं विधेयमित्येवंरूपः, भवजलधियानपात्रप्रायः खल्वयम्, अस्य श्रवणमात्रादेव समीहितं भवति, तदर्थज्ञानाद् भवतीति किमु वक्तव्यम्?। **शुभः** निःश्रेयसाऽभ्युदयलक्षणकुशलसाधकः। **नित्यं** निरन्तरम्। तथा **दर्शनं** मुखारविन्दावलोकनम्।

धर्मचारिणाम् उद्यतविहारशालिनां पवित्रसाधूनाम्, तेषां दर्शनं परमबोधिलाभनिदानं क्लिष्टकर्मविगमहेतुत्वात् । तथा **स्थाने** शास्त्रोक्तस्थले । **विनयः** करशिरःसंयोगविशेषादिलक्षणतद्वन्दनाद्यभिव्यङ्ग्यो मानसः परिणामविशेषः । **इत्येतत्** एवंभूतम् । साधुसेवाफलं **महत्** धर्माङ्गसाधनम्, उपदेशादिना चारित्रप्रतिबन्धककर्मक्षयोपशमादिना चारित्रधर्मावाप्तेरवश्यम्भावात् ॥ ७ ॥

मैत्रीफलमुपदर्शयति—

मैत्रीं भावयतो नित्यं, शुभो भावः प्रजायते ।
ततो भावोदकाज्जन्तोर्द्वेषाग्निरुपशाम्यति ॥ ८ ॥

मैत्रीमिति— मैत्रीं-प्रत्युपकारनिरपेक्षां प्रीतिम् । **भावयतः** अभ्यस्यतः । **नित्यं** सर्वकालम् । **शुभः** प्रशस्तः । **भावः** साम्यलक्षणः, यं पातञ्जलमतानुयायिनः "प्रशान्तवाहिता" इत्याचक्षते । **जायते** उत्पद्यते । **ततः** तस्मात् । **भावोदकात्** परमार्थभावरूपोदकात् । **जन्तोः** प्राणिनः । **द्वेषाग्निः** मत्सरानलः । **उपशाम्यति** समूलमपयाति, तथा च शुद्धोपयोगलक्षणधर्मे साम्य-द्वेषोपशमद्वारा मैत्र्युपयुज्यत इति फलितं निर्धारितं वाचकप्रवरैः ॥ ८ ॥

आत्मीयग्रहमोक्षफलं दर्शयति—

अशेषदोषजननी, निःशेषगुणघातिनी ।
आत्मीयग्रहमोक्षेण, तृष्णाऽपि विनिवर्तते ॥ ९ ॥

अशेषदोषेति—अशेषाणां दोषाणां-हिंसा-ऽनृताऽज्ञानादीनाम्, जननीव मातेव, तृष्णायां सत्यां सकलदोषाणामवश्यम्भावात्, "लोभमूलानि पापानि" [ ] इत्युक्तेः । तथा **निःशेषगुणघातिनी** निःशेषाणां गुणानामुपशमादीनां घातिनी, तृष्णया स्वकालवर्तिनां गुणानां विनाशात्, भाविनां च तेषामुत्पत्तिप्रतिबन्धात् । **आत्मीयग्रहमोक्षेण** बाह्यसङ्गत्यागलक्षणेन । **तृष्णाऽपि** लौल्यपरिणतिरपि, लोभवासनाऽपीति यावत् । **विनिवर्तते** विषयसङ्गरूपोद्बोधकाभावादनुत्थानोपहता सती प्रतिपक्षपरिणामाभ्यासेन क्षीयत इति यावत् ॥ ९ ॥

अतिदिशति—

एवं गुणगणोपेतो, विशुद्धात्मा स्थिराशयः ।
तत्त्वविद्भिः समाख्यातः, सम्यग्धर्मस्य साधकः ॥ १० ॥

एवमिति—एवम्-उक्तेन प्रकारेण । **गुणगणोपेतः** सन्, **विशुद्धात्मा** अत्यन्तापायहेतुकुग्रहमलरहितः । **स्थिराशयः** स्थिरचित्तो नास्तिक्यानुपहतचित्ताध्यवसायः । **तत्त्वविद्भिः** सर्वज्ञैः । **समाख्यातः** कथितः । **सम्यग्** आगमोक्तविधिना । **धर्मस्य साधकः** नियमभावित्वेन धर्महेतुसाधनेऽपि धर्मस्य साधकः, कारणे कार्योपचारात् ।

अत्र विशेषं कञ्चनोपदर्शितवन्तो न्यायविशारदा यशोविजयोपाध्याया इत्थम्—एवंविधस्यादित एव मार्गानुसारिप्रवृत्त्युपलम्भात्, तदर्थमेवादिकर्मविध्युपदेशाच्च, तदुक्तं ललितविस्तरायां ग्रन्थकृतैव-"तत्सिद्ध्यर्थं यतितव्यमादिकर्मणि, परिहर्तव्योऽकल्याणमित्रयोगः, सेवितव्यानि कल्याणमित्राणि, न लङ्घनीयोचितस्थितिः, अपेक्षितव्यो लोकमार्गः, माननीया गुरुसंहतिः, भवितव्यमेतत्त्रेण, प्रवर्तितव्यं दानादौ, कर्तव्योदारपूजा भगवताम्, निरूपणीयः साधुविशेषः, श्रोतव्यं विधिना धर्मशास्त्रम्, भावनीयं महायत्नेन, प्रवर्तितव्यं विधानतः, अवलम्बनीयं धैर्यम्, पर्यालोचनीयाऽऽयतिः, अवलोकनीयो मृत्युः, भवितव्यं परलोकप्रधानेन, सेवितव्यो गुरुजनः, कर्तव्यं योगपददर्शनम्, स्थापनीयं तद्रूपादि च चेतसि, निरूपयितव्या धारणा, परिहर्तव्यो विक्षेपमार्गः, यतितव्यं योगसिद्धौ, कारयितव्या भगवत्प्रतिमा, लेखनीयं भुवनेश्वरवचनम्, कर्तव्यो मङ्गलजापः, प्रतिपत्तव्यं चतुःशरणम्, गर्हितव्यानि दुष्कृतानि, अनुमोदनीयं कुशलम्, पूजनीया मत्रदेवता, श्रोतव्यानि सच्चेष्टितानि, भावनीयमौदार्यम्, वर्तितव्यमुत्तमज्ञानेन" इति, नानिवृत्ताधिकारायां प्रकृतावेवंभूत इति कापिलाः, नानवाप्तभवविपाके इति च सौगताः, अपुनर्बन्धकस्त्वेवंभूत इत्यार्हताः । न चापुनर्बन्धकस्याधिकारिविशेषणस्यानिश्चये प्रवृत्त्यनुपपत्तिरिति शङ्कनीयम्, अशाठ्यपूर्वकैतत्प्रयत्नेनैव तन्निश्चयात्, तदुक्तम्—"भग्नोऽप्येतद्यत्नलिङ्गोऽपुनर्बन्धकः" [ ] इति, तं प्रत्युपदेशसाफल्यमिति । आदित एतत्प्रयत्न एवास्य कथम्, इति चेत्? अविरुद्धकुलाचारादिपरिपालनाद्यर्थितयेति

गृहाण, अत एव 'सम्यग्दर्शनादिजन्यविवेकाभावादनाभोगतोऽपि "सदन्ध०" न्यायेन मार्गगमनमेवास्य' इति वदन्ति । विभावनीयं चेदं "सुसमण्डितप्रबोधदर्शन०" न्यायेनेति दिगिति ॥ १० ॥

ननु धर्मे एव सुखार्थिनां प्रेक्षावतां प्रवृत्तिरित्यत्र न किञ्चिन्नियामकं पश्यामः, सुखोपायेषु स्रक्-चन्दना-ऽङ्गना-भाषादिष्वपि प्रवृत्तेर्न्यायप्राप्तत्वादित्यत आह—

उपादेयश्च संसारे, धर्म एव बुधैः सदा ।
विशुद्धो मुक्तये सर्वं, यतोऽन्यद् दुःखकारणम् ॥ ११ ॥

उपादेयश्चेति—उपादेयश्च-ग्रहीतुं योग्यश्च । **संसारे** भवनिधौ । **धर्म एव** प्रधानपुरुषार्थमोक्षसाधनत्वात् प्रधानपुरुषार्थः । **बुधैः** ज्ञाततत्त्वैः । **सदा** दुःखदभोगादिकालव्यवच्छेदेन । किंविशिष्टो धर्मो ग्राह्य इत्यपेक्षायामाह-**विशुद्ध** इति—निरतिचार इत्यर्थः । **मुक्तये** विशुद्धो धर्मोऽखिलफलनिरीहस्यैव भवतीति सर्वत्राशंसाऽभावेन मुक्त्यर्थम्, धर्मस्य विशुद्धत्वं नान्तरेण मुक्त्यर्थत्वमिति विशुद्धग्रहणेन मुक्त्यर्थमर्थाल्लब्धमेव तथापि पार्थक्येन तदभिधानं प्राधान्यख्यापनार्थम् । कथं निरतिचारधर्मस्यैव बुधैर्ग्राह्यत्वमत आह—**सर्वं यतोऽन्यदिति**—यतः—यस्मात् कारणात् । अन्यत्—धर्मभिन्नम् । सर्वं—स्रक्-चन्दना-ऽङ्गनालिङ्गनादिकम् । **दुःखकारणं** नरकाद्यनुबन्धि, तथा चेष्टसाधनताज्ञानमात्रस्य प्रवृत्तिहेतुत्वे मधुविषसम्पृक्तान्नभोजनस्यापि क्षुन्निवृत्तिरूपेष्टसाधनत्वमिति तत्रेष्टसाधनत्वस्य ज्ञानात् प्रवृत्तिः प्रसज्येत, तद्वारणार्थं बलवदनिष्टाननुबन्धित्वे सतीष्टसाधनताज्ञानं प्रवृत्तौ कारणं वाच्यम्, तच्च नरकादिरूपबलवदनिष्टानुबन्धिनि स्रक्-चन्दना-ऽङ्गनाऽऽलिङ्गनादौ नास्तीति कारणाभावान्न तत्र न्याय्या प्रवृत्तिरिति धर्म एवेत्यवधारणस्यौचित्यम् । ननु बलवदनिष्टानुबन्धीष्टसाधनताज्ञानस्य प्रवृत्तिं प्रति कारणत्वे अविरतसम्यग्दृशां निषिद्धकर्मणि प्रवृत्तिर्न भवेत्, तेषां निषिद्धकर्मणि बलवदनिष्टसाधनत्वज्ञानस्य भावेन बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानासम्भवात्; न चाविरतसम्यग्दर्शिनो रागान्धत्वान्निषिद्धकर्मजन्यदुःखे बलवत्त्वं न प्रतिसन्दधत इति बलवदनिष्टानुबन्धीष्टसाधनताज्ञानं निषिद्धकर्मणि तेषां समस्त्येवेति प्रवृत्त्युपपत्तिरिति वाच्यम्, परदारमैथुनादिकर्मणो निषेधविधायकविधिनैव तज्जन्यदुःखे बलवत्त्वस्याविरतसम्यग्दृशामपि बोधस्य सम्भवात्; न च सामान्यतः प्रवृत्तौ बलवदनिष्टसाधनत्वज्ञानं यदि

प्रतिबन्धकं भवेद्, भवेत् तदा सामान्यतः प्रवृत्तौ बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानं कारणम्, न चैवम्, न्यूनदुःखजनकत्वज्ञानस्याप्यलसप्रवृत्तिप्रतिबन्धकत्वदर्शनेन विशिष्यैव प्रतिबध्यप्रतिबन्धकभावस्य कल्पनीयतया रागान्धप्रवृत्तौ बलवद्दुःखानुबन्धित्वज्ञानस्य प्रतिबन्धकत्वमेव न कल्प्यत इति तत्प्रवृत्ताविष्टसाधनताज्ञानमेव कारणमिति ततो निषिद्धकर्मणि तत्प्रवृत्त्युपपत्तिरिति वाच्यम्, दुःखमात्रभीरोरलसस्य बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानस्य सद्भावेऽपि प्रवृत्तिफलेच्छैव नास्तीति प्रवृत्तिफलेच्छाऽपि प्रवृत्तौ कारणमिति तदभावादेव न प्रवृत्तिरितीतरसकलसमवधाने तत्सत्त्वे तदभावरूपान्वयव्यभिचाराभावान्न बलवदनिष्टानुबन्धीष्टसाधनत्वज्ञानस्य सामान्यतः प्रवृत्तिं प्रति कारणत्वं परित्याज्यम्, रागान्धानां तु सम्यग्दृशां द्वेषानुदयेऽपि निषेधविधायकशास्त्रतो निषिद्धकर्मणि बलवदनिष्टनरकादिदुःखानुबन्धित्वज्ञानसम्भवेन बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानाभावात् प्रवृत्त्यनुपपत्तेर्वज्रलेपायमानत्वात्; न च सामान्यतः प्रवृत्तिं प्रतीष्टसाधनताज्ञानमेव कारणम्, न तु बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानम्, फले उत्कटेच्छाविरहविशिष्टदुःखजनकत्वज्ञानं च प्रवृत्तिं प्रति प्रतिबन्धकं कल्प्यते, तावतैव च न मधुविषसम्पृक्तान्नभोजने प्रवृत्तिः, अलसस्य तु फलेच्छैव नास्तीति तदभावादेव न प्रवृत्तिः, यदि सा समस्ति तदा दुःखद्वेषादपकृष्टा समा वा, न तु दुःखद्वेषादुत्कृष्टत्वेनोत्कटा इति उत्कटेच्छाविरहविशिष्टदुःखजनकत्वज्ञानरूपप्रतिबन्धकसद्भावान्नालसस्य प्रवृत्तिः, रागान्धानां च पारदार्यादिफले उत्कटेच्छोदयादुत्कटेच्छाविरहविशिष्टदुःखजनकत्वज्ञानरूपप्रतिबन्धकाभावात् पारदार्यादिफले प्रवृत्तिरुपपद्यत इति वाच्यम्, निरुक्तप्रतिबन्ध्यप्रतिबन्धकभावस्याधिकस्याभ्युपगमेऽपि निषेधविधिसामर्थ्याद् रागान्धानामप्यविरतसम्यग्दृशां नरकादिदुःखेऽत्युत्कटताज्ञानस्य प्रवृत्तिफले वैषयिकसुखे उत्कटेच्छाविघातकत्वेनोत्कटेच्छाविरहविशिष्टदुःखजनकत्वज्ञानस्य प्रवृत्तिप्रतिबन्धकस्य सद्भावात् प्रवृत्त्यनुपपत्तेः; एतेन 'विशेष्यतासम्बन्धेन प्रवृत्तिं प्रति विशेष्यतासम्बन्धेन बलवद्द्वेषस्य कार्यकालवृत्तितया प्रतिबन्धकत्वम्, तत एवालसस्य स्वल्पदुःखजनकेऽपि बलवद्द्वेषस्य प्रवृत्तिप्रतिबन्धकस्य सद्भावान्न प्रवृत्तिः, रागान्धस्य तु बहुदुःखजनकेऽपि परदारमैथुनादौ बलवद्द्वेषस्याभावात् प्रवृत्तिः' इत्यपास्तम्, निषिद्धे बलवद्द्वेषस्याप्यवश्यम्भावात्, यदि रागान्धस्य कारणबलादपि तत्र द्वेषो नोपेयते तर्हि विषभक्षणादावपि द्वेषो भवत्येवेत्यत्र बलवत्प्रमाणाभावेन तद्रूपप्रति-

बन्धकस्य तत्राप्यभावात् प्रवृत्त्यापत्तेर्दुर्वारत्वादिति चेत्? सत्यम्–मोहप्राबल्यलक्षणदोषमहिम्नैव पारदार्यादिफलेच्छाविघातस्य तत्र बलवद्द्वेषस्य चानुदयाद् रागान्धप्रवृत्त्युपपत्तेः; तदुक्तम्—

"जाणिज्जइ चिंतिज्जइ जम्म-जरा-मरणसंभवं दुक्खं।
न य विसएसु विरज्जइ अहो सुबद्धो कवडगंठी" ॥ १ ॥
[ज्ञायते चिन्त्यते जन्म-जरा-मरणसम्भवं दुःखम्।
न च विषयेषु विरज्यतेऽहो! सुबद्धः कपटग्रन्थिः ॥ इति संस्कृतम्]।

अथवा शास्त्रबोधितदुःखबलवत्त्वस्यैव कर्मोदयदोषेणापनोदः। ननु येनोदितेन कर्मणा शास्त्रबोधितं दुःखबलवत्त्वमपोद्यते तस्य कर्मणः शास्त्रेणानपनयने विफलं तच्छास्त्रं प्रसज्यत इति चेत्? न–अनिकाचितस्य तस्य कर्मणः शास्त्राभ्यासनिवर्तनीयत्वादिति ॥ ११ ॥

धर्मभिन्नस्य सर्वस्य दुःखकारणत्वं यदुपदार्शितं तद् विविच्य दर्शयति—

अनित्यः प्रियसंयोगः, इहेर्ष्या-शोकवत्सलः।
अनित्यं यौवनं चापि, कुत्सिताचरणास्पदम् ॥ १२ ॥

अनित्य इति—अनित्यः–स्वप्नसमागतकामिनीविलासवत् पर्यन्तविनश्वरप्रकृतिरशाश्वतः। प्रियसंयोगः वल्लभसमागमः। इह संसारे। कीदृशः प्रियसंयोगो यस्यानित्यत्वमित्यपेक्षायामाह—ईर्ष्या-शोकवत्सल इति—प्रतिपक्षोन्नतिदर्शनप्रभवो मत्सरविशेष ईर्ष्या, प्रियसंयोगस्य विनाशादिचिन्तनप्रभवो दुःखविशेषः शोकः, तौ वत्सलौ–अवश्योपनतकारणौ यत्र तादृशः; एतेन प्रकृतिदोषसम्बन्धदोषावेदनेन पूर्वं पश्चाच्च दुःखानुबन्धित्वं प्रियसंयोगस्य प्रकटीकृतम्। यौवनं चापि कामाप्रतिघमित्रं वयोविशेषोऽपि। कुत्सिताचरणास्पदं कुत्सिताचरणस्य–गर्हितकामक्रीडाद्याचारस्य, आस्पदं–गेहमसद्व्यवहारनिमित्तमिति यावत्, अस्यापि च पूर्वं पश्चाच्च दुःखनिमित्तत्वम्। अनित्यं च स्वप्नसमागतकामिनीक्रीडावत् पर्यन्तविनश्वरप्रकृतित्वादनित्यमिदमपीति ॥ १२ ॥

सम्पज्जीवितयोरनित्यत्वादिना दुःखनिमित्तत्वं भावयति—

अनित्याः सम्पदस्तीव्र-क्लेशवर्गसमुद्भवाः।
अनित्यं जीवितं चेह, सर्वभावनिबन्धनम् ॥ १३ ॥

अनित्या इति। **सम्पदो** मणि-काञ्चन-व्रीह्यादयः। **अनित्याः** विद्युद्विलसितवदकस्माद् विनश्वराः। यतः **तीव्रक्लेशवर्गसमुद्भवाः** तीव्रः–दुःसहो यः क्लेशवर्गो निशितशरप्रवाहपरायणकिराताक्रान्तविकटकान्तारगमन-प्रतिकूलपवन-समुच्छलद्बहलजलपरिक्षुब्धजलधियानपात्रारोहण-प्रकृतिभीषणराजसेवादिलक्षणधनार्जनोपायजन्यः, तस्मात् समुद्भवः–उत्पत्तिर्यासामेतादृशः, इमा अपि प्रकृतिदोष-सम्बन्धदोषाकलितत्वाद् दुःखजनन्यः। तथा **अनित्यं जीवितं चेह** इह–संसारे, जीवितं च–प्राणधारणलक्षणजीवनमपि, अनित्यं–नश्वरम्। **सर्वभावनिबन्धनं** सकलव्यवहारकारणम्, इदमपि प्रकृतिदोष-सम्बन्धदोषाकलितत्वाद् दुःखनिमित्तम्। इत्थमत्रैहिकं दुःखं समस्तीति दर्शितम्॥ १३॥

अथात्रामुष्मिकं दुःखमुपदर्शयति—

पुनर्जन्म पुनर्मृत्युर्हीनादिस्थानसंश्रयः।
पुनः पुनश्च यदतः, सुखमत्र न विद्यते॥ १४॥

पुनर्जन्मेति—एतज्जन्मापेक्षयाऽग्रिमं जन्म पुनर्जन्मेत्यभिधीयते, बीजरूपस्य जन्मान्तरनिर्मित्तस्याद्दष्टस्य सत्त्वेऽङ्कररूपस्य जन्मान्तरस्य प्रादुर्भावात्। तथा **पुनर्मृत्युः** पुनर्जन्मनि सति यो मृत्युः स पुनर्मृत्युरिति कथ्यते, "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।" [ ] इति वचनाज्जन्मनो मृत्युनान्तरीयकत्वस्यावधारणात्। तथा **हीनादिस्थानसंश्रयः पुनः पुनश्च**—हीनादीत्यादिपदाद् हीनतर-हीनतमपरिग्रहः, प्रागुपात्तनीचैर्गोत्रादिकर्मविपाकात् पुनः पुनश्च–वारं वारं च, हीनादिस्थानानाम्—अधमा-ऽधमतरा-ऽधमतमादिजातीनां संश्रयः–आश्रयणम्। **यद्** यस्मात् कारणाद् भवति। **अतः** अस्मात् कारणात्। **अत्र** जगति। **सुखम्** अनिष्टाविमिश्रितं यत् सुखं प्रवृत्त्युपयोगि तत्। **न विद्यते** नास्त्येव। व्यवहारतः प्रतिभासमानमपि सांसारिकं सुखं बहुतरदुःखानुविद्धत्वेन हेयमेवेति न प्रवृत्त्युपयोगि, निश्चयतस्तु आत्मस्वरूपमेव सुखं-सुखपदवाच्यम्, कर्मोदयजनितं तु वैषयिकं सुखं–सुखपदवाच्यमेव न भवति, तदुक्तं विशेषावश्यके—

"पुण्णफलं दुक्खं चिय कम्मोदयओ फलं व पावस्स।
नणु पावफले वि समं पच्चक्खविरोहिया चेवं॥

जत्तो चिय पच्चक्खं सोम्म! सुहं णत्थि दुक्खमेवेदं ।
तप्पडियारविभिण्णं तो पुण्णफलं ति दुक्खं ति ॥
विसयसुहं दुक्खं चिय दुक्खपडियारओ तिगिच्छि व्व ।
तं सुहमुवयाराओ ण य उवयारो विणा तच्चं ॥"

[पुण्यफलं दुःखमेव कर्मोदयतः फलमिव पापस्य ।
ननु पापफलेऽपि समं प्रत्यक्षविरोधिता चैवम् ॥
यत एव प्रत्यक्षं सौम्य! सुखं नास्ति दुःखमेवेदम् ।
तत्प्रतीकारविभिन्नं ततः पुण्यफलमिति दुःखमिति ॥
विषयसुखं दुःखमेव दुःखप्रतीकारतश्चिकित्सेव ।
तत् सुखमुपचारान्नोपचारो विना तथ्यम् ॥

—एकादशे गणधरवादे गाथा—३३. ३४. ३५.]

इति, अत एव व्यास-पतञ्जलिप्रभृतिभिरपि संसारे सुखाभाव एवोक्तः, गौतमेनापि चैकविंशतिदुःखमध्य एव सुखं परिगणितमिति, दुःखानाम्प्रेकविंशति-परिगणनं चेत्थम्—शरीरं, षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखं दुःखं चेत्येकविंशतिः। न च वस्तुभूतसुखस्य दुःखतयाऽवधारणं विपर्यास एवेति वाच्यम्, यतो वस्तुभूतस्य पारमार्थिकसुखस्य न दुःखमध्ये परिक्षेपः, किन्तु तादृशसुखविकाररूपयोर्वैषयिकसुख-दुःखयोर्मध्यात् सुखस्य दुःखेऽन्तर्भाव इति वैषयिकसुखस्य दुःखानुबन्धित्वाद् दुःखत्वावधारणं न विपर्यास इत्येवं यशो-विजयोपाध्याया व्याख्यातवन्त इति ॥ १४ ॥

फलितमुपसंहरति—

प्रकृत्याऽसुन्दरं ह्येवं, संसारे सर्वमेव यत् ।
अतोऽत्र वद किं युक्ता, क्वचिदास्था विवेकिनाम्?॥१५॥

प्रकृत्येति—प्रकृत्या-स्वभावेन। असुन्दरं बलवदनिष्टानुबन्धीष्टसाधनत्वरूपसफलत्वाभावादशोभनम्। हि निश्चितम्। एवम् उक्तप्रकारेण। संसारे जगति। सर्वमेव सकलमेव प्रियसंयोगादिकम्। यत् यस्मात् कारणात्। अतः अस्मात् कारणात्। अत्र संसारे। वद इति संबोधनं व्यामोहादिदोषनिरासेनावधानार्थम्। किमित्याक्षेपे, नेत्यर्थः, युक्ता साध्वी, न साध्वीत्यर्थः। क्वचित्

कुत्रापि प्रियसंयोगादौ । **आस्था** प्रवृत्त्यादिरूपा तत्प्रवर्तकवचनप्रामाण्यप्रवृत्तिरूपा वा । **विवेकिनां** पण्डितानाम् ॥ १५ ॥

धर्मव्यतिरिक्ते प्रवृत्तिर्न युक्ता, धर्मे तु सा युक्तैवेत्यपवादमाह—

मुक्त्वा धर्मं जगद्वन्द्यमकलङ्कं सनातनम् ।
परार्थसाधकं धीरैः, सेवितं शीलशालिभिः ॥ १६ ॥

मुक्त्वेति—मुक्त्वा-त्यक्त्वा । **धर्मं** पुण्यम्, तं विशिनष्टि—**जगद्वन्द्यमिति**-जगतां वन्द्यम्-इष्टसाधनत्वेन स्पृहणीयम् । **अकलङ्कम्** ऐहिकाऽऽमुष्मिकदोषसामान्यरहितम् । **सनातनम्** आद्यन्तरहितत्वलक्षणनित्यत्वोपेतम्, एतत् प्रवाहापेक्षयाऽवसेयम्, एतच्च धर्मे आधुनिकत्वशङ्काव्यवच्छेदार्थमुक्तम् । **परार्थसाधकं** परः-त्रिवर्गापेक्षया प्रकृष्टो मोक्षः, अर्थः—धनम्, उपलक्षणात् कामोऽपि, तत्साधकं-तन्निबन्धनम्, एतेन धर्मा-र्थ-काम-मोक्षेषु चतुर्वर्गेषु धर्मस्याभ्यर्हितत्वमुपदिष्टं भवति । **धीरैः** स्थिराशयैस्तीर्थकरादिभिः । **सेवितम्** आचीर्णम् । धीरैः कीदृशैरित्याकाङ्क्षायामाह—**शीलशालिभिरिति**-काष्ठाप्राप्तब्रह्मचर्यैरित्यर्थः । एतादृशे धर्मे आस्था युक्तैव तदन्यत्र सा न युक्तेति हृदयम् ॥ १६ ॥

धर्मेऽप्यास्था न युक्तेति पूर्वपक्षिणः प्रत्यवस्थानं प्रतिक्षेप्तुं त्रिभिः श्लोकैरुपन्यस्यति—

आह तत्रापि नो युक्ता, यदि सम्यग् निरूप्यते ।
धर्मस्यापि शुभो यस्माद्, बन्ध एव फलं मतम् ॥ १७ ॥

आहेति-आह-पूर्वपक्षी वक्ति । **तत्रापि** धर्मेऽपि । **नो युक्ता** आस्थेति प्रकृतम् । किं विचारमन्तरेणैव वाङ्मात्रेणैव न युक्तेत्यत आह—**यदीति** । **सम्यग्** सूक्ष्मनीत्या । **निरूप्यते** पर्यालोच्यते । किमत्र पर्यालोचनमित्यपेक्षायामाह—**धर्मस्यापीति**-उक्तलक्षणस्य धर्मस्यापीत्यर्थः । **शुभः** सातादिहेतुः । **यस्मात्** यस्मात् कारणात् । **बन्ध एव** अभिनवकर्मपुद्गलपरिग्रह एव । **फलं मतं** प्रयोजनमिष्टं लोके ॥ १७ ॥

न चायसस्य बन्धस्य, तथा हेममयस्य च ।
फले कश्चिद् विशेषोऽस्ति, पारतन्त्र्याविशेषतः ॥ १८ ॥

ननु अभिनवकर्मपुद्गलपरिग्रहः शुभबन्धरूपत्वादिष्ट एव, तत्साधनत्वादास्था

युक्तैवेति समाधानव्यपोहायाह–**न चेति** । **आयसस्य** लोहनिगडादेः । तथा **हेममयस्य** कनकशृङ्खलादेः । **बन्धस्य फले** प्रयोजने बन्धनलक्षणे । **कश्चित्** अनुकूलत्वप्रतिकूलत्वकृतो बलवत्त्वाबलवत्त्वकृतो वा । **विशेषो** वैलक्षण्यम् । **न च** नैव, अस्ति, पारतन्त्र्यस्य–स्वेच्छानिरोधदुःखस्य, अविशेषतः–उभयत्र विशेषाभावात् ॥ १८ ॥

तस्माद्धर्मवत् त्याज्यो, धर्मोऽप्येवं मुमुक्षुभिः ।
धर्मा-ऽधर्मक्षयान्मुक्तिर्मुनिभिर्वर्णिता यतः ॥ १९ ॥

पूर्वपक्षवादी स्वाभिप्रेतमुपसंहरति–**तस्मादिति**–यस्मात् संसारपरिभ्रमणजन्यबलवद्दुःखानुबन्धित्वं धर्मा-ऽधर्मयोरुभयोरपि समानं तस्माद्धेतोरित्यर्थः । **अधर्मवद् धर्मोऽपि त्याज्यः** अधर्मो यथा त्यक्तुं योग्यस्तथा धर्मोऽपि त्यक्तुं योग्यः । **एवम्** उक्तविचारेण । कैरित्यपेक्षायामाह–**मुमुक्षुभिरिति**–मोक्षेच्छावद्भिरित्यर्थः, तदितरेषां संसारसुखविरक्तत्वाभावेन विवेकाभावात्, एतावता बलवद्दुःखानुबन्धित्वेनाधर्मवद् धर्मस्य त्याज्यत्वमुक्तम् । इष्टसाधनीभूताभावप्रतियोगित्वलक्षणेष्टप्रतिबन्धकत्वेनापि तस्य त्याज्यत्वमाह–**धर्मेति**–धर्माधर्मक्षयात्–धर्माधर्मयोरुभयोः क्षयाद्–अत्यन्तविनाशात् । **मुक्तिः** मोक्षः । **मुनिभिः** परिणतवचनैः । **वर्णिता** निरूपिता । **यतः** यस्मात् कारणात्, अतोऽप्यधर्मवत् त्याज्यो धर्म इति ॥ १९ ॥

अत्र ग्रन्थकारः प्रतिविधानमुपदर्शयति—

उच्यत एवमेवैतत्, किन्तु धर्मो द्विधा मतः ।
संज्ञानयोग एवैकस्तथाऽन्यपुण्यलक्षणः ॥ २० ॥

उच्यत इति–उक्ताशङ्कायां समाधानप्रतिपत्त्यनुकूलव्यापारः क्रियत इत्यर्थः । **एवमेव** अविप्रतिपत्तिविषय एव । **एतत्** भवदुपदर्शितं धर्मस्य संसारहेतुत्वं मोक्षविरोधित्वं च । नन्वेवं धर्मस्य मोक्षप्रतिबन्धकत्वे मदुपगते भवतोऽप्यविप्रतिपत्तिविषये सति मोक्षजनकत्वं विरोधान्न सम्भवतीत्युपादेयत्वं कथं स्यादिति पृच्छति–**किन्त्विति** । यद्येकविध एव धर्मो भवेत् तदैकस्य तस्य मोक्षं प्रति जनकत्व-प्रतिबन्धकत्वे न स्यातामपि, न चैवम्–धर्मस्य द्वैविध्येनैकस्य मोक्षविरोधित्वेऽप्यन्यस्य मोक्षजनकत्वसम्भवादित्युत्तरयति–**धर्म इति**–धर्मः-धर्मपद-

वाच्यः, तेनैकस्य धर्मत्वस्य सामान्यरूपस्योभयसाधारणस्याभावेऽपि न क्षतिः। **द्विधा** द्विप्रकारः। **मतः** शास्त्रकारैरिष्टः, तथा च नानार्थकोऽयं धर्मशब्द इत्येकस्य धर्मशब्दवाच्यस्य मोक्षजनकत्वम्, तदन्यस्य धर्मशब्दवाच्यस्य मोक्षविरोधित्वमविरुद्धमित्यग्रे स्पष्टीभविष्यति। द्वैविध्यमित्थम्-**संज्ञानयोग एवैकः** सं-समीचीनमर्हत्प्रवचनानुसारि, ज्ञानं-गुरुपारतन्त्र्यनिमित्तं संवेदनम्, तेन सहितो योगः-शुभवीर्योल्लासः, प्रसिद्धार्थश्चात्रैवकारो नान्यं व्यवच्छिनत्ति। **एकः** एकप्रकारः। **तथा** एवम्, **अन्यो** द्वितीयप्रकारो धर्मः। **पुण्यलक्षणः** पुण्येन-सातादिना कार्येण लक्ष्यत इति पुण्यलक्षणः, पुण्यहेतुराशंसावान्, ततश्च हेयः सः ॥ २० ॥

प्रसिद्धः खलु पुण्यलक्षणो धर्मो लोक इति स्वरूप-फलाभ्यां संज्ञानयोगधर्मं निरूपयति—

ज्ञानयोगस्तपः शुद्धमाशंसादोषवर्जितम्।
अभ्यासातिशयादुक्तं, तद्विमुक्तेः प्रसाधकम् ॥ २१ ॥

ज्ञानयोग इति-**ज्ञानयोगः**-यः प्रथमभेदो धर्मस्य संज्ञानयोगः, स **तपः**। तद् **विशिनष्टि**—**शुद्धमिति**-अविध्यासेवनमलरहितं ज्ञान-संयमोपबृंहितमित्यर्थः। पुनस्तद् **विशिनष्टि**—**आशंसादोषवर्जितमिति**-आशंसादोषेण-इहपरलोकादिनृ-देवैश्वर्यादिपुष्टफलाशंसया, वर्जितं-तज्जन्येच्छाऽविषयीभूतमित्यर्थः, दोषवर्जितमित्येतावन्मात्रोक्तावपि दोषत्वेनाशंसादोषस्य ग्रहणसम्भवाद् विशिष्योपादानमस्य प्राधान्यप्रतिपत्तये। उक्तगुणोपपन्नं तपः कुतो भवतीत्याकाङ्क्षायामाह—**अभ्यासातिशयादिति**-क्षायोपशमिकभावपूर्वकदृढयत्नादित्यर्थः। **उक्तं** सर्वज्ञैरुपदिष्टम्। **हि** यतः। **तत्** निरुक्तं तपः। **मुक्तेः** मोक्षस्य। **प्रसाधकं** जनकम्।

अत्र विशेषमित्थमुपदर्शितवन्तः श्रीमन्तो यशोविजयोपाध्यायाः-दुष्टाशंसापूर्वकस्य तपसो निषिद्धत्वात्, "नो इहलोगट्ठाए तवमहिट्ठिज्जा, नो परलोगट्ठाए तवमहिट्ठिज्जा" [नो इहलोकार्थतया तपोऽधितिष्ठेत्, नो परलोकार्थतया तपोऽधितिष्ठेत्,] इतिवचनात्, केवलस्य च तस्य विशिष्टनिर्जरां प्रत्यजनकत्वात्, समुदितानामेव त्रयाणां प्रकाश-व्यवदाना-ऽनाश्रवरूपव्यापारैर्निःशेषकर्माभावोपपत्तेः, अभ्यासस्य च स्वजनकभावबृंहिहेतुत्वेन ततोऽशुभवासनाक्षयाद-

विलम्बेन फलोदयाच्च, अङ्गीकृतं च पातञ्जलैरप्येतत्-"अभ्यास-वैराग्याभ्यां तन्निरोधः" [पात० १. १२.] ताः-प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतिलक्षणाः पञ्च वृत्तयः, तत्र प्रत्यक्षादीनि प्रमाणानि, विपर्ययो मिथ्याज्ञानम्, तद् अविद्या-ऽस्मिता-राग-द्वेषा-ऽभिनिवेशभेदेन पञ्चविधम्, "अनित्या-ऽशुचि-दुःखा-ऽनात्मसु नित्य-शुचि-सुखा-ऽऽत्मख्यातिरविद्या" [पात० २. ५.] "दृग्-दर्शन-शक्त्योरेकात्मतैवाऽस्मिता" [पात० २. ६.] "सुखानुशयी रागः" [पात० २. ७.] "दुःखानुशयी द्वेषः" [पात० २. ८.] "स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः" [पात० २. ९.] शब्दज्ञानानुपाती वस्तुशून्यः प्रमा-भ्रमविलक्षणोऽसदर्थव्यवहारो विकल्पः-शशविषाणम्, असत् पुरुषस्य चैतन्य-मित्यादि, "अभावप्रत्ययालम्बना वृत्तिर्निद्रा" [पात० १. १०.] चतसृणां वृत्तीनामभावस्य प्रत्ययः-कारणं तमोगुणस्तदालम्बना वृत्तिर्निद्रा, न तु ज्ञानाद्य-भावमात्रमिति भावः, अनुभूतविषयासंप्रमोषप्रत्ययः स्मृतिः, पूर्वानुभवसंस्का-रजं ज्ञानमित्यर्थः, तासां निरोधः-सवासनानां क्षयः, स चाभ्यासेन वैराग्येन च भवति; वैराग्येण चित्तनद्या विषयप्रवाहो निवार्यते, समाध्यभ्यासेन च प्रशान्तवाहिता सम्पाद्यते, इति द्वारभेदेनोभयोः समुच्चयात्, एकद्वारत्वे व्रीहि-यववद् विकल्प एव स्यात्, न तु समुच्चय इति; "तत्र स्थितौ यत्नोऽभ्यासः" [पात० १. १३.] तत्र-द्रष्टरि शुद्धे, चित्तस्यावृत्तिकस्य प्रशान्तवाहितारूपा निश्चला स्थितिः, तदर्थं यत्नो-मानस उत्साहो बहिर्मनो निरोत्स्यामीत्याकारः, स चाऽऽवर्त्यमानोऽभ्यास उच्यत इति; "स तु दीर्घकाल-नैरन्तर्य-सत्कारासेवितो दृढभूमिः" [पात० १. १४.] अनिर्वेदेन दीर्घकालासेवितः, अविच्छेदेन निरन्तरासेवितः, श्रद्धातिशयेन सत्कारासेवितो दृढभूमिः-विषयवासनया चाल-यितुमशक्यो भवति, अन्यथा तु लयविक्षेप-कषाय-सुखास्वादापरिहारे व्युत्थान-संस्कारप्राबल्यात् समाधिसंस्काराणां भङ्गुरतयाऽदृढभूमिरेव स्यात्, इति कथं ततो विशिष्टफलसिद्धिः स्यात्?; वैराग्यं च द्विविधं-परमपरं च, तत्र यतमान-संज्ञा-व्यतिरेकसंज्ञैकेन्द्रियसंज्ञा-वशीकारसंज्ञाभेदैरपरं चतुर्धा, तत्र किमिह सारं, किं चासारम्? इति गुरुशास्त्रपारतन्त्र्येण ज्ञानोद्योगो यतमानम्, विद्य-मानस्वचित्तदोषाणां मध्येऽभ्यस्यमानविवेकेनैतावन्तः पक्काः, एतावन्तश्चावशिष्टा

इति चिकित्सावद् विवेचनं व्यतिरेकः, दृष्टा-ऽऽनुश्रविकविषयप्रवृत्तेर्दुःखमयत्व-बोधेन बहिष्प्रवृत्तिमजनयन्त्या अपि तृष्णाया औत्सुक्यमात्रेण मनस्यवस्थान-मेकेन्द्रियम्, तृष्णाविरोधिनी चित्तवृत्तिर्ज्ञानप्रसादरूपा वशीकारः, तदिदं सूत्रितम्-"दृष्टाऽऽनुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्" [पात० १. १५.] इति, तदन्तरङ्गसाधनं संप्रज्ञातस्य समाधेः, असंप्रज्ञातस्य तु बहि-रङ्गम्; परं तु वैराग्यं संप्रज्ञातसमाधिपाटवेन गुणत्रयात्मकात् प्रधानाद् विविक्तस्य पुरुषस्य साक्षात्कारादगुणशेषगुणत्रयव्यवहारेषु वैतृष्ण्यं यत्, "तत् परं पुरुषख्यातेर्गुणवैतृष्ण्यम्" [पात० १. १६] इति सूत्रम्, तदन्तरङ्गं साधनमसंप्रज्ञातसमाधेः, तत्परिपाकनिमित्ताच्च चित्तोपशमातिशयात् कैवल्यम्, इति यथास्थानं व्यवस्थापनात् ।

अत्रेदमवधेयम्—अभ्यस्तं तपः समुच्छिन्नक्रियानिवृत्तिरूपं ध्यानमेव, तस्यैव साक्षाद् मोक्षहेतुत्वात्, न च मोक्षहेतुशुद्धात्मज्ञानेन तस्य व्यवधानम्, सम-कालभाविनोरपि ज्ञान-ध्यानयोः प्रदीप-प्रकाशयोरिव निश्चयतो हेतुत्वा-श्रयणात्, तदिदमभिप्रेत्योक्तम्—

"मोक्षः कर्मक्षयादेव, स चात्मज्ञानतो भवेत् ।
ज्ञानसाध्यं मतं तच्च, तद् ध्यानं हितमात्मनः ॥ १ ॥" [ ] इति ।

समाधिरिति च शुक्लध्यानस्यैव नामान्तरं परैः परिभाषितम्, तथाहि—चतुर्विधस्तैः संप्रज्ञातसमाधिरुक्तः-सवितर्कः, निर्वितर्कः, सविचारः, निर्विचारश्चेति, यदा स्थूलं महाभूतेन्द्रियात्मकषोडशविकाररूपं विषयमादाय पूर्वा-ऽपरानु-सन्धानेन शब्दार्थोल्लिखेन च भावना क्रियते सविकल्पकवृत्तिरूपा तदा सवितर्कः समाधिः, यदा त्वस्मिन्नेवालम्बने शब्दार्थस्मृतिविलये तच्छून्यत्वेन भावना प्रवर्तते निर्विकल्पवृत्तिरूपा तदा निर्वितर्कः समाधिः, यदाऽन्तःकरणं सूक्ष्मविषय-मालम्ब्य देश-काल-धर्मावच्छेदेन सविकल्पकवृत्तिरूपा भावना प्रवर्तते तदा सविचारः समाधिः, यदा चास्मिन्नेव विषये तदवच्छेदं विना निर्विकल्पक-वृत्तिरूपा धर्मिमात्रभावना प्रवर्तते तदा निर्विचारः समाधिरिति; रजस्तमो-लेशानुविद्धान्तःकरणसत्त्वस्य भावनात्मको भाव्यमानसत्त्वोद्रेकेण सानन्दः समाधिः, यत्र बद्धधृतयः प्रधान-पुरुषतत्त्वान्तराऽदर्शिनो विदेहशब्देनोच्यन्ते; रजस्तमोलेशानभिभूतशुद्धसत्त्वमालम्ब्य भावनात्मकश्चिच्छक्तेरुद्रेकात् सत्ता-

मात्रावशेषत्वेन सास्मितः समाधिः, यत्र स्थिताः परं पुरुषं पश्यन्ति; तदिदं समाधिद्वयं ग्रहीतृ-ग्रहणयोरपि चित्तवृत्तिविषयतया ग्राह्यकोटावेव निक्षेपान्नातिरिच्यते; तदिदमुक्तम्–"सूक्ष्मविषयत्वं चालिङ्गपर्यन्तम्" [पात० १. ४५.] इति, सूत्रितं च–"चतुर्विधा हि ग्राह्यसमापत्तिः" [ ] इत्यादि, "क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" [पात० १. ४१.] इति समापत्तिलक्षणम्, तत्स्थता-तदेकाग्रता तन्मयता, न्यग्भूते चित्ते भाव्यमानोत्कर्षः स्फटिकोपरागस्थानीयः निर्विचारसमाधेः प्रकृष्टाभ्यासाच्छुद्धसत्त्वोद्रेके क्लेशवासनारहितस्य चित्तस्य भूतार्थविषयः क्रमानुरोधी स्फुटः प्रज्ञालोकः प्रादुर्भवति, तदुक्तम्–"निर्विचारवैशारद्येऽध्यात्मप्रसादः" [पात० १. ४७.] इति, "ऋतम्भरा तत्र प्रज्ञा" [पात० १. ४८.] इति, "ऋतं–सत्यमेव बिभर्ति भ्रान्तिकारणाभावादिति ऋतम्भरा, यौगिकीयं संज्ञा, सा चोत्तमो योगः, तथा च भाष्यम्—

"आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्" ॥ १ ॥ इति ।

तज्जन्यसंस्काराणां व्युत्थानादिसंस्कारविरोधित्वात्, तत्प्रभवप्रत्ययाभावेऽप्रतिहतप्रसरः समाधिः, ततस्तज्जा प्रज्ञा, ततस्तत्कृताः संस्काराः, इति नवो नवः संस्काराशयो वर्धते, ततश्च प्रज्ञा, ततश्च संस्कार इति, ततो योगिप्रयत्नविशेषेण संप्रज्ञातसमाधेर्व्युत्थानजानां च संस्काराणां निरोधादसंप्रज्ञातसमाधिर्भवति, तदुक्तम्–"तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः" [पात० १. ५१.] इति, तदा च निरोधचित्तपरिणामप्रवाहः, तज्जन्यसंस्कारप्रवाहश्चावतिष्ठते, तदुक्तम्–"संस्कारशेषोऽन्यः" [पात० १. १८.] इति, ततः प्रशान्तवाहिता संस्कारात्, सा ह्यवृत्तिकस्य चित्तस्य निरिन्धनाग्निवत् प्रतिलोमपरिणामेनोपशमः, तत्र पूर्वप्रशमजनितः संस्कार उत्तरोत्तरप्रशमहेतुरिति, ततो निरिन्धनाग्निवच्चित्तक्रमेणोपशाम्यद् व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयत इति; अत्र चतुर्विधोऽपि संप्रज्ञातसमाधिः शुक्लध्यानस्याद्यपादद्वयं प्रायो नातिशेते, षोडशकादिविषयोपवर्णनं च तत्राप्रामाणिकस्वप्रक्रियामात्रम्, तत्र मानाभावात्, आत्मविषयकसाक्षात्कारे आत्मविषयकस्यैव ध्यानस्य हेतुत्वाच्च; वितर्कश्चात्र विशिष्टश्रुतसंस्काररूपः, विचारश्च योगान्तरसंक्रमरूपो

ग्राह्यः, विशिष्टज्ञाने सविकल्पकनिर्विकल्पकव्यवस्थायोगात्, परिभाषामात्रस्य निरालम्बनत्वात्, पृथक्त्वानभिधानेन चात्र न्यूनत्वम्, प्रज्ञालोकश्च केवलज्ञानादधः सचित्रालोककल्पश्चतुर्ज्ञानप्रकर्षोत्तरकालभावी प्रतिभापरनामा ज्ञानविशेषः, ऋतम्भरा च केवलज्ञानम्, ततः संस्काराशयवृद्धिश्चासंभवदुक्तिका, मतिज्ञानभेदस्य संस्कारस्य तन्मूलभूतज्ञानावरणक्षयेणैव क्षीणत्वात्, अतश्चरमशुक्लध्यानांशस्थानीयोऽसंप्रज्ञातसमाधिर्न वृत्तिनिरोधार्थमपेक्षणीयः, किन्तु भावोपग्राहिकर्मक्षयार्थमिति सूक्ष्ममीक्षणीयम्, ज्वरपरवशपुरुषवचनप्रायाणां परतन्त्राणां काकतालीयन्यायेनैव क्वचिदर्थबोधादिति दिक् ।

तदेवं ध्यानरूपमेवं तपो ज्ञान-क्रियाभ्यामपृथग्भूतमपृथग्भूततत्तद्व्यापारयोगि परमयोगाभिधमपवर्गहेतुरिति निर्व्यूढम्, तत्र च धर्मपदशक्तिराप्तवाक्यादेव, स्वारसिकप्रयोगे लक्षणानवकाशात्, अन्यथा विनिगमनाविरहात्, देवार्चादौ धर्मजनकत्वेनैव धर्मपदप्रयोगो न तु स्वरसत इति चेत्? तथाऽप्यत्र योगजादृष्टप्रयोजकतया धर्मपदप्रयोग इति न वैषम्यम्" इति ॥ २१ ॥

परप्रश्न-तदुत्तरनिकरगुम्फनेन शुद्धतपसो धर्मत्वं व्यवस्थापयति—

धर्मस्तदपि चेत् सत्यं, किं न बन्धफलः स यत् ।
आशंसावर्जितोऽन्येऽपि, किं नैवं चेन्न यत् तथा ॥ २२ ॥

धर्मस्तदपीति—धर्मस्तदपीति परस्य पृच्छा, शुद्धतपोऽपि धर्मव्यवहारविषय इति तदर्थः । इति **चेत् सत्यमित्युत्तरम्**, एवं यदि त्वं मन्यसे तत् सत्यम्, शुद्धतपो धर्मपदव्यवहारविषय एवेति तदर्थः । उद्घाटिताशयः परः पृच्छति—**किं न बन्धफलः स** इति-तपोलक्षणो धर्मः कर्मबन्धहेतुः किं न भवति? यत्र धर्मव्यवहारविषयत्वं तत्र शुभबन्धहेतुत्वमिति हि दृश्यते दानादिधर्मे, धर्मव्यवहारविषयत्वं चोपेयते संज्ञानयोग इति तत्रापि शुभबन्धहेतुत्वं स्यादिति प्रष्टुरभिप्रायः । प्रकटितस्वाभिप्रायः समाधातोरुत्तरयति—**यद् आशंसावर्जित** इति-यस्माच्छुद्धतपोलक्षणो धर्म आशंसावर्जित इत्यर्थः; दानादिधर्मे धर्मपदवाच्यतया लोकप्रसिद्धे आशंसादोषवत्त्वं प्रसिद्धं तस्मात् स बन्धहेतुः, तद्धर्मानाक्रान्तं च शुद्धतप इति न धर्मव्यवहारविषयत्वेनास्य बन्धहेतुत्वम्, सहचारमात्रस्य व्याप्तिग्रहानिमित्तत्वात्, लोहलेख्यत्व-पार्थिवत्वयोर्वज्रभिन्ने सर्वत्र पार्थिवे सहचारेऽपि वज्रे व्यभिचारेण व्याप्त्यग्रहवत् प्रकृतेऽपि धर्मव्यव-

हारविषयत्व-शुभबन्धहेतुत्वयोर्व्याहत्यग्रहादित्याशयः । यत्र धर्मपदव्यवहार-विषयत्वं तत्र शुभबन्धहेतुत्वमिति नियमो मास्तु किन्तु यत्र धर्मपदव्यवहार-विषयत्वं तत्र शुभबन्धहेतुत्वाभाव इति सहचारः संज्ञानयोगलक्षणतपसि दृश्यत इति तद्वद् दानादिधर्मेऽपि बन्धहेतुत्वाभावः सिद्ध्येदिति पराशङ्कामुपन्यस्यति-**अन्येऽपि किं नैवं चेदिति**-पुण्यलक्षणधर्मा अपि अबन्धफलाः किं न स्युरित्यर्थः । अबन्धहेतुत्वव्यापकस्याशंसादोषवर्जितत्वस्य पुण्यलक्षणधर्मेष्व-भावात् तद्व्याप्यस्य बन्धफलहेतुत्वाभावस्याप्यभावो व्यापकाभावे व्याप्या-भावस्यावश्यम्भावादित्युत्तरयति-**न यत् तथेति**-यस्मात् कारणात् पुण्यलक्षणा धर्मा आशंसावर्जिता न किन्त्वाशंसासमन्विता एवेत्यर्थः । ननु यस्य धर्मस्य मोक्षहेतुत्वं न तस्य शुभबन्धहेतुत्वम्, यस्य शुभबन्धहेतुत्वं न तस्य मोक्षहेतुत्वमिति धर्मद्वैविध्योपपादनेन यदुपदर्शितं तन्न युक्तम्, चारित्रधर्मस्यैकस्यापि रागसह-कारेण बन्धहेतुत्वस्य रागवैकल्येन मोक्षहेतुत्वस्य च संभवात्, अत एव भगवत्यां पूर्वतपः-पूर्वसंयमयोः शुभफलात्मकस्वर्गहेतुत्वमुपदर्शितम्; न च धर्मस्यैकत्वेऽपि तद्गतो बन्धजनकतावच्छेदकधर्मोऽन्यः, तदन्यश्च मोक्षजनकता-वच्छेदकधर्म इत्येवं जनकतावच्छेदकधर्मभेदाच्छुभबन्धहेतुत्वं मोक्षहेतुत्वं च भविष्यतीति साम्प्रतम्, सरागत्वं बन्धजनकतावच्छेदकं वीतरागत्वं मोक्ष-जनकतावच्छेदकमित्यत एवोपपत्तौ तदतिरिक्तजनकतावच्छेदकरूपभेदकल्पने मानाभावात्; न च सरागत्वं न बन्धजनकतावच्छेदकं नवा वीतरागत्वं मोक्षजनकतावच्छेदकम्, किन्तु कर्मक्षयोपशमजन्यधर्मे यत् कर्मक्षयोपशम-निरूपितजन्यतावच्छेदकं तच्छुभबन्धजनकतावच्छेदकं कर्मक्षयजन्यधर्मे यत् कर्मक्षयनिरूपितजन्यतावच्छेदकं तन्मोक्षजनकतावच्छेदकमिति वाच्यम्, तथा सति शैलेशीसमयभाविन एव चारित्रस्य कर्मक्षयजन्यत्वेन कर्मक्षयनिरूपित-जन्यतावच्छेदकधर्मवत्तया मोक्षहेतुत्वस्य संभवेन ऋजुसूत्रनयाश्रयणप्रसङ्गादिति चेत्? सत्यम्-ऋजुसूत्रोपगृहीतव्यवहाराश्रयणेनैवेत्थमभिधानात्, शुद्धर्जुसूत्र-नयेन तु ज्ञान-तपसोरन्यथासिद्धत्वम्, तज्जन्यक्रियाया एव मोक्षसम्भवात्, यदाह भगवान् भद्रबाहुः—

"सद्दुज्जुसुआणं पुण निव्वाणं संजमो चेव" [शब्दर्जुसूत्रयोः पुनर्निर्वाणं संयम एव] इति । अथवा धर्मस्तदपीत्यादिपद्ये आशंसासाहित्यं शुभबन्धहेतोः,

मोक्षहेतोराशंसाराहित्यमित्येवं यद्वैलक्षण्यमुपवर्णितं तेन बन्धजनकतावच्छेदक-पाशंसासाहित्यं मोक्षजनकतावच्छेदकमाशंसाराहित्यमित्येव वर्णितम् । न चैवं—'संज्ञानयोग एवैकस्तथाऽन्यः पुण्यलक्षणः' इति मोक्षजनककर्मभिन्नत्वं यच्छुभ-बन्धहेतोः पुण्यलक्षणस्योक्तं तत् कथं सङ्गतं स्याद्? धर्मस्याभेदेऽपि तत्र निरुक्तधर्मवैलक्षण्यसंभवादिति वाच्यम्, तत्रान्यपदस्य वैधर्म्यार्थकत्वेन सर्वसामञ्जस्यात् ।

परे तु—"तपस्त्व-चारित्रत्वाभ्यामेव मोक्षहेतुता, न तु तत्र वीतरागत्वमपि जनकतावच्छेदककोटौ प्रविशति, सरागताकालीनप्रशस्तसङ्गादेव स्वर्गोपपत्तेः; वस्तुतः सरागतपसः स्वर्गहेतुत्वं 'सविशेषणे हि°' इति न्यायेन रागमात्र एव पर्यवस्यति" इत्याहुः ।

अपरे तु—"यस्य यदुद्देशेन क्रियमाणत्वं तस्य तत्फलकत्वमिति नियमेन मोक्षोद्देशेन क्रियमाणयोस्तपः-संयमयोर्मोक्षफलकत्वान्मोक्षहेतुत्वमेव, स्वर्गस्य चानुद्देश्यत्वान्न फलत्वम्, कर्माशप्रतिबन्धाच्च न तदा मोक्षोत्पादः, ततो गत्यन्तर-जनकादृष्टाभावादर्थत एव स्वर्गोत्पत्तिः" इत्याहुः ।

इत्थमुपवर्णिताः सूरीणां सर्व एव पक्षाः सदादेशत्वादुपादेया एव, सर्वज्ञार्ह-दनुमतविचित्रनयाकूताकलनप्रवणमहर्षिवचनानुसारित्वादिति ॥ २२ ॥

उक्तदिशोपपादितं धर्मद्वैविध्यं शब्दान्तरेण तत्रान्तरेऽप्यभ्युपगतमित्याह—

भोग-मुक्तिफलो धर्मः, स प्रवृत्तीतरात्मकः ।
सम्यङ्मिथ्यादिरूपश्च, गीतस्तत्रान्तरेष्वपि ॥ २३ ॥

भोगेति—पुण्यलक्षणो धर्म एको भोगफलः, अन्यश्च शुद्धतपोरूपो धर्मो मुक्तिफल इति शैवाः; भोगफलो धर्मः प्रवृत्त्यात्मक एकः, मुक्तिफलो धर्मो निवृत्त्यात्मकोऽन्य इति त्रैविद्यवृद्धाः; सम्यग्रूपो मुक्तिफलो धर्म एकः, मिथ्यारूपो भोगरूपो धर्मोऽन्य इति बौद्धविशेषाः; सम्यग्-मिथ्यादीत्यत्रादिशब्दाद् हेयो-पादेया-ऽभ्युदयनिश्रेयसपरिग्रहः । एवं प्रयोजनभेदादेव **तत्रान्तरेष्वपि** जैनदर्शनातिरिक्तदर्शनेष्वपि । **स** द्विभेदः । **गीत** उक्त इत्यर्थः ॥ २३ ॥

ये चागमस्य प्रामाण्ये सामान्यतो विशेषतो वा विप्रतिपद्यन्ते तान् प्रति मोक्षफलके संज्ञानयोगलक्षणधर्मे कार्यान्यथानुपपत्तिलक्षणं प्रमाणमुपदर्शयति—

तमन्तरेण तु तयोः, क्षयः केन प्रसाध्यते?।
सदा स्यान्न कदाचिद् वा, यद्यहेतुक एव सः॥ २४॥

तमन्तरेणेति—तमन्तरेण तु—संज्ञानयोगं विनैव। **तयोः** संसारफलयोर्धर्माऽधर्मयोः। **क्षय** अत्यन्तविनाशः। **केन** केन हेतुना। **प्रसाध्यते** उत्पाद्यते, न केनापि हेतुना तस्योत्पत्तिर्भवेदित्यर्थः। ननु संसारफलकधर्माधर्मात्यन्तविनाशहेतुर्न कश्चिद् दृश्यत इत्यहेतुक एव धर्माधर्मविनाशोऽस्तु, सहेतुकविनाशस्य दुःश्रद्धेयत्वादिति बौद्धाशङ्कायामाह—**सदा स्यादिति**। **यद्यहेतुक एव** हेतुरहित एव, **स** धर्माधर्मोभयक्षयः, तदा तस्योत्पत्तिस्वभावत्वे यस्य यः स्वभावः स तत्स्वभावमन्तरेण न तिष्ठतीति सदैवोत्पत्तिस्वभावः स स्यादित्याह—**सदा स्यादिति**। धर्माऽधर्मक्षयस्यानुत्पत्तिस्वभावत्वे कदापि न स्यादेव, अन्यथा तत्स्वभावप्रच्युतिः स्यादित्याह—**न कदाचिद् वेति**—कदापि वा न स्यादित्यर्थः। कदाचिदनेनोत्पत्तव्यमित्येवं कदाचिदुत्पत्तिस्वभावत्वान्न सर्वदा स्यादिति चेत्? विनिगमकाभावाद् यदा यदोत्पत्तिस्स्यात्पाद्यते स स कालः कदाचिदित्यस्याभिधेय इत्येवं कालान्तरेऽप्युत्पत्तिः स्यात्, अथवा यदा नोत्पद्यते स कदाचिन्नेति वक्तुं न शक्यते तदोत्पत्त्याऽपि कदाचिदुत्पत्तिस्वभावोऽस्य निर्वहतीति तदोत्पत्तिप्रसङ्गः स्यात्। तदहरेवानेनोत्पत्तव्यमित्येवं कालविशेषघटिततदहरेवोत्पत्तिस्वभावत्वान्नान्यदोत्पत्तिरिति चेत्? तर्हि उक्तस्वभावः प्रतिनियतदिवसघटित इति तद्दिवसस्य सद्भाव एव उक्तस्वभावसम्भवः, स दिवसो यदि कारणमन्तरेणैव स्यात् तदा पूर्व-पूर्वतर-पूर्वतमकालेऽपि स्यादेवमुत्तरोत्तरकालेऽपि स्यादित्येवमभिमतदिवसस्य सनातनत्वे तदहरेवोत्पत्तिस्वभावस्यापि सदातनत्वे सत्येव सम्भव इति सदातनत्वं प्रसज्यत इति तद्दिवसस्य कारणमवश्यमभ्युपगन्तव्यमिति तस्य यत् कारणं तदुक्तस्वभावस्यापीति तत्तद्धेतुसकाशादेवोत्पत्तिस्वभावादायातं सहेतुकत्वम्। ननु आकाशस्याकाशत्वं भवद् निर्हेतुकमपि नात्मादेर्भवतीति तस्य क्वाचित्कत्वं यथा न हेतुनियम्यं तथाऽत्र कादाचित्कत्वमपि स्वभावत्वादेव न हेतुनियम्यमिति चेत्? न—कादाचित्कत्वस्यावधिनियम्यत्वात्। सन्त्ववधयो न तु तेऽपेक्ष्यन्त इति चेत्? न—नियतपूर्ववर्तित्वस्यैवापेक्षार्थत्वात्, यदि नियतपूर्ववर्तिभिन्नमप्यपेक्ष्येत तदा

धूमो वह्निमिव गर्दभमप्यवधीकुर्यात्, तथा च वह्नेर्धूम इतिवद् गर्दभाद्धूम इत्यपि प्रमीयेतेति, तदुक्तं कुसुमाञ्जलावुदयनाचार्येण—

"सन्तु ये केचिदवधयो न तु तेऽपेक्ष्यन्त इति स्वभावार्थ इति चेत्? नापेक्ष्यन्त इति कोऽर्थः? किं न नियताः? आहोस्विन्नियता अप्यनुपकारकाः? प्रथमे-धूमो दहनवद् गर्दभमप्यवधीकुर्यात्, नियामकाभावात्; द्वितीये तु-किमुपकारान्तरेण, नियमस्यैवापेक्षार्थत्वात्, तस्यैव च कारणात्मत्वात्, ईदृशस्य च स्वभाववादस्येष्टत्वात्; नित्यस्वभावनियमवदेतत्, नह्याकाशस्य तत्त्वमाकस्मिकमिति सर्वस्य किं न स्यादिति वक्तुमुचितमिति चेत्? न-सर्वस्य भवतः स्वभावत्वानुपपत्तेः, नह्येकमनेकस्वभावं नाम, व्याघातात्; नन्वेवमिहापि सर्वदा भवतः कादाचित्कस्वभावव्याघात इति तुल्यः परिहारः, न तुल्यः—निरवधित्वे अनियतावधित्वे वा कादाचित्कत्वव्याघातात्, नियतावधित्वे हेतुवादाभ्युपगमात्" इति।

एतद्व्याख्यानं च वर्धमानोपाध्यायस्य शिष्यबुद्धिवैशद्यनिमित्तमित्युपदर्श्यते—

"द्वितीयं शङ्कते—सन्त्विति—प्रागभावादन्येषामवधित्वेऽपि तैर्घटादिसत्ताया अनियमनान्न तानि कारणानीत्यर्थः। **प्रथम** इति—ननु यो दहनव्यभिचारी स रासभानन्तरं भवतीत्यत्रापादकाभावः, स्वयमपि व्याप्तेरनभ्युपगमात्, न च धूमत्वं यदि दहनव्यभिचारिवृत्ति स्यात् दहनासमवहितसामग्र्युत्तरकालोत्पत्तिकवृत्ति स्यादित्यर्थः, परस्येष्टापत्तेः, मैवम्-धूमो यदि रासभसमवधानोत्पत्तिकतावच्छेदकरूपवान् स्यात् रासभसमवधानानन्तरोत्पत्तिकः स्यात्, धूमत्वं वा यदि दहनव्यभिचारिवृत्ति स्यात् दहनासमवहितदेशवृत्ति स्यादित्यापादनार्थत्वात्; वस्तुतो यद्यग्निर्धूमकारणं न स्यात् तदा कथं धूमार्थी नियमतोऽग्निमुपादत्ते न रासभमिति तद्ग्राहिप्रत्यक्षव्याघात इति भावः। **द्वितीये त्विति**—नह्युपकारव्याप्ता कारणता येन तदभावे न स्यात्, उपकारेऽपि कर्तव्ये उपकारान्तरापेक्षयाऽनवस्थितेः, किन्तु स्वरूपविशेषव्याप्ता, तन्निवृत्तावेव निवर्तत इत्यर्थः। **नियमस्यैवेति**—नियतान्वय-व्यतिरेकवज्जातीयस्यैवापेक्षणीयपदवाच्यतया लोकसिद्धत्वादित्यर्थः। **नित्यस्वभावेति**—यथा नित्यस्याकाशस्य यः स्वभावो धर्मः शब्दाश्रयत्वमात्मनश्चात्मत्वमाकस्मिकमिति सर्वस्य तदन्यस्यापि धर्मः कुतो न स्यादिति न वक्तुमुचितमप्रामाणिकत्वात्, तथा आकस्मिकत्वाविशेषेऽपि

सदातनत्वमाकाशादीनां कादाचित्कत्वं स्वभावो न त्वन्यस्य धर्मोऽन्यस्येत्यर्थः, यथाऽऽहुः—

"नित्यसत्त्वा भवन्त्येके नित्यासत्त्वाश्च केचन ।
विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः ॥ १ ॥
वह्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः ।
केनेदं रचितं तस्मात् स्वभावात् तद्व्यवस्थितिः ॥ २ ॥" [ ] इति ।

न च 'नियतदेशवन्नियतकालस्वभावः' इत्यनेनास्य पौनरुक्त्यम्, पूर्वं हि सापेक्षत्वादित्यत्र यथा परमाणु-तत्परिमाणादीनां निरपेक्षत्वेऽपि नियतदेशवृत्तित्वं तथा घटादीनां नियतकालत्वं स्यादित्यप्रयोजकत्वमुक्तम्, सम्प्रति तु कादाचित्कत्वस्वभावो निर्हेतुकः स्वभावनियतत्वात्, नित्यस्वभाववदिति सत्प्रतिपक्षत्वमुक्तमित्यर्थभेदात् । पूर्वं यन्नियतं तन्न कारणनियम्यं यथा जातेः क्वाचित्कत्वमित्युक्तम्, सम्प्रति तु स्वभावो न नियम्य इत्युच्यत इत्यपौनरुक्त्यमित्यन्ये । **न-सर्वस्येति**—एकनियतो धर्मः स्वभाव इत्युच्यते, तद्यदि सर्वस्य सम्भवेत् तदा स्वभावत्वमसाधारणत्वं नोपपद्यते सत्तादेरिवेति स्वभावत्वव्याघात इत्यर्थः । **नन्वेवमिति**-यद्याकाशस्याकाशत्वं न सर्वस्य तत्त्वव्याघातादिति विपरीतमनाशङ्कनीयम्, तदा कादाचित्कत्वस्वभावस्याहेतुकत्वे सदातनत्वमप्यनाशङ्कनीयं कादाचित्कत्वस्वभावभङ्गप्रसङ्गादित्यर्थः । कादाचित्कत्वस्वभावसिद्धौ तद्विपरीतकल्पनायां व्याघातः स्यात्, तत्सिद्धिश्च निरवधित्वस्वभावत्वे वा, सावधित्वस्वभावत्वे वा, प्रकारान्तराभावात्, द्वितीयेऽप्यनियतावधित्वे तद्विपर्यये वा, तत्र प्रथम-द्वितीययोराह-**निरवधित्व** इति ये ये निरवधयोऽनियतावधयश्च भावा दृष्टास्तेषां नियमतः कादाचित्कत्वस्वभावविरहात्, निरवधिस्वभावस्य अनियतावधिस्वभावस्य वा कादाचित्कत्वस्वभावविरोधः, न हि विरुद्धयोरुष्णशीतयोरेकस्वभावत्वम्, तथा च कादाचित्कत्वव्याघातस्तत्स्वभावत्वव्याघात इत्यर्थः । तृतीयमाशङ्क्य सम्प्रतिपत्तिमुत्तरमाह-**नियतावधित्व** इति । वस्तुतोऽस्मिन् सतीदं भवति असति न भवतीति प्रत्यक्षेण नियतपूर्वभावस्य ग्रहात् प्रत्यक्षमेव कारणत्वे मानम्, तस्य चानन्यथासिद्धत्वग्राहकस्तर्कः स्यादेवेत्यादिना दर्शित इति रहस्यम्" इति ॥ २४ ॥

मुक्तिफलकधर्मस्वरूपसिद्धिमुपसंहरति—

तस्मादवश्यमेष्टव्यः, कश्चिद्धेतुस्तयोः क्षये ।
स एव धर्मो विज्ञेयः, शुद्धो मुक्तिफलप्रदः ॥ २५ ॥

तस्मादिति–यस्मात् कादाचित्कत्वस्वभावः सहेतुकत्वनियतस्तस्मात् कारणादित्यर्थः । **अवश्यं कश्चित् तयोः** संसारफलकयोर्धर्मा-ऽधर्मयोः । **क्षये** विनाशे । **हेतुः** कारणम् । **एष्टव्यः** स्वीकर्तव्यः । **य एव धर्मा-ऽधर्मयोः क्षये कारणं स एव शुद्धः** सर्वांशसारूपमलरहितः । **मुक्तिफलप्रदः** मुक्तिलक्षणफलजनकः । **धर्मः** धर्मपदाभिधेयः । **विज्ञेयः** श्रद्धास्पदत्वेन ज्ञातव्यः ॥२५॥

चोद्यशेषं प्रतिक्षिपति—

धर्माधर्मक्षयान्मुक्तिर्यच्चोक्तं पुण्यलक्षणम् ।
हेयं धर्मं तदाश्रित्य, न तु संज्ञानयोगकम् ॥ २६ ॥

धर्मा-ऽधर्मक्षयादिति । यच्च यत् पुनः । 'धर्मा-ऽधर्मक्षयान्मुक्तिः' इति **उक्तम्** अभिहितम् । **तत्** उक्तवचनम् । **पुण्यलक्षणं हेयम्** आशंसादोषकलङ्कितत्वेनानुपादेयत्वात् त्याज्यम् । **धर्मम् आश्रित्य** प्रकृतधर्मपदशक्तिग्रहविषयीकृत्य । **संज्ञानयोगकमित्यत्र** कप्रत्ययस्य संज्ञायां विधानात् संज्ञानयोगसंज्ञं **धर्ममाश्रित्य न तु** नैवोक्तवचनम् । तथा च धर्मा-ऽधर्मक्षयादित्यत्र धर्मपदेन संज्ञानयोगलक्षणधर्मस्योपग्रहे तत्क्षयजन्यमुक्तौ तज्जन्यत्वं न संभवतीत्येवं बाधस्य नावकाश इति ॥ २६ ॥

संज्ञानयोगलक्षणधर्म एवास्था विधेया तदन्यधर्ममात्रस्य दुःखकारणत्वेनानुपादेयत्वादित्युपसंहरति—

अतस्तत्रैव युक्तास्था, यदि सम्यङ् निरूप्यते ।
संसारे सर्वमेवान्यद्, दर्शितं दुःखकारणम् ॥ २७ ॥

अत इति–पूर्वपक्षोक्तयुक्तिनिकरनिराकरणादित्यर्थः । **तत्रैव** उक्तलक्षणधर्म एव । **युक्तास्था** आस्था समीचीना । **यदि सम्यग्** आगमोपपत्त्यनुसारेणाविपरीतम् । **निरूप्यते** विचार्यते । संज्ञानयोगातिरिक्तं सर्वमेव दुःखकारणमिति यदेव प्रतिपक्षप्रवृत्तिनिरासार्थमुपदर्शितं तदेव स्मारयति–**संसार** इति–संसारे सर्वमेव, **अन्यद्** निरुक्तधर्मातिरिक्तम् । **दुःखकारणं** केवलदुःखमयम् ।

"अनित्यः प्रियसंयोगः" इत्यादिना दर्शितम् । सर्वस्याप्यस्य दुःखमयत्वं प्रतिपादयतीदं पतञ्जलिसूत्रम्–"परिणाम-ताप-संस्कार-दुःखैर्गुणविरोधाच्च दुःखमेव सर्वं विवेकिनः" [पात० २.१५.] एतद्विवेचनं श्रीमद्यशोविजयोपाध्यायपरिशीलितमित्थम्—

"राग एव हि पूर्वमुद्भूतः सन् विषयप्राप्त्या सुखं परिणमते, तस्य च प्रतिक्षणं प्रवर्धमानत्वेन स्वविषयाप्राप्तिनिबन्धनदुःखस्य दुष्परिहरत्वात् परिणामदुःखता; तथा सुखमनुभवन् दुःखसाधनानि द्वेष्टि, तदपरिहारक्षमश्च मुह्यतीति तापदुःखता; तथा वर्तमानसुखानुभवः स्वविनाशकाले संस्कारमाधत्ते, स च सुखस्मरणम्, तच्च रागम्, स च मनः-काय-वचनप्रवृत्तिम्, सा च पुण्याऽपुण्यकर्माशयौ, तौ च जन्मादीनीति संस्कारदुःखता । एवं कालत्रयेऽपि सुखस्य दुःखानुषङ्गाद् दुःखरूपता सिद्धा, उद्भूतसत्त्वकार्यत्वेऽपि सुखस्यानुद्भूतरजस्तमःकार्यत्वात् स्वभावतोऽपि दुःखविषादरूपता, समवृत्तिकानामेव हि गुणानां युगपद्विरोधो न तु विषमवृत्तिकानाम्, इत्येकदोद्भूता-ऽनुद्भूततया न सुख-दुःख-मोहविरोधः" इति ॥ २७ ॥

मुक्तिकारणत्वात् संज्ञानयोगलक्षणे धर्मे युक्ताऽऽस्थेति समर्थिते सति ततो मुक्तिर्यथा रीत्योत्पद्यते तत्प्रकारस्यावश्यवक्तव्यत्वेऽपि प्रतिबन्धकशिष्यजिज्ञासायाः सत्त्वान्नेदानीं मुक्त्युत्पत्तिप्रकारो वक्ष्यते, किन्तु शिष्यजिज्ञासानिवृत्तौ सत्यां प्रतिबन्धकनिवृत्ताववश्यवक्तव्यत्वलक्षणावसरसङ्गत्योत्तरकालं वक्ष्यते इतीदानीं तत्प्रतीक्षामाह—

तस्माच्च जायते मुक्तिर्यथा मृत्यादिवर्जिता ।
तथोपरिष्टाद् वक्ष्यामः, सम्यक् शास्त्रानुसारतः ॥ २८ ॥

तस्माच्चेति–निरुक्तधर्मात् पुनरित्यर्थः । **जायते** उत्पद्यते । **मुक्तिः** मोक्षः । **यथा** येन प्रकारेण । कीदृशी मुक्तिरित्यपेक्षायामाह—**मृत्यादिवर्जितेति**–मृत्यादीत्यादिपदाद् रोग-शोकपरिग्रहः, मृतिः–आयुःक्षयः, तथा च आयुःक्षय-रोग-शोकरहिता निवृत्तिर्येन प्रकारेण भवतीत्यर्थः । **तथा** तेन प्रकारेण । **उपरिष्टात्** अग्रे । **वक्ष्यामः** "तथैव ज्ञानयोगस्य" इत्यादिना कथयिष्यामः । **सम्यग्** अविरोधेन । **शास्त्रानुसारतः** शास्त्रतात्पर्यं परिगृह्य ॥ २८ ॥

यद्यग्रे मुक्त्युत्पत्तिप्रकारं दर्शयिष्यन्ति भवन्तस्तर्हीदानीं किं करिष्यन्ति भवन्त इत्यपेक्षायां प्रसङ्गसङ्गत्या शास्त्रपरीक्षैव क्रियत इत्याह—

इदानीं तु समासेन, शास्त्रसम्यक्त्वमुच्यते ।
कुवादियुक्त्यपव्याख्यानिरासेनाविरोधतः ॥ २९ ॥

इदानीं त्विति–संज्ञानयोगलक्षणे युक्तास्थासमर्थनकालान्यवहितोत्तरकाले पुनरित्यर्थः । **समासेन** संक्षेपेण, तेन विस्तरतः शास्त्रसम्यक्त्वकथनस्य परिमितवर्षायुषामस्मादृशामशक्यत्वेऽपि शिष्यहितानावहत्वेऽपि न क्षतिः । **शास्त्रसम्यक्त्वं** शास्त्रस्य–आगमस्य, सम्यक्त्वम्–अविपरीतार्थाभिधायकत्वं प्रामाण्याऽप्रामाण्यविभागो वा । **उच्यते** कथ्यते । कथमित्याकाङ्क्षायामाह–**कुवादी**ति–कुवादिनाम्–अयथार्थप्ररूपकाणां चार्वाक-मीमांसकादीनां युक्तयश्चापव्याख्याश्च कुवादियुक्त्यपव्याख्यास्तासां **निरासेन**–बलवत्प्रमाणबाध्यत्व-भ्रान्तिमूलकत्वोपदर्शनेन । **अविरोधतः** सर्वशास्त्राविरोधेन, तेन कुवाद्यापादितविरोधाशङ्कानिरासोऽभिव्यज्यते ॥ २९ ॥

कुवादिमतोपदर्शने कृत एव तद्युक्त्यपव्याख्या उपदर्शिता भवन्ति, उपदर्शनतो ज्ञातेष्वेव तेषु बलवत्प्रमाणबाध्यत्वादिकमुपदर्शयितुं शक्यमिति तत्रादौ चार्वाकयुक्तीनां निराचिकीर्षया तन्मतमुपन्यस्यति—

पृथिव्यादिमहाभूतमात्रकार्यमिदं जगत् ।
न चात्मा-ऽदृष्टसद्भावं, मन्यन्ते भूतवादिनः ॥ ३० ॥

पृथिव्यादीति–इदं प्रत्यक्षप्रमाणविषयीभूतम् । **जगत्** चराचरं यत्किञ्चिद्दृश्यते तत् सर्वम् । **पृथिव्यादिमहाभूतमात्रकार्यं** पृथिव्यादीत्यादिपदाज्जलतेजो-वायूनां ग्रहणम्, तथा च पृथिवी-जल-तेजो-वायुलक्षणानि यानि महाभूतानि चत्वारि, महत्त्वविशेषणोपादानात् प्रत्यक्षप्रमाणाविषयस्य परमाणुद्व्यणुकलक्षणसूक्ष्मभूतस्य व्यवच्छेदः, तस्यासत्त्वेन तत्कार्यत्वस्य जगत्यसम्भवात्, **तन्मात्रकार्यं** तदतिरिक्तस्यासत्त्वेन तत्कार्यत्वस्य सम्भावयितुमशक्यत्वादिति मात्रपदेनाकाशादिव्यवच्छेदः। नन्वात्मनो जगदन्तर्गतस्य नित्यत्वान्महाभूतकार्यत्वं न सम्भवतीति कथं महाभूतमात्रकार्यं जगदित्यत आह–**न चात्मे**ति–शरीरातिरिक्तोऽहंप्रत्ययविषयीभूत आत्मा नैवास्ति, चैतन्यस्य शरीरधर्मत्वेन शरीर-

स्यैवाहंप्रत्ययविषयत्वात् स एवात्मा, "चैतन्यविशिष्टः कायः पुरुषः" [ ] इति वचनात्, अदृष्टं–धर्मा-ऽधर्मलक्षणम्, तथा च शरीरव्यतिरिक्तात्मा-ऽदृष्टयोः सद्भावम् । **भूतवादिनः** भूतचतुष्टयमात्रतत्त्ववादिनो लोकायतिकाश्चार्वाका इति यावत् । **न च मन्यन्ते** नैव स्वीकुर्वन्ति ।

प्रत्यक्षविषयवस्तुन एव पारमार्थिकत्वं ते स्वीकुर्वन्ति नादृष्टस्य, तत्र प्रमाणाभावात्, प्रत्यक्षाविषयत्वादेवाऽदृष्टशब्दवाच्ये तस्मिन् न प्रत्यक्षप्रामाण्यं क्रमते । सर्वोपसंहारेण सहचारलक्षणाया व्याप्तेर्ग्रहीतुमशक्यत्वेन व्यभिचारित्वशङ्काया व्याप्तिग्रहप्रतिबन्धिकायाः सर्वत्र सुलभत्वेनापाततो व्याप्तिग्रहस्य व्यभिचारिण्यपि सम्भवेन च व्यभिचारिसाधारण्येनानुमानस्याप्रमाणतया नानुमानमपि तत्र प्रमाणम् । नन्वनुमानस्याप्रमाणत्वे धूमादिना वह्न्यादिकमनुमाय वह्न्याद्यानयनादौ या प्रवृत्तिः सा न स्यादिति चेत्? न–वह्न्यादिसम्भावनयैव तत्र प्रवृत्त्युपपत्तेः, संवादेन च तत्र प्रामाण्याभिमानस्याप्रामाण्यग्रहप्रतिबन्धकस्य सत्त्वेन प्रवृत्तावुपयुक्तस्य तज्जनकज्ञानेऽप्रामाण्यज्ञानानास्कन्दित्वस्यापि सम्भवात् । ननु अगृहीतासंसर्गकवह्न्यादिस्मृतिरूपायां संभावनायामसद्विषयिण्यां परमार्थसत्स्वलक्षण[स्वलक्षणशब्दो विशेषपरिभाषकः]विषयकाध्यक्षविषयविषयकत्वलक्षणः संवादः प्रामाण्यसहचरितो नास्त्येव, अध्यक्षमूलकविकल्पविषयविषयकत्वरूपसंवादस्य निरुक्तसंभावनायां सम्भवेऽपि तस्य न सद्विषयकत्वरूपप्रामाण्यसहचरितत्वमिति न ततः संभावनायां प्रामाण्याभिमान इति चेत्? सत्यम्–तथाप्यध्यक्षमूलकाध्यक्षान्तरसाधारणस्याध्यक्षमूलकविषयविषयत्वरूपसंवादस्य सद्विषयकत्वरूपप्रामाण्यसहचरितत्वेन ततस्तत्र तदभिमानस्य संभवात् । एतमन्ते परमार्थसत्स्वलक्षणमदृश्यपरमाणुस्वरूपं न संभवति, प्रत्यक्षाविषयत्वेन तस्यासत्त्वात्, परमाणोरभावे तत्पुञ्जस्याप्यभावेन तदात्मकस्यापि स्वलक्षणत्वं वक्तुमनर्हम्, किन्तु यदेव दृश्यते महाभूतं पृथिव्यादि तदेव स्वलक्षणमिह ग्राह्यम्, परमार्थसत्तदात्मकस्वसंवेदनविषयकमध्यक्षं निर्विकल्पकप्रत्यक्षम्, तद्विषयः परमार्थसत्स्वलक्षणम्, तद्विषयत्वरूपसंवादो निर्विकल्पकप्रत्यक्ष एव वर्तते, न त्वसद्विषयिण्यामगृहीतासंसर्गकवह्न्यादिस्मृतिरूपसंभावनायामिति न ततस्तत्र प्रामाण्याभिमानसंभवः, अध्यक्षं निर्विकल्पकम्, तन्मूलको विकल्पः सामान्याद्यसदर्थविषयकः, तद्विषयः सामान्यादि, तद्विषयकत्वमुक्तसंभावनायां यद्यप्यस्ति तथापि तन्न परमार्थसत्स्वलक्षणग्राहिणि निर्विकल्पकप्रत्यक्षप्रमाणे

इति तन्न सद्विषयकत्वलक्षणप्रामाण्यसहचरितमिति ततोऽपि अध्यक्षमूलकविकल्पविषयविषयकत्वरूपसंवादान्न प्रामाण्याभिमानसंभवः, परन्तु अध्यक्षमूलकमध्यक्षान्तरं विकल्पश्चेति तत्राध्यक्षमूलकत्वेनाध्यक्षान्तरमुपादाय तद्विषयपरमार्थसत्स्वलक्षणविषयकत्वं प्रमाणभूते निर्विकल्पकप्रत्यक्षे वर्तते, अध्यक्षमूलकत्वेन विकल्पकमुपादाय तद्विषयीभूतासद्विषयकत्वमुक्तसंभावनायामपि वर्तत इति सद्विषयकत्वरूपप्रामाण्यसहचरितादध्यक्षमूलकविषयविषयकत्वरूपसंवादादुक्तसंभावनायां प्रामाण्याभिमानसंभव इत्यत्र बोध्यम् । नन्वेवं निरुक्तसंभावनात्मकं ज्ञानं प्रमाणम्, अध्यक्षमूलकविषयविषयकत्वात्, यदध्यक्षमूलकविषयविषयकं तत् प्रमाणम्, यथा निर्विकल्पकप्रत्यक्षमित्येवं प्रामाण्याभिमानोऽत्रानुमानमेव स्यात्, तथा च तदृष्टान्तेनान्यदप्यनुमानं भवेत्, यथा पर्वतो वह्निमान् धूमात्, यो यो धूमवान् स वह्निमान् यथा महानसमित्येवं साधर्म्यदर्शनमूलकत्वस्यान्यत्रापि भावादिति दृष्टसाधर्म्येणानुमानप्रामाण्यसाधनमनुमानप्रामाण्यानभ्युपगमे चार्वाकवराकस्य दुःसाधनमेवेति चेत्? सत्यम्–यद्युक्तदिशाऽभिमतः प्रामाण्याभिमानोऽनुमानरूपो भवेत्, न चैवम्, किन्तु संभावनायामपि प्रामाण्याभिमानः संभावनारूप एवेति, साधर्म्यदर्शनस्य चागृहीतासंसर्गकार्थस्मृतिरूपत्वे संभावनाया उद्बोधकविधया, उत्कटकोटिकसंशयरूपत्वे तु साधारणधर्मदर्शनविधयोपयोगात्, संभावनाया एव च बहुशो व्यवहारहेतुत्वात्, प्रमाणभूतानुमानाभ्युपगमस्य न किञ्चित् प्रयोजनम्, अत एव न परकीयसंदेहादिप्रतिसन्धाननिमित्तशब्दप्रयोगाद्यनुपपत्तिः, येनानुमानं प्रमाणमनभ्युपगच्छन् चार्वाकः परकीयसंशयं विपर्ययमज्ञानं वा स्वप्रत्यक्षप्रमाणागोचरं केनावधारयेत्? तदीयचेष्टादिलिङ्गेनैव संशयादिकार्येण तदनुमानरूपं संशयाद्यवधारणं स्यात्, प्रत्यक्षस्य तत्राप्रसरादनुमानस्य चानभ्युपगमात्, तदनवधारणे च परार्थं वाक्योच्चारणमपि तस्य न स्यात्, परकीयं संशयादिकं ज्ञात्वैव तन्निवृत्त्यर्थं वाक्यमुच्चारयन्ति पण्डिताः, अन्यथोन्मत्तवाक्यवदनादरणीयत्वमेव यत्किञ्चित्प्रलापस्य स्यादित्याशङ्कोन्मेषो भवेत्; चेष्टादिना परकीयसंशयादिसंभावनयैव तन्निवृत्त्यर्थं परार्थवाक्योच्चारणप्रवृत्तिसंभवात् । ननु अर्थसंशयरूपसंभावनाया न प्रवृत्तिं प्रति कारणत्वम्, धूमदर्शनात् प्रागपि वह्निरूपार्थसंशयरूपसंभावनायाः सत्त्वेऽपि वह्न्यर्थिनस्तत्र प्रवृत्तेरभावेन व्यतिरेकव्यभिचारादिति चेत्? तत एवोत्कटकोटिकत्वं संशयविशेषणतयोपादीयते, धूमदर्शनात् प्राग् यः 'पर्वतोऽयं

वह्निमान् नवा' इति संशयोऽस्ति स न वह्निरूपविध्यंशे उत्कटकोटिक इति तस्य संभावनात्वाभावेन ततः प्रवृत्त्यभावेऽपि न व्यभिचारः ननु; धूमदर्शनोत्तरकालमपि पर्वतो वह्निमान् नवेत्येवमेवोपजायमानस्य संशयस्य धूमदर्शनप्राक्कालीनजायमानतथाविधसंशयतो विशेषाभावात् कथमुत्कटकोटिकत्वमिति चेत्? तर्हि वह्निरूपविध्यंशे उत्कटकोटिकवह्निसंशयं प्रति धूमदर्शनं कारणमित्येवं विशिष्य कार्यकारणभाव आद्रियताम्, तथा च धूमदर्शनात् प्राग् धूमदर्शनरूपकारणाभावाज्जायमानवह्निसंशयस्य वह्न्यंशेऽनुत्कटकोटिकत्वेऽपि धूमदर्शनोत्तरकाले जायमानस्य तस्योत्कटकोटिकत्वसंभवेन संभावनात्मकात् तस्माद् वह्न्यर्थिनस्तत्र प्रवृत्तिरुपपन्नैवेति । ननु अनुमानं न प्रमाणमिति यद् भवतो वाक्यं तत् प्रमाणमप्रमाणं वा?, यदि प्रमाणं तदा शब्दस्य प्रामाण्यं भवताऽप्युररीकृतमिति प्रत्यक्षमेवैकं प्रमाणमिति स्वमतव्याकोपः; अथ न प्रमाणं, तदा तस्याप्रामाण्यमप्रमाजनकत्वादेव स्यादिति तदर्थज्ञानमप्रमात्मकं वाच्यम्, तच्च तदा स्याद् यदि प्रमाणत्वाभावाभाववत्यनुमाने प्रमाणत्वाभावप्रकारकत्वं स्यादित्यनुमानप्रामाण्यापात इति चेत्? न–अनुमितिलक्षणप्रमात्मकफलाभावे तत्करणरूपस्यानुमानस्याप्यभावेन शशशृङ्गकल्पस्य तस्य न किञ्चित् कार्यं प्रति कारणत्वमित्येतद्वाक्यस्य प्रमाकरणत्वाभावरूपाप्रामाण्यविषयकज्ञानलक्षणविकल्पजनकत्वेन प्रामाण्यासंभवात्, विकल्पमात्रस्यासदर्थविषयकत्वेन प्रमात्वानभ्युपगमात्, एतावतोक्तवाक्यस्याप्रामाण्येऽपि नानुमानस्य प्रामाण्यमापतत्यसत्ख्यातिवादिनश्चार्वाकस्य । ननु ज्ञाने प्रामाण्यस्य स्वतो ग्राह्यत्वे इदं ज्ञानं प्रमा न वेति संशयो न स्यात्, संशये धर्मिज्ञानस्य कारणत्वेन धर्मिणो ज्ञानस्य ग्रहे तद्ग्राहकेण तद्गतप्रामाण्यनिश्चयेन प्रामाण्यसंशयप्रतिबन्धात्, धर्मिणो ज्ञानस्याग्रहे तु धर्मिज्ञानाभावादेव संशयासंभवादिति संशयानुरोधेन प्रामाण्यस्य परतो ग्राह्यत्वमेवाभ्युपेयम्, तथा च 'प्रत्यक्षं प्रमाणं संवादिप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवं यथा भ्रमः' इत्यनुमानेनैव प्रत्यक्षस्य प्रामाण्यं गृह्यत इति प्रत्यक्षस्य प्रामाण्यमभ्युपगच्छता चार्वाकेणानुमानस्यापि प्रामाण्यमभ्युपेयमेव, अन्यथा प्रत्यक्षस्यापि प्रामाण्यं न सिध्येदिति चेत्? न–निर्विकल्पकप्रत्यक्षस्यैव प्रामाण्यस्याभ्युपगमेन तत्र स्वलक्षणविषयकत्वरूपव्यावर्तकधर्मदर्शनस्य संशयप्रतिबन्धकस्य सद्भावेन स्वसंवेदनेन तद्व्यक्त्यात्मकसद्विषयकत्वरूपप्रामाण्यनिश्चयेन च संशयस्यैवाभावात्, सवि-

कल्पकप्रत्यक्षस्यानुमानवदप्रमाणतयैव स्वीकृतत्वेन तत्र प्रामाण्यसाधनस्य चार्वाकाननुष्ठेयत्वात्, निर्विकल्पकं यथा स्वसंवेदनसिद्धं तथा तद्वतानि सन्मात्रावलम्बनत्व-स्वप्रकाशविषयत्व-प्रामाण्यावगाहित्वान्यपि तत्स्वरूपत्वादेव स्वसंवेदनसिद्धान्येवेति न तत्सिद्ध्यर्थमनुमानस्यापेक्षणम्, तत्तद्रूपेण संभावनाविषयत्वादेव च निर्विकल्पकं सन्मात्रविषयं स्वप्रकाशविषयं प्रामाण्यविषयमित्यादिधियोऽयं घट इति धीवत् सम्भवन्ति, विर्विकल्पकं सन्मात्रविषयमिति संभाव्यते, निर्विकल्पकं स्वप्रकाशविषयमिति संभाव्यते, निर्विकल्पकं प्रामाण्यावगाहीति संभाव्यते, इत्येव भवति, न त्वनुमीयत इति नानुमानापेक्षाऽत्रापीति । अत एव शब्दोऽपि न प्रमाणम्, परस्परविरुद्धार्थाभिधायकानामागमानां मध्येऽयमागमः प्रमाणमयं च न प्रमाणमित्यस्य विनिगन्तुमशक्यत्वेन विनिगमनाविरहात् सर्वस्य प्रामाण्ये नित्यत्वा-ऽनित्यत्वादिकं सर्वं परस्परविरुद्धमेकत्र सिद्ध्येत्, तथा च विरोधवातैर्वोच्छिद्येत, ततः सर्वेषामागमानामप्रामाण्यमेवास्थेयम्, तथा च न प्रमाणजन्योऽपि शब्दः, किन्तु वासनामात्रप्रभवो वासनामात्रजनकश्च, वासना च पूर्वपूर्वविकल्पप्रभवस्तत्समानोऽसदर्थविषयक उत्तरोत्तरविकल्प एव, न तु पूर्वानुभवजनित उत्तरस्मृतिजनको भावनाख्यः संस्कारो नैयायिकाद्यभिमतश्चार्वाकसंमतः, तस्यातीन्द्रियत्वेन प्रत्यक्षप्रमाणागोचरतया प्रत्यक्षमात्रप्रमाणवादिना चार्वाकेणाभ्युपगन्तुमशक्यत्वात्, एवं च—

"विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ॥
कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यपि ॥ १ ॥" [ ] इति

बौद्धवचनमेतन्मतस्याप्युद्बलकम्, यदि शब्दः सदर्थप्रतिपादक एवेत्यभ्युपगम्येत तदाऽसदर्थप्रतिपादकशशशृङ्गादिशब्दप्रयोगो दुर्घट एव स्यात्, एवं स्वोत्प्रेक्षापरिकल्पितार्थगोचरनिबन्धगुम्फनमपि न स्यात्, वासनामात्रप्रभवत्वे च स्वकर्तृकविगतोत्प्रेक्षालक्षणवासनातस्तत्समुदायः स्वाध्ययनकर्तृणां स्वप्रभववासनासमुल्लासश्च घटते । नन्वेवं शब्दस्याप्रमाणत्वे तवागमोऽपि प्रमितिफलाजनकत्वान्निरर्थकः स्यादिति चेत्? न-ममागमस्य परं प्रति दूषणपर्यनुयोगपरत्वात्, परस्य दूषणपर्यनुयोगनिर्वर्तकोत्तरादानमात्रेण निग्रहे सति परनिग्रहप्रयोजकत्वेन ममागमस्य सार्थक्यात्, अत एव चार्वाकमतप्रवर्तकस्य बृहस्पतेः परं प्रति पर्यनुयोगपराण्येव सूत्राणि, तदुक्तम्-"सर्वत्र पर्यनुयोगपराणि सूत्राणि

बृहस्पतेः'' इति, तथा च प्रत्यक्षाविषये अलौकिके धर्माधर्मादावात्मनि च शरीरव्यतिरिक्ते मानाभावान्नास्त्यात्मेति लोकायतिकप्रवादः ॥ ३० ॥

शरीरव्यतिरिक्तात्मवादिनां परमपुरुषार्थमोक्षाभ्युपगन्तॄणामार्हतानां मतमुपदर्शयति—

अचेतनानि भूतानि, न तद्धर्मो न तत्फलम् ।
चेतनाऽस्ति च यस्येयं स एवात्मेति चापरे ॥ ३१ ॥

अचेतनानीति–**भूतानि** पृथिव्यादीनि । **अचेतनानि** चैतन्याभाववत्त्वेन प्रमात्मकविज्ञानविषयत्वाच्चैतन्यरहितानि, अचैतन्यवत्तया प्रमिते चैतन्यवत्त्वस्याभ्युपगन्तुमशक्यत्वात् , चेतना चैतन्यम् । **तद्धर्मो न** अविष्वग्भावसम्बन्धेन भूतवृत्तिर्न, तेनावच्छेदकतासम्बन्धेन शरीरात्मकभूते चैतन्यस्य वृत्तित्वेऽपि न क्षतिः, ये नैयायिकादय आत्मनो विभुत्वमिच्छन्ति तेषां मते आत्मनोऽन्यदेशे सत्त्वेऽपि न तत्र चैतन्यं किन्तु शरीर एवेत्यव्याप्यवृत्तिनश्चैतन्यस्यावच्छेदकशरीरमावश्यकम्, जैनमते तु शरीरपरिणामतुल्यकपरिणाम एवात्मेति सम्पूर्णात्मन्येव चैतन्यमिति व्याप्यवृत्तेस्तस्यावच्छेदकं किमिति परिकल्प्यमिति नारेकणीयम्, जैनमते धर्ममात्रस्यैवाव्याप्यवृत्तित्वेनाभ्युपगमात् , सम्पूर्णात्मनि विद्यमानमपि चैतन्यं सावच्छिन्नं भवत्येव, तत्रावच्छेदकतया प्रतीयमानस्य शरीरस्यावच्छेदकतासम्बन्धेन तदालम्बनत्वं सम्भवत्येव, चैतन्यस्य भेदसम्पृक्ताभेदलक्षणाविष्वग्भावसम्बन्धेन भूतवृत्तित्वप्रतिषेधार्थमेवान्यत्र 'तद्धर्मो न भूतस्वभावभूतो न' इति व्याख्यानम् , यत एव भूतधर्मश्चेतना न भवति तत एव **तत्फलं न** चेतना मूलक्षणोपादानकारणजन्या न, भूतोपादेया नेति यावत्, यथा जडस्वभावो घटो जडस्वभावाया एव मृद उपादेयस्तथाऽजडस्वभावा चेतना अजडस्वभावस्यैवोपादानस्योपादेया भवितुमर्हति, तत्स्वभावस्यैव तदुपादेयत्वमिति नियमात् । ननु सर्वमेव वस्तु जडस्वभावमेव, चेतना नाम जगति नास्त्येव, नहि शशशृङ्गादि कस्यचिद् धर्मो भवति, ततस्तस्याभूतधर्मत्वप्रतिषेधेन न काचिदिष्टसिद्धिरित्यत आह–**अस्ति चेति**-यथा गोचरीक्रियमाणत्वादेवान्ये पदार्थाः सिद्ध्यन्ति, अन्यथा शून्यमेव जगत् स्यात्, सा प्रतिप्राणि स्वसंवेदनात्मकानुभवगोचरीक्रियमाणाऽस्त्येवेत्यर्थः । ननु चेतनाया अस्तित्वेऽपि भूत-

धर्मत्व-भूतफलत्वयोरभावेऽपि चात्मनः किमायातमत आह-**यस्येयमिति**-इयं-चेतना, यत्स्वभावभूता यत्फलभूता च। **स एवात्मा**'चेतना-चैतन्यं कस्यचित् स्वभावो धर्मत्वात्, यो यो धर्मः स कस्यचित् स्वभावः, यथा जाड्यम्, 'चैतन्यं न भूतानां स्वभावः जाड्यानात्मकत्वात्, यन्नैवं तन्नैवं यथा मृत्त्वादिकम्' 'चैतन्यं भूतव्यतिरिक्तस्य स्वभावः, भूतस्वभावत्वाभावे सति स्वभावत्वाद्' इति परिशेषानुमानेन यत्स्वभावत्वं चैतन्यं सिद्ध्यति स एवात्मा, एवं 'तत्तदवगाहितयोपलभ्यमानं चैतन्यं कस्यचिदुपादेयं कादाचित्कभावत्वात्, यत् कादाचित्कभावस्वरूपं तत् कस्यचिदुपादेयम्, यथा घटादि' 'तन्न जडोपादेयमजडस्वभावत्वात्, यद् यत्स्वभावं न भवति तत् तदुपादेयमपि न भवति, यथा चेतनस्वभावविकलो घटो न चेतनोपादेयः' 'तच्चेतनोपादेयम् अचेतनोपादेयत्वाभावे सत्युपादेयत्वाद्' इत्यनुमानेन चैतन्यस्य चेतनोपादेयत्वे सिद्धे तदुपादानं यत् स एवात्मेति सिद्धम्, । **इति च** एवंस्वरूपं च। **अपरे** न परे-अपरे इति व्युत्पत्त्या ग्रन्थकर्तृजातीया **जैनाः**, वदन्तीति द्रष्टव्यम् ॥ ३१ ॥

उपदर्शितानुमाने हेतौ साध्याभाववद्वृत्तित्वस्य साध्याभाववति हेतुसत्त्वस्य वा बाधकं तर्कमुपदर्शयति—

यदीयं भूतधर्मः स्यात्, प्रत्येकं तेषु सर्वदा ।
उपलभ्येत सत्त्वादि-कठिनत्वादयो यथा ॥ ३२ ॥

यदीयमिति-इयं-चेतना । यदि **भूतधर्मः** पृथिव्यादिधर्मः । **स्यात्** भवेत्। यदीत्यनेन तदेत्याक्षिप्यते, तदा-भूतधर्मत्वाभ्युपगमे । **तेषु** भूतेषु । **प्रत्येकं** शरीरात्मकसङ्घातावस्थाऽनापन्नदशायामपि । **सर्वदा** यदा यदा तत्तद्भूतेन सहेन्द्रियसंयोगस्तत्तद्भूतप्रत्यक्षकारणं विद्यते तदानीम् । **उपलभ्येत** प्रत्यक्षविषयः स्यात्। **सत्त्वादि कठिनत्वादयो यथा** योग्याः सत्त्वादयो भूतसामान्यधर्मा यस्य कस्यचिद् भूतस्य प्रत्यक्षे तद्भूततयोपलभ्यन्ते, एवं चैतन्यमपि यदि भूतसामान्यधर्मः स्यात् तदा यस्य कस्यचिद् भूतस्य प्रत्यक्षे तद्भूततयोपलभ्येत, यथा वा कठिनत्वादयो भूतविशेषधर्माः स्वाश्रयस्य भूतविशेषस्य प्रत्यक्षे तद्भूततयोपलभ्यन्ते तथा चैतन्यमपि भूतविशेषधर्मः स्यात् तदा स्वाश्रयभूतविशेषस्य प्रत्यक्षे तद्भूततयोपलभ्येत, भूतसामान्यधर्मतया भूतविशेषधर्मतया यत् पृथक्कृत्य चैतन्यस्य प्रत्यक्षापादनं तद् दृष्टान्तप्रदर्शकवचने मध्यगतादिपदस्यो-

पादानमनुसन्धाय, अन्यथा मध्ये आदिपदोपादानं न कमप्यर्थं पुष्णीयादन्त्यादिपदादेव धर्मान्तरग्रहणसम्भवादिति बोध्यम् ॥ ३२ ॥

प्रत्येकं भूतेषु सदा चैतन्योपलम्भापादनस्य परिहारं पराभिप्रेतं प्रतिक्षेप्तुमुपदर्शयति—

शक्तिरूपेण सा तेषु, सदाऽतो नोपलभ्यते ।
न च तेनापि रूपेण, सत्यसत्येव चेन्न तत् ॥ ३३ ॥

शक्तिरूपेणेति । **सा** चेतना । **तेषु** भूतेषु । **सदा** असंघातावस्थायामपि । **शक्तिरूपेण** अदृश्येन शक्तिरूपेण वर्तते । **अतः** अयोग्यशक्तिरूपेण विद्यमानत्वादेव कारणात् । **नोपलभ्यते** असङ्घातावस्थायामिन्द्रिय-भूतसंयोगेऽपि प्रत्यक्षविषयो न भवति, व्यक्तेरेव योग्यत्वं न शक्तेरिति प्रत्यक्षयोग्यस्य व्यक्तिरूपस्य तदानीमभावादेव चेतना सत्यपि नोपलभ्यत इत्यर्थः, **तेनापि रूपेण** अतीन्द्रियशक्त्याख्यस्वरूपेणापि । **सती** स्वरूपवती चेतना । **असती** तु तत्कालीनभूतवृत्त्यभावप्रतियोगिनी । **न च** नैव, योग्यानुपलब्ध्यैवाभावः सिद्ध्यति, न त्वयोग्यानुपलब्ध्या, शक्तेरयोग्यत्वेन शक्तिस्वरूपावच्छिन्नस्य चैतन्यस्याप्ययोग्यतया तदनुपलब्धिरयोग्यानुपलब्धिरेव, नास्यास्तदानीं चैतन्याभावः सिद्ध्यतीति । प्रतिक्षेप्ता आह–**इति चेदिति**–एवं त्वं मन्यसे यदीत्यर्थः । **न तत्** तवाभिमतमनन्तरमुपदर्शितं न युक्तम् ॥ ३३ ॥

कुतो न युक्तमित्यत आह—

शक्ति-चैतन्ययोरैक्यं, नानात्वं वाऽथ सर्वथा ।
ऐक्ये सा चेतनैवेति, नानात्वेऽन्यस्य सा यतः ॥ ३४ ॥

शक्ति-चैतन्ययोरिति—शक्तिलक्षणातीन्द्रियधर्म-चैतन्यलक्षणधर्मिणोरित्यर्थः । **ऐक्यम्** अभेदः । **सर्वथा** भेदासहिष्णुतया । **वा अथेति** द्वयं पक्षान्तरावबोधकम् । **नानात्वं** भेदः । **सर्वथा** अभेदासहिष्णुतया । सर्वथैक्य-सर्वथाभेदपक्षयोराद्यं सर्वथैक्यपक्षमधिकृत्याह–**ऐक्य इति**–शक्ति-चैतन्ययोः सर्वथैक्ये, भेदासहिष्ण्वभेद इत्यर्थः । **सा** शक्तिः । **चेतनैव** चेतनास्वरूपैव, न तु तदन्या, एकान्ताभेदाभ्युपगमात्, तथा च चेतना यदि योग्या तदा तदात्मिका शक्तिरपि योग्येति असंघातावस्थायामपि चेतनायाः प्रत्यक्षप्रसङ्गः, यदि च न योग्या तदा संघातावस्थायामपि सैवेति तदाऽपि तदनुपलब्धिप्रसङ्ग

इत्यर्थः । द्वितीयपक्षमधिकृत्याह-**नानात्व** इति-शक्ति-चैतन्ययोः सर्वथा भेदे इत्यर्थः । **सा** चेतना । **अन्यस्य** भूतभिन्नस्य स्यादिति शेषः, भूतगता या शक्तिस्तद्भिन्ना सा न भूतानाम्, तेषां चेतनाभिन्नशक्तिरूपत्वात् । **यतः** यस्मादेवम्, तस्मात् परोक्तं न युक्तमिति "**न तत्**" इति पूर्वगतेन सह योजनातो लभ्यते ।

ननु पूर्वावस्थायां निर्विकल्पकैकज्ञानगोचरीभूता चेतनाऽस्त्येव, तस्या व्यक्तरूपचेतनाजनकतालक्षणा शक्तिः स्वाभिन्नव्यक्तिरूपा समस्ति, व्यक्तरूपचेतनाजनकतालक्षणशक्तिरूपेण च सा न पूर्वं सविकल्पकज्ञानगोचर इति तदानीं चेतनायाः सविकल्पकज्ञानलक्षणोपलब्ध्यभावप्रसङ्गनं नानिष्टमिति चेत्? नया सङ्गतदशायां व्यक्तचेतना सविकल्पकसंवेद्याऽभिमता साऽप्युत्तरचेतनाजननी चेतनाप्रवाहाविच्छेदान्यथाऽनुपपत्त्याऽवश्यमेषितव्या, तस्या अप्युत्तरचेतनाजनकतालक्षणशक्तिरूपेणायोग्यत्वात् सविकल्पकासंवेद्यत्वप्रसङ्गात्, उत्तरज्ञानजनिका व्यक्तचेतना चेतनात्वेनैव योग्या, न तूत्तरज्ञानजनकतालक्षणशक्तिरूपेणेति तद्रूपेण सविकल्पकज्ञानागोचरत्वप्रसङ्गनं तस्या नानिष्टमिति चेत्? एवं सत्यसङ्गतलक्षणप्रत्येकभूतदशायामपि निरुक्तशक्तिरूपेणायोग्याऽपि चेतना चेतनात्वेन योग्यैवेति चेतनात्वेन सविकल्पकसंवेद्या प्रसज्येत, अथवा चेतनात्वं तत्र न स्यादिति महासङ्कटे प्रविष्टश्चार्वाकवराक इति ॥ ३४ ॥

प्रत्येकदशायामनभिव्यक्ता चेतनैव शक्तिरिति तदानीमनभिव्यक्तत्वादेव सा नोपलभ्यत इति पराशयं दूषयति—

अनभिव्यक्तिरप्यस्या न्यायतो नोपपद्यते ।
आवृतिर्न यदन्येन, तत्त्वसङ्ख्याविरोधतः ॥ ३५ ॥

अनभिव्यक्तिरपीति-अस्याः चेतनायाः । **अनभिव्यक्तिरपि** अभिव्यक्तिप्रतिबन्धकदोषसमवधानस्वरूपावृतिरेवानभिव्यक्तिरत्राभिमता स्यात्, तदन्यस्वरूपतया तस्या निर्वक्तुमशक्यत्वात्, साऽपि । **न्यायतः** परमार्थविचारस्वरूपया नीत्या । **नोपपद्यते** अबाधितप्रतीतिविषयो न भवति । भवतु निरुक्तावृतिस्वरूपैवानभिव्यक्तिः, तस्याः कथमनुपपन्नत्वमित्यत आह-**आवृतिरिति** । **यत्** यस्मात् कारणात् । **अन्येन** भूतव्यतिरिक्तेन । **आवृत्तिः** चेतनाभिव्यक्तिप्रतिबन्धो न । भूतव्यतिरिक्तेन चेतनाभिव्यक्तिप्रतिबन्धाभ्युपगमे

चार्वाकस्य किमनिष्टं स्याद् येन न भूतव्यतिरिक्तेन प्रतिबन्ध इत्यत आह–**तत्त्वसङ्ख्याविरोधत** इति–पृथिव्यप्तेजोवाय्वात्मकभूतचतुष्टयमेव तत्त्वमित्येवं निर्धारिता या तत्त्वस्य चतुष्टसङ्ख्या तस्या विरोधतः-अभावप्रसङ्गात्, तथा च स्वसिद्धान्तव्याकोपभयाद् भूतातिरिक्तं नास्त्येव किञ्चित् तत्त्वम्, यच्चेतनोपलब्धिप्रतिबन्धकं भवेत्, भूतानि च चेतनाया आश्रयत्वादभिव्यञ्जकान्येवेत्यतोऽनभिव्यक्तिर्नोपपद्यत इति युक्तियुक्तमिति भावः ॥ ३५ ॥

भूतानां चेतनाभिव्यञ्जकत्वादेव न केनचिद्रूपेण चेतनाऽऽवारकत्वमित्याह—

न चासौ तत्स्वरूपेण, तेषामन्यतरेण वा ।
व्यञ्जकत्वप्रतिज्ञानात्, नावृतिर्व्यञ्जकं यतः ॥ ३६ ॥

न चासाविति–असौ चेतनावृतिः। **तत्स्वरूपेण** भूतत्वादिना भूतस्वरूपेण। **न च** नैव । **वा** अथवा । **तेषां** भूतानाम्। **अन्यतरेण** पृथिवीत्व-जलत्व-तेजस्त्व-वायुत्वान्यतमस्वरूपेण पृथिवीजलान्यतरत्व-पृथिवीतेजोऽन्यतरत्व-पृथिवीवाय्वन्यतरत्व-जलतेजोऽन्यतरत्व-जलवाय्वन्यतरत्व तेजोवाय्वन्यतरत्वादिना वा, न च । कुतो नेत्यत आह–**व्यञ्जकत्वप्रतिज्ञानादिति**–भूतानां चैतन्यसाक्षात्कारजनकत्वस्वीकारादित्यर्थः । भूतानां चैतन्याभिव्यञ्जकत्वेऽपि चैतन्यावारकत्वमस्त्वित्यत आह–**नावृतिरिति** । **यतः** यस्मात् कारणात् । **आवृतिः** चैतन्यसाक्षात्कारकारणीभूताभावप्रतियोगित्वलक्षणचैतन्यसाक्षात्कारप्रतिबन्धकत्व-चैतन्यसाक्षात्कारजनकत्वलक्षणचैतन्यव्यञ्जकत्वयोर्विरोधादेकत्र समावेशासम्भवेनावृतिर्व्यञ्जकं चैकं न भवितुमर्हतीति ॥ ३६ ॥

ननु कायाकारपरिणतेष्वेव भूतेषु चैतन्यमुपलभ्यत इति कायाकारपरिणतानां भूतानां चैतन्याभिव्यञ्जकत्वम्, कायाकारेणापरिणतेषु भूतेषु चैतन्यं नोपलभ्यत इति कायाकारपरिणामाभाव एव चैतन्योपलम्भप्रतिबन्धकत्वादावृतिरित्याशङ्काप्रतिक्षेपार्थमाह—

विशिष्टपरिणामाभावेऽपि ह्यत्रावृतिर्न वै ।
भावताऽऽप्तेस्तथा नाम-व्यञ्जकत्वप्रसङ्गतः ॥ ३७ ॥

विशिष्टेति-**विशिष्टपरिणामाभावेऽपि** प्राणा-ऽपान-वाक्-कायाकारपरिणामाभावेऽपि । **हिः** पादपूरणे । **वै** निश्चितम् । **अत्र** भूतगतचैतन्ये, सप्त-

म्यर्थो निरूपितत्वम् । **आवृतिः** भावप्रधाननिर्देशादावारकत्वम्, **विशिष्ट-परिणामाभावोऽपीति** पाठे तु भावप्रधाननिर्देशानाश्रयणेऽपि नान्वयानुपपत्तिः । **न नैव** । निषेधे हेतुमाह–**भावतान्नेरिति**–यत्र यत्रावारकत्वं तत्र भावत्वमित्येवमावारकत्वस्य भावत्वव्याप्यत्वेन विशिष्टपरिणामाभावस्यावारकत्वे भावत्वप्रसङ्गादित्यर्थः । नन्वन्धकारोऽपि दृष्टिप्रतिरोधकत्वाच्चाक्षुषप्रत्यक्षप्रतिबन्धकत्वेन चक्षुष आवारको भवति, स च नैयायिकैरुत्कृष्टतेजोऽभावरूप एवोपेयत इति तत्राऽऽवारकत्वमस्ति भावत्वं च नास्तीति व्यभिचारेणाऽऽवारकत्वं न भावत्वमिति चेत्? न–अन्धकारे द्रव्यत्वस्य स्याद्वादवादिभिर्बहुषु ग्रन्थेषु व्यवस्थापितत्वात्, तुच्छत्वादभावस्य नावारकत्वं तथात्वे भावत्वापत्तिरिति मूलकृदभिमतं व्याख्यातम् । दूषणान्तरमाह-**तथेति** । **नामव्यञ्जकत्वप्रसङ्गतः** नमनं–परिणमनं नामेति, नामस्य–परिणामस्य प्राणापानवाक्कायाकारपरिणामस्य, व्यञ्जकत्वं–चैतन्यसाक्षात्कारजनकत्वम्, तस्य प्रसङ्गतः–आपत्तेः, कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम्, तच्च चैतन्यसाक्षात्कारं प्रति विशिष्टपरिणामस्य तदा स्याद् यदि विशिष्टपरिणामाभावाऽभावश्चैतन्यसाक्षात्कारं प्रति तत्त्वेन कारणं स्यात्, तच्च न युक्तं विशिष्टपरिणामाभावाभावत्वेन निरुक्ताभावस्य कारणत्वकल्पनापेक्षया लाघवेन विशिष्टपरिणामत्वेन विशिष्टपरिणामस्यैव चैतन्यसाक्षात्कारं प्रति कारणत्वस्य कल्पयितुमुचितत्वादित्येवं व्यञ्जकत्वप्रसङ्गादित्याशयः ॥ ३७ ॥

ननु विशिष्टपरिणामस्य चैतन्यसाक्षात्कारजनकत्वमिष्टमेव चार्वाकस्येत्यत आह—

न चासौ भूतभिन्नो यत्, ततो व्यक्तिः सदा भवेत् ।
भेदे त्वधिकभावेन, तत्त्वसङ्ख्या न युज्यते ॥ ३८ ॥

न चासाविति–असौ विशिष्टपरिणामः । **भूतभिन्नो** भूतारिक्तः । **यत्** यस्माद्धेतोः । **न च ततः** तस्मात् कारणात्, **सदा** असङ्घातावस्थायामपि, भूतेन्द्रियसन्निकर्षे सति । **व्यक्तिः** चैतन्यसाक्षात्कारः, **भवेत्** स्यात्, यावद्भूतकालभाविनो भूताभिन्नविशिष्टपरिणामस्य चैतन्याभिव्यञ्जकस्य तदानीमपि सत्त्वात् । **भेदे तु** विशिष्टपरिणामस्य भूतेभ्यो भिन्नत्वेऽभ्युपगम्यमाने पुनः । **अधिकभावेन** अधिकस्य भूतचतुष्टयव्यतिरिक्तस्य विशिष्टपरिणामस्य सद्भावेन । **तत्त्वसङ्ख्या** "चत्वार्येव भूतानि" इतिवचनान्निर्धारिता तत्त्व-

चतुष्कसङ्ख्या। **न युज्येत** न युक्ता स्यात्, तथा च स्वसिद्धान्तव्याकोप इति भावः ॥ ३८ ॥

ननु विशिष्टपरिणामस्य यावद्भूतकालसत्त्वं नाङ्गीक्रियते, नैतावता तस्य भूताभिन्नत्वव्याहतिः, यदा स परिणामो भवति तदा स भूताभिन्न एव, एवं च सर्वदा तस्यासत्त्वान्न सर्वदा चैतन्योपलम्भप्रसङ्गः, किन्तु यदा स विद्यते तदा चैतन्योपलम्भ इति पराकूतमाशङ्क्य प्रतिक्षिपति—

स्वकालेऽभिन्न इत्येवं, कालाभावे न सङ्गतम्।
लोकसिद्धाश्रये त्वात्मा, हन्त! नाश्रीयते कथम्?॥ ३९ ॥

स्वकाल इति—तथाविधपरिणामभवनकाले इत्यर्थः। **अभिन्नः** भूतो निरुक्तपरिणामाभिन्नः, निरुक्तपरिणामो वा भूताभिन्नः, तथा च निरुक्तपरिणामोऽपि परिणामिभूतचतुष्टयान्यतमान्तर्गत एवेति तत्त्वसङ्ख्याव्याघातो न भवति, विशिष्टपरिणामाभावकाले च भूतस्य विशिष्टपरिणामभिन्नत्वेन विशिष्टपरिणामरूपव्यञ्जकाभावान्न चैतन्योपलम्भप्रसङ्गः, एकस्मिन्नपि भूते विभिन्नकालावच्छेदेन विशिष्टपरिणामभेदाऽभेदयोः सत्त्वं न विरोधापनेयम्, एकस्मिन् घटे पाककालतदन्यकालावच्छेदकभेदेन श्यामभेद-श्यामाभेदोभयस्यापि सत्त्वम्, श्यामभेदसत्त्वत एव "अयं न श्यामः" इति धीस्तत्र जायते, न चेयं धीर्विशेषणस्य श्यामरूपस्य पाकाद् विनाशेन तत्संसर्गाभावावगाहिनी, न तु श्यामभेदावगाहिनीति वाच्यम्, धार्मिवाचकपदोत्तरसप्तमीविभक्तिसमभिव्याहृतेनैव नञा संसर्गाभावो बोध्यत इति नियमेन प्रकृतेऽनुयोगिवाचकेदम्पदोत्तरप्रथमाविभक्तेरेव सत्त्वेनानुयोगिवाचकपदोत्तरसप्तमीविभक्तिसमभिव्याहृतत्वाभावान्नञा संसर्गाभावबोधनासंभवात्, तथैकत्र विशेषणतयोपस्थितस्य नान्यत्र विशेषणतयाऽन्वय इति प्रकृते श्यामपदस्य श्यामरूपवदर्थैकत्वे सम्बन्धिनि विशेषणतयोपस्थितस्य श्यामरूपस्य प्रतियोगितासम्बन्धेन नञर्थाभावे विशेषणतयाऽन्वयासम्भवाच्च, यत्रानुयोगिवाचकपद-प्रतियोगिवाचकपदयोः समानविभक्तिकत्वं तत्र नञाऽन्योऽन्याभावो बोध्यत इति नियमतोऽन्योऽन्याभावबोधकस्यैवात्र न्याय्यत्वाच्च। **इत्येवम्** एतत्प्रकारं प्रकृतवचनम्। **कालाभावे** कालरूपतत्त्वान्तराभावे। **न सङ्गतं** न युक्तम्, अलीकमिति यावत्, भूतचतुष्टयमात्रतत्त्ववादिभिश्चार्वाकैर्नहि कालो नाम तत्त्वान्तरमिष्यते। "**लोकसिद्धाश्रये तु** लोकसिद्धस्य

कालस्याश्रये पुनः क्रियमाणे । आत्मा हन्त ! नाश्रीयते कथम्? तस्यापि लोकसिद्धत्वादित्यभिप्रायः" इत्येवं सामान्यतो व्याख्यातमुत्तरार्द्धं श्रीमद्भिर्हरिभद्रसूरिभिः ।

शिष्यबुद्धिवैशद्यार्थमवतार्य व्याख्यातं श्रीमद्भिर्यशोविजयोपाध्यायैरित्थम्– "अथ शब्द-तदुपजीविप्रमाणयोरेवानादरश्चार्वाकाणाम्, तन्मूलभूताऽऽप्तानाश्वासात्, अनुभवसिद्धस्त्वर्थो नापह्नोतुं शक्यः, अत एव तात्त्रिकलक्षणलक्षितमेवानुमानं प्रतिक्षिप्यते, तादृशप्रत्यक्षवत्, न तु बाल-गोपालसाधारणानलादिप्रतिपत्तिरूपम्, अन्यथा व्यवहारानिर्वाहात्, नहि धूमपरामर्शात् 'पर्वतो वह्निमान्' इति ज्ञानं जायमानं संशयरूपं स्मृतिरूपं वा संभवति, 'संदेह्मि, स्मरामि' इत्यननुसन्धानात् । किञ्च, परामर्शस्य निश्चयसामग्रीत्वान्न संशयहेतुत्वम्, 'पर्वतो वह्निमान्' इति पूर्वमननुभवाच्च न तादृशी स्मृतिः । अथ 'यो धूमवान् सोऽग्निमान्' इति व्याप्तिज्ञानं धूमवत्त्वावच्छेदेन वह्निप्रकारकं तथैव स्मृतिमनुमितिस्थानीयां जनयति, पर्वतत्वांशे उद्बुद्धसंस्काराद् वा ततः 'पर्वतो वह्निमान्' इति स्मृतिः, यथा बुद्धिविषयतावच्छेदकवच्छिन्नशक्तादपि तत्पदात् निरुक्तशक्तिग्रहाहितसंस्कारेण तत्तद्धर्मावच्छिन्नशक्त्यंशे उद्बुद्धेन सहकृतात् पर्वतत्वादिविशिष्टोपस्थितिरिति चेत्? न–विशिष्योद्बोधकहेतुत्वे गौरवात्, हेत्वाभासादिवैफल्यप्रसङ्गाच्च । तथाप्यनुमित्यभ्युपगमे प्रमाणान्तरप्रसङ्ग इति चेत्? न–अनुमितित्वस्य मानसत्वव्याप्यत्वात् "वह्निं न साक्षात्करोमि" इति प्रतीतेर्गुरुत्वादाविव लौकिकविषयताभावादेवोपपत्तेः, युक्तं चैतत् अनुमितित्वावच्छिन्नं प्रति चाक्षुषादिसामग्रीप्रतिबन्धकत्वाकल्पने लाघवादिति, तथा च इदानीं घट इत्यादिप्रतीतौ सम्बन्धघटकतया, परत्वादिलिङ्गेन वा कालसिद्धिरिति नव्यचार्वाकाशय इति चेत्? अत्राह–लोकसिद्धस्य कालस्याश्रयेऽङ्गीकारे तु 'हन्त' इति खेदे, आत्मा कथं नाश्रीयते श्रद्धीयते, लोकसिद्धत्वाविशेषेऽपि सकलप्रयोजनहेतोरन्यसाधारणगुणस्यानङ्गीकारः, तत्तद्वस्तुपरिणामान्यथासिद्धस्य कालस्य चाङ्गीकार इति पुरः परिस्फुरतोर्मणि-पाषाणयोर्मध्ये मणिपरित्याग-पाषाणग्रहणवदतिशोचनीयं विलसितमिदं देवानांप्रियस्य इति 'हन्त' इत्यनेन सूच्यते इति" ॥ ३९ ॥

आत्मनो लोकसिद्धत्वे न विप्रतिपत्तव्यमित्यावेदयितुं तस्य लोकसिद्धत्वं स्पष्टयति—

नात्मापि लोके नो सिद्धो, जातिस्मरणसंश्रयात् ।
सर्वेषां तदभावश्च, चित्रकर्मविपाकतः ॥ ४० ॥

नात्मा ऽपीति–आत्मपदानन्तरं श्रूयमाणमपिपदं लोकपदानन्तरं योज्यम्, लोकपदं च शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणानुसारिलोकपरम्, तथा च शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणानुसारिलोकेऽपीति । **आत्मा** चैतन्यस्वभावः । निषेधद्वयं प्रकृतमर्थं गमयतीति न्यायात् **नो सिद्धो** नेत्यनेनाऽऽत्मा सिद्ध एवेत्यवधार्यते । लोकसिद्धत्वे हेतुमुपदर्शयति–**जातिस्मरणसंश्रयादिति**–जातिस्मरणस्य–भवान्तरानुभूतार्थविषयकस्य मतिज्ञानविशेषस्य, संश्रयात्-लोकेनाङ्गीकरणात्, अनुभवस्मरणयोः समानविषयकयोः सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावस्यान्येनानुभूतस्यान्येन स्मरणप्रसङ्गो मा प्रसाङ्क्षीदित्येतदर्थमवश्यं स्वीकरणीयस्य पूर्वोत्तरभवानुयाय्यात्मद्रव्याभ्युपगममन्तरेणानुपपत्त्याऽऽत्मा लोकसिद्धो मन्तव्य एव, शरीरस्य त्ववयवोपचया-ऽपचयाभ्यां विनश्वरस्वभावस्यैकस्यैकजन्मन्यपि न पूर्वावस्थोत्तरावस्थाकालानुयायित्वं किमुत पूर्वोत्तरभवानुयायित्वमिति शरीरव्यतिरिक्त एवात्मा ततः सिद्ध्यति । ननु सर्वेऽप्यात्मानः यावन्न मुक्तिस्तावत् पूर्वभवाद् भवान्तरमागच्छन्त्येवेति पूर्वोत्तरभवानुयायित्वाविशेषे किमिति कस्यचिदेवाऽऽत्मनो जातिस्मरणं न सर्वेषामिति तटस्थाशङ्काप्रतिविधानार्थमाह–**सर्वेषामिति**–जातिस्मरणशालिजीवव्यतिरिक्तजीवानामित्यर्थः, तेन जातिस्मरण-जातिस्मरणाभावयोर्जीवत्वाव्यापकत्वेन सर्वेषां जातिस्मरणमिति यथाऽविशेषितसर्वजीवाभिप्रायेण न सम्भवति तथाऽविशेषितसर्वजीवाभिप्रायेण सर्वेषां जातिस्मरणाभाव इति वचनमप्यन्वयानुपपत्त्या न सम्भवतीत्याशङ्काया नोन्मेषः । **तदभावश्च** जातिस्मरणाभावश्च । **चित्रकर्मविपाकतः** चित्रस्य–बहुविधशक्तिकस्य, कर्मणः–जातिस्मरणरूपमतिज्ञानविशेषावरणकर्मणः, विपाकः–फलप्रदानाभिमुख्यकालस्तस्मात्, भवान्तरादागमनाविशेषेऽपि यस्यैव जीवस्य मतिज्ञानविशेषावरणीयकर्मक्षयोपशमविशेषस्तस्यैव मतिज्ञानविशेषजातिस्मरणं न त्वन्यस्येति भावः ॥ ४० ॥

उक्तमेदार्थं स्पष्टदृष्टान्तावष्टम्भेन निष्टङ्कयति—

लोकेऽपि नैकतः स्थानादागतानां तथेक्ष्यते ।
अविशेषेण सर्वेषामनुभूतार्थसंस्मृतिः ॥ ४१ ॥

लोकेऽपीति–इह लोकेऽपीत्यर्थः । **एकतः स्थानात्** विवक्षितैकग्राम-नगरादेः । **आगतानां** सर्वेषां प्राणिनाम् । **न तथेक्ष्यते** अनुभूतार्थसंस्मृतिरविशेषेण न दृश्यते, किन्तु कस्यचित् पटुमतेरत्यन्तमेधाशालिनस्तद्ग्रामस्थानुभूतानां यावतामपि पदार्थानां स्मृतिर्ग्रामान्तरगतस्यापि भवति, कस्यचित् त्वल्पमेधाविनोऽनुभूतपदार्थानां मध्यात् कतिपयपदार्थस्यैवातिहृद्यस्य स्मृतिरुपजायते, विस्मरणशीलस्य तु मन्दमतेरनुभूतस्य कस्यचिदपि पदार्थस्य स्मृतिर्नैवोपजायत इति विशेषो दृश्यते, तादृशविशेषस्य यथा चित्रकर्मविपाकप्रयोज्यत्वं तथा जात्यस्मरणस्यापि चित्रकर्मविपाकप्रयोज्यत्वम् । अथ तत्र दृष्टविशेषस्थले यदंशे संस्कारोद्बोधस्तदंशे स्मरणमित्यत्यन्तमेधाविनोऽनुभूतेषु सर्वेषु पदार्थेषु संस्कारोद्बोधतः सर्वेषामनुभूतानां स्मरणम्, अल्पमेधाविनश्चानुभूतकतिपयपदार्थ एव संस्कारोद्बोध इति कतिपयपदार्थस्यैव स्मरणम्, नष्टचित्तस्य त्वनुभवेन संस्कारो न जायत एव, जातोऽपि लुप्त एव, अलुप्तोऽपि नोद्बुद्ध इत्युद्बुद्धसंस्कारस्य कुत्राप्यनुभूतपदार्थेऽभावान्न कस्याप्यनुभूतस्य स्मरणमित्येवं विशेषस्यान्यथैवोपपत्तौ किं तत्प्रतिबन्धकादृष्टकल्पनेनेति चेत् ? सत्यम्–उद्बोधकानामपि स्मृत्यावरणक्षयोपशमाधायकतयैवोपयोगात्, स्मृत्यावरणकर्मक्षयोपशमस्यैव स्मृत्यन्तरङ्गहेतुत्वात्, उद्बोधकमन्तरापि स्मृत्यावरणकर्मक्षयोपशमपाटवात् झटिति स्मृत्युत्पत्तिदर्शनात्, संस्कारश्चोत्कर्षतः षट्षष्टिसागरोपमस्थितिकमतिज्ञानभेदान्तःपाती समतिक्रान्तसंख्यातभवावगमस्वरूपमतिज्ञानविशेषजातिस्मरणार्थं न प्राग्भवीय उपयुज्यते, किन्तु स्मृतिसामान्येऽनुभवव्यापाररक्षार्थं जातिस्मरणनियतेहादिचतुष्टयान्तर्भूत एव, तथाविधक्रमानुविद्धस्यैव छद्मस्थोपयोगस्य साधनात्, क्वचिदपायमात्रस्य क्वचन धारणामात्रस्य स्फुटत्वेऽपि दोषादन्यानपलक्षणात्; यदाह भगवान् जिनभद्रगणिक्षमाश्रमणः—

"उप्पलदलसयवेहे व्व दुव्विहावत्तणेऽवि हाइ ।
समयं व सुक्कसकुलिदसणे विसयाणुवलद्धि ॥

[उत्पलदलशतवेध इव दुर्विभावत्वेन प्रतिभाति ।
समकं वा शुष्कशष्कुलीदशने विषयाणामुपलब्धिः ॥
–विशेषावश्यकभाष्यगाथा-२९९] इति ।

एतद्विषये श्रीमन्तो यशोविजयोपाध्याया इत्थं व्यावर्णयाञ्चक्रुः–"अथावग्रहादीनां सूत्रोक्तक्रमनियमे हेतुमाह—

व्यतिक्रमोत्क्रमौ नैतैर्नैतेषां तत्त्वनिर्णयः ।
नेदंग् ज्ञेयस्वभावोऽपि, तदेते नियतक्रमः ॥ ७ ॥

अनानुपूर्वीभवनं व्यतिक्रमः, पश्चानुपूर्वीभवनमुत्क्रमः, अन्यतरवैकल्यं शून्यत्वम्, एतैर्वस्तुनस्तत्त्वनिर्णयो न स्यात्, तदेते एव वस्तुनिर्णयाय सर्वेऽपि क्रमनियमेनान्वेषणीयाः, नह्यनवगृहीतमीह्यते, धर्मिणोऽप्रसिद्धौ निरालम्बनविचाराप्रवृत्तेः; न चानीहितं निश्चीयते, तस्य विचारपूर्वकत्वात्; न च विचारं विनाऽपि कारणमहिम्ना तदुत्पादो युक्तो विचारस्यापि तत्कारणत्वेन तद्विरहे कारणमहिम्न एवासिद्धेः; न चानिश्चितं धार्यते, अन्यथा सन्देहादपि तत्प्रसङ्गादिति; वस्तुनोऽपि च सामान्य-विशेषस्वभावस्तथाज्ञानयोग्यतयैव व्यवस्थित इति तस्य तथाभावो युक्तः; यदाह—

"उक्कमओऽइक्कमओ, एगाभावे वि वा ण वत्थुस्स ।
जं सब्भावाहिगमो, तो सव्वे णियमियक्कमा य ॥"
[उत्क्रमतोऽतिक्रमतः, एकाभावेऽपि वा न वस्तुनः ।
यत् स्वभावाधिगमः ततः सर्वे नियमितक्रमाश्च ॥
–विशेषावश्यकभाष्यगाथा-२९५]

ईहिज्जइ णाऽगहियं णज्जइ नाणीहियं न याऽणायं ।
धारिज्जइ जं वत्थुं तेण कमोऽवग्गहाईओ ॥"
[ईह्यते नागृहीतं, ज्ञायते नानीहितं न चाज्ञातम् ।
धार्यते यद् वस्तु, तेन क्रमोऽवग्रहादिकः ॥"
–विशेषावश्यकभाष्यगाथा-२९६]

"एत्तो च्चिय ते सव्वे भवन्ति भिन्ना य णेव समकालं ।
न वइक्कमो य तेसिं ण अग्गहा नेव सब्भावो ॥"

[इत एव ते सर्वे भवन्ति भिन्नाश्च नैव समकालम् ।
न व्यतिक्रमश्च तेषां, नान्यथा ज्ञेयसद्भावः ॥"
–विशेषावश्यकभाष्यगाथा–२९७] ॥ ७ ॥

नन्वभ्यस्ते पुरुषेऽयं पुरुष इति प्रथममेव निर्णयः समुन्मीलति, अनुभूते च संस्कारोद्बोधात् प्रथममेव स पुरुष इति स्मृतिरुल्लसति, अनुभूयते च–झटित्येवायं पुरुषो निरणायि, झटित्येव चैवमस्मार्षमिति च, तथा च कथमन्यतराभावे न वस्तुभावज्ञानम्, आह च–

"अब्भत्थेऽवाओ चिय, कत्थइ लक्खिज्जइ इमो पुरिसो ।
अण्णत्थ धारण च्चिय, पुरोवलद्धे इमं तं ति ॥"
[अभ्यस्तेऽपाय एव क्वचिल्लक्ष्यतेऽसौ पुरुषः ।
अन्यत्र धारणैव पुरोपलब्धे इदं तदिति ॥
–विशेषावश्यकभाष्यगाथा-२९८] अत्रोच्यते—

"अभ्यस्ते निर्णयस्मृत्योर्लक्ष्यः सौक्ष्म्येण न क्रमः ।
पद्मपत्रशतच्छेदे यथा वाऽन्यत्र बुद्धिषु ॥ ८ ॥"

उक्तापाय-स्मृत्योरवग्रहेहादिष्वीहादेः कालसौक्ष्म्यादलक्षणेऽप्युक्तक्रमस्य प्रमाणसिद्धत्वान्न तत्र तदपलापः कर्तुं शक्यः, नहि पद्मपत्रशतच्छेदे सत्यपि कालभेदे तदलक्षणेन तदभावो नाम, नवा दीर्घशुष्कशष्कुलीभक्षणे तद्रूपदर्शनतज्जनितशब्दश्रवण-तद्गन्धाघ्राण-तद्रसास्वादन-तत्स्पर्शोपलब्धीनां यौगपद्याभिमानेऽपि कारणक्रमनियतस्तत्क्रमः प्रमाणसिद्धोऽपि नास्तीति वक्तुं शक्यते, एकदैकोपयोगस्वभावत्वान्मनसः सर्वेन्द्रियेषु तदसम्बन्धादाशु सञ्चारित्वेनैव तेनाशुकार्यजननात्, तथा च पारमर्षम्–"णो मणे देवासुरमणुआणं तंसि तंसि समयंसि त्ति" [नो मनो देवासुरमनुजानां तस्मिन् तस्मिन् समये इति ।] ननु भवतां मनसः शरीरव्यापित्वेन सर्वदा सर्वेन्द्रियसंयोगाद् युगपदनेकज्ञानोत्पत्तिर्दुर्वारा, तदणुत्वाभ्युपगम एवेन्द्रियेषु तत्संयोगक्रमेण ज्ञानक्रमसंभवादिति चेत्? न–अणुत्वाभ्युपगमेऽपि तस्य रसनेन्द्रियसंयोगकाले त्वक्संयोगस्य दुर्निवारत्वाद् युगपदुभयज्ञानोत्पत्तेर्दुर्निवार्यत्वात्, अदृष्टवैचित्र्यमहिम्नैव तद्वारणे च चित्रोपयोगक्रमादेव ज्ञानक्रम इति युक्तमभ्युपगन्तुमिति दिक् । तदिदमभिप्रेत्याह—

"उप्पलदलसयवेहे व्व दुव्विभावत्तणेण पडिहाई ।
समयं व सुक्कसक्कुलिदसणे विसयाणमुवलद्धी ॥"
[उत्पलदलशतवेध इव दुर्विभावेन प्रतिभाति ।
समकं वा शुष्कशष्कुलीदशने विषयाणामुपलब्धिः ॥
–विशेषावश्यकभाष्यगाथा–२९९]

अभ्यासस्थलेऽप्ययं पुरुष इति निर्णयेऽयं पुरुष इति प्रयोगे कस्यचिदाकाङ्क्षायां कर-चरणादिमत्त्वादिति प्रयोगात् तदनुगुणेहादेरनुमानात् तत्र तत्सत्त्वं सिद्ध्यतीत्याहुः" इति ।

यथा च जातिस्मरणेन पूर्वापरभवानुगामितया शरीरव्यतिरिक्तस्य चैतन्यस्वभावस्याऽऽत्मनः सिद्धिस्तथा सद्योजातस्य बालस्य स्तन्यपानप्रवृत्त्यन्यथानुपपत्त्याऽपि सिद्धिः, तथाहि प्रवृत्तित्वावच्छिन्नं प्रति इष्टसाधनताज्ञानस्य कारणत्वमन्वय-व्यतिरेकाभ्यामवधारितमिति सद्योजातस्य बालस्य स्तन्यपानप्रवृत्तिरिष्टसाधनताधीसाध्येत्यनुमीयते, बालस्य स्तन्यपानगोचरा प्रवृत्तिरिष्टसाधनताज्ञानजन्येत्यनुमितिश्च यत्र यत्र प्रवृत्तित्वं तत्र स्वगोचरविशेष्यकेष्टसाधनताज्ञानजन्यत्वमिति व्याप्तिस्मरणजन्येत्येवं रीत्या या परस्यावगतिस्तया यद्यपि न पूर्वापरभवानुयाय्यात्मसिद्धिः परस्यैकभव एव स्वप्रवृत्ताविष्टसाधनताज्ञानजन्यत्वप्रवृत्तित्वयोर्व्याप्त्यनुभवतो व्याप्तिस्मरणस्य सम्भवात्, किन्तु बालस्य स्तन्यपाने इष्टसाधनताज्ञाने सत्येव स्तन्यपाने प्रवृत्तिर्भवितुमर्हति, प्रवृत्तिं प्रति इष्टसाधनताज्ञानस्य कारणत्वेन तद्रूपकारणमन्तरेण तत्कार्यप्रवृत्तेरसम्भवात्, बालस्य स्तन्यपानं मदिष्टसाधनमिति ज्ञानं च न प्रत्यक्षरूपम्, तस्य तदानीं कारणताप्रत्यक्षजनकस्यान्वय-व्यतिरेकग्रहस्याभावात्, किन्त्वनुमितिरूपम्, तच्च व्याप्त्यादिस्मृतिजन्यम्, वर्तमानभवे सद्योजातस्य बालस्य केनचिद्धेतुना सममिष्टसाधनत्वरूपसाध्यस्याविनाभावोऽनुभावकाभावान्नानुभवेन ग्रहीतुं शक्य इत्येतज्जन्मनि न व्याप्तेरनुभव इति प्राग्भवीयानुभवसाध्या व्याप्त्यादिस्मृतिरिति सरागस्यैव जन्मदर्शनादित्येतत्पर्यवसितेन "वीतरागजन्मादर्शनात्" [ ] इति न्यायेन भवान्तरानुगाम्यात्मसिद्धिरित्यन्ये वर्णयन्ति । वस्तुतो यत् किमपि स्मरणं तत् कालान्तरानुभूतस्यैव भवति नाननुभूतस्येति स्मृतित्वावच्छिन्नं प्रति अनुभवत्वावच्छिन्नं कारणमिति पूर्वकाले यत्रानुभवस्तत्रैवोत्तरकाले स्मरणमिति स्मरणान्तरान्यथानुपपत्त्याऽपि लोकसिद्ध एवाऽऽत्माऽभ्युपेयः, अन्येनानुभूतस्या-

न्येन स्मरणे चैत्रेणानुभूतस्य मैत्रेणादिस्मरणप्रसङ्गः स्यादिति नान्यानुभूतमन्यः स्मरतीत्युपदर्शितकार्यकारणभावबलाद् व्यवस्थितौ शरीरस्य चैतन्ये बाल्येऽनुभूतस्य तारुण्ये स्मरणं न स्यात्, बाल-युवशरीरयोर्भेदात्, बाल-युवशरीरपरिणामभेदस्य द्रव्यभेदमन्तरेणानुपपत्तेः। न चोपादानोपादेयभाव आश्रयभेदेऽप्यनुभव-स्मरणयोर्नियामक इत्युपादानगतानुभवत उपादेये स्मरणमिति पूर्वपूर्वशरीरस्योत्तरोत्तरशरीरं प्रति उपादानतया बालशरीरगतानुभवाद् युवशरीरे स्मरणं भेदेऽपि भविष्यतीति वाच्यम्, अच्छिन्नकरादिकं छिन्नकरादिकं प्रत्यनुपादानमिति च्छिन्नकरादेरच्छिन्नकरानुभूतास्मरणप्रसङ्गात्। न चाच्छिन्नकरशरीरावयवकरेण यदनुभूतं तत् छिन्नकरात्मकखण्डशरीरोपादानापरकिञ्चिदवयवेनाप्यनुभूतमिति च्छिन्नकरात्मकखण्डशरीरोपादानावयवगतवासनायाश्छिन्नकरात्मकखण्डशरीरे सङ्क्रमात् तत्र स्मरणं भविष्यतीति वाच्यम्, अनुभवितुरेकस्य शरीरस्य यावन्तोऽवयवास्तेषु प्रत्येकमनुभवात्मकचैतन्येऽनुभवितृणामवयवानां नानात्वादनेकस्मरणप्रसङ्गात्, यावदवयवेष्वेकमेव चैतन्यं व्यासज्यवृत्तीत्येकस्यैव व्यासज्यवृत्तेः स्मरणस्य सम्भव इत्यप्यभ्युपगमो न युक्तः, तथा सति बहुत्वसङ्ख्याया यथा यत्किञ्चिदाश्रयनाशाद् विनाशस्तथाऽनुभवात्मकचैतन्यस्याप्येकस्य व्यासज्यवृत्तेरेकावयवविनाशे विनाशो भवेत्, एवं च पूर्वचैतन्यापगमे उत्तरचैतन्यमपि नोत्पद्येतेति छिन्नकरादौ स्मरणानुपपत्तिर्वज्रलेपायिता। यदि च परमाणुगतत्वमेव चैतन्यस्येति तदाश्रयपरमाणोर्विनाशाभावाच्छिन्नकरेऽपि तदाश्रितानुभवात्मकचैतन्यसद्भावात् स्मरणोपपत्तिरित्युच्यते तदा परमाणोरतीन्द्रियत्वात् तद्गतरूपादिकं यथा प्रत्यक्षं न भवति तथा चैतन्यमपि तद्गतमतीन्द्रियत्वान्न प्रत्यक्षं स्यादिति चैतन्याननुभवप्रसङ्गः। यथा रूपाणां भिन्नत्वेऽपि तत्स्कन्धस्यैक्यं तथा विज्ञानानां भिन्नत्वेऽपि तत्स्कन्धस्यैक्यमिति तत्प्रत्यक्षं स्मरणादिकं चोपपद्यत इति चेत्? न-उपादानोपादेयभूतयोः शरीरयोर्भिन्नत्वेन 'योऽहमनुभवामि सोऽहं स्मरामि' इत्यभेदावमर्शानुपपत्तेः। अनुभवितृ-स्मर्त्रोः शरीरयोर्भेदेऽपि सौसादृश्यदोषेण वैसादृश्यस्य तिरस्कारादुक्ताभेदावमर्श उपपत्स्यते, तथा च क्षणभङ्गपक्षे स्मृतिकुर्वद्रूपपरमाणुपुञ्जानामेव स्मृतिनियामकत्वात् स्मृत्युपपत्तिः स्यादिति चेत्? न स्थैर्यस्य तत्साधकप्रत्यभिज्ञाप्रामाण्यस्योपपादयिष्यमाणत्वेन क्षणभङ्गस्यैवासम्भवेन तदाश्रयणेन स्मृत्युपपादनस्य कर्तुमशक्यत्वात् ॥ ४१ ॥

आत्मनो लोकसिद्धत्वमुपपत्त्यन्तरेण व्यवस्थापयति—

दिव्यदर्शनतश्चैव, तच्छिष्टाव्यभिचारतः ।
पितृकर्मादिसिद्धेश्च, हन्त ! नात्माऽप्यलौकिकः ॥ ४२ ॥

दिव्यदर्शनतश्चैवेति–मन्त्रविशेषेणाकृष्टस्य विशिष्टशक्तिमत्पुरुषविशेषलक्षणपात्रागमनादिस्वरूपे पात्रावतारादौ दिव्यस्य-विशिष्टरूपस्य पुरुषस्य, यदवेक्षणं स्पष्टं भवति तस्माच्चैवेत्यर्थः । **हन्त !** इति खेदे । **आत्माऽप्यलौकिको न** लोकागम्य आत्मा न, किन्तु लोकगम्य एव भूतव्यतिरिक्तचैतन्यलक्षण आत्मा, यतो जडत्वान्मन्त्रविशेषाकृष्टस्य भूतविशेषस्यागमनमेव न संभवति, भूते विशिष्टशक्तिरपि नास्ति, एवं **तच्छिष्टाव्यभिचारतः** तेन-दिव्यदर्शनविषयेण मन्त्रविशेषाकर्षणत आगतेन पुरुषविशेषेण, यद्वचनं शिष्टं–कथितं 'तवोत्तरकाले इदं भविष्यति, पूर्वमिदं सञ्जातम्' इत्यादिरूपम्, तस्याव्यभिचारादविसंवादिप्रवृत्तिजनकत्वादपि, अलौकिक आत्मा नेति संबध्यते, तेन यद् यथा कथितं तत् तथैव भवतीत्यत्र कारणमतिशयिततद्विषयकज्ञानमेव, तदन्तरेण तद्वचनस्याविसंवादिप्रवृत्तिजनकत्वलक्षणाव्यभिचारासम्भवात्, तच्च ज्ञानमाश्रयीभूतात्मानमन्तरेण न सम्भवतीति । तथा **पितृकर्मादिसिद्धेश्च** येनाचारविशेषेण प्रसन्नाः सन्तः परलोकगताः पितरो वरप्रदानादिफलं प्रयच्छन्ति स वरप्रदानादिफलकपरलोकगतपितृप्रीत्यनुकूल आचारविशेषः पितृकर्म, आदिपदाद् विषबालनादि गृह्यते, तेषां निरुक्तपितृकर्मविषबालनादीनां सिद्धेस्तत्फलान्यथानुपपत्तेरपि आत्मा लोकसिद्धो भवति, यतस्तत्फलनिर्वाहकादृष्टरूपातिशयशालित्वं पितृकर्मादिकालतत्फलककालवर्तिन आत्मन एव संभवति, तत्तत्फलनिर्वाहकातिशयस्याऽदृष्टस्यालौकिकत्वेऽपि, दिव्यदर्शन-तद्विषयपुरुषकथितवचनाव्यभिचार-पितृकर्मादीनां तत्फलानां च प्रत्यक्षप्रमाणविषयत्वेन लौकिकानां व्यापारतया कारणकार्यान्तरालकालपतितकल्पितालौकिकातिशयसहकारेऽपि तत्र शक्ति-लक्षणान्यतरात्मकवृत्तिसव्यपेक्षशब्दव्यापाराभावात् करणफललौकिकत्वनिबन्धनलोकसिद्धत्वमात्मनोऽभिमानविषयो भवतीति, अतिशयश्च सुख-दुःखादिलक्षणभोगं प्रति सामानाधिकरण्यप्रत्यासत्त्यैव कारणमतस्तस्य भोक्तृनिष्ठत्वमेव न तु भोग्यनिष्ठत्वम्, तदुक्तं कुसुमाञ्जलौ नैयायिकप्रकाण्डेन उदयनाचार्येण—

"संस्कारः पुंस एवेष्टः, प्रोक्षणा-ऽभ्युक्षणादिभिः ।

स्वगुणाः परमाणूनां, विशेषाः पाकजादयः ॥" [स्तबक.१ का०११] इति, व्याख्यातं चेदं पद्यं वर्द्धमानोपाध्यायेन, तथाहि-"प्रोक्षणादिजन्यातिशयसिद्धावपि तस्य व्रीहिनिष्ठत्वं न सिद्ध्यतीत्याह—**संस्कार** इति-अतिशयधर्मिग्राहकमानादेव लाघवसहकृतात् स एक एव सिध्यति पुरुषनिष्ठश्च, तथाहि-व्रीहिगतत्वे न तावत् सकलव्रीहिनिष्ठ एक एव, एकव्रीहिनाशे तन्नाशापत्तेः, न च यावदाश्रयनाशात् तन्नाशः, लाघवादाश्रयनाशस्यैव तत्त्वात्, वृक्षादौ किञ्चिदाश्रयनाशात् तन्नाशेऽपि खण्डपटन्यायेन पुनरुत्पत्तिरित्यनेको वाच्यः, न चैवमेकव्रीहिनाशे फलानुदयः, तावत्संस्काराणामभावादिति वाच्यम्, संस्कारत्वेनैव प्रयोजकत्वात्, किञ्चित्तत्समवधानेऽपि दण्डादिवत् कार्यसत्त्वादिति गौरवम्; न च विनिगमकाभावः, प्रोक्षणमपूर्वजनकं दृष्टद्वाराभावे सति कालान्तरभाविफलजनकतया विहितत्वात्, यागवत्, न चाप्रयोजकत्वम्, यागादीनामपूर्वजनकतायामुक्तरूपस्यैव प्रयोजकत्वात्, अन्यस्यानुगतत्वादिति भावः, कृष्यादिना व्यभिचाराभावं परोक्तदृष्टान्तस्यासिद्धिं चाह-**स्वगुणा** इति-तत्र दृष्टद्वारस्यैव सम्भवान्न व्यभिचारः, नवा तत्र परमाणौ अतिशय इति दृष्टान्तः साध्यविकल इत्यर्थः; यद्यपि पाकजा रूपादयोऽपि तन्निष्ठातिशया एवेति न साध्यवैकल्यम्, तथाप्याधेयशक्त्यभावमात्रे तात्पर्यम्, न चाधेयशक्ति-पाकजयोरतीन्द्रियत्वाविशेषात् कल्पनायामविशेषः, परमाणावयविरूपादिसजातीयपाकजरूपाद्युत्पत्तेरावश्यकत्वात्, तत एव नियतकार्यजननोपपत्तेः शक्त्याधानकल्पने गौरवादिति भावः" इति ।

उक्तरीत्या लोकसिद्धस्य कालस्याश्रयणे, आत्मनोऽपि लोकसिद्धस्याश्रयणं चार्वाकस्य स्यादित्यभ्युपगमवादादुपदर्शितम्, वस्तुतो लोकसिद्धाश्रयणमपि चार्वाकस्य न युज्यते, तथाहि-अनुभवसिद्धार्थस्यापलापः कर्तुमशक्य इत्युपगमस्तावच्चार्वाकस्य न युक्तः, तदभ्युपगमबाधितत्वात्, कथमन्यथा जात्यादिवैशिष्ट्यस्यानुभवसिद्धस्यापलापश्चार्वाकस्य शोभेत । ननु यद्यपि जात्यादिवैशिष्ट्यमनुभूयते, तथापि जात्यादिवैशिष्ट्यं परीक्ष्यमाणं सन्नोपपद्यत इति बाधितोऽनुभवस्तस्य, अबाधितानुभवविषयस्यैवापलापो न युक्त इत्यभ्युपगम एवास्माकम्, तस्य न किञ्चिदपगतमिति चेत्? तर्हि अनुगताकारविषयत्वेन विशिष्टज्ञानमात्र एव

भवतां प्रामाण्याभावनिश्चयाद् विशिष्टज्ञाननिबन्धनस्य व्यवहारमात्रस्यैव बाधितानुभवप्रभवत्वेन बाधितत्वं प्रसज्येत; यदाऽपि यत्रानुगताकारविषयकत्वं तत्र प्रामाण्याभाव इत्येवं प्रामाण्याभावव्याप्यत्वमनुगताकारविषयकत्वेन निश्चीयते तदाऽपि व्यवहारकारणे विशिष्टज्ञानेऽप्रामाण्यसन्देहात् तत्प्रभवे व्यवहारेऽपि बाधितत्वसन्देहः स्यात्; ननूभयकोटिकः संशयो भावाभावलक्षणकोटिद्वयस्मरणे सत्येव समुन्मीषति नान्यथेत्येककोटेरस्मरणेऽप्रामाण्यसंशयाभावाद् बाधे सत्यपि बाधाप्रतिसन्धानात् प्रवृत्तिलक्षणो व्यवहारः स्यादिति चेत्? तत्र बाधप्रतिसन्धानमस्मृतैककोटेः पुरुषस्य प्रामाण्याप्रामाण्यसन्देहाभावात् मा भवतु व्यवहारबाधः, भवतस्तु प्रामाण्याभावव्याप्यविशिष्टविषयकत्वनिर्णयरूपविशेषदर्शनशालिनो बाधितवैशिष्ट्यविषयकज्ञानात् प्रवृत्तिर्न स्यादेव, प्रवृत्तावप्रामाण्यज्ञानानास्कन्दितज्ञानस्यैव कारणत्वात्; ननु निर्विकल्पकं न प्रमा नापि भ्रमः, तत्र प्रामाण्याभावव्याप्यं विशिष्टविषयकत्वमेव नास्ति, तथा चाप्रामाण्यज्ञानानास्कन्दिताद् धर्मिमात्रविषयकान्निर्विकल्पकाद् धर्मिमात्रविषयिण्या एव प्रवृत्तेरुपगमात् तादृशप्रवृत्तिलक्षणव्यवहारोऽबाधितप्रसर एवेति चेत्? एवं सति "तान्त्रिकलक्षणलक्षितमेवानुमानं प्रतिक्षिप्यते, न तु स्वप्रतिपत्तिरूपं व्यवहारचतुरम्" इति स्वाभ्युपगम एव विस्मृतो भवता, व्यवहारचतुरत्वस्य सविकल्पक एव भावात्, निर्विकल्पानन्तरभाविनः सविकल्पकादेव प्रवृत्तेरुपलभ्यमानत्वात्, सविकल्पकात्मकोत्तरज्ञानेन विनष्टस्य निर्विकल्पकस्य सविकल्पकोत्तरभाविप्रवृत्त्युपयोगित्वं कथं नाम श्रद्धेयम्; ननु सविकल्पकज्ञानस्यापि धर्म-धर्मिणोर्वैशिष्ट्यांश एवाप्रामाण्यम्, न तु धर्म्यंशे स्वप्रकाशत्वांशे च, तथा च धर्म्यंशेऽप्रामाण्यज्ञानानास्कन्दिताद् विशिष्टज्ञानाद् धर्म्यंशे प्रवृत्तिः स्यादेव, शुक्त्यादाविदं रजतमित्यादिज्ञानानां च विशिष्टवासनोपनीतरजताद्यलीकधर्म्यवगाहित्वेन न धर्म्यंशेऽपि प्रामाण्यमिति तेभ्यो जायमानाः प्रवृत्तयो विसंवादिन्यो भवन्तीति तदात्मकव्यवहाराणां निर्विषयत्वलक्षणो बाधो भवतीति, एवं चोक्तज्ञानानां धर्म्यंशेऽप्यप्रामाण्ये "सर्वं ज्ञानं धर्मिण्यभ्रान्तम्" इति प्रवादस्यानुपपत्तिरिष्टत्वान्न दोषावहेति चेत्? न–अस्मिन् ज्ञानेऽलीकधर्म्यवगाहितायां निमित्तं विशिष्टवासना न त्वन्यस्मिन् ज्ञाने इत्यत्र विनिगमकस्य कस्यचिदभावाद् विशिष्टज्ञानमात्र एव विशिष्टालीकलक्षणधर्म्यवगाहित्वे विशिष्टवासनासामर्थ्यस्याविशेषेण कल्पयितुं शक्यतया विशिष्टज्ञानमात्रस्थल एव व्यवहारबाधापत्तेर्भवतामनिवार्यत्वात्,

यदि चैवं सर्वविशिष्टज्ञानानां विशिष्टवासनासामर्थ्याद् विशिष्टालीकधर्म्यवगाहित्वतो मिथ्यात्वमेव भवेन्न सम्यक्त्वमिति सम्यग्मिथ्याज्ञानविभागानुपपत्तिः स्यात्, तत्परिहारार्थं केषुचिदेव विशिष्टज्ञानेष्वलीकविशिष्टधर्म्यवगाहितानिमित्तं विशिष्टवासना, नान्येषु विशिष्टज्ञानेष्वित्येवं कुसृष्टिकल्पनाऽऽद्रियते, तदा लाघवादेकत्र धर्मिणि प्रकारीभूतधर्मसत्त्वम्, अन्यत्र च तदसत्त्वमित्येतावन्मात्रमेवाश्रयणीयमिति; ननु इदं रजतमित्यत्र पुरोवर्ति रजतमनुभूयते, न च सत्यरजतं तत्रास्ति, ततो रजतस्यानुभूयमानपुरोवर्तित्वोपपत्तये तद्देशेऽलीकं रजतं कल्प्यते, सत्यरजतस्थले तु न मिथ्यारजतकल्पनायाः प्रयोजनं सत्यरजतस्यैव पुरोवर्तित्वादिति विशेषान्नोक्तानुपपत्तिरिति चेत्? न-इदमिति विषयतायां क्षयोपशमविशेषस्यैव प्रयोजकत्वेन पुरोवर्तितामन्तरेणापि तस्याः सम्भवेन तदर्थमतिरिक्तालीकरजतकल्पनाया अयुक्तत्वात्, तथाकल्पनेऽनन्तालीकरजताद्युत्पत्तिविनाशतद्धेत्वादिकल्पने महागौरवात्, यदि ज्ञान-प्रवृत्त्योर्विषयतासम्बन्धेन प्रवृत्तिं प्रति विषयतासम्बन्धेन ज्ञानं कारणमित्येवं समानविषयतया कार्यकारणभावः स्यात् तदा सत्यरजतासमवधानस्थलेऽलीकरजतगोचरप्रवृत्त्यन्यथानुपपत्त्या तज्जनकज्ञानेऽलीकरजतावगाहित्वस्यावश्यकतया तदर्थमलीकरजताद्युत्पत्ति-विनाशादिकल्पनागौरवं फलमुखत्वान्न दोषावहम्, किन्तु विशिष्याज्ञातेऽपि स्वर्गादिधर्मिणि प्रवृत्तिर्दृश्यते, सोक्तकार्यकारणभावाभ्युपगमे न भवेदतः प्रकारतासम्बन्धेन प्रवृत्तिं प्रति प्रकारतासम्बन्धेन ज्ञानं कारणमित्येवं समानप्रकारतयैव ज्ञान-प्रवृत्त्योः कार्यकारणभाव इति सत्यरजतासमवधानेऽपि रजतत्वप्रकारकशुक्ति-विशेष्यकज्ञानाद् रजतत्वप्रकारकशुक्तिविशेष्यकविसंवादिप्रवृत्युपपत्तेरलीकरजतावगाहित्वं ज्ञाने निष्प्रयोजनत्वान्न कल्पनीयमेवेति दिक्।

यदपि लोकसिद्धानुमितिरूपज्ञानस्योपगमेऽपि तत्रानुमितित्वं मानसत्वव्याप्यमेवेत्यनुमितिकरणमनुमानमित्येवंलक्षणलक्षितमनुमानप्रमाणं प्रत्यक्षप्रमाण एवान्तर्भवतीति नानुमानं प्रमाणान्तरमिति मननं चार्वाकस्य, तदप्यसमीचीनम्-वह्निव्याप्यधूमज्ञानानन्तरं वह्निमानसस्वीकारे मानसज्ञाने मनोरूपेन्द्रियजन्ये व्याप्तिज्ञानस्याप्रयोजकत्वाद् य एव व्यापकतया गृहीतः स एव मानसे भासत इति नियमाभावाल्लिङ्गादीनामपि तदानीं मानसापत्तेः, बाह्यपदार्थस्य मानसे भाने मनसो ज्ञानलक्षणालौकिकसन्निकर्षस्यैवापेक्षणात्, ज्ञानलक्षणालौकिकसन्निकर्षस्य प्रकृते वह्निव्याप्यो धूम इति व्याप्तिज्ञानरूपस्य विषयतया वह्नाविव

धूमेऽपि सम्भवात्; न च लिङ्गोपहितलैङ्गिकभानाभ्युपगन्तुरुदयनाचार्यस्य मते वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्येवमनुमितिरुपजायते, तत्र यथा लिङ्गभानं तथा मानसेऽपि लिङ्गादिभानमात्रे इष्टापत्तिरिति वाच्यम्, यथाकथञ्चिदुपस्थितानां व्याप्यव्यापकभावानापन्नानामपि घटादीनां तत्र भानापत्तेः, न च वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शादिरूपविशेषसामग्री वह्न्यादिभानप्रयोजिका, घटव्याप्यतद्भूतलत्वादिमत् तद्भूतलमित्यादिपरामर्शादिसामग्री घटादिभानप्रयोजिकेति विशेषसामग्रीविरहादेव न मानसे उच्छृङ्खलोपस्थितघटादिभानापत्तिरिति वाच्यम्, विशेषसामग्रीविरहेऽपि सामान्यसामग्रीबलात् तत्र घटादिभानापत्तेः; न च घटमानसत्वावच्छिन्नं प्रति वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्य प्रतिबन्धकत्वमिति निरुक्तपरामर्शात्मकप्रतिबन्धकाभावरूपकारणस्य निरुक्तपरामर्शकालेऽभावान्न तदानीं घटादिमानसापत्तिरिति वाच्यम्, सामान्यसामग्रीबलात् पटादिमानसापत्तिवारणाय पटमानसत्वादीनामपि निरुक्तपरामर्शप्रतिबध्यतावच्छेदकत्वस्याभ्युपगन्तव्यत्वेनानन्तप्रतिबध्यप्रतिबन्धकभावकल्पने गौरवात्, यत्र वह्निव्याप्यधूमवान् पर्वतः, घटव्याप्यतद्भूतलत्ववच्च तद्भूतलमिति समूहालम्बनात्मकः परामर्शः, तत्र घटमानसस्यापि सम्भवेन निरुक्तपरामर्शरूपप्रतिबन्धकाभावस्यासत्त्वेन व्यतिरेकव्यभिचारेण कारणत्वासम्भवात्, घटव्याप्यवत्तापरामर्शाभावविशिष्टवह्निव्याप्यवत्तापरामर्शस्य घटमानसत्वावच्छिन्नं प्रति प्रतिबन्धकत्वकल्पने चातिगौरवात्, तस्मात् सामान्यतो मानसत्वावच्छिन्नं प्रत्येव परामर्शादिघटितानुमितिसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमित्यनुमितित्वस्य मानसत्वव्याप्यत्वासम्भवाल्लोकसिद्धानुमितिप्रमोपगमे तत्करणं प्रमाणान्तरं स्यादेवेति; न चैवं मानसत्वावच्छिन्नं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वे अनुमितिसामग्र्यां सत्यां सुख-दुःखसाक्षात्काररूपभोगोऽपि मानसो न स्यात् तस्यापि प्रतिबध्यतावच्छेदकमानसत्वरूपधर्माक्रान्तत्वादिति वाच्यम्, सुख-दुःखयोरसंविदितयोर्भानाभावात् सुख-दुःखान्यतरसद्भावेऽवश्यं तत्साक्षात्कार इति भोगान्यज्ञानत्वावच्छिन्नं प्रत्येव सुख-दुःखान्यतरस्य प्रतिबन्धकत्वम्, तत्र सुखभिन्नत्वे सति दुःखभिन्नो यस्तद्भिन्नत्वलक्षणं सुख-दुःखान्यतरत्वं गौरवेण नावच्छेदकम्, किन्तु सुख-दुःखोभयमात्रगतं किञ्चित् सामान्यं परिकल्प्य तस्यैव निरुक्तप्रतिबन्धकताया अवच्छेदकत्वमित्येवं भोगान्यज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकतया सिद्धजातिविशेषरूपेण सुख-दुःखयोरुत्तेजक-

त्वम्, तथा च निरुक्तधर्मावच्छिन्नसुख-दुःखनिष्ठप्रतियोगिताकाभावविशिष्टानुमितिसामग्र्या मानसत्वावच्छिन्नं प्रति प्रतिबन्धकत्वस्य कल्पनीयतया सुख-दुःखान्यतरसत्त्वे निरुक्तप्रतिबन्धकस्याभावेन सुख-दुःखान्यतरसाक्षात्कारलक्षणस्य भोगस्य सम्भवादिति ।

एतद्विषये न्यायालोके श्रीमद्भिर्यशोविजयोपाध्यायैरित्थं विवेचना कृता, तथाहि–"यत् पुनरुक्तम्–अनुमानात्मनोऽभ्युपगमेऽपि तदनतिरेकान्नापसिद्धान्त इति, तन्न–वह्निव्याप्यधूमवान् पर्वत एतादृशनिश्चयस्यैतदुत्तरदहनानुमितित्वस्य जन्यतावच्छेदकत्वेन धर्मविशेषसिद्धौ धर्मिविशेषसिद्धेः प्रमाभेदेन प्रमाकरणभेदात्; न चैतदुत्तरज्ञानत्वमेव तज्जन्यतावच्छेदकम्, अप्रामाण्यज्ञानशून्यानाहार्यतादृशनिश्चयं विनाऽपि तदवच्छिन्नस्मृतिसन्देहादिसम्भवेन व्यभिचारात्; न च गृहीताप्रामाण्यकाहार्यविनश्यदवस्थधूमपरामर्शविशिष्टायामविनश्यदवस्थालोकादिपरामर्शजन्यानुमितौ व्यभिचारवारणायाप्रामाण्यग्रहाभावा-ऽऽहार्यभेदयोर्जन्यतावच्छेदके निवेशान्नोक्तदोष इति वाच्यम्, अनुगतरूपेण तदनिवेशात् तत्तदप्रामाण्यग्रहाभाव-तत्तदाहार्यभेदादीनां जन्यतावच्छेदके निवेशे गौरवादनुमितित्वस्यैव तत्र निवेशयितुं युक्तत्वात्; न चाप्रामाण्यप्रकारतानिरूपितोभयावृत्तिधर्मावच्छिन्नविशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकस्याप्रामाण्यग्रहाभावस्यानुगतस्यैव निवेशान्नोक्तगौरवमिति वाच्यम्, तथापि प्रकृते स्वोत्तरत्वस्य स्वध्वंसाधारकालध्वंसानाधारस्वध्वंसाधारक्षणवृत्तित्वरूपस्य निवेशनीयतया प्रागुत्पन्नसंस्कारवारणायानुमितित्वनिवेशावश्यकत्वात्; न चापेक्षाबुद्ध्यात्मकपरामर्शद्वितीयक्षणोत्पन्नतदनात्मकानुमितिसङ्ग्रहायाव्यवहितोत्तरोत्पत्तिकत्वमेव संस्कारव्यावृत्तं वैशिष्ट्यं देयमिति वाच्यम्, स्वध्वंसाधारपदस्यापेक्षाबुद्धिरूपपरामर्शानाधारस्वध्वंसानाधारार्थकत्वे उक्तानुमितिसङ्ग्रहात्, ज्ञानत्वनिवेशे प्रत्यक्षादिष्वनपेक्षितपरामर्शजन्यत्वकल्पनापत्तेरनुमितित्वनिवेशौचित्याच्च; यत्त्वप्रामाण्यज्ञानाभावस्य पृथक्कारणत्वान्नायं दोष इति, तन्न–तत्तद्व्यक्तित्वेनाप्रामाण्यग्रहाभावानां तत्तदप्रामाण्यग्रहाभावविशिष्टधूमादिलिङ्गकानुमितिं प्रति हेतुत्वकल्पनापेक्षया सामानाधिकरण्यविशिष्टविशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावानामवच्छेदकत्वकल्पनौचित्यात्; यत् तु वह्निमनुमिनोमीत्यनुव्यवसायेनानुमितित्वसिद्धिरिति, तन्न–तत्र विधेयताविशेषस्यैव विषयत्वात्, अन्यथा पर्वतमनुमिनोमीत्यपि स्यात्; परामर्शजन्यतायामपि स एव

प्रवेश्यतामिति चेत् ? न–तदीयसम्बन्धापेक्षयाऽनुमितित्वीयसम्बन्धस्य समवाय-रूपस्य कार्यतावच्छेदकतावच्छेदकत्वे लाघवात्; ननु तथाऽप्यनुमितित्वस्य मानसत्वव्याप्यत्वमेवेति प्रागुक्तम्, तथा च नानुमानस्य प्रमाणान्तरत्वम्; न चानुमितेः साक्षात्कारत्वे कथं न वह्निं साक्षात्करोमीति प्रतीतिरिति वाच्यम्, तत्र लौकिकविषयतया साक्षात्काराभावादेव गुरुत्वादाविव तदुपपत्तेः, अत एव पीतं शङ्खं साक्षात्करोमीत्यादिप्रतीतिबलाद् दोषविशेषजन्यतयाऽपि लौकिकविषयतां कल्पयन्ति ग्रान्थिकाः, युक्तं चैतत्, चाक्षुषादिसामग्रीसत्त्वे मानसत्वरूपव्यापक-धर्मावच्छिन्नसामग्र्यभावादेवानुमित्यनुदयोपपत्तौ अनुमितित्वादेस्तत्प्रतिबध्य-तावच्छेदकत्वाकल्पनेन लाघवात्; अथानुमित्साद्युत्तेजकभेदेन विभिन्नरूपेण प्रतिबध्य-प्रतिबन्धकभाव आवश्यक इति चेत् ? न–तत्तदिच्छाऽनन्तरोपजायमान-भिन्नमानसे जातिविशेषं स्वीकृत्य तदवच्छिन्नं प्रति मानसान्यज्ञानसामग्र्याः प्रतिबन्धकत्वकल्पनादनुमितित्वादेर्मानसवृत्तित्वकल्पनौचित्यात्; अथ तत्तदिच्छा-विरहकाले तत्तदिच्छानन्तरोपजायमानमानसापत्तिरिति चेत् ? न–तादृशमानसं प्रति तत्तदिच्छानां हेतुत्वात्; न चैवं गौरवम्, फलमुखत्वात्, वस्तुत आपा-दकाभावादेव न तदा तदापत्तिः; अथ सुस्मूर्षाद्यनन्तरोपजायमानभिन्नज्ञाने जातिविशेषं स्वीकृत्य तदवच्छेदेन चाक्षुषादिसामग्र्याः प्रतिबन्धकत्वेऽनुमिति-त्वादेः परोक्षवृत्तितैवास्त्विति चेत् ? न–तदवच्छेदेन स्मृत्यन्यज्ञानसामग्र्या एव प्रतिबन्धकत्वात्, तज्जातिविशेषस्य स्मृतित्वव्याप्यस्यैव युक्तत्वात्, तज्जाति-वदन्यज्ञानसामग्रीत्वादिना प्रतिबन्धकत्वेऽपि विशेषगतावच्छेदकप्रकारकज्ञान-जन्यतावच्छेदकतया सिद्धस्य प्रत्यक्षत्वस्यैवानुमितौ युक्तत्वादिति चेत् ? अत्र वदन्ति न्यायनिष्णाताः—

'तदानीं वह्निमानसस्वीकारे लिङ्गादीनामपि मानसापत्तिः; न चाचार्यमत इव तत्र तज्ज्ञानमात्रे इष्टापत्तिः; एवमप्युच्छृङ्खलोपस्थितानां घटादीनां तत्र भानापत्तेः; न च तद्धर्मिकतत्संसर्गकतद्धर्मावच्छिन्नव्याप्यवत्ताज्ञानात्मकपरा-मर्शादिरूपविशेषसामग्रीविरहान्न तदापत्तिरिति वाच्यम्, सामान्यसामग्रीवशात् तदापत्तेः, न च घटमानसत्वस्य परामर्शादिप्रतिबध्यतावच्छेदकतया न तदा-पत्तिः, पटमानसत्वादेरप्युच्छृङ्खलोपस्थितपटादिभानवारणाय तत्प्रतिबध्यताव-च्छेदकत्वेऽनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनापत्तेः; अथ भोगपरामर्शजन्य-भिन्नज्ञाने जातिविशेषं स्वीकृत्य तदवच्छिन्नमानसं प्रति तज्जातीयान्यज्ञान-

सामग्र्याः प्रतिबन्धकत्वान्न तदानीं वह्नीतरज्ञानापत्तिरिति चेत्? न–मानसत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वौचित्यात्; न चैवमनुमितिसामग्र्यां सत्यां भोगोऽपि कथं भवेदिति वाच्यम्, भोगान्यज्ञानप्रतिबन्धकतावच्छेदकतया समानीतजातिविशेषवतां सुख-दुःखानामुत्तेजकत्वात्; न च तादृशसुख-दुःखकालेऽप्यनुमितिसामग्रीभूतपरामर्शादौ समवायेन तदभावादनुमित्यापत्तिः, सामानाधिकरण्यकालिकोभयसम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्य निवेशाद् इत्यधिकं स्याद्वादरहस्ये" इति।

एतावता ग्रन्थेन प्रत्येकावस्थायामपि भूतेषु शक्तिरूपेण चैतन्यमस्तीति पक्षश्चार्वाकस्य निराकृतः ॥४२॥

अथ चैतन्यं भूतकार्यमिति कार्यपक्षमपहस्तयितुमधिकरोति—

काठिन्याबोधरूपाणि, भूतान्यध्यक्षसिद्धितः।
चेतना तु न तद्रूपा, सा कथं तत्फलं भवेत्? ॥ ४३ ॥

काठिन्येति—कठिनत्व-कोमलत्व-मृदुत्वादयः पाकादुद्भवन्तोऽनुष्णशीतस्पर्शविशेषाः पृथिव्यात्मकभूतमात्रवृत्तयः, काठिन्यं च रसादीनामप्युपलक्षणम्, अबोधश्चैतन्यलक्षणबोधविरोध्यचैतन्यं जाड्यमिति यावत्, तद्रूपाणि–तदात्मकधर्मनिरूपितधर्मिताश्रयाणि, काठिन्यादिधर्मैः समं भूतानां कथञ्चित्तादात्म्यलक्षणोऽविष्वग्भाव एव सम्बन्धस्तेन तद्रूपाणि भूतानीति हृदयम्, **भूतानि** पृथिव्यादीनि। न चेयं स्वमनीषा, किन्तु प्रत्यक्षप्रमाणादित्थमवसीयत इत्याह—**अध्यक्षसिद्धित** इति–कठिना पृथिवी, अचेतना पृथिवी, इत्यादिकं यदध्यक्षमबाधितत्वात् सत्यं तदात्मकप्रमाणविषयत्वादित्यर्थः, यद्यपि येनेन्द्रियेण यद् गृह्यते तदभावोऽपि तेनैव गृह्यते नान्येन, चैतन्यं तु मानसप्रत्यक्षेण मनोरूपेन्द्रियेण गृह्यत इति नैयायिकादिभिरुपेयत इति तदभावलक्षणस्याचैतन्यस्य चक्षुरादिना ग्रहणं यद्यपि न सम्भवति तथाऽपि ज्ञानलक्षणालौकिकप्रत्यासत्त्या मनसा तत्प्रत्यक्षं ज्ञेयम्, मनसा त्वलौकिकप्रत्यक्षे बाह्यपदार्थस्य विशेष्यतयाऽपि भानं सम्भवत्येव, ज्ञानलक्षणप्रत्यासत्त्या विशेषणतयैव भानं न तु विशेष्यतयेति तु बहिरिन्द्रियजन्यप्रत्यक्ष एव नियमो न तु मानसे, अथवा चाक्षुषप्रत्यक्षमेवाचेतना पृथिवीति, तत्र ज्ञानलक्षणप्रत्यासत्त्याऽचैतन्यस्य

लौकिकसन्निकर्षेण पृथिव्या भानस्य सम्भवात्, सुरभि चन्दनमित्यादौ तथा-दर्शनात्। **चेतना तु तद्रूपा न** चेतना पुनः कठिनाबोधरूपा न, नहि भवति—कठिना चेतना, अचेतना चेतनेत्येवं प्रत्यक्षं काठिन्येनाचैतन्येन वा समं चैतन्यस्य सामानाधिकरण्यग्राहकम्, तथा च यद् यद्रूपेण न प्रमीयते तत् तद्रूपं न भवति, चेतना काठिन्यरूपेणाचैतन्यरूपेण च न प्रमीयत इति न सा काठिन्याबोधरूपा। अतः **सा** चेतना, **तत्फलं** भूतफलम्, भूतोपादेयेति यावत्, उपादानोपादेयभावेनैव कार्यकारणभावस्यात्राभिप्रेतत्वात्। **कथं भवेत्?** न कथमपि भवितुमर्हतीत्यर्थः। ननु भूतधर्मेण काठिन्य-जाड्यादिनाऽप्यात्मनः 'कठिनोऽहं, जडोऽहम्' इति प्रतीतिः 'स्थूलोऽहं, गौरोऽहम्' इति स्थूलत्व-गौरत्वादिनाऽऽत्मनः प्रतीतिवज्जायत एव, यदि जाड्यरूपेणाऽऽत्मनः प्रतीतिर्न भवेत् तर्हि कथमुपपद्येत 'मामहं न जानामि' इति प्रतीतिरिति चेत्? न—शरीरेण सहाऽऽत्मनोऽभेदभ्रमतज्जनितवासनादोषाज्जायमानायाः स्थूलोऽहमिति प्रतीतेरपि भ्रमतयैवोपगमात्, तद्वच्छरीरात्माभेदभ्रमवासनादोषाज्जायमानायाः कठिनोऽहमित्यादिप्रतीतेर्भ्रमत्वात्, 'कठिनमिदं जडोऽयम्' इत्येवमिदन्त्वसामानाधिकरण्येनानुभूयमानस्य काठिन्यादेरहन्त्वसामानाधिकरण्यासम्भवाच्च, मामहं न जानामीति प्रतीतिस्तु आत्मविषयकज्ञानविशेषाभावप्रकारकात्मविशेष्यकज्ञान-स्वरूपा नात्मनो जाड्यमवगाहते, ज्ञानवत्यपि यत्किञ्चिज्ज्ञानाभावस्य सत्त्वेन तस्य ज्ञानसामान्यविरोधित्वाभावेन जाड्यरूपत्वाभावात्, तस्या ज्ञानसामान्या-भावप्रकारकत्वं तु वक्तुमशक्यम्, उक्तप्रतीतेरपि ज्ञानत्वेन ज्ञानसामान्याभाव-वत्यात्मनि विरोधादेवोत्पत्त्यभावापत्तेः, भावरूपाज्ञानविषयकत्वं तु माया-ऽविद्यादिशब्दाभिलाप्याज्ञानस्य वेदान्त्यभिमतस्यान्यत्र निरस्तत्वान्न सम्भ-वतीति ॥ ४३ ॥

भूतेषु प्रत्येकं चेतनोत्पत्तेः प्राक् किं सती असती वेति विकल्प्योभयपक्षे दोषोपदर्शनेन भूतकार्यत्वं चेतनायाः खण्डयति—

प्रत्येकमसती तेषु, न च स्याद् रेणुतैलवत्।
सती चेदुपलभ्येत, भिन्नरूपेषु सर्वदा ॥ ४४ ॥

प्रत्येकमसतीति—प्रत्येकम्-असंहतावस्थायाम्, **तेषु** भूतेषु, **असती** अविद्यमाना, चेतनेत्यनुवर्तते, **न च** नैव, **स्यात्** भवेत्, उत्पत्तेः प्राग्भूतेषु

प्रत्येकमविद्यमाना चेतना समुदितेष्वपि भूतेषु न भवेदित्यर्थः। तत्र दृष्टान्तमाह—**रेणुतैलवदिति**—रेणौ तैलवदित्यर्थः, यथा प्रत्येकं तिलेषु विद्यमानमेव तैलं समुदितेषु तिलेषु यन्त्रनिष्पीडितेषु प्रादुर्भवति, रेणुषु तु प्रत्येकमविद्यमानं तत्समुदितेष्वपि रेणुषु यन्त्रनिष्पीडितेषु नोपजायते, तथा भूतेषु प्रत्येकं प्रागविद्यमाना चेतना समुदितेष्वपि तेषु नोत्पद्येत, प्रत्येकास्तित्वस्य तत्समुदायजन्यत्वव्यापकत्वेन प्रत्येकास्तित्वाभावात् तत्समुदायजन्यत्वाभावसिद्धेः, व्यापकाभावे व्याप्याभावस्यावश्यम्भावात्। **चेत्** यदि। **भिन्नरूपेषु** असंहततयाऽवस्थितेषु भूतेषु। **सती** विद्यमाना, चेतनेत्यनुवर्तते, तदेति दृश्यम्। **सर्वदा** संहतावस्थायामसंहतावस्थायां च, प्रत्यक्षकारणेन्द्रियविषयसम्बन्धसमवधाने सति, **उपलभ्येत** प्रत्यक्षविषयो भवेत्, तत्प्रत्यक्षप्रतिबन्धकस्य कस्यचिदभावात् ॥ ४४ ॥

यत् प्रत्येकं येषु प्राग् नास्ति तत् तेषु समुदितेष्वपि नेति नियमे परो व्यभिचारमाशङ्कते—

असत् स्थूलत्वमण्वादौ, घटादौ दृश्यते यथा।
तथाऽसत्येव भूतेषु, चेतनाऽपीति चेन्मतिः ॥ ४५ ॥

असदिति—अविद्यमानमित्यर्थः। **स्थूलत्वं** महत्त्वम्। **अण्वादौ** परमाण्वादौ, अत्रादिपदाद् द्व्यणुकपरिग्रहः। **घटादौ** घटस्यादिः—परम्परया कारणं घटादिः त्रसरेणुः, तस्मिन्। **यथा दृश्यते** चाक्षुषप्रत्यक्षविषयो भवति, तथा **भूतेषु** असंघातावस्थभूतेषु,। **असत्येव** अविद्यमानैव **चेतनाऽपि** भवतीति शेषः, सामग्र्यां सत्यामवश्यं कार्यमित्येवं कार्य-सामग्र्योरेव व्याप्यव्यापकभावः; न तु येषु समुदितेषु यदुत्पत्तिस्तेष्वसमुदितेष्वपि तदस्तित्वमिति नियमः, प्रत्येकमवयवेष्वसतोऽप्यवयविनः समुदितेषु भावेन, मद्याङ्गेषु प्रत्येकमसतोऽपि मादनशक्तिपरिणामस्य तेषु समुदितेषु भावेन देशनियमस्यान्यथैवोपपत्तेः। **इति** एवम्। **चेत्** यदि। **मतिः** परस्य स्वमनीषा ॥४५॥

अत्रोत्तरमाह—

नासत् स्थूलत्वमण्वादौ, तेभ्य एव तदुद्भवात्।
असतस्तत्समुत्पादो, न युक्तोऽतिप्रसङ्गतः ॥ ४६ ॥

नासदिति—अण्वादौ परमाणुद्व्यणुकयोः, **स्थूलत्वं** महत्त्वम्, **असत्**

अविद्यमानं, न किन्तु विद्यमानमेव, तत्र हेतुः–**तेभ्य एव तदुद्भवादिति**–द्व्यणुककारणत्वेन सिद्धेभ्यः परमाणु-द्व्यणुकेभ्य एव, त्र्यणुके महत्त्वोत्पादात्। ननु अणुष्वविद्यमानमेव महत्त्वं त्रसरेणावुत्पद्यतामित्यत आह–**असत** इति–अणुष्वविद्यमानस्य महत्त्वस्येत्यर्थः। **तत्समुत्पादः** अणुभ्य उत्पत्तिः। **अतिप्रसङ्गतः** यथा महत्त्वमसदपि अणुभ्य उत्पद्यते तथा पञ्चमभूतादिकमप्यणुष्वसदणुभ्यस्त्र्यणुके समुत्पद्येतेत्येवमतिप्रसङ्गदोषात्, **न युक्तः** न समीचीनः ॥४६॥

अतिप्रसङ्गदोषमेव स्पष्टयति—

पञ्चमस्यापि भूतस्य, तेभ्योऽसत्त्वाविशेषतः ।
भवेदुत्पत्तिरेवं च, तत्त्वसंख्या न युज्यते ॥४७॥

पञ्चमस्यापीति—षष्ठादीनामप्युपलक्षणम्, तेन भू-जल-तेजो-वाय्वतिरिक्ततत्त्वस्यापीत्यर्थः। **भूतस्येत्यप्युपलक्षणम्**, तेन पञ्चमभूतसमुत्पत्तौ यथा "चत्वार्येव भूतानि तत्त्वम्" इति स्वसिद्धान्तव्याकोपो यथा चार्वाकस्य तथा भूतातिरिक्ततत्त्वोत्पादेऽपि भूतमात्रतत्त्ववादित्वव्याहतिरपि तस्य दोष एवेति। **तेभ्यः** अणुभ्यः, **असत्त्वाविशेषतः** यथा महत्त्वस्याणुष्वसत्त्वं तथा पञ्चमभूतस्यापीत्येवमसत्त्वस्योभयत्र समत्वात्, तथा चासत्त्वस्याविशेषाद् विनिगमकस्य कस्यचिदभावाद् यदि भूतेष्वणुष्वसत् स्थूलत्वं त्र्यणुके तत्कार्ये समुत्पद्येत तदा तत्र पञ्चमभूतमपि समुत्पद्येतेत्यर्थः। भवत्वेवं का नो हानिरित्यत आह–**एवं चेति**–पञ्चमभूतोत्पत्त्यभ्युपगमे चेत्यर्थः, **तत्त्वसङ्ख्या** "चत्वार्येव भूतानि" इति वचनाभिलाप्या तत्त्वानां चतुष्टसङ्ख्या। **न युज्यते** युक्त्युपपन्ना न स्यात्, तथा च यत्समुदायजन्यत्वं यस्य तस्य तत्प्रत्येकवृत्तित्वमिति नियमस्य देशनियमार्थमकल्पनेऽपि, अविशेषादसमुदितावस्थायामसतामशेषाणामपि समुदितेषूत्पत्तिर्मा प्रसाङ्क्षीदित्यसदनुत्पत्तिनिर्वाहाय तत्संघातजन्यत्वमसंहततत्प्रत्येकास्तित्वव्याप्यमित्येवं नियमस्य कल्पनमावश्यकमिति हृदयम्। नन्वसत्त्वाविशेषेऽपि यद्धर्मावच्छिन्नं प्रति यद्धर्मावच्छिन्नस्य कारणत्वं तद्धर्मावच्छिन्नात् तद्धर्मावच्छिन्नस्योत्पत्तिरिति पञ्चमभूतासाधारणधर्मावच्छिन्नं प्रति भूतसमुदायत्वावच्छिन्नस्य कारणत्वाभावात् कारणाभावादेव न पञ्चमभूतोत्पत्तिः प्रसज्यत इति चेत्? न–पञ्चमभूतं प्रति न किमपि कारणमित्यत्र हेतोर्वक्तव्यत्वात्; ननु पञ्चमभूतस्यासत्त्वादेव न तत् प्रति किमपि कारणमिति चेत्?

असत्त्वमेव तस्य कुतः?; कारणाभावादसत्त्वं तस्येति चेत्? तर्हि कारणाभावादसत्त्वमसत्त्वाच्च कारणाभाव इत्येवमन्योऽन्याश्रय आपद्येत। ननु न कारणाभावादसत्त्वं येनान्योऽन्याश्रयः, किन्तु अस्तीतिधीविषयत्वाभावादसत्त्वम्, असत्त्वाच्च कारणाभाव इति चेत्? न-अस्तीतिधीविषये प्रध्वंसे असत्त्वस्य सत्त्वाभावरूपस्य सत्त्वेऽपि अस्तीतिधीविषयत्वाभावस्य तत्रासत्तया तस्यासत्त्वनियामकत्वासम्भवात्। विधि-निषेधव्यवहाराविषयत्वादसत्त्वम्, असच्च न विधिनिषेधव्यवहारविषय इति चेत्? न-पञ्चमं भूतमस्तीत्येवं विधिव्यवहाराभाजनेऽपि पञ्चमभूते पञ्चमं भूतं नास्तीत्येवं निषेधव्यवहारस्य तत्र सद्भावेन विधिनिषेधव्यवहाराविषयत्वस्य तत्राभावात्। ननु भूतस्य पञ्चमत्वस्य च प्रसिद्धतया भूते पञ्चमत्वं नास्तीत्येव व्यवह्रियत इति चेत्? न-असतोऽपि विकल्पविषयत्वस्याभ्युपगमेन विकल्पविषयस्याखण्डस्यैव पञ्चमभूतस्य पञ्चमं भूतं नास्तीत्येवं प्रतीयमानस्य निषेधस्य प्रतियोगितयोल्लिख्यमानत्वात्, अन्यथा इह पञ्चमं भूतं नास्तीत्येवं प्रतीतेरुल्लेखो नोपपद्येत, तथा चान्यथानुपपद्यमाने प्रतीतेस्तथोल्लेखे जाग्रति निरुक्तप्रतीतेर्भूतविशेष्यकत्वे सति पञ्चमत्वप्रकारत्वस्याभ्युपगन्तुमशक्यत्वाच्च। नन्वेवम्—

"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्॥" [साङ्ख्यकारिका]

इतिवचनप्रतिपाद्यस्य साङ्ख्यानां सत्कार्यवादस्य साम्राज्यं स्यात्, तथा चोत्पत्तेः प्रागपि कार्यस्य सत्त्वे तदानीं कार्यसत्त्वमुपलभ्येत; न च तदानीं सदपि कार्यं तिरोभूतं न त्वाविर्भूतमित्याविर्भावाभावान्नोपलब्धिप्रसङ्ग इति वाच्यम्, आविर्भावाभावस्यैव निरुच्य दर्शयितुमशक्यत्वात्, आविर्भावो नाम प्रकटीभावः, स चोपलम्भ एवेत्युपलम्भाभाव आविर्भावाभावः स्यात्, तथा च 'आविर्भावाभावादुपलम्भाभावः' इत्येतत् 'उपलम्भाभावादुपलम्भाभावः' इति पर्यवसितमात्माश्रयग्रस्तमिति; आविर्भावाभावस्य व्यञ्जकाद्यभावरूपत्वमपि न युक्तम्, व्यञ्जकादीनां प्राक् सत्त्वे तदानीं व्यङ्ग्यस्य कार्यस्योपलम्भापत्तेः, व्यञ्जकाद्यभावस्य तदानीमप्यसत्त्वेन तत्प्रयुक्तस्योपलम्भाभावस्यासत्त्वापत्तेश्च, व्यञ्जकादीनां प्रागसत्त्वे च 'असतो नास्त्युत्पत्तिः' इति सिद्धान्तादुत्तरकालेऽपि व्यञ्जकादीनामुत्पत्तिर्न स्यात्, तथा च व्यञ्जकाद्यभावादुत्तरकालेऽपि कार्योपलम्भो न भवेदिति सर्वदा कार्यानुपलम्भप्रसङ्गः। अपि च, असत उत्पत्त्यनुपगमे सत उत्पत्ति-

रित्यपि वक्तुं न शक्यम्, कार्यस्य प्रागपि सत्त्वेन स्वाधिकरणक्षणध्वंसानधिकरणस्वाधिकरणक्षणात्मकाद्यक्षणसम्बन्धरूपाया उत्पत्तेर्निरुक्ताद्यक्षणाप्रसिद्ध्याऽसम्भवादित्युत्पत्तेः प्रागसत्त्वमपि नोपपद्यते सत्त्वमपि नोपपद्यत इति चेत्? न—उक्तदिशाऽसत्कार्यवादस्यैकान्तस्य सत्कार्यवादस्य चैकान्तस्य दूषितत्वेऽपि स्याद्वाद्युपगते कथञ्चित्सदसत्कार्यवादेऽनेकान्ते दोषाभावात्, द्रव्यरूपेण पर्यायस्वरूपकार्यस्योत्पत्तेः प्राक् सत्त्वम्, स्वासाधारणपर्यायस्वरूपेण चासत्त्वमित्येवं कथञ्चित्सदसत्कार्यवादो विरोधानाघ्रातः, तत्र द्रव्यरूपेण प्राक् सतः कार्यस्य द्रव्यरूपेणोपलब्धिर्भवत्येव, पर्यायस्वरूपेण च प्रागसतो निरुक्ताद्यक्षणसम्बन्धरूपोत्पत्तिरपि सुघटैव, एवं सत्येव चोपादानकारणत्वमप्युपपद्यते, यद्रूपेण यस्योत्पत्तेः प्राक् सत्त्वं तद्रूपवत्त्वमेव तस्योपादानकारणत्वमिति द्रव्यरूपे सम्भवतीदम्, असत्कार्यवादेऽन्यादृशमेवोपादानकारणत्वमभिमतं तन्न सङ्गतम्, स्वसमवेतकार्यकारित्वलक्षणस्य तस्य समवायनिरासेन निरस्तत्वात्, यत्र कारणे यत्कार्यप्रागभावसत्त्वं तस्य तदुपादानत्वमित्यपि न सुसङ्गतम्, यतः प्रागभावस्य प्रतियोगिना समं स्वरूपाख्यः सम्बन्धः, उपादानात्मकानुयोगिना सममपि स्वरूपाख्य एव सम्बन्धः, तथा च यदि किञ्चित्स्वरूपेण कार्यमवस्थितं स्यात् तदा तत्स्वरूपसम्बन्धेन प्रागभावसम्बन्धिकार्यमिति तत्प्रागभाव इति वक्तुं युज्येत, तत्स्वरूपसम्बन्धात्मना च कार्य-तत्प्रागभावयोरप्यैक्यम्, तथा कार्य-प्रागभाव-तत्कारणयोरपि किञ्चित्स्वरूपमुभयानुगतं भवेत् तदा तेन स्वरूपेण कार्यप्रागभावसम्बन्धि तत्कारणं भवेत्, तथोपगमे च तत्स्वरूपात्मना कारणाभिन्नस्य प्रागभावस्याभिन्नं कार्यमिति तदभिन्नाभिन्नस्य तदभिन्नत्वमिति नियमबलात् कार्यकारणयोः कथञ्चित्तादात्म्यमायाति, अन्यथा कार्यप्रागभाव इत्यपि वक्तुं न शक्यते तद्वत् कारणमित्यपि वक्तुमनर्हमिति, यत एव सदसत्कार्यवाद एवोत्पत्त्युपादानत्वादयो घटन्ते, नैकान्तासत्कार्यवादे नैकान्तसत्कार्यवादे च, तत एव बौद्ध-वैशेषिकाणां सत्कार्यवादे, साङ्ख्यानां चासत्कार्यवादे ताभ्रिकैरुपदर्शिताः पर्यनुयोगा एकान्तपक्षनिवृत्त्यंशे फलवन्त एव, संवदति चामुमर्थं संमतौ वादिप्रकाण्डसिद्धसेनः—

"जे संतवायदोसे सक्को-लूआ भणंति संखाणं ।
संखा य असब्वाए तेसिं, सव्वे वि ते सच्चा" ॥ गाथा–१४७ ॥

[यान् सद्वाददोषान् शाक्योलूका भणन्ति साङ्ख्यानाम् ।
साङ्ख्याश्चासद्वादे तेषां सर्वेऽपि ते सत्याः ॥ इति संस्कृतम्]

इत्यनया गाथया, एतद्वृत्तिः शिष्यबुद्धिवैशद्यायोल्लिख्यते—

"यानेकान्तसद्वादपक्षे द्रव्यास्तिकाभ्युपगतपदार्थाभ्युपगमे शाक्योलूक्या दोषान् वदन्ति साङ्ख्यानां क्रिया-गुणव्यपदेशोपलब्ध्यादिप्रसङ्गादिलक्षणान्, ते सर्वेऽपि तेषां सत्या इत्येवं सम्बन्धः कार्यः, ते च दोषा एवं सत्याः स्युर्यद्यन्य-निरपेक्षनयाभ्युपगतपदार्थप्रतिपादकं तच्छास्त्रं मिथ्या स्यात्, नान्यथा, प्रागपि कार्यावस्थात एकान्तेन तत्सत्त्वनिबन्धनत्वात् तेषाम्, अन्यथा कथञ्चित् सत्त्वे अनेकान्तवादापत्तेर्दोषाभाव एव स्यात्; साङ्ख्या अपि असत्कार्यवाददोषान् असदकरणादीन् यान् वदन्ति ते सर्वे तेषां सत्या एव, एकान्तासति कारण-व्यापारासम्भवात्, अन्यथा शशशृङ्गादेरपि कारणव्यापारादुत्पत्तिः स्यात् । अथ शशशृङ्गस्य न कारणावस्थायामसत्त्वादनुत्पत्तिः, किन्तु कारणाभावात्, घटा-देस्तु मृत्पिण्डावस्थायामसतोऽपि कारणसद्भावादुत्पत्तिः; ननु कुतः शशशृङ्गस्य कारणाभावः ? अत्यन्ताभावरूपत्वात् तस्येति चेत् ? तदेव कुतः ?, कारणाभावा-दिति चेत् ? सोऽयमितरेतराश्रयदोषः; घटादीनामपि च मृत्पिण्डावस्थानाम-सत्त्वे कुतः कारणसद्भावः, प्रागसत्त्वादेव तत्र कारणसद्भावः सति कारणव्यापारा-सम्भवादिति चेत् ? असदेतत्–घटस्य मृत्पिण्डावस्थायां सत्त्वे प्रागनवस्थायोगात्, असत्त्वेऽपि शशशृङ्गस्येव तदनुपपत्तेः; अथास्योत्पत्तिदर्शनात् प्रागभावः, न शशशृङ्गस्य, न–इतरेतराश्रयदोषप्रसक्तेः, तथाहि–यावदस्य न प्रागभावित्वं न तावदुत्पत्तिसिद्धिः, यावच्च नोत्पत्तिसिद्धिर्न तावत्प्रागभावित्वसिद्धिरिति व्यक्त-मितरेतराश्रयत्वम्; अथ कारणस्य कार्यशून्यता प्रागभावः प्रागेव सिद्धः, असदेतत्–अकारणस्यापि कार्यशून्यतोपलम्भात्, तत्सम्बन्धाद् घटस्य तत्कार्यता-प्रसक्तेः, तथाहि–यस्य प्रागभावित्वं तस्य कार्यता, तत्कार्यशून्यं पदार्थान्तरं कारकाभिमतादन्यदपि च तत्प्रागभावस्वभावं प्राप्तम्, तत्सम्बन्धेन च घटादेः शशशृङ्गादिव्यवच्छेदेन कार्यताऽभ्युपगतेति सूत्रपिण्डकार्यताऽपि घटस्यैवं भवेत्; न च तदन्वय-व्यतिरेकाभावान्न तत्कार्यता, अन्वय-व्यतिरेकाभावस्य तत्रासत्त्व-निबन्धनत्वात्, न च प्रागभावो नाम प्रत्यक्षादिप्रमाणग्राह्यः, मृत्पिण्डस्वरूप-मात्रस्यैव तत्र प्रतिभासनात्, न च कारणस्वरूपमेव प्रागभावः, निर्विशेषणस्य

स्वरूपमात्रस्य कार्येऽपि सद्भावात् तस्यापि प्रागभावरूपताप्रसक्तेः; अथ कार्यान्तरापेक्षया तस्यापि प्रागभावरूपता कारणस्वभावाभ्युपगम्यत एव, न–कारणाभिमतापेक्षयाऽपि तद्रूपताप्रसक्तेः; तथाप्रतीत्यभावान्न तद्रूपतेति चेत् ? न–प्रतीतिमात्रादनपेक्षितवस्तुस्वरूपाद् वस्तुव्यवस्थाऽयोगात्, ततो मृत्पिण्डादिरूपतया वस्तु गृह्यतेऽध्यक्षादिना, न पुनस्तद्व्यतिरिक्तकारणादिरूपतया, तस्यास्तत्राप्रतिभासनात्, प्रतिभासनेऽपि विशिष्टकार्यापेक्षया कारणत्वस्य प्रतिपत्तौ कार्यप्रतिभासनमन्तरेण तत्कारणत्वस्याप्रतीतेरसतस्तदानीं कार्यस्याप्रतिभासनात् प्रत्यक्षस्यासदर्थग्राहकत्वेन भ्रान्तताप्रसक्तेः, तदा तत्कार्यस्य सत्त्वप्रसक्तिः स्यादिति कथमसति कारणव्यापारः प्रतीयेत ? तन्नासतः कार्यत्वं युक्तम्। नापि असत्कारणं कार्यम्, तदानीमसति कारणे तस्य तत्कृतत्वायोगात्, क्षणमात्रावस्थायिनः कारणस्य स्वभावमात्रव्यवस्थितेरन्यत्र व्यापारायोगात्; अथ तदनन्तरं कार्यस्य भावात् प्राग्भावित्वमात्रमेव कारणस्य व्यापारः, असदेतत्–समस्तभावक्षणानन्तरं विवक्षितकार्यस्य सद्भावात् सर्वेषां तत्पूर्वकालभावित्वस्य भावात् तत्कारणताप्रसक्तेः; अथ सर्वभावक्षणाभावेऽपि तद्भाव इति न तस्य तत्कार्यता, न–क्षणिकेषु भावेषु विवक्षितक्षणाभाव एव सर्वत्र विवादाध्यासितकार्यसद्भावान्न तदपेक्षयाऽपि तस्य कार्यता भवेत्; न च क्षणिकस्य कार्यस्य तदभावेऽपि पुनर्भवनसंभवः, तस्य तदैव भावात्, अन्यदा कदाचिदप्यभावात्; न च विशिष्टभावक्षणधर्मानुविधानात् तस्य तत्कार्यताव्यवस्था, सर्वथा तद्धर्मानुविधाने तस्य कारणरूपतापत्तेस्तत्प्राक्कालभावितया तत्कार्यताव्यतिक्रमात्, कथञ्चित्तद्धर्मानुविधाने अनेकान्तवादापत्तेरसत्कारणं कार्यमित्यभ्युपगमव्याघातात्; अथ सन्तानापेक्षः कार्यकारणभाव इत्ययमदोषः, न–सन्तानस्य पूर्वापरक्षणव्यतिरेकेणाभावात्, भावे वा तस्यैव कार्यकारणरूपस्यार्थक्रियासामर्थ्यात् सत्त्वं स्यात्, न क्षणानामर्थक्रियासामर्थ्यविकलतया भवेत्; अथ तत्सम्बन्धिनः सन्तानस्य कार्यकारणत्वे तेषामपि कार्यकारणभावः, न–भिन्नयोः कार्यकारणभावादपरस्य सम्बन्धस्याभावात् सन्तानस्य च सर्वजगत्क्षणानन्तरभावित्वेन सर्वसन्तानतापसक्तिः स्यात्, किञ्च, तस्यापि नित्यत्वे क्षणकार्यत्वे च सत्कार्यवादप्रसक्तिः, क्षणिकत्वे चान्वयाप्रसिद्धेस्तस्य तत्कार्यताऽप्रसिद्धिः, व्यतिरेकश्च कार्यतानिबन्धनं क्षणिकपक्षे न सम्भवतीति प्रतिपादितमेव; न च अत्राप्यपरसन्तानप्रकल्पनया कार्यकारणभावप्रकल्पनं युक्तम्, अनवस्थाप्रसक्तेः, तथाहि–सन्तानस्यापि कार्यताभ्युपगमे

क्षणिकत्वान्न कार्यरूपता, अतः सन्तानान्तरमत्रापि कार्यतानिबन्धनमभ्युपगन्तव्यम्, तत्रापि च क्षणिकत्वे कार्यताऽप्रसिद्धेस्तन्निबन्धनमपरं सन्तानान्तरमभ्युपगमनीयमित्यनवस्था परिस्फुटैव, किञ्च, क्षणिकभावाभ्युपगमवादिनो यदि भिन्नकार्योदयाद्धेतोः सत्त्वमभिमतं तदा तत्कार्यस्याप्यपरकार्योदयात् सत्त्वसिद्धिरित्यनवस्थाप्रसक्तेर्न क्वचित् सत्त्वव्यवस्था स्यादिति कुतस्तद्व्यवच्छेदेन 'असत् कार्यम्' इति व्यपदेशः; अथ ज्ञानलक्षणकार्यसद्भावाद्धेत्वोः सत्त्वव्यवस्थितिः, ननु ज्ञानस्यापि कथं ज्ञेयसत्ताव्यवस्थापकत्वम्? ज्ञेयकार्यत्वादिति चेत्? ननु किं तेनैव ज्ञानेन ज्ञेयकार्यता स्वात्मनः प्रतीयते? उत ज्ञानान्तरेण? न तावत् तेनैव, तस्य प्रागसत्त्वाभ्युपगमादप्रवृत्तेः, प्रवृत्तौ वा तत्कार्यतावगतिः पुनः प्राक्प्रवर्तने सङ्गच्छते, तत्रापि पुनः प्राक्प्रवृत्तावित्यनवस्थाप्रसक्तेः कुतस्तस्य तत्कार्यतावगतिः; अथ समानकालत्वेऽपि ज्ञानस्य ज्ञेयकार्यता, नन्वेवमविशेषाज्ज्ञेयस्यापि ज्ञानकार्यतावगतिः स्यादिति तदपि तद्व्यवस्थापकं प्रसज्येत, न च समानकालयोः स्तम्भ-कुम्भयोः कार्यकारणतोपलब्धेति प्रकृतेऽपि सा न स्यात्; अथ केवलस्यापि कुम्भस्य दृष्टेरकार्यता, ज्ञानस्यापि केवलस्य दृष्टेरकार्यताप्रसक्तिः, तस्य ततोऽन्यत्वान्न व्यभिचार इति चेत्? ननु कुम्भोऽपि कुतोऽन्यः स न भवेत्, प्रत्यभिज्ञानान्नान्य इति चेत्? एतद् ज्ञानेऽपि समानम्, नित्यता च कुम्भस्यैवं भवेदिति कुतोऽसत्कार्यवादः? न च प्रत्यभिज्ञानं भवतः प्रमाणम्, पूर्वापररूपाधिकरणस्यैकतयाऽप्रतीतेः, नहि पूर्वापरप्रत्ययाभ्यामपरपूर्वरूपताग्रहः, नापि एकप्रत्ययेन पूर्वापररूपद्वयस्य क्रमेण ग्रहः, एकस्याक्रमस्य क्रमवद्रूपग्राहकतयाऽप्रवृत्तेः, न च स्मरणस्य द्वयोर्वृत्तिः संभवति, न चास्य प्रमाणता, न च पूर्वापरप्रत्ययोः परस्परपरिहारेण वृत्तौ तत उत्पद्यमानं स्मरणमेकत्वस्य वेदकं युक्तम्, अगृहीतग्राहितयाऽस्मरणरूपताप्रसक्तेः, न चात्माऽप्येकत्वमवैति, प्रत्यक्षादिप्रमाणवशेनार्थावेदकत्वात् तस्य चैकत्वेऽप्रवृत्तेः, न च प्रमाणनिरपेक्ष एवात्मैकत्वग्राहकः, स्वाप-मद-मूर्च्छाद्यवस्थायामपि तस्य तद्ग्राहकत्वापत्तेः, न च तस्याप्येकत्वं कुतश्चित् प्रमाणात् प्रसिद्धम्, तद्ग्राहकत्वेन तस्याप्रतीतेः, न च बौद्धस्यात्माऽन्यद् वा वस्तु नित्यमस्ति "क्षणिकाः सर्वसंस्काराः" [ ] इति वचनात्, तन्न-तेनैवात्मनः प्रमेयकार्यताऽवगतिः, नापि अन्येन, तस्यापि स्वप्रमेयकार्यतावगतौ प्रागवृत्तितयाऽसामर्थ्यात्, तन्न ज्ञानलक्षणमपि कार्यं हेतोः सत्तां व्यवस्थापयितुं समर्थं क्षणिकैकान्तवादे, अध्यक्षस्य यथोक्तन्यायेन पौर्वा-

पर्येऽप्रवृत्तेः, अत एव नानुमानस्यापि पौर्वापर्ये प्रवृत्तिः, तस्य तत्पूर्वकत्वात् प्रत्यक्षाप्रतिपन्नेऽर्थे परलोकादाविवार्थविकल्पनमात्रत्वेन सर्वज्ञानस्याभ्युपगमात्, तन्नासत्कार्यवादः प्रमाणसङ्गतः । सत्कार्यवादस्तु प्रागेव निरस्तत्वादयुक्त एव, तथाहि–नित्यस्य कार्यकारित्वं तत्र स्यात्, तच्चायुक्तम्, नित्यस्य व्यतिरेकाप्रसिद्धितः कार्यकरणे सामर्थ्याप्रसिद्धेः, नहि नित्यस्य सर्वदेशकालव्यापिनः क्वचित् कार्यव्यापारविरहिणः सामर्थ्यमवगन्तुं शक्यम्; अथ सर्वदेशाव्यापिनस्तस्य तत्र सामर्थ्यं भविष्यति, तदसत्–यतः सर्वदेशाव्यापिस्तस्य तथाप्रतीतेर्यद्यवसीयते सर्वकालाव्यापिरपि तस्य तत एवाभ्युपगमनीया स्यात्; अभ्युपगम्यत एवेति चेत्? नन्वेवं कतिपयदेशकालव्यापिरप्यप्रतिपत्तेरेवानुपपन्नेति निरंशैकक्षणरूपता भावानां समायाता, न च तदेकान्तपक्षेऽपि कार्यजनकता, प्राक् प्रतिक्षिप्तत्वात्, न चैकान्तनित्यव्यापकत्वपक्षे प्रमाणप्रवृत्तिरित्यसकृत् प्रतिपादितम्, न चासति कार्ये निर्विषयत्वात् कारणव्यापारासम्भवात् सत्येव तत्र तेषां व्यापारः, यतो न दृष्ट्वा श्रुत्वा ज्ञात्वा वा हेतूनां कार्ये व्यापारः, तेषां जडत्वेन तदसम्भवात्, न चादृश्यमानाऽजडेश्वरादिहेतुकमदृष्टोत्पत्तिकं भूरुहादि सम्भवतीति प्राक् प्रतिपादितम्, न चासतः कार्यस्य विज्ञानं न ग्राहकम्, असत्यप्यध्यक्षादिबुद्धेः प्रवृत्तेः, अन्यथा कथं कार्यार्थप्रतिपादिका चोदना भवेत्; किञ्च यदि सत्येव कार्ये कारणव्यापारस्तदा उत्पन्नेऽपि घटादिकार्ये कारणव्यापारादनवरतं तदुत्पत्तिप्रसक्तिः तत्सत्त्वाविशेषात्; अथाभिव्यक्तत्वान्नोत्पन्ने पुनरुत्पत्तिः, उत्पत्तेरभिव्यक्तिस्वरूपत्वात्, तस्याश्च प्रथमकारणव्यापारादेव निर्वृत्तत्वात्, ननु अभिव्यक्तिरपि यदि विद्यमानैवोत्पद्यते, उत्पन्नाऽपि पुनः पुनरुत्पद्येत, अथाविद्यमाना सा, तदाऽसदुत्पत्तिप्रसक्तिः, न चाभिव्यक्तावप्यसत्यां कार्य इव कारणव्यापारोऽभ्युपगन्तुं युक्तः, स्वसिद्धान्तप्रकोपप्रसङ्गात्; अथ सतः कारणात् कार्यमिति सत्कार्यवादः, असतो हेतुत्वायोगात्, तथाऽभ्युपगमे वा शशशृङ्गादेरपि पदार्थोत्पत्तिप्रसक्तिः, अत्यन्ताभाव-प्रागभावयोरसत्त्वेनाऽविशेषात्, न च प्रागभावी आसीदिति हेतुर्नात्यन्ताभावीति वक्तव्यम्, यतो यदाऽसीत् तदा न हेतुः, अन्यदा हेतुरिति प्रसक्तेः, ततश्चेदं प्रसक्तम्–असन् हेतुः सँश्चाहेतुरिति, ततः सन्नेव हेतुस्तस्य कार्ये व्यापारात्, नासन् तत्र तदयोगात्, एतदप्यसत्–यतः सतोऽपि कारणस्य प्राक्तनरूपापरित्यागान्न कार्यं प्रति हेतुता प्राक्तनावस्थावत्; अथ तदाव्यापारयोगाद्धेतुता, असदेतत्–व्यापारेण कार्यं प्रति तस्य हेतुत्वे

सोऽपि व्यापारः कुतस्तस्येति पर्यनुयोगसम्भवात्; व्यापारवत्पदार्थाश्चेत्? ननु तत्रापि व्यापारो यद्यपरव्यापारात् तदा व्यापारपरम्पराव्यवहितत्वात् कारणस्य न कदाचित् कार्योत्पादने प्रवृत्तिः स्यात्, अनन्तव्यापारपरम्परापर्यवसानं यावत् कस्यचिदनवस्थानादसतः कारणात् कार्योत्पत्तिश्च स्यात्; अथ कारणस्वरूपमेव व्यापारः, तत्काल एव च कार्यं तेन नानवस्था, नापि असतः कारणात् कार्योत्पत्तिः, नन्वेवं कारणसमानकालं कार्यं स्यात्, तथा च सव्येतरगोविषाणवत् कुतः कार्यकारणभावः?; अथ कार्यभावकाले न कारणस्य सद्भावः, तर्हि चिरतरनष्टादिव तत्कालध्वंसिनोऽपि कुतः कार्यसद्भावः?; कार्योत्पत्तिकाले तदनन्तरभाविनः सत्ता चेत्? तर्हि कार्योत्पत्तिः कार्यान्न भिन्नेति कार्य-कारणयोः समानकालतैव स्यात्, तथा च कुतः कार्यकारणभावः?; न च सतः कारणात् कार्योत्पत्तिरित्यभ्युपगमवादिनः कार्योत्पत्तिकाले कारणस्यासत्त्वं बौद्धस्येव सिद्धम्, अविचलितरूपस्य च तस्य सद्भावे तदापि न कार्यवत्ता विकलकारणत्वात् प्राग्वत्; तदा तद्वत्त्वे वा पूर्वमपि तद्वत्त्वं स्यादविकलकारणत्वात् तदवस्थावत् तन्नैकान्तसत्कार्यवादः, असत्कार्यवादो वा युक्तः, अनेकदोषदुष्टत्वात्। अथ एकान्तेन सदसतोरजन्यत्वादजनकत्वाच्च कार्यकारणभावाभावात् सर्वशून्यतैव, अशक्तं सर्वमिति चेदित्यादि, न-कथञ्चित् सदसतोर्जन्यत्वाज्जनकत्वाच्च; न चैकस्य सदसद्रूपत्वं विरुद्धम्, कथञ्चिद् भिन्ननिमित्तापेक्षस्य सदसत्त्वस्यैकदैकत्राबाधिताध्यक्षतः प्रतिपत्तेः, न च अध्यक्षप्रतिपन्ने वस्तुनि विरुद्धः, अन्यथा एकचित्रपटज्ञाने चित्ररूपतायाः, चित्रपटे च चित्रैकरूपस्य विरोधः स्यात्, तथा च शुक्लाद्यनेकप्रकारं पृथिव्या रूपमिति वैशेषिकस्य विरुद्धाभिधानं भवेत्" इति।

यथा चैकानेकस्वभावं चित्ररूपवद् वस्त्वभ्युपगन्तव्यं वैशेषिकेण, चित्रपटप्रतिभासस्यैकानेकरूपतामभ्युपगच्छता बौद्धेनापि एकानेकरूपं वस्त्वभ्युपगन्तव्यमित्यपि तत्रैवोपपादितम्, ग्रन्थगौरवभयान्न तदुल्लिख्यते, अनेकान्ततत्त्वबुभुत्सुभिरवलोकनीया तथोपपादिका तद्वृत्तिरिति ॥ ४७ ॥

पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

तज्जननस्वभावा नेत्यत्र मानं न विद्यते।
स्थूलत्वोत्पाद इष्टश्चेत्, तत्सद्भावेऽप्यसौ समः ॥ ४८ ॥

तज्जनेति—हरिभद्रसूरिटीकासमलङ्कृतमूलमुद्रितग्रन्थे—"न तज्जनन-

स्वभावाश्चेत् तेऽत्र मानं न विद्यते" इति पूर्वार्द्धपाठः, तत्र द्वितीयचरणस्य नवाक्षरत्वम्, "तज्जननस्वभावा नेत्यत्र मानं न विद्यते" इति मुद्रितयशोविजयोपाध्यायविरचितटीकोपेतमूलग्रन्थे पाठः, तत्र नवाक्षरत्वं द्वितीयचरणे नास्ति, किन्तु येष्वण्वादिषु तज्जननस्वभावत्वं निषिध्यते तत्प्रतिपादकं वचनं न विद्यते, तथा च कः पाठोऽत्रादरणीय इत्याकाङ्क्षानिवृत्तये ममेदं भाति–"न तज्जननस्वभावास्तेऽत्र मानं न विद्यते" इति पाठो भवितुमर्हति, आशङ्काप्रतिपादकवचनाभावेऽप्याशङ्का यथोपाध्यायधृतपाठेऽर्थादवगम्यते तथा प्रकृतेऽपि, अणुरपि विशेषोऽध्यवसायकर इति न्यायात्, अण्वादिधर्मिप्रतिपादकवचनघटितत्वादयं पाठो युज्यते, बहुषु प्राचीनपद्येषु नवाक्षरत्वमपि चरणे दृश्यत इति तस्य न दोषत्वमिति यदि भवति प्रेक्षाशालिनां मतिस्तदा नवाक्षरचरणघटितपाठ एव शङ्काभिलापकपदघटितत्वाद् युक्त इति ध्येयम्। **ते** अण्वादयः। **तज्जननस्वभावाः** असत्पञ्चमभूतादिजननस्वभावाः। **न** नैव, ततो नाण्वादिभ्यः पञ्चमभूताद्युत्पत्तिः, स्वभावस्यापर्यनुयोज्यत्वात् कथमण्वादयो नासत्पञ्चमभूताद्युत्पादकस्वभावा इति पर्यनुयोगो न शक्यते कर्तुम्, अन्यथा कथं वह्निर्दहति कथमाकाशो न दहतीत्यादिपर्यनुयोगोऽप्यापद्येत। **चेद्** एवं पर आशङ्केत, **अत्र** आशङ्किते, अण्वादीनामसत्पञ्चमभूताद्यजननस्वभावत्वे, **मानं** प्रमाणम्, **न विद्यते** नास्तीति, अण्वादीनां निर्विकल्पकप्रत्यक्षप्रमाणगम्यत्वस्य परेणाभ्युपगततया निर्विकल्पकप्रत्यक्षविषयत्वमण्वादिष्वसदजननस्वभावस्यापीत्येतत् तदा स्याद् यदि निर्विकल्पकप्रत्यक्षानन्तरभाविनिश्चयात्मकसविकल्पकप्रत्यक्षं परमाण्वादिगततयाऽसदजननस्वभावमवगाहेत, न च तत् तथाऽवगाहत इति निर्विकल्पकप्रत्यक्षमपि न तेष्वसदजननस्वभावमवगाहत इत्यकामेनापि स्वीकरणीयत्वेन निर्विकल्पकं न तत्र प्रमाणम्, "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता" [ ] इति वचनात् स्वसंवेदनात्मकनिर्विकल्पकप्रत्यक्षविषयत्वमपि तदैव तत्र कल्पयितुं शक्यं यद्युत्तरकालं तथा निश्चयः स्यात्, निर्विकल्पके तत्तद्विषयत्वस्य निश्चयैकोन्नेयत्वादिति हृदयम्। अत्र परः शङ्कते—**स्थूलत्वोत्पाद इष्टश्चेदिति**–नन्वणुषु मिलितेषु स्थूलत्वस्य–महत्त्वस्योत्पाद इष्टोऽभिमतो भवतः, 'यद्युत्तरकालं सत् पूर्वकालमसत् तर्हि महत्त्वादिकमुत्पद्यते, यच्च पूर्वकालमुत्तरकालं चासत् पञ्चमभूतादि तन्नोत्पद्यत एवेति स्थूलत्वोत्पादान्यथानु-

पपत्तिरेव सर्वदाऽसत्पञ्चमभूताद्युत्पत्तिप्रसङ्गलक्षणातिप्रसङ्गभङ्गायासदजननस्वभावत्वेनोपादानस्योपेयहेतुत्वे मानमिति चेत् ? अत्रोत्तरमाह—तत्सद्भावेऽपीति-स्थूलत्वस्याणुषु कथञ्चित् सद्भावेऽपीत्यर्थः । असौ स्थूलत्वोत्पादः । समः तुल्यनिर्वाहः, तथा च लाघवात् सज्जननस्वभावत्वेनैवोपादानस्योपेयहेतुता, न त्वसदजननस्वभावत्वेन, तथा च सदेव पूर्वकाले महत्त्वमत उत्पद्यते, यद्येवं चैतन्यमपि भवेत् तदैवोत्तरकाले उत्पद्येत नान्यथेति न प्रत्येकावस्थायामसतश्चैतन्यस्य समुदितावस्थायामुत्पादः सम्भवतीति ॥ ४८ ॥

उक्तदिशा सत्कार्यसिद्धौ पर्यायार्थिकनयानुसारिणः पर्यायमेवाऽऽमनन्तीति पर्यायद्वारेणैव कार्यस्य पूर्वोत्तरकालयोः सत्त्वमादिशन्ति, न तु द्रव्यद्वारेण, तस्य निष्पन्नत्वेन सर्वदाऽवस्थितत्वाददलत्वात्, द्रव्यार्थिकनयानुसारिणस्तु न पर्यायो नामास्ति कृश्चिद् येन तद्रूपेण द्रव्यमुत्पद्येतेति पर्यायरूपेण द्रव्यस्यानुत्पन्नत्वाद् द्रव्यरूपेणैव कार्यस्य पूर्वोत्तरकालयोः सत्त्वमादिशन्ति, तदिदमभिप्रेत्य सम्मतावुक्तम्—

"पच्चुप्पन्नं भावं विगय-भविस्सेहिं जं समण्णेइ ।
एयं पडुच्चवयणं दव्वंतरणिस्सियं जं च ॥" गाथा-१०० इति ॥

[प्रत्युत्पन्नं भावं विगत-भविष्यद्भ्यां यत् समन्वेति ।
एतत् प्रतीत्यवचनं द्रव्यान्तरनिश्रितं यच्च ॥ इति संस्कृतम्]

एतद्वृत्तिरित्थम्—

प्रत्युत्पन्नं भावं-वस्तुनो वर्तमानपरिणामम्, विगत-भविष्यद्भ्यां पर्यायाभ्यां यत् समानरूपतया नयति-प्रतिपादयति, वचः, तत् प्रतीत्यवचनं-समीक्षितार्थवचनम्, सर्वज्ञवचनमित्यर्थः, अन्यच्चानाप्तवचनम् । ननु वर्तमानपर्यायस्य प्रागपि सद्भावे कारकव्यापारवैफल्यम्, क्रिया-गुणव्यपदेशानां च प्रागप्युपलम्भप्रसङ्गश्च, उत्तरकालं च सद्भावे विनाशहेतुव्यापारनैरर्थक्यम्, उपलब्ध्यादिप्रसङ्गश्च, ततो यद् यदैवोपलम्भादिकार्यकृत् तत् तदैव, न प्राक् न पश्चात्, अर्थक्रियालक्षणसत्त्वविरहे वस्तुनोऽभावात्, असदेतत्-तस्य प्रागसत्त्वेऽदलस्योत्पत्त्ययोगात्, न चात्मादि द्रव्यं विज्ञानादिपर्यायोत्पत्तौ दलम्, तस्य निष्पन्नत्वात्, न च निष्पन्नस्यैव पुनर्निष्पत्तिः, अनवस्थाप्रसङ्गात्, न च तत्र विद्यमान एव ज्ञानादिकार्योत्पत्तिः, 'तत्र' इति सम्बन्धाभावतो व्यपदेशाभावप्रसङ्गात्,

समवायसम्बन्धप्रकल्पनायां तस्य सर्वत्राविशेषात् तद्वदाकाशादावपि तत् स्यात्; अथात्मादि द्रव्यमेव तेनाकारेणोत्पद्यत इति नादलोत्पत्तिः, कार्यस्य भवत्येव-मुत्पत्तिः, किन्त्वात्मद्रव्यं पूर्वमप्यासीत् पश्चादपि भविष्यति, तत्सर्वावस्थासु तादात्म्यप्रतीतेः, अन्यथा पूर्वोत्तरावस्थयोस्तत्प्रतिभासो न भवेत्; न चैकत्व-प्रतिभासो भ्रान्तः, बाधकाभावे भ्रान्त्यसिद्धेः; न चार्थक्रियाविरोधो नित्यत्वे बाधकः, अनित्यत्वे एव तस्य बाधकत्वेन प्रतिपादनात्; न चोत्पाद-विनाशयो-रपि तत्र प्रतिपत्तावेकान्ततो नित्यत्वमेव, परिणामनित्यतया तस्य नित्यत्वात्, अन्यथा खरविषाणवत् तस्याभावप्रसङ्गात्; न चैवं तस्य विकारित्वप्रसङ्गो दोषाय, अभीष्टत्वात्; न च नित्यत्वविरोधः, तथैव तत् तत्त्वप्रतीतेः; न च तस्य तथात्व-प्रतिपत्तिर्भ्रान्तिः, बाधकाभावादित्युक्तत्वात्; अथ ज्ञानपर्यायादावात्मनो व्यतिरेके भेदेनोपलम्भः स्यात्, अव्यतिरेके पर्यायमात्रं द्रव्यमात्रं वा भवेत्; व्यतिरेका-व्यतिरेकपक्षस्तु विरोधाघ्रातः, अनुभयपक्षस्तु अन्योऽन्यव्यवच्छेदरूपाणामेक-निषेधेनापरविधानादसङ्गतः, असदेतत्, व्यतिरेकाव्यतिरेकपक्षस्याभ्युपगमात्; न च व्यतिरेकपक्षभावी तद्व्यतिरेकेणोपलब्धिप्रसङ्गो दोषः, एकज्ञानव्यतिरेकेण ज्ञानान्तरेऽपि तस्य प्रतीतेर्व्यतिरेकोपलम्भस्य सद्भावात्, अव्यतिरेकोऽपि ज्ञानात्मकत्वेन तस्य प्रतीतेः; न च व्यतिरेकाव्यतिरेकयोरन्योऽन्यपरिहारेणावस्था-नाद् विरोधः, अबाधितप्रमाणविषयीकृते वस्तुतत्त्वे विरोधासम्भवात्, अन्यथा संशयज्ञानस्यैवानेकरूपस्य वैशेषिकेण, ग्राह्यग्राहकसंवित्तिरूपस्य बुद्ध्यात्मनश्चैका-नेकस्वभावस्य सौगतेन कथं प्रतिपादनमुपपत्तिमद् भवेत्, यदि प्रमाणप्रतिपन्ने वस्तुतत्त्वे विरोधः संगच्छेतेत्यादि पूर्वमेव प्रतिपादितम्; वर्तमानपर्यायस्यान्वयि-द्रव्यद्वारेण त्रिकालास्तित्वप्रतिपादकं प्रतीत्यवचनमिति सिद्धम्। परमाण्वा-रम्भकद्रव्यात् कार्यद्रव्यं द्व्यणुकादिद्रव्यान्तरं वैशेषिकाभिप्रायतः, तेन निःसृतं संबद्धं कारणं परमाण्वादि यत् प्रतिपादयति तदपि प्रतीत्यवचनम्, तथाहि-व्यणुकरूपतया परमाणवः प्रादुर्भूताः, द्व्यणुकरूपतया प्रच्युताः, परमाणुरूप-तयाऽविचलितस्वरूपा अभ्युपगन्तव्याः, अन्यथा तद्रूपतयाऽनुत्पादे प्राक्तन-रूपताऽपगमो न स्यात् परमाण्ववस्थावत्, प्राक्तनरूपानपगमे वा नोत्तररूप-तयोत्पत्तिस्तदवस्थावत्, परमाणुरूपतयाऽपि विनाशोत्पत्त्यभ्युपगमे पूर्वोत्तरा-वस्थयोर्निराधारविगमप्रादुर्भावप्रसक्तिः; न च तदवस्थयोरेवाऽऽधारत्वम्, तयोस्तदानीमसत्त्वात्; न च पूर्वोत्तरकार्यद्रव्यविनाश-प्रादुर्भावयोः कारणद्रव्य-

स्याविनाश-प्रादुर्भावौ, ततस्तस्यैकान्ततो हिमवद्विन्ध्ययोरिव भेदप्रसक्तेः; न च कारणाश्रितस्य कार्यद्रव्यस्योत्पत्तेर्नायं दोषः, तयोर्युतसिद्धितः कुण्डबदरवत् पृथगुपलब्धिप्रसक्तेः, अयुतसिद्धावपि कार्योत्पत्तौ कारणस्याप्युत्पत्तिप्रसक्तिः, अन्यथाऽयुतसिद्ध्यनुपपत्तेः; अथायुताश्रयसमवायित्वमयुतसिद्धिः, सा च कार्योत्पत्तौ कारणानुत्पत्तावपि भवत्येव, न-समवायासिद्धावयुतसिद्ध्यसिद्धेः; न चायुतसिद्धित एव समवायसिद्धिः, इतरेतराश्रयदोषप्रसक्तेः; न चाध्यक्षतः समवायसिद्धेर्नायं दोषः, तन्त्वात्मकपटप्रतिभासमन्तरेणाध्यक्षप्रतिपत्तावपरसमवायाप्रतीतेः, इह तन्तुषु पट इत्यत्रापि प्रत्यये 'इह तन्तुषु' इति प्रतिपत्तिस्तन्त्वालम्बना, 'पटः' इति प्रतिपत्तिः पटालम्बना संवेद्यत इति नापरः समवायप्रतिभासः, न च इह तन्तुषु पट इति लौकिकी प्रतिपत्तिः, किन्तु पटे तन्तव इति, न चान्यथाभूतप्रतिपत्त्याऽन्यथाभूतार्थव्यवस्था; न चानुमानादपि समवायप्रसिद्धिः, प्रत्यक्षाभावे तत्पूर्वकस्य तस्य तत्राप्रवृत्तेः, अनुमानपूर्वकस्य तु तस्यानवस्थादिदोषाघ्रातत्वात् तत्राप्रवृत्तिरित्यनेकशः प्रतिपादितं न पुनरुच्यत इति व्यवस्थितमेतत्-तथाभूतवस्तुप्रतिपादकमेवाप्तवचनम्, एकान्तप्रतिपादकं तु नाप्तवचनम्" इति,

अत्र पर्यायनयाभिप्रायेण "न चात्मादिद्रव्यं विज्ञानादिपर्यायोत्पत्तौ दलं तस्य निष्पन्नत्वात्" इति वृत्तिकृतोक्तम्, द्रव्यनयाभिप्रायेण चोपचयमाह— न चेति-इत्थमेवावधारितं श्रीमद्भिर्यशोविजयोपाध्यायैः, पूज्यैः श्रीहरिभद्रसूरिभिस्तु उपचयमाह—

न च मूर्ताणुसंघातभिन्नं स्थूलत्वमित्यदः ।
तेषामेव तथाभावो, न्याय्यं मानाविरोधतः ॥ ४९ ॥

न चेति-मूर्तानां-रूपवताम्, अणूनां-परमाणूनाम्, सङ्घातात्-परिणामविशेषात्, भिन्नम्-अतिरिक्तम्, स्थूलत्वं-महत्त्वम्, न च-नैव, रूपवत्परमाणुपरिणामविशेषात्मकमेव स्थूलत्वमित्यर्थः, चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं महत्त्वं च कारणम्, तत्र महत्त्वमणुसङ्घातस्य तदात्मकत्वादेवायाति प्रत्येकमणुषु रूपाभावे तत्परिणामविशेषोऽपि रूपवान्न स्यादिति तत्प्रत्यक्षं न भवेदिति तत्प्रत्यक्षोपपत्तये रूपवदित्यर्थकं मूर्तपदमणुपदसामानाधिकरण्येनोपदर्शितम्। इति एतस्माद्धेतोः। अदः स्थूलत्वम्। तेषामेव परमाणूनामेव। तथाभावः

कथञ्चिदेकत्वपरिणामः । न्याय्यम् न्यायोपेतम् । मानाविरोधतः प्रमाणविरोधाभावात्, यदि प्रमाणविरोधः स्यात् तदा बाधितत्वान्नैवमनुमातुं शक्यम्, न चैवम् । ननु 'स्थूलत्वं परमाणूनामेव कथञ्चिदेकत्वपरिणामः, परमाणूनामेव कथञ्चिदेकत्वपरिणामत्वाद्' इत्येवमनुमानप्रयोगे हेतु-साध्ययोरैक्याद्धेतोः सिद्धौ तदात्मकं साध्यमपि सिद्धमिति सिद्धसाधनदोषः, साध्यस्यासिद्धौ तदात्मको हेतुरप्यसिद्ध इति हेत्वसिद्धिरिति चेत् ? स्यादेवं, यद्यप्येकरूपेणैव हेतु-साध्यभावो भवेत्, न चैवम्, किन्तु मूर्ताणुसङ्घातभिन्नभेदरूपेण हेतुना मूर्ताणुसङ्घातरूपत्वं साध्यते, तथा च हेतु-साध्ययोरैक्येऽपि हेतुतावच्छेदक-साध्यतावच्छेदकयोर्भेदात्, हेतुतावच्छेदकरूपेण सिद्धावपि साध्यतावच्छेदकरूपेण सिद्ध्यभावान्न सिद्धिसाधनावकाशः, साध्यतावच्छेदकरूपेणासिद्धावपि हेतुतावच्छेदकरूपेण सिद्धत्वाद्धेत्वसिद्धिरपि नास्तीति, यदा च परमाणूनामेवैकत्वपरिणामः स्थूलत्वं तदा परिणाम्यणुद्रव्यरूपेण तस्य प्रागपि सिद्धं सत्त्वम् ।

अत्र स्याद्वादिनां प्रक्रिया अनेकान्ततत्त्वमर्मज्ञैर्यशोविजयोपाध्यायैरुपदर्शिता सोपस्कारोपदर्श्यते, तथाहि—अणूनामेवैकत्वसङ्ख्या-संयोग-महत्त्वा-ऽपरत्वादिपर्यायैरुत्पत्तिः, विशकलितानामणूनामनेकेषां प्रागेकत्वसङ्ख्यादिपर्यायाणामभावात्, बहुत्वसङ्ख्या-विभागा-ऽणुपरिमाण-परत्वादिपर्यायैश्चानुत्पत्तिः, बहुत्वसङ्ख्यादीनां तत्र पूर्वमपि भावात्; संहतपरमाण्वव्यतिरिक्तं नैयायिकादिपरिकल्पितमवयविद्रव्यं च नास्ति; न च विशिष्टाण्वतिरिक्तावयव्यभावे विभक्तस्याणोर्यथा चाक्षुषप्रत्यक्षं न भवति तथा संहतस्याप्यणोः चाक्षुषप्रत्यक्षं न भवेदिति जगति चाक्षुषप्रत्यक्षाभाव एव प्रसक्त इति वाच्यम्, परमाणोर्नानास्वभावत्वेनाचाक्षुषत्वमिव चाक्षुषत्वमपि तस्य स्वभावः संहतिकालश्च तन्निमित्तमिति तदा चाक्षुषप्रत्यक्षजननस्वभावत्वाच्चाक्षुषप्रत्यक्षविषयत्वम्, यथा विप्रकृष्टेषु रेणुषु चाक्षुषप्रत्यक्षाजननस्वभावत्वं सन्निकृष्टेषु तेषु चाक्षुषप्रत्यक्षजननस्वभावत्वमित्येवं विभिन्ननिमित्तापेक्षनानास्वभावत्वं दृश्यते तथा प्रकृतेऽपि, अणूनां नानास्वभावस्य दर्शनबलाद् व्यवस्थितौ यस्य सन्निकृष्टस्य प्रमातुर्भवति यत्संहतस्य दर्शनं तत्प्रमात्रपेक्षया तस्य संहतस्य परमाणोश्चाक्षुषजननस्वभावत्वम्, यस्य च न भवति दर्शनं तत्प्रमात्रपेक्षया तस्यैव चाक्षुषाजननस्वभावत्वमित्येवमुपगमे एकस्य प्रत्यक्षे सर्वेस्यापि प्रमातुस्तत्प्रत्यक्षापत्तिरित्येवमतिप्रसङ्गो न भवतीत्येवं बहवो

मेनिरे। संहतस्य परमाणोश्चाक्षुषप्रत्यक्षविषयत्वे यथा घटादेस्तद्व्यणुकादेश्च संहतपरमाणुस्वरूपस्य चाक्षुषप्रत्यक्षं भवति तथा पिशाचादेस्तथा तद्व्यणुकादेश्च चाक्षुषप्रत्यक्षं स्यात् संहतपरमाणुरूपत्वस्याविशेषादतो घटत्व-तद्व्यणुकत्वादि-घटकपरमाणुसंयोगानां पिशाचत्व-तद्व्यणुकत्वादिघटकसंयोगभिन्नानां वैजात्येन द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रति हेतुत्वात् तादृशवैजात्यरूपचाक्षुषप्रत्यक्षजनकतावच्छेदकस्य घटत्वतद्व्यणुकादिघटकसंयोग एव सत्त्वमतस्तत्संयोगवतः परमाणोरेव चाक्षुषमिति परतन्त्रानुसारिणो वदन्ति। ननु परिणतिविशेषापन्नानामणूनां नानास्वभावत्वेन चाक्षुषजननस्वभावत्वतच्चाक्षुषत्वस्योपपादनेऽपि, यथैकं द्रव्यं समवेतं यत्र तद्द्रव्यनाशमन्तरेण नान्यद् द्रव्यं तत्रोत्पद्यते इत्यनुरोधेन यथाऽवयव्यभ्युपगन्तुः परस्य मते सामानाधिकरण्यप्रत्यासत्त्या द्रव्यस्य द्रव्यान्तरोत्पत्ति-प्रतिबन्धकत्वमुपेयत इति यावन्न पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशस्तावन्नान्यस्योत्तरद्रव्यस्योत्पादः, अन्त्यावयविनो विनाशतस्तदुत्तरं तदवयवे खण्डावयविनः समुत्पत्तिः, न तु तत्सत्त्वकाले, अन्यथा तं तत्तदवयवाँश्चोपादानीकृत्याप्यपरद्रव्यमुत्पद्येतेत्यन्त्यावयवित्वमेव तस्य न स्यात्, एवं च तन्त्वादिपरिणतानामणूनां पटादिपरिणामो न भवेत्, द्रव्यस्थानीयस्य परिणामस्य द्रव्यान्तरस्थानीयपरिणामप्रतिबन्धकत्वादिति चेत्? न-अन्त्यावयविनि पटादौ सत्यपि खण्डपट-महापटाद्युत्पत्तिदर्शनेन द्रव्यस्य द्रव्यान्तरोत्पत्तिं प्रति प्रतिबन्धकत्वे मानाभावात्; नन्वेवं पटे पटान्तरसत्त्वे 'पटे पटः' इत्यपि प्रतीतिः स्यादिति चेत्? न-पटत्वस्य पटत्वावच्छिन्नाधेयतानिरूपिताधारतानवच्छेदकत्वे पटे पट इति प्रतीत्यापत्त्यभावात्। ननु द्रव्यनाशः कश्चित् समवायिकारणनाशाद् भवति, यथा कपालनाशाद् घटनाशः, यत्र च सत्यप्यवयवेऽवयविनो नाशस्तत्रासमवायिकारणीभूतसंयोगनाशाद् द्रव्यनाशः, यथा कपालद्वयस्य सत्त्वेऽपि तद्विभागेन घटनाशोऽसमवायिकारणीभूतकपालद्वयसंयोगविनाशात्, तथा च समवायिकारणनाशादसमवायिकारणनाशाद् वा द्रव्यनाश इत्यायाति, परमेवमेवाभ्युपगमेऽसमवायिकारणनाशतो जायमानस्य द्रव्यनाशस्य समवायिकारणनाशाभावेऽपि भावेन, समवायिकारणनाशतोऽसमवायिकारणनाशोत्पत्तिक्षण एव जायमानस्य द्रव्यनाशस्य पूर्वमसमवायिकारणनाशाभावेऽपि भावेन व्यतिरेकव्यभिचारेण सामान्यतो द्रव्यनाशत्वावच्छिन्नं प्रत्यसमवायिकारणनाशत्वेनासमवायिकारणनाशस्य समवायिकारणनाशत्वेन समवायिकारणनाशस्य च

कारणत्वं न सम्भवतीत्यतः समवायिकारणनाशाव्यवहितोत्तरजायमानद्रव्यनाशत्वावच्छिन्नं प्रति समवायिकारणनाशत्वेन समवायिकारणनाशस्य, असमवायिकारणनाशाव्यवहितोत्तरजायमानद्रव्यनाशत्वावच्छिन्नं प्रति असमवायिकारणनाशत्वेनासमवायिकारणनाशस्य कारणत्वं वाच्यमिति गौरवं स्यात्, तदपेक्षया लाघवेन द्व्यणुकसमवायिकारणस्य परमाणोर्नित्यस्य नाशो न भवत्येवेति द्व्यणुकनाशं प्रति परमाणुद्वयसंयोगात्मकासमवायिकारणनाशस्यैव कारणत्वं क्लृप्तमित्यन्यत्रापि द्रव्यनाशेऽसमवायिकारणनाशस्यैव कारणत्वम्, यत्र कपाललक्षणसमवायिकारणनाशाद् घटनाशः प्रतीयते तत्रापि कपालनाशतः कपालद्वयसंयोगनाशे तत एव घटनाशः, समवायिकारणनाशोत्पत्तिक्षणे निराश्रयस्य द्रव्यस्यावस्थानावश्यकत्वेन क्षणद्वयेऽपि द्रव्यस्य निराश्रयावस्थानं स्वीकर्तुमुचितमित्येवं द्रव्यनाशत्वावच्छिन्नं प्रत्येवासमवायिकारणसंयोगनाशस्य हेतुत्वव्यवस्थितौ द्रव्यासमवायिकारणीभूतसंयोगनाशेन पूर्वपटनाशोत्तरमेवोत्तरपटोत्पादः; न च द्वितन्तुकादिरूपे पटे एकैकतन्तुसंयोगे द्वितन्तुकादिपटनाशे त्रितन्तुकादिपटोत्पत्तिः, पुनरेकैकतन्तुवियोगे त्रितन्तुकादिपटनाशे द्वितन्तुकादिपटोत्पत्तिरिति कल्पनागौरवाद् द्वितन्तुकपटादेरेव तन्त्वन्तरसंयोगेन त्रितन्तुकादिपटोत्पादकत्वमिति वाच्यम्, द्वितन्तुकादिक्रमेणोत्पन्नचतुरादितन्तुकपटस्य द्वितन्तुकासमवायिकारणसंयोगनाशाद् द्वितन्तुकादिनाशक्रमेण नाशः, अन्तरा पुनर्द्वितन्तुकादिक्रमेणोत्पत्तिरिति कल्पनागौरवसाम्यात्, पटादिजनकविजातीयसंयोगं प्रति तन्तुत्वादिना हेतुत्वात् तन्तोस्तन्त्वन्तरेण संयोग एव पटजनकविजातीयसंयोगो न तु पटेन सह तन्तुसंयोगः, पटस्य पटजनकविजातीयसंयोगं प्रति जनकत्वाभावादिति न द्वितन्तुकादिपटस्य तन्त्वन्तरसंयोगतस्त्रितन्तुकादिपटोत्पत्तिः किन्तु त्रिचतुरादिसङ्ख्यकानां तन्तूनामेवान्योऽन्यं विजातीयसंयोगात् त्रितन्तुकादिपटोत्पत्तिरिति पूर्वासमवायिकारणीभूततन्तुसंयोगनाशाद् द्वितन्तुकादिपटनाशः, पुनस्त्रिसङ्ख्यकादितन्तुसंयोगात् त्रितन्तुकादिपटोत्पाद इति न द्वितन्तुकादिपटे सत्येव त्रितन्तुकादिपटोत्पत्तिरिति चेत्, न–विजातीयसंयोगस्य द्रव्यहेतुत्वासिद्धेः, द्वितन्तुकपटादिना तन्त्वन्तरसंयोगो न विजातीयः किन्तु तन्तूनां संयोग एव, एतच्च तन्तुत्वेन कारणत्वस्वीकारमात्रेण न निर्वहति, यत्र तान-वितानादिक्रमेण न तन्तूनां संयोगः किन्तूर्ध्वाधोऽवस्थानमात्रतस्तन्तूनां संयोगः, सोऽपि तन्तुसंयोगो भवत्येव, न च ततः पटोत्पत्तिरिति ततो विलक्षण एव संयोगो विजातीयो

वाच्यः, तं प्रति कारणान्तरकल्पनापेक्षयाऽवश्याश्रयणीयेन स्वभावापरनाम्ना परमाणुगतातिशयेनैव द्रव्योत्पत्तिसम्भवाद् विजातीयसंयोगस्य द्रव्यहेतुत्वे प्रमाणाभावात्, द्रव्योत्पत्तिप्रयोजकः स्वभावापरनामा परमाणुगतातिशयश्च शक्तिस्तदन्यो वेति वादान्तरम्, अतिशयस्यैव द्रव्यान्तरोत्पादप्रयोजकत्वं न तु संयोगस्येति व्यवस्थितौ दशतन्तुकपटादेश्चरमतन्तुसंयोगवियोगक्रमेण यथा नवतन्तुकपटोपलब्धिस्तथा प्रथमतन्तुसंयोगवियोगक्रमेणापि नवतन्तुकपटोपलब्धिरबाधितैव, नवपर्यन्तैस्तन्तुभिरतिशयशालिभिर्नवतन्तुकपटारम्भस्येव द्वितीयादिभिरपि नवतन्तुभिरतिशयितैर्नवतन्तुकपटारम्भस्य सम्भवात्; न चैवं प्रतिलोमक्रमेणानन्तपटकल्पनापत्तिः, द्वितीयमादाय नवतन्तुकपटस्येव तृतीयमादायाष्टतन्तुकपटस्यापि स्वीकर्तव्यत्वादिति वाच्यम्, इष्टत्वात्, एकानेकस्वभावाविरोधात्; न चैवं दशतन्तुकपटे नवतन्तुकाष्टतन्तुकपटादिसत्त्वे दशतन्तुकपटोपलब्धिसमये नवतन्तुकपटाद्युपलब्धिः स्यात्, एवं नवतन्तुकपटोपलब्धिकालेऽष्टतन्तुकपटाद्युपलम्भः स्यादिति वाच्यम्, दशतन्तुकपटस्थले नवतन्तुकपटस्य सत्त्वेऽप्येकतन्तुसंयोगविगमस्य तत्र तदभिव्यञ्जकस्याभावान्नवतन्तुकपटोपलब्ध्यभावोपपत्तेः, तत्रैव द्वितन्तुसंयोगविगमादेरष्टतन्तुकपटाद्यभिव्यञ्जकस्याभावादष्टतन्तुकपटादेरप्युपलब्ध्यभावात्, एवं नवतन्तुकपटेऽप्यष्टतन्तुकपटादिसत्त्वेऽप्येकतन्तुसंयोगविगमादिलक्षणाभिव्यञ्जकाभावादष्टतन्तुकपटाद्यनुपलब्धिसम्भवात्, प्रतिनियताभिव्यञ्जकाभावादेव सहस्रतन्तुकादिरूपे महति पटे एकोनसहस्रतन्तुकादिरूपाणां बहूनां पटानामनुपलब्धावेकः पट इति प्रतीतिर्नानुपपन्ना, यथावाऽङ्गुलीभूतलसंयोगे पाणिभूतलसंयोग-शरीरभूतलसंयोगादेः सत्त्वेऽपि तदवच्छेदेन तस्य बहुविधस्यानुपलब्धिरेव तथैवैकपटस्यैवोपलब्धिर्न तु सतोऽप्यनेकपटस्य, न चानुपलब्धिमात्रेण पटान्तराणामसत्त्वम्, तथा सत्यङ्गुलीभूतलसंयोगावच्छेदेन पाण्यादिसंयोगानामनुपलब्ध्या तेषामप्यभावापत्तेरिति।

ननूक्तदिशा द्रव्यस्य द्रव्यान्तराप्रतिबन्धकत्वेन दशतन्तुकपटादौ नवतन्तुकपटादिसद्भावेऽपि पटात्मकपरिणामकाले तन्त्वादिपरिणामस्य सद्भावो न भवेत्, पूर्वावस्थानाशेनैवोत्तरावस्थाया अभ्युपगमेन तन्त्वादिपरिणामलक्षणपूर्वावस्थानाशेनैव पटादिपरिणामलक्षणोत्तरावस्थोत्पत्तेरिति पटकाले विनष्टस्य तन्तोः प्रतीतिर्न स्यात्, प्रत्यक्षप्रतीतौ वर्तमानतयैव विषयाणां कारणत्वस्यातीतविषयाप्रत्यक्षानु-

रोधेनोपगमादिति चेत् ? न-प्रायोगिक-वैस्रसिकभेदेन विनाशस्य द्वैविध्यात्, तत्राद्यस्य पुरुषप्रयत्नजनितस्य समुदयजनितत्वेनैकविध्यमेव, द्वितीयस्य तु स्वाभाविकस्य समुदयजनितत्वैकत्विकत्वाभ्यां द्वैविध्यम्, तत्रैकत्विकत्वं धर्मास्तिकायादीनां विनाशे स्वीकरणीयम्, यतो धर्मास्तिकायस्य गत्याधारत्वपर्यायोत्पादो गत्यनाधारत्वध्वंसपूर्वकः, अधर्मास्तिकायस्य स्थित्याधारत्वपर्यायोत्पादः स्थित्यनाधारत्वध्वंसपूर्वकः, आकाशास्तिकायस्य च जीवाद्यवगाढावगाहदानाधारत्वपर्यायोत्पादस्तदनाधारत्वध्वंसपूर्वकः, न च तेषां ध्वंसानां समुदयाजनितत्वेनैकत्विकत्वेऽपि गत्यनाधारत्वादिप्रतियोगिकत्वान्न धर्मास्तिकायादिप्रतियोगिकत्वमिति धर्मादीनां विनाश एव नास्तीति कथं तस्यैकत्विकत्वमिति वाच्यम्, क्षणविनाशे क्षणविशिष्टविनाशस्येव गत्यनाधारत्वादिविनाशे तद्विशिष्टधर्मास्तिकायादिविनाशस्याप्यवश्यम्भावात्, यश्च समुदयजनितः स्वाभाविको विनाशः स समुदयविभागलक्षणा-ऽर्थान्तरगमनलक्षणभेदाद् द्विविधः, तत्र समुदयविभागलक्षणविनाशस्य संयोगात्मकसमुदयरूपप्रतियोगिप्रतिपत्तिविरोधित्वेऽपि अर्थान्तरगमनलक्षणविनाशस्य प्रतियोगिप्रतिपत्त्यविरोधित्वादिति पटादिपरिणामस्तन्तोरर्थान्तरगमनलक्षण एव विनाश इति तस्य तन्तुप्रतिपत्त्यविरोधित्वेन पटकालेऽपि तन्तुप्रतिपत्तेरुपपत्तेरिति ॥ ४९ ॥

ननु स्थूलत्वं महत्त्वलक्षणपरिमाणविशेषो गुणजातीयः, परमाणुश्च द्रव्यम्, तयोश्चाभेदो न संभवति, गुणगुणिनोर्भेदात्, तथा महत्त्वलक्षणपरिमाणविशेषः कारणबहुत्वसङ्ख्यातः कारणमहत्त्वपरिमाणात् कारणगतशिथिलाख्यसंयोगलक्षणप्रचयाच्चोपजायते, यदुक्तम्—

"सङ्ख्यातः परिमाणाच्च, प्रचयादपि जायते ।
अनित्यं द्व्यणुकादौ तु, सङ्ख्याजन्यमुदाहृतम् ॥
परिमाणं घटादौ तु, परिमाणजमुच्यते ।
प्रचयः शिथिलाख्यो यः, संयोगस्तेन जन्यते ॥
परिमाणं तूलकादौ, नाशस्त्वाश्रयनाशतः ।" [कारिकावलि-] इति,

तथा चोक्तकारणत्रयान्यतमेन जायमानस्य महत्त्वस्यावयविनिष्ठत्वं युक्तम्, न तु परमाणुस्वरूपत्वं तस्य जन्यत्वाभावात्, न च परमाणोर्निरवयवस्य कारणं विद्यते येन तद्गतसङ्ख्यादितः परमाणुपरिणतिविशेषः स भवेत्; न च परमाणु-

पुञ्जैरेवावयविकार्योपपत्तेरवयविनि मानाभावः, विलक्षणसंस्थानावच्छेदेन चक्षुस्सन्निकर्षाद् यद्द्रव्यगतघटत्वादिग्रहस्तत्तद्घटादिद्रव्यव्यक्तेरुत्पादविनाशभेदादिप्रत्यया जायन्ते, न च तेऽतिरिक्तावयविनमन्तरेण सम्भवन्तीति तदन्यथानुपपत्तिलक्षणप्रमाणादतिरिक्तावयविसिद्धेः; न चावृतत्वा-ऽनावृतत्वरूपविरुद्धधर्माध्यासादवयविनो भेदापत्तावेकोऽवयवी न संभवतीति वाच्यम्, "विरुद्धधर्माध्यासः कारणभेदश्च भेदहेतुः, स चेन्न भेदको विश्वमेकं स्यात्" इति बौद्धवचनाद् विरुद्धधर्माध्यासस्य भेदसाधकत्वेऽपि आवृतत्वानावृतत्वयोरवच्छेदकभेदेनैकत्र वर्तमानयोरविरुद्धत्वेन तद्वत्त्वाद् भेदापत्त्यभावात्; न चावृतत्वा-ऽनावृतत्वयोरवच्छेदकभेदेनैकत्रावयविनि सत्त्वेऽर्धावृतोऽप्यवयवी यद्भागावच्छेदेनानावृतस्तद्भागावच्छेदेनेन्द्रियसन्निकर्षसत्त्वे परिमाणादिग्रहः स्यात्, इष्टत्वात्, अर्धावृतावयविनि परिमाणं गृह्यत एव, तद्वतहस्तत्वादिकं परिमाणत्वावान्तरसामान्यं तु न गृह्यते, हस्तत्वाद्यवान्तरसामान्यप्रत्यक्षे यावदवयावच्छेदेन द्रव्येन्द्रियसन्निकर्षस्य हेतुत्वात्, अर्धावृतावयविनि यावदवयवावच्छेदेनेन्द्रियसन्निकर्षाभावात्; न च सकम्पत्व-निष्कम्पत्वरूपविरुद्धधर्माध्यासाद् भेद एवावयविन इति नैकोऽवयवी सम्भवति, 'पाणौ शरीरं सकम्पं, निष्कम्पं च चरणे' इति प्रतीतिश्च तत्र विरुद्धधर्माध्यासमवगाहत इति वाच्यम्, तत्र पाणावेव कम्पस्वीकारात्, पाणिगतकम्पस्यैव स्वाश्रयसमवेतत्वरूपपरम्परासम्बन्धेन शरीरे वृत्तित्वावगाहितया 'पाणौ शरीरं चलति' इति प्रत्ययोपपत्तेः; न च कम्पस्य साक्षात्सम्बन्धमुपादायैव शरीरे पाणौ शरीरं सकम्पमिति प्रतीतिः, निष्कम्पं चरणे शरीरमिति तु चरणनिष्ठकम्पाभावस्य स्वाश्रयसमवायित्वसम्बन्धलक्षणपरम्परासम्बन्धं शरीरऽवगाहत इति वाच्यम्, पाणिगतकर्मणैव परम्परासम्बन्धेन शरीरसम्बन्धिना पाणौ शरीरं सकम्पं पाणौ शरीरं चलतीत्यादिप्रतीतेरुपपत्तौ साक्षात्सम्बन्धेन शरीरवर्तिनोऽवयवकर्मातिरिक्तकर्मणः कल्पने गौरवात्; न च यथा पाणिगतकर्मैव परम्परासम्बन्धेन शरीरे प्रतीयते, न तु शरीरगतं कर्म, तथा पाणादावपि साक्षात्सम्बन्धेन कर्म माऽस्तु, त्रुटिगतमेव साक्षात्सम्बन्धेन कर्म परम्परासम्बन्धेन पाणादावपि प्रतीयत इत्येवं कल्पने महल्लाघवमिति वाच्यम्, सर्वावयवावच्छेदेनोपलभ्यमानकर्मवत्यपि शरीरादौ साक्षात्सम्बन्धावच्छिन्नकर्मनिष्ठप्रतियोगिताकाभावस्य सत्तया तदुपलम्भापत्तेः; एतेनान्त्यावयविनि शरीरादावेवास्तु साक्षात्सम्बन्धेन कर्म, तस्यैव स्वाश्रयवत्त्वतदाश्रय-

त्वादिरूपपरम्परासम्बन्धेन पाणि-तदवयवादौ प्रतीतिरस्तु, साक्षात्सम्बन्धेन नानावयवे कर्म कल्पनायां गौरवादित्यपास्तम्, पाण्यादौ साक्षात्सम्बन्धेन कर्मणोऽनभ्युपगमे साक्षात्सम्बन्धावच्छिन्नकर्मनिष्ठप्रतियोगिताकाभावस्य परम्परासम्बन्धेनोपलभ्यमानकर्माविरुद्धस्य पाण्यादौ सत्त्वेन तदुपलम्भापत्तेः; न च कर्मणः परम्परासम्बन्धोऽपि कर्माभावोपलम्भे दोषविधया प्रतिबन्धक इति तत एव न साक्षात्सम्बन्धावच्छिन्नकर्मनिष्ठप्रतियोगिताकाभावस्योपलम्भ इति वाच्यम् 'पाणौ शरीरं सकम्पं निष्कम्पं च चरणे' इत्येवं चरणे निरुक्तकर्माभावप्रतीत्यभावापत्तेः, शरीरगतकर्मणः परम्परासम्बन्धस्य निरुक्तकर्माभावप्रतीतिप्रतिबन्धकस्य चरणे सत्त्वात्, उक्तसम्बन्धस्य दोषत्वकल्पने गौरवाच्च, तस्मादावृतत्वानावृतत्व-सकम्पत्वनिष्कम्पत्वादीनामप्यवच्छेदकभेदेनैकत्रावयविनि सत्त्वे विरोधाभावादवयविनो भेदापत्त्यसम्भवे विलक्षणसंस्थानावच्छेदेन चक्षुस्सन्निकर्षजन्यप्रत्यक्षविषयघटत्वादिमद्द्रव्यैकरूपादिनाशभेदादिप्रत्ययान्यथानुपपत्त्या पृथक्तया सिद्धेऽवयविन्येव कारणबहुत्व-कारणमहत्त्व-प्रचयान्यतमप्रभवं महत्त्वं न परमाण्वभिन्नमित्याशङ्क्यायामाह—

भेदे तदद्दलं यस्मात्, कथं सद्भावमश्नुते? ।
तदभावेऽपि तद्भावे, सदा सर्वत्र वा भवेत् ॥ ५० ॥

भेद इति। भेदे स्थूलत्वस्य महत्त्वापरपर्यायस्य परमाणुभ्य एकान्तेन भेदे, **अदलं सत्** अनुपादानं सत्, **तत्** स्थूलत्वम्, **यस्मात्**, **कथं** केन प्रकारेण, **सद्भावं** सत्ताव्यवहारं स्थूलत्वं सदित्यादिप्रतीतिव्यपदेशलक्षणम्, **अश्नुते** प्राप्नुयात्? यद् द्रव्यादैकान्तेन भिन्नं तदसत्, यथा शशशृङ्गादि, द्रव्यादैकान्तेन भिन्नं च स्थूलत्वमतस्तदसदेव भवेत्, **तदभावेऽपि** दलाभावेऽपि, उपादानाभावेऽपीति यावत्, **तद्भावे** स्थूलत्वोत्पादे, अभ्युपगम्यमाने इति च दृश्यम्, **सदा** सर्वदा, यदोपादानादिसकलकारणसमवधानं तदोपादेयस्योत्पाद इत्येवमुपादेयस्य कादाचित्कत्वमुपादानादिकारणसमवधानकादाचित्कत्वनिबन्धनं महत्त्वस्य चानुपादानस्य न तत्कादाचित्कत्वनिबन्धं समस्तीति प्रतिनियतकालवृत्तित्वे नियामकाभावात् सर्वकालवृत्तित्वमेव तस्य स्यादित्यर्थः । यद्देशे उपादानादिकारणसमवधानं तद्देशे उपादेयोत्पाद इति नियमलभ्यश्चोपादेयस्य देशनियमः, निरुपादानस्य तु महत्त्वस्योपादानादिकारणसमवधानाश्रयदेशत्वरूप-

तद्देशनियमहेतोरभावात् सर्वदेशत्वमेव विनिगमकाभावादापतेदित्याह–**सर्वत्र वेति, भवेत्** स्यात्, तदिति योजनीम् । ननु महत्त्वस्यादलत्वे सर्वमिदमुच्यमानं शोभेत, तदेव नास्ति, त्र्यणुकादेरेव महत्त्वोत्पादनत्वेन तदुपादानकत्वरूपतदलत्वस्य महत्त्वे सद्भावात्, उपादानभिन्नदलवत्त्वाभावलक्षणमदलत्वं च देशकालनियमाभावेऽप्रयोजकमेवेति तादृशादलत्वतो महत्त्वस्य न देशकालनियमाभावप्रसक्तिः, अत्र च सामान्यत उपादानोपादेयभाव इत्थम्–समवायसम्बन्धेन जन्यसत्त्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यत्वेन द्रव्यं कारणम्, सत्त्वस्य नित्यद्रव्य-नित्यगुणयोरपि सत्त्वात् कार्यत्वस्य तत्राभावेनातिप्रसक्तत्वादन्यूनानतिप्रसक्तधर्मस्यावच्छेदकत्वमतस्तस्य जन्यतावच्छेदकत्वासम्भवेन जन्यत्वस्य कार्यतावच्छेदककोटौ निवेशः, जन्यत्वं ध्वंसेऽपि वर्तते, ध्वंसश्च समवायसम्बन्धेन नोत्पद्यते किन्तु स्वरूपसम्बन्धेनैवेति जन्यत्वमात्रावच्छिन्नकार्यता न समवायसम्बन्धावच्छिन्नेत्यतः सत्त्वस्यापि कार्यतावच्छेदककोटौ निवेशः, उक्तकार्यकारणभावमूलकः समवायेन जन्यसन्मात्र द्रव्य एवोत्पद्यत इति नियमः, तादात्म्येन द्रव्यं च द्रव्य एव वर्तते न तु गुणादावतो महत्त्वस्य न गुणादावुत्पत्तिप्रसङ्गलक्षणाऽतिप्रसङ्ग इति चेत्? न-समवायसम्बन्धस्य निरासेन तस्य जन्यसत्त्वावच्छिन्नकार्यतावच्छेदकत्वासम्भवात्, जन्यसत्त्वापेक्षया लघुभूतस्य जन्यत्वस्यैव ध्वंससाधारणस्य तादात्म्यसम्बन्धावच्छिन्नद्रव्यत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वौचित्यात्, द्रव्यगतगुणादिध्वंसोऽपि कथञ्चिद्द्रव्याभिन्न एवेत्यपृथग्भावलक्षणं तादात्म्यमेवात्र निरुक्तकार्यतावच्छेदकसम्बन्ध इति अपृथग्भावेन महत्त्वं द्रव्ये समुत्पद्यत इति तस्य परमाणुद्रव्याभिन्नत्वमेव युज्यते; अनन्तावयव्यादिकल्पने गौरवादतिरिक्तावयविनि मानाभावश्च, आवृतत्वा-ऽनावृतत्वाभ्यां भेदादेकोऽवयवी न संभवतीत्यपि युक्तमेव, ज्ञानप्रतिबन्धकसंयोग आवृतत्वम्, ज्ञानप्रतिबन्धकसंयोगाभावोऽनावृतत्वम्, संयोग-तदभावयोश्चाव्याप्यवृत्तित्वं सर्वानुमतमिति तदात्मकयोरावृतत्वा-ऽनावृतत्वयोर्भिन्नावच्छेदेनैकत्र संभवेऽपि चाक्षुषविषयत्वमनावृतत्वं तदभावश्चावृतत्वम्, विषयता च विषयस्वरूपैवेति न तस्या अव्याप्यवृत्तित्वमिति तद्रूपयोरावृतत्वा-ऽनावृतत्वयोर्न भिन्नावच्छेदेनैकत्र संभव इति तदुभयाध्यासादवयविनो भेदेनैकत्वसंभवः, 'पाणौ शरीरं सकम्पं निष्कम्पं च चरणे' इति प्रतीतिबलात् सकम्पत्व-निष्कम्पत्वरूपविरुद्धधर्माध्यासाच्छरीररूपावयविनो भेदाच्च नैकत्वसंभवः, शरीरे निष्कम्पत्वस्यैवोपगमे पाणौ न चलति

शरीरमित्यपि प्रतीतिश्चरणे न चलति शरीरमिति प्रतीतिवत् स्यात्; ननु शरीरे कर्माभावो व्याप्यवृत्तिरेव, तस्य यथा न शरीरत्वादिकमवच्छेदकं तथा पाणिरपि नावच्छेदक इति शरीरवृत्तिकर्माभावस्य पाण्यनवच्छिन्नत्वादेव तस्य पाण्यवच्छिन्नत्वावगाहिन्याः 'पाणौ न चलति शरीरम्' इति प्रतीतेरप्रसङ्ग इति चेत्? न-यदा चरणे कम्पः, पाणौ न कम्पः, तदानीं पाणौ न चलति शरीरमिति प्रतीतेरनुभूयमानाया अप्यपलापापत्तेः; न च यदा पाणौ कर्म तदाऽपि शरीरे नास्त्येव कर्म, तथापि पाणौ न चलति शरीरमिति यत्र प्रतीयते तत्र दोष एव निबन्धनमिति वाच्यम्, तादृशदोषकल्पने गौरवात्; किञ्च, यथाऽवयवगतकर्मैव परम्परयाऽवयविवृत्ति, परम्परासम्बन्धेन कर्मवत्त्वमेवावगाहते शरीरे कर्मप्रतीतिरित्यवयविनो निष्कर्मत्वमेव, तथा वृक्षादावपि कपिसंयोगादिकं साक्षात्सम्बन्धेन नास्त्येव, किन्त्वग्रादिनिष्ठकपिसंयोगादेरेव स्वाश्रयसमवेतत्वरूपपरम्परासम्बन्धेनाश्रयत्वमवगाहते वृक्षेऽग्रे कपिसंयोग इति प्रतीतिः, तथा च संयोगादेरपि कर्मवद् व्याप्यवृत्तित्वमेव स्यात्, अपि चावयविनो व्यतिरिक्तत्वेऽवयविसद्भावकालेऽवयवानामपि सद्भावोऽवयवगुरुत्वेभ्यश्चातिरिक्तावयविनि गुरुत्वमप्यतिरिक्तमुपजायत इत्यवयवनोऽनारम्भदशायां शतमाषकावयवगुरुत्वकार्यतुलाऽवनतितोऽधिकतरावनतिविशेषः शतमाषकारब्धावयविनि गुरुत्वाधिक्यात् स्यात्, तदानीमवयवगुरुत्वानामवयविगुरुत्वस्य च सत्त्वात्; ननु समयोर्गुरुतरद्रव्ययोरुत्तोलने एकत्रापकृष्टगुरुत्ववत्संलग्नतृणादिगुरुत्वाधिक्येऽपि नावनतिविशेषो यथा, तथैवावयविगुरुत्वाधिक्येऽपि नावनतिविशेषः, अवयविनो गुरुत्वस्यात्यन्तापकृष्टत्वादिति वाच्यम्, गुणान्तरेऽवयवगुणादवयविनि सजातीयं गुणान्तरमुत्पद्यमानमुत्कृष्टमेव दृश्यते, गुरुत्वगुणे तु अवयवगुरुत्वेभ्योऽवयविन्यपकृष्टमेव गुरुत्वमुपजायत इति कल्पनाया अत्यन्तापकृष्टगुरुत्वं प्रति तादात्म्येन तत्तदन्त्यावयवित्वेन कारणत्वस्वीकारे सत्येव सम्भवदुक्तिकत्वेन, अवयवगुणानां सजातीयोत्कृष्टगुणजननस्वभावत्वस्यान्यत्रावधृतत्वेन तद्बलादुत्कृष्टगुरुत्वं कस्मान्न भवतीत्याकाङ्क्षानिवृत्तये उत्कृष्टगुरुत्वं प्रति तत्तदन्त्यावयविनः प्रतिबन्धकत्वस्य तदभावस्य कारणत्वस्य च कल्पनीयत्वेनातिगौरवापत्तेः, तस्मात् परमाणुषु सदेव कथञ्चित् परमाण्वभिन्नमेव च महत्त्वमुपजायते, इत्युपचयेन सिद्धम् ॥ ५० ॥

ननु यथाऽणुषु द्रव्यरूपेण प्रत्येकावस्थायां सदेव स्थूलत्वं समुदितावस्थाया-

मुत्पद्यते तथा चैतन्यमपि भूतेषु प्रत्येकावस्थायां सदेव समुदितावस्थायामुत्पद्यताम्?, तावताऽपि भूतचैतन्यवादिनां चार्वाकाणामिष्टमेव स्यादित्यत आह–

न चैवं भूतसंघातमात्रं चैतन्यमिष्यते ।
अविशेषेण सर्वत्र, तद्वत् तद्भावसंगतेः ॥ ५१ ॥

न चैवमिति । एवं यथाऽणुसंघातमात्रं स्थूलत्वमण्वभिन्नं तथा, **भूतसंघातमात्रं** भूतसंघातस्वरूपमेव, मात्रपदेन भूतसङ्घातातिरिक्तत्वव्यवच्छेदः, **चैतन्यम्** आत्मगुणत्वेन नैयायिकाद्यभिमतं ज्ञानम्, **न च** नैव, **इष्यते** चार्वाकैरभ्युपगम्यते । ननु भूतसङ्घातस्वरूपमेव चैतन्यं चार्वाकाभ्युपगतमस्तु किं ततस्तेषां क्षुण्णं स्यादिति तटस्थाशङ्कायामाह–**अविशेषेणेति**–जीवच्छरीरमपि भूतसङ्घातस्वरूपं घटादिकमपि भूतसङ्घातस्वरूपम्, शरीरात्मकभूतसङ्घाते घटाद्यात्मकभूतसङ्घातात् कस्यचिद् विशेषस्यानभ्युपगमेन । **सर्वत्र** जीवच्छरीरे तद्भिन्ने च भूतसङ्घाते । **तद्वत्** भूतसङ्घातवत् **तद्भावसङ्गतेः** व्यक्तचैतन्यसद्भावप्रसङ्गात्, व्यक्तेति विशेषणाच्छरीरव्यतिरिक्तेऽपि भूतसङ्घाते प्रत्येकभूतेष्विवाव्यक्तचैतन्यस्य चार्वाकैरप्युपगन्तुं शक्यत्वेऽपीष्टापत्तेर्नावकाशः ॥ ५१ ॥

भवतु जीवच्छरीरादन्यस्मिन्नपि भूतसङ्घाते व्यक्तचैतन्यं तावता किमनिष्टं चार्वाकस्येत्यत आह–

एवं सति घटादीनां, व्यक्तचैतन्यभावतः ।
पुरुषान्न विशेषः स्यात्, स च प्रत्यक्षबाधितः ॥ ५२ ॥

एवमिति । एवम् उक्तप्रकारेण । **सतीति** 'व्यक्तचैतन्यभावतः' इत्यनन्तरं योजनीयम् तसुप्रत्ययस्य च सप्तम्यर्थत्वं "सार्वविभक्तिकस्तसिः" इति शाब्दिकवचनप्रामाण्यादुररीकृत्य 'एवं व्यक्तचैतन्यभावे सति' इति योजितवन्तः श्रीमन्तो यशोविजयोपाध्यायाः, तथा योजने च 'एवं सति' इत्येवं यथाश्रुतसमभिव्याहारे पूर्वपद्यस्थेन 'सर्वत्र तद्भावसङ्गतिः' इत्यनेनोक्तस्य घटादौ व्यक्तचैतन्यसद्भावप्रसङ्गस्य 'एवं सति' इत्यनेन परामर्शे तु सर्वत्रेत्येतद्घटकसर्वपदस्य घटादिरेवार्थ इति य एव 'एवं सति' इत्यस्यार्थः स एव 'घटादीनां व्यक्तचैतन्यभावतः' इत्यस्यापीत्यर्थतः पौनरुक्त्यं स्यादिति युक्तिं चाभिहितवन्तः । "पुरुषाद्यविशेषः स्यात्"

इति पाठ उपाध्यायव्याख्योपेतमूले मुद्रिते, व्याख्यायां तत्र "घटादीनां पुरुषात्–जीवच्छरीरात्, न विशेषः स्यात्" इति पाठः, टीकास्वारस्यात् "पुरुषान्न विशेषः स्यात्" इति पाठ एव मूले भवितुमर्हति, हरिभद्रसूरिव्याख्योपेतमूले मुद्रिते तु "पुरुषान्न विशेषः स्यात्" इत्येव पाठो मुद्रितोऽस्ति किन्तु टीकायां "पुरुषाद्यविशेषः स्यात्" इति पाठो मुद्रितोऽस्ति, तत्र मुद्रितमूलपाठस्य युक्तत्वेन टीकायामपि "पुरुषान्न विशेषः स्यात्" इति पाठ एव भवितुमर्हति, यदि च हरिभद्रसूरिभिः "तद्भावसङ्गतेः" इत्यस्य "चैतन्यभावप्रसङ्गाद्" इत्येव व्याख्यानमादृतं न तु व्यक्तचैतन्यभावप्रसङ्गादिति, "सर्वत्र" इत्यस्य व्याख्यानं न कृतं किन्तु विशेष्यपदं "भूतसङ्घाते" इति तत्र योजितम्, तथा च 'एवं सति' इत्यस्योक्तार्थपरामर्शकत्वेऽपि सर्वत्र भूतसङ्घाते चैतन्याभावप्रसङ्गे सतीत्येवार्थो न तु घटादीनां व्यक्तचैतन्याभावादित्यर्थ इति न पौनरुक्त्यम्, यो यो भूतसङ्घातः स चैतन्यवानित्यवगतौ यथा प्रत्येकमणुष्वव्यक्तं महत्त्वमणुसङ्घातस्वरूपं सद् व्यक्तं भवति तथा प्रत्येकं भूतेष्वव्यक्तं चैतन्यं भूतसङ्घाते व्यक्तं स्यादिति दृष्टान्तदार्ष्टान्तिकभावबलाद् भूतसङ्घाते चैतन्यस्येष्टौ तच्चैतन्यं व्यक्तमेव भवेदित्येवं घटादीनां भूतसङ्घातत्वेन हेतुना सिद्धाद् व्यक्तचैतन्यभावतः कारणादित्यर्थोऽपुनरुक्त एव, "पुरुषाद्यविशेषः स्यात्" पुरुषपदं जीवच्छरीरपरम्, आदिपदाद् घटादीनामुपग्रहः, तथा च जीवच्छरीरघटादीनां सर्वेषां व्यक्तचैतन्यसद्भावाद् विशेषो न स्यादित्यर्थ इति विभाव्यते तदा श्रीहरिभद्रसूरिव्याख्यास्वारस्यात् "पुरुषाद्यविशेषः स्यात्" इत्यापि पाठः कथञ्चित् सङ्गतिमङ्गतीति बोध्यम् । ननु भवतु घटादीनां पुरुषात्–जीवच्छरीराद् विशेषाभावः, इष्टापादनमेवैतदित्यत आह–**स चेति**–स च-घटादीनां पुरुषादविशेषश्च । **प्रत्यक्षबाधितः** घटादीनामचेतनत्वेनैव प्रत्यक्षं भवतीति तेन प्रत्यक्षेण चैतन्यसद्भावलक्षणोऽविशेषो बाधितः, प्रत्यक्षबाधाद् व्यक्तचैतन्यसद्भावो घटादीनां पुरुषादविशेषश्चार्वाकस्यापि नेष्ट इत्याशयः ॥ ५२ ॥

ननु सर्वस्याणुसङ्घातस्य न स्थूलत्वरूपता, तथा सति द्व्यणुकस्याप्यणुद्वयरूपसङ्घातात्मकत्वेन स्थूलत्वरूपताऽऽपद्येत, किन्तु त्र्यणुकाद्यात्मकाणुसङ्घातविशेषस्यैव स्थूलत्वरूपत्वम्, तथा घटादिव्यावृत्तभूतसङ्घातविशेष एव चैतन्यं न भूतसङ्घातमात्रमिति न घटादीनां पुरुषादविशेष इत्येवं स्वाकूतं पर आशङ्कते—

अथ भिन्नस्वभावानि, भूतान्येव यतस्ततः ।
तत्संघातेषु चैतन्यं, न सर्वेष्वेतदप्यसत् ॥ ५३ ॥

अथेति । शङ्कार्थकोऽयमथशब्दः । यतः यस्मात् कारणात् । भूतान्येव शरीरारम्भकाणि भूतान्येव, भिन्नस्वभावानि प्रकृत्यैव घटाद्यारम्भकस्वभावविलक्षणस्वभावानि, ततः तस्मात् कारणात्, तत्संघातेषु घटाद्यारम्भकस्वभावविलक्षणस्वभावभूतसङ्घातस्वरूपशरीरेषु, चैतन्यं विद्यते, न सर्वेषु घटाद्यारम्भकस्वभावभूतसङ्घातस्वरूपेषु घटादिषु न चैतन्यं समस्तीति, तथा च संहन्यमानभूतवैलक्षण्यकृतः सङ्घातविशेषो न तु भूतसामान्यकृतो येन घटादयोऽपि सङ्घातविशेषाः स्युरिति । उक्ताशङ्कां प्रतिक्षिपति-एतदपीति-परस्यैतत् स्वाशयप्रकटनमपीत्यर्थः, असत् अशोभनम् ॥ ५३ ॥

कस्मादशोभनमित्यपेक्षायां तत्र हेतुमुपदर्शयति—

स्वभावो भूतमात्रत्वे, सति न्यायान्न भिद्यते ।
विशेषणं विना यस्मान्न तुल्यानां विशिष्टता ॥ ५४ ॥

स्वभाव इति । भूतमात्रतत्त्ववादिनस्तव मते भूतमात्रत्वे सति शरीरारम्भकाणां भूतानां स्वभावो घटाद्यारम्भकभूतस्वभावाद् भिन्नस्तदा भवेद् यदि विरुद्धधर्मो घटाद्यारम्भकभूतस्वभावावृत्तिधर्मः शरीरारम्भकभूतस्वभाववृत्तिभेदकः स्यात्, प्रकृते भूतातिरिक्तस्य तथाविधस्य भेदकस्याभावे सति, न्यायाद् युक्तितः, 'अयमेव भेदो भेदहेतुर्वा, यदुत-'विरुद्धधर्माध्यासः' इत्यादिवचनाद् विरुद्धधर्माध्यासस्यैव भेदकत्वं नान्यस्येति युक्तित इति यावत्, स्वभावः शरीरारम्भकभूतस्वभावः, न भिद्यते घटाद्यारम्भकभूतस्वभावाद् भिन्नो न भवति । भेदकमन्तरेणैव कुतो न स्वभावस्य भिन्नतेत्यत आह-विशेषणं विनेति । यस्मात् यस्मात् कारणात्, तुल्यानां समानानाम्, यथा समशुक्लपटादीनां प्रकृते भूतत्वेन समानानां घटशरीराद्यारम्भकभूतानाम्, विशेषणं विना व्यावर्तकविरुद्धधर्ममन्तरेण, विशिष्टता विभिन्नता, न नैव भवति, अत्रैव भावमावेदयन्ति यशोविजयोपाध्यायाः-"भूतस्य भूतान्तरभेदो हि न वास्तवः, किन्तु विभिन्नधर्मप्रकारकबुद्धिविषयत्वलक्षणो भाक्त एव, विशेषणावच्छिन्नविशेष्यभेदात्मको वा, न च विभिन्नधर्मं विना तद्घटिततत्संभव इति

भावः" इति । भूतातिरिक्तस्य भेदकस्याभावादेव भूतान्तरनिष्ठकार्यजनकातिशयान्यातिशयशालित्वलक्षणवैधर्म्यरूपो भेदोऽपि न सम्भवति, भूतान्तरनिष्ठकार्यजनकातिशयान्यातिशयस्य भूतातिरिक्तत्वे भूतव्यतिरिक्ततत्त्वान्तरस्वीकाराद् भूतमात्रतत्त्ववादित्वं तथाऽभ्युपगन्तुश्चार्वाकवराकस्य व्याहन्येत, निरुक्तातिशयस्य भूतानतिरिक्तत्वे च घटाद्यारम्भकभूतस्वभावस्य भूतत्वेन यथाऽविशिष्टत्वं तथोक्तातिशयेनापि भूतानतिरिक्तेनाविशिष्टत्वमेवेति स्वभावभेदो न भवेत्, तथा च घटाद्यारम्भकभूतानां संहन्यमानानामविशेषाच्छरीरारम्भकभूतसंघातस्वरूपे शरीरे इव घटाद्यारम्भकभूतसंघातस्वरूपे घटादावपि व्यक्तचैतन्यसद्भावतो घटादेः पुरुषाद् विशेषो न भवेदित्यर्थः ॥ ५४ ॥

घटाद्यारम्भकभूतानां शरीरारम्भकभूतानां चान्योऽन्यं स्वरूपत एव भेद इति स्वरूपमात्रभेदपक्षमाश्रित्याह—

स्वरूपमात्रभेदे च, भेदो भूतेतरात्मकः ।
अन्यभेदकभावे तु, स एवात्मा प्रसज्यते ॥ ५५ ॥

स्वरूपमात्रभेदे चेति–घटस्य स्वरूपं पटस्य स्वरूपं शरीरस्य स्वरूपमित्यादिप्रतीतौ भासमानं यत् स्वरूपं तदेव घटस्य पटस्येत्यादिसम्बन्धिविशेषानवच्छिन्नं सत् स्वरूपमात्रमित्युच्यते, तद्रूपभेदेऽविशिष्टस्वभावावच्छिन्नेऽभ्युपगम्यमाने सतीत्यर्थः । **भेदः** इदमिदं नेति इदं भूतं नेति प्रतीतिप्रमाणको भेदपदार्थः । **भूतेतरात्मकः** भूतमितरयति-स्वस्मात् पृथक्करोति यः स भूतेतरः, भूतेतर आत्मा स्वरूपं यस्य स भूतेतरात्मकः, एवम्भूतः स्यात्, अर्थात् स्वरूपमात्रलक्षणो घटाद्यारम्भक शरीरारम्भकभूतानां स्वभावभेदो नेदं भूतमिति प्रतीतिप्रमितो भूतभिन्नः स्यात्, तथा च भूतभिन्नः स न पृथिव्यादिभूतचतुष्टयेऽन्तर्भवतीत्यात्मैव स इत्याशयः । यदि च स्वरूपमात्रलक्षणभेदाभ्युपगमे तस्योक्तदिशा भूतातिरिक्तात्मस्वरूपत्वापत्तिभिया घटाद्यारम्भक-शरीरारम्भकभूतानां स्वभावस्य भेदकमन्यदेवाभ्युपगम्यते तदा त्वाह–**अन्यभेदकभावे त्विति**–भूतातिरिक्तस्य निरुक्तस्वभावभेदकस्य सत्त्वे त्वित्यर्थः । **स एव** घटाद्यारम्भकभूताच्छरीरारम्भकभूतस्य भेदकत्वेनाभिमत एव, **आत्मा** भूतातिरिक्तश्चेतनः, **प्रसज्यते** प्रसक्तः स्यात्, यथा समानशुक्लपटेष्वेकस्य रक्तिमपदार्थरञ्जनं रक्तिमपदार्थसंसर्ग एव

भेदकस्तथा निरात्मकघटाद्यारम्भकभूतेभ्यः शरीरारम्भकभूतस्य साऽऽत्मकत्वेन विशेषादित्यात्मा भेदकः सिध्यतीत्यर्थः । न च शरीरे सात्मकत्ववत् हिताहित-प्राप्तिपरिहारफलकक्रियादिमत्त्व-सुख-दुःख राग-द्वेष-ज्ञानयत्नादिमत्त्वादिकमपीति तदात्मकधर्माणामेव सात्मकत्वसमनियतानां घटादितः शरीरस्य भेदकत्वमिति नात आत्मसिद्धिरिति वाच्यम्, चेष्टाया भेदकत्वं सुखस्य दुःखस्य रागादेर्वा भेदकत्वमित्यत्र विनिगमकस्य कस्यचिदभावाद् विनिगमनाविरहात् सर्वेषां भेदकत्वे गौरवाल्लाघवादेकस्यैव सात्मकत्वस्य भेदकत्वकल्पनाया उचितत्वात्; न च सात्मकत्वस्य भेदकत्वं चेष्टादिमत्त्वस्य वा भेदकत्वमित्यत्रापि विनिगमनाविरह इति वाच्यम्, हिताहितप्राप्तिपरिहारफलेन चेष्टायाः, सातासातवेदनलक्षणोप-भोगविषयत्वेन सुख-दुःखयोः, काम-क्रोधादिरूपानुभवविषयत्वेन राग द्वेषयोः, स्वसंवेदनानुभवविषयत्वेन ज्ञानस्य, यते करोमीत्यादिप्रत्यक्षविषयत्वेन यत्नस्य च प्रसिद्धत्वेन प्रसिद्धानां तेषां मध्यादेकस्य घटादितः शरीरस्य भेदे निमित्तत्वे तदन्येषामपि विनि मनाविरहात् तत्र निमित्तत्वप्रसङ्गात्, सात्मकत्वस्य त्वन्य-प्रमाणतोऽसिद्धस्य निरुक्तभेदनिमित्ततयैव कल्पनीयस्यान्यभेदकभावे सद्भावमेव प्राप्तुमयोगस्यान्येन समं विनिगमनाविरहासम्भवात्, न हि भवति शश-शृङ्गादेः केनापि समं विनिगमनाविरहः, क्लृप्तस्य हि क्लृप्तेनान्येन समं विनिगमना-विरहो नाक्लृप्तेनेति; न च भवतु सात्मकत्वं शरीरस्य घटादितो भेदकम्, चैतन्यं प्रत्युपादानत्वं तु सात्मकत्वविशिष्टशरीरत्वेन शरीरस्यैवेति शरीरस्यैवोपादानस्य धर्म उपादेयभूतं चैतन्यमिति वाच्यम्, स्वसंवेदनानुभूयमानं चैतन्यं कार्यं कादाचित्कत्वाद् घटादिवत्, चैतन्यं सोपादानकं कार्यत्वाद् घटादिवत्, चैतन्यं नाचेतनोपादानकमचेतनविजातीयत्वात्, यथा तेजो न जलोपादानकम्, चैतन्यं चेतनात्मोपादानकम्, अचेतनानुपादानकत्वे सति सोपादानकत्वात्, यन्नैवं तन्नैवं यथा घटादि, इत्येवमात्मरूपधर्मिग्राहकप्रमाणेन सात्मकत्वविशिष्टशरीरे विशेषणी-भूतस्याऽऽत्मन एव चैतन्योपादानतया सिद्धेः, चैतन्यं प्रत्यात्मत्वेनैवात्मनो लाघवादुपादानत्वं न तु सात्मकत्वविशिष्टशरीरत्वेन शरीरस्य गौरवादिति निष्कर्षः, तथा च न विशेषणकृतोऽपि भूतसंघातविशेष इति हृदयम् । अपि च शरीर-लक्षणः परिणामो येषां भूतानां तेषां घटादिलक्षणपरिणामशालिभ्यो भूतेभ्यो वैचित्र्ये सत्येव शरीरस्य घटादितो विशेषः सम्भवति, नान्यथा, तेषां वैचित्र्यं चात्मोपग्रहमन्तरेण न सम्भवति, आत्मोपग्रहश्चात्मसहकारित्वम्, तच्च न

संयोगमात्रम्, तथा सति आत्मनो नैयायिकादिमते विभुत्वेन तत्संयोगस्य भूतमात्रे सत्त्वेन सर्वस्य भूतस्यात्मसहकारित्वमापद्येत, न चाशेषाणि भूतानि आत्मसहकारीणि, किन्त्वदृष्टद्वारा, यदात्मनो दृष्टादाकृष्टानि भूतानि यच्छरीररूपेण परिणमन्ते तच्छरीरं तदात्मनो भोगे जननीये सहकारि, तत एव भोग प्रति नियमोऽपि, एवं च शरीरं भोगसमानाधिकरणगुणसाध्यं भोगसाधनत्वात्, स्रगादिवत्, यददृष्टजन्यं स्रगादि तस्य साक्षात् परम्परया वा भोगं जनयति, तत एव कार्यमात्रस्य कस्यचित् पुरुषस्य साक्षात् परम्परया भोगजनकत्वाद् भोगसमानाधिकरणादृष्टगुणजन्यत्वमिति नैयायिकादयोऽभिमन्यन्त इत्यत्र प्रकृतपद्यतात्पर्यम् ॥ ५५ ॥

कार्यभेदादेव भूतानां स्वभावभेदो भविष्यतीति स्वाकूतं पर आशङ्कते—

हवि-र्गुड-कणिकादिद्रव्यसंघातजान्यपि ।
यथा भिन्नस्वभावानि, खाद्यकानि तथेति चेत् ? ॥ ५६ ॥

हविरिति। हविः-घृतम्, कणिकादीत्यादिपदाच्चातुर्जातकादिद्रव्यविशेषग्रहणम्, हवि-र्गुड-कणिकादीनां द्रव्याणां संघाताज्जातान्यपि, **खाद्यकानि** अशोकवर्तिमरिचमज्जर्यादीनि, **यथा भिन्नस्वभावानि** प्रत्येकं हविरादिद्रव्यतो रसवीर्यविपाकादिलक्षणकार्यभेदात् भिन्नस्वभावानि, तथा भूतसंघातजान्यपि शरीराणि चैतन्यलक्षणकार्यभेदात् चैतन्याजनकेभ्योऽचेतनस्वभावेभ्यो घटादिभ्यश्चैतन्यात्मकस्वभावत्वेन भिन्नस्वभावानि। अत्र शरीर-घटादीनां भूतसङ्घातत्वेनाविशेष्टानां चैतन्याचैतन्यलक्षणकार्यभेदः स्वभावभेदादेव सिद्ध्यति, स्वभावाभेदे कार्याभेद एव स्यात्, स्वभावभेदश्च कार्यभेदात् सिद्ध्यति, कार्याभेदे स्वभावाभेदस्यैव प्रसक्तेरित्येवमन्योऽन्याश्रयदोषं स्फुटत्वादुपेक्ष्य कार्यभेदासिद्धिं दोषान्तरमुपदर्शयन् प्रतिक्षिपति—**इति चेदिति**-एतदनन्तरं 'नैतदेवम्' इति शेषः ॥ ५६ ॥

निषेधहेतुमाह—

व्यक्तिमात्रत एवैषां, ननु भिन्नस्वभावता ।
रस-वीर्यविपाकादिकार्यभेदो न विद्यते ॥ ५७ ॥

व्यक्तिमात्रत इति। अत्र निषेधहेत्ववगतये यत इति द्रष्टव्यम्, यस्मात् कारणादिति तदर्थः। **एषां** खाद्यकानाम्। **ननु** इति परं प्रति आक्षेपे, कीदृशी

मूढता तव, यदुत-कार्यभेदो नास्त्येव दृष्टान्ते तथापि कार्यभेदं ब्रवीषीति मूढतामाहात्म्यं कामं त्वयि प्रगल्भते इति। **भिन्नस्वभावता** हविरादीनां प्रत्येकावस्थातः खाद्यकभावावस्थायां स्वभावलक्षणता, **व्यक्तिमात्रत एव** अभिव्यक्तिभेदमात्राधीनैव, मात्रपदप्रयोजनोपदर्शकं-**रसत्वाद्युत्तरार्द्धम्**, तस्य हविरादीनामसङ्घातावस्थातः संघातावस्थायां रस-वीर्यविपाकादिविलक्षणकार्यहेतुत्वं न विद्यते इत्यर्थः। अत्राभिप्रायमित्थमावेदयन्त्युपाध्यायाः-कारणोत्कर्षात् कार्योत्कर्षेऽपि कार्यवैजात्यस्य कारणवैजात्याधीनत्वात् खाद्यकदृष्टान्तेनासंहतभूतकार्यात् संहतभूतकार्योत्कर्षेऽपि चैतन्यलक्षणं विलक्षणं कार्यं विलक्षणमात्मानमेव हेतुमाक्षिपतीति ॥ ५७ ॥

कदाग्रहग्रहिलः पर आशङ्कते—

तदात्मकत्वमात्रत्वे, संस्थानादिविलक्षणा।
यथेयमस्ति भूतानां, तथा सापि कथं न चेत्? ॥ ५८ ॥

तदात्मकत्वमात्रत्वे इति। खाद्यकानां हवि-गुंड-कणिक्कादिद्रव्यसङ्घातात्मकत्वमात्रत्वे सतीत्यर्थः, मात्रपदेन हवि-गुंड-कणिक्कादिद्रव्यसङ्घातप्रभवत्वप्रयुक्ततदतिरिक्तत्वव्यवच्छेदः। **संस्थानादी**त्यादिपदात् परिमाणादिपरिग्रहः, तथा च **संस्थानादिविलक्षणा** संस्थानपरिमाणादिना विभिन्नसंवित्तिसंवेद्या, **यथेयमस्ति** खाद्यकानां हविरादिपृथगवस्थानावस्थातो भिन्नस्वभावता यथा विद्यते, **तथा भूतानां** भूतकार्याणां देह-घटादीनाम्, **साऽपि** चैतन्योपादानत्व-चैतन्यानुपादानत्वपर्यवसितचेतनत्वाचेतनत्वरूपा विभिन्नस्वभावताऽपि, **कथं न** कस्मान्न स्यात्, अपि तु स्यादेव। अत्रोत्तरम्-**इति चेत्?** एवं त्वं मन्यसे, न च तन्मन्तव्यं युक्तम्, 'खाद्यकानां विभिन्नस्वभावता व्यक्तिमात्रतः' इति यदुक्तं तत्र 'व्यक्तिमात्रतः' इत्यस्य स्वरूपभेदाप्रयोज्यत्वमर्थः, हवि-गुंडादिप्रत्येकद्रव्यस्वरूपभिन्नखाद्यकस्वरूपप्रयोज्या न खाद्यकानां भिन्नस्वभावता, स्वरूपभेदस्यैवाभावात्, किन्तु खाद्यकस्वभावाक्रान्तहवि-गुंड-कणिक्कादिद्रव्याभिव्यक्तिस्तत्सङ्घटनकर्तृव्यापारादिकारणविशेषसमुत्पाद्यैव, तथा च यदा कर्तृव्यापारादिकारणविशेषसमवधानं तदा हविरादीनां खाद्यकस्वभावाभिव्यक्तिरित्येवं कालनियमसम्भवान्न तस्या आकस्मिकत्वम्, असंहत्यवस्थापन्नहविरादितः खाद्यकस्वभा-

वापन्नस्याभिव्यक्तिलक्षणविशेषसद्भावादविशेषापत्तिलक्षणदोषोऽपि न, भूतमात्रवादिनस्तव तु कर्तुरभावात् तद्व्यापारादिकारणसमवधानासम्भवाद् भूतसङ्घाते चैतन्याभिव्यक्तिविशेषस्योत्पत्तिर्न घटत इति ॥ ५८ ॥

कुतो न परमन्तव्यं युक्तमित्यपेक्षायामाह—

कर्त्रभावात् तथा देश-कालभेदाद्ययोगतः ।
न चासिद्धमदो भूतमात्रत्वे तदसम्भवात् ॥ ५९ ॥

कर्त्रभावादिति । कर्त्रभावात् खाद्यकादिव्यतिरिक्तो यथा खाद्यकादीनां कर्ता समस्ति हविर्गुडादिसंमीलनप्रयोजनकव्यापारपरायणः, तथा शरीरस्य तथा संघाताभिव्यक्तिव्यापारपरायणस्यातिरिक्तस्य कर्तुरभावात् । **तथा** कर्तृवत् । **देशकालभेदाद्ययोगतः**, आदिनाऽदृष्टादेर्ग्रहः, देशभेद-कालभेदा-ऽदृष्टभेदादीनामभावात् । **न चासिद्धमदः** देशभेद-कालभेदा-ऽदृष्टभेदाद्ययोगादि नैवासिद्धम् । **भूतमात्रत्वे** भूतमात्रतत्त्ववादिनस्तव मते विश्वस्य भूतैकस्वभावत्वे, **तदसंभवात्** कर्त्राद्यसम्भवात् ॥ ५९ ॥

उक्तमेवार्थं स्पष्टयति—

तथा च भूतमात्रत्वे, न तत्संघातभेदयोः ।
भेदकाभावतो भेदो, युक्तः सम्यग् विचिन्त्यताम् ॥६०॥

तथा चेति । तथा च–कर्तृ देश काला-ऽदृष्टभेदादीनामभावे च, **विश्वस्य** भूतैकस्वरूपत्वलक्षणं भूतमात्रत्वमप्यनन्तरमभिहितमिति "तथा च" इत्यनेनैव "भूतमात्रत्वे च" इत्यस्याप्यवगतिसम्भवेऽपि यत् "भूतमात्रत्वे" इति पृथग्वचनं तद् विश्वस्य भूतैकस्वरूपत्वाभ्युपगमत एव चार्वाकस्य परोक्तदोषप्रमोषार्थं सर्वाऽपि कल्पनाऽचतुरस्रेत्याह्रेडितं भवति । **भूतमात्रत्वे** विश्वस्य भूतैकस्वरूपत्वे । **तत्सङ्घातभेदयोः** भूतसङ्घातभेदयोः शरीर घटादिविशेषयोः । **भेदकाभावतः** भूतव्यतिरिक्तस्य कस्यचिद् भेदकस्याभावतः, उपदर्शितदिशा भेदकाभावतो वा । **भेदः** चैतन्याचैतन्यलक्षणवैलक्षण्यम्, **न** नैव, **युक्तः** युक्तिसङ्गतः, इतीति द्रष्टव्यम्, तदर्थः–एवम् । **सम्यग्** उक्तरीत्या परमार्थविचारेण । **विचिन्त्यतां** परामृश्यताम् ॥ ६० ॥

चार्वाकस्य मते एकस्य भूतसङ्घातस्य देहादिरूपत्वमपरस्य घटादिरूपत्वमित्यपि विशेषो न सम्भवति भूतातिरिक्तनिमित्ताभावादित्याह—

एकस्तथाऽपरो नेति, तन्मात्रत्वे तथाविधः ।
यतस्तदपि नो भिन्नं, ततस्तुल्यं च तत् तयोः ॥ ६१ ॥

एक इति । एकः एको भूतसङ्घातो देहादिरूपः । **तथा** देहादिरूपत्वेन । **अपरः** घटादिरूपो भूतसङ्घातः । **तन्मात्रत्वे** इत्यनन्तरमपिर्गम्यते, भूतसङ्घातमात्रत्वेऽपीत्यर्थः । **तथाविधः** देहादिरूपः । **न** नैव । **इति** एतादृशो विभागः । **यतः** यस्मान्निमित्तात्, उच्यते इति शेषः । **तदपि** आपाततः प्रतीयमानमुक्तविभागनिमित्तमपि । **नो भिन्नं** भूतातिरिक्तं न भवति, तस्य निमित्तस्य भूतातिरिक्ततयोपगमे भूतचतुष्टयमात्रतत्त्ववादव्याकोपः स्यात्, **ततः** तस्मात् कारणात् । **तयोः** देह-घटादिरूपयोर्भूतसङ्घातयोः । **तच्च** भूतमात्रत्वं च । **तुल्यं** समम्, तेन भूतत्वं तादृशविभागनिमित्तं न, भूतातिरिक्तं तु तत्त्वान्तरप्रसङ्गभीत्या निमित्तं नाभ्युपगन्तुं शक्यं परेण, अतः शरीरस्य नात्मत्वं युक्तमित्याशय इत्येवमुपाध्याया वर्णयन्ति । "यतः यस्मात् । निमित्तं नो भिन्नं ततः भूतमात्रात्, अपि तु तदेव तदिति" इति श्रीमन्तो हरिभद्रसूरयो व्याचक्षते ॥ ६१ ॥

स्वमतकदाग्रहावेशात् परोक्त्यभिप्रायमज्ञात्वैव पुनः शङ्कते—

स्यादेतद् भूतजत्वेऽपि, ग्रावादीनां विचित्रता ।
लोकसिद्धेति सिद्धैव, न सा तन्मात्रजा न तु ॥ ६२ ॥

स्यादेतदिति—प्रश्नार्थकोऽयं शब्दः । **भूतजत्वेऽपि** भूतमात्रजन्यत्वेऽपि । **ग्रावादीनां** पाषाणादीनाम् । **विचित्रता** घटादिभ्यो विलक्षणवर्ण-स्पर्श-संस्थानादिरूपा विचित्रता । **लोकसिद्धा** लौकिकप्रत्यक्षप्रमाणप्रमितैव । **इति** एवं परो मन्यते । तस्यायमभिप्रायः—आबालगोपालप्रत्यक्षप्रमाणसिद्धस्य पाषाणादीनां वैचित्र्यस्य भूतमात्रजत्वेऽपि नापलापः शक्यः कर्तुम्, तथा भूतसङ्घातमात्रत्वेऽपि घटादिक्षणभूतसङ्घाततः शरीरलक्षणभूतसङ्घातस्य वैचित्र्यमप्युपपत्स्यत इति । उक्तप्रभप्रतिविधानमाह—**सिद्धैवेति** । **सा** ग्रावादीनां विचित्रता, **सिद्धैव** लौकिकप्रत्यक्षप्रमाणप्रमितैव, अत एव **न सा** प्रतिक्षिप्यते इति शेषः, 'तु पुनः, **तन्मात्रजा न** ग्रावादीनां विचित्रता भूतमात्रजा न' इत्येवं व्याख्यानं

"न सा तन्मात्रजा न तु" इति मूलपाठमवलम्ब्योपाध्यायसम्मतम्, श्रीहरिभद्रसूरिभिस्तु 'न सा तन्मात्रजा ननु" इति मूलपाठं परिगृह्य "किन्तु न सा प्रावादीनां विचित्रता तन्मात्रप्रभवा ननु" इति व्याख्यातम्, अत्र 'प्रतिक्षिप्यते' इति शेषो न करणीय इति ॥ ६२ ॥

कुतो प्रावादीनां विचित्रता भूतमात्रप्रभवा नेत्यपेक्षायामाह—

अदृष्टा-ऽऽकाश-कालादिसामग्रीतः समुद्भवात् ।
तथैव लोकसंवित्तेरन्यथा तदभावतः ॥ ६३ ॥

अदृष्टेति । अदृष्टाकाशकालादीत्यत्रादिपदान्नियत्यादेरुपग्रहः, अदृष्टाऽऽकाश-कालनियत्यादीनां या सामग्री–सर्वेषां समवधानलक्षणसम्पूर्णता, ततः, **समुद्भवात्** प्रावादिविचित्रतोत्पादाभ्युपगमात् । ननु प्रावादीनां विचित्रतोत्पत्तिरदृष्टाकाशकालादिसामग्रीतो न लोकेन प्रतीयत इति चेदत्राह–**तथैवेति**–इत्थमेवेत्यर्थः । **लोकसंवित्तेः** व्युत्पन्नलोकप्रतीतेः, व्युत्पन्नेति विशेषणादव्युत्पन्नलोकस्य तथाप्रतीत्यभावेऽपि नानुपपत्तिः । **अन्यथा** अदृष्टा-ऽऽकाश-कालादिसामग्रीतो प्रावादिविचित्रतोत्पत्त्यनभ्युपगमे, **तदभावतः** भूतमात्रजत्वस्य सर्वत्राविशेषात् कारणान्तरस्याभावात् विचित्रताऽभावप्रसङ्गात् ॥ ६३ ॥

नन्वाबालगोपालप्रत्यक्षप्रमाणसिद्धत्वमेव लोकसिद्धत्वं न तु व्युत्पन्नलोकमात्रसिद्धत्वं तथा, अव्युत्पन्नलोकेन च प्रावादिवैचित्र्यस्य अदृष्टाकाशकालादिसमुद्भवत्वं न प्रतीयत इति कथं लोकसिद्धत्वं तस्योपेयमिति चेदत्राह—

न चेह लौकिको मार्गः, स्थितोऽस्माभिर्विचार्यते ।
किन्त्वयं युज्यते केति त्वन्नीतौ चोक्तवन्न सः ॥ ६४ ॥

न चेहेति । इह तत्त्वपरीक्षणप्रक्रमे, **लौकिकः** अव्युत्पन्नलोकमात्राश्रितः, **स्थितो मार्गः** किमयमित्थं स्थित इति संशयोपारूढोऽर्थः, मृग्यते-अन्विष्यते इति मार्गः, अन्वेषणं च संशयोपारूढस्यैव निर्णयरूपावाप्त्यर्थं भवतीति मार्गपदेन संशयोपारूढत्वं लभ्यते । **अस्माभिः** तत्त्वपरीक्षणैकपरायणैः । **विचार्यते न च** नैव विचारविषयीक्रियते, अर्थात् लोकव्यवहारानुवर्तिभिरपरीक्षकैर्गतानुगतिकतयाऽव्युत्पन्नलोकैर्यथा संदिह्यते तथैव न संहिह्यते, तर्हि तत्त्वपरीक्षाविदग्धैर्भवद्भिः किं विचार्यत इति पृच्छति–**किन्त्विति** । उत्तरयति–**अयमिति** ।

अयं युज्यते क्व? अयं-प्रावादिविचित्रतारूपः प्रत्यक्षादिप्रमाणप्रमितोऽर्थः, कस्मिन् दर्शने युक्तिसङ्गतो भवति। इति इत्यादिजिज्ञासाक्रमेण, 'विचार्यते' इत्यनुवर्तते तस्य परीक्ष्यते इत्यर्थः, परीक्ष्यमाणश्च उक्तवत् उक्तरीत्या। त्वन्नीतौ त्वदभ्युपगमे, भूतचतुष्टयमात्रतत्त्ववादिचार्वाकदर्शने इति यावत्, स प्रावादिविचित्रतारूपो यथास्थितोऽर्थः, न नैव, 'युज्यते' इत्यनुवर्तते, घटते इति तदर्थः॥ ६४॥

अथ नव्यनास्तिकमतमुत्थाप्य तत्समाधानरूपतया पञ्चषष्टितमपद्यमवतारितं श्रीमद्भिर्यशोविजयोपाध्यायैः, तदेव सोपस्कारमुपदर्श्यते, तथाहि-ननु नैयायिकादिभिरतिरिक्ते आत्मद्रव्ये कल्पितेऽपि तत्र विभौ न व्याप्यवृत्तितया ज्ञानादिको गुणः समुत्पद्यते, तथा सति आत्मनो घटादिदेशेऽपि सत्त्वेन तत्रापि शरीर इव ज्ञानादिगुणोपलम्भः स्यादतोऽव्याप्यवृत्तिरेव गुणः, एवमपि घटाद्यवच्छेदेनापि ज्ञानादिकमात्मनि समुत्पद्यमानमव्याप्यवृत्ति स्यादेवेति किमिति शरीरमेवात्मनि ज्ञानादिवृत्तावव्यवच्छेदकं न घटादिकम्, अतोऽवच्छेदकतासम्बन्धेन ज्ञानादिकं प्रति तादात्म्यसम्बन्धेन शरीरं कारणमित्येवमवच्छेदकनियमार्थं कार्यकारणभावोऽवश्यं स्वीकरणीय एव नैयायिकादिभिः, तथा ज्ञानादिकं समवायेनात्मन्येव समुत्पद्यते नान्यत्रेत्येवं समवायिदेशनियमार्थं समवायसम्बन्धेन ज्ञानादिकं प्रति तादात्म्यसम्बन्धेनात्मा कारणमिति द्वितीयः कार्यकारणभावोऽपि स्वीकरणीयः, तथा च तदपेक्षया लाघवात् समवायसम्बन्धेन ज्ञानादिकं प्रति तादात्म्यसम्बन्धेन शरीरस्यैव कारणत्वं कल्पयितुमुचितम्, शरीरे चाविभौ व्याप्यवृत्त्येव ज्ञानादिकमिति ह्यवच्छेदकतया तत् प्रति न तादात्म्येन कस्यापि कारणत्वस्य कल्पनायाः प्रयोजनमिति तदकल्पनप्रयुक्तलाघवं नव्यनास्तिकमते स्पष्टमेव; न च शरीरस्य ज्ञानादिसमवायित्वे आत्मत्वं तद्वृत्त्येव जातिः स्यात्, न च तत् संभवति पृथिवीत्वाभाववति जलीयशरीरे आत्मत्वस्य तदभाववति घटादौ पृथिवीत्वस्य सत्तया परस्परात्यन्ताभावसामानाधिकरण्यस्य तयोश्चैकत्र पार्थिवशरीरे सामानाधिकरण्यस्य भावेन साङ्कर्यात् तस्य च जातिबाधकत्वादिति वाच्यम्, एकेनोपाधिना सङ्कीर्णोऽपरो यथोपाधिर्भवति, यथा च जातिरप्युपाधिसङ्कीर्णा भवतीति उपाधिसाङ्कर्यं नोपाधित्वस्य जातित्वस्य बाधकं, तथा जातिसङ्कीर्णोऽप्यनुगतप्रतीतिसाक्षिका जातिः स्यादेवेति जातिसाङ्कर्यस्य जातित्वाबाधकत्वात्; न च शरीरं पाञ्चभौतिकमिति प्रवादः समस्ति, तत्र आकाशात्मकभूतस्य चार्वाकानभ्युपगतत्वेऽपि भूतचतुष्टय-

स्याभ्युपगमस्तस्याप्यस्तीति चातुर्भौतिकं शरीरं तदनुमतं भवेत्, तथा च भूतचतुष्कप्रकृतिकं शरीरं भूतचतुष्टयभिन्नमेव भवितुमर्हति, कस्यापि भूतचतुष्टयान्यतमान्तर्गतस्य भूतचतुष्टयप्रकृतिकत्वाभावादिति वाच्यम्, यावदवयवगुणैरेव गन्धादिभिरवयविनि गुण आरभ्यते, एकावयवमात्रवर्तिनो गन्धादेरवयविनि गन्धाद्यनारम्भकत्वमित्यस्योपपत्तये समवायसम्बन्धेन गन्धादिकं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन गन्धाभावादिः प्रतिबन्धक इत्येवं प्रतिबध्यप्रतिबन्धकभावस्य कल्पनीयत्वेन शरीरस्य भूतचतुष्कप्रकृतिकत्वासम्भवात्, पार्थिवादिशरीरे जलादीनां निमित्तत्वेन तत्रोपष्टम्भकजलधर्मस्य स्वाश्रयसंयोगादिलक्षणपरम्परासम्बन्धेन प्रतीतित औपाधिकत्वात्, शरीरस्य पृथिवीजलोभयप्रकृतिकत्वे गन्धाभावस्य प्रतिबन्धकस्य 'स्वं-गन्धाभावस्तदाश्रयो जलं तत्समवेतत्वं शरीरे' इति स्वाश्रयसमवेतत्वसम्बन्धेन सत्त्वात् तदभावरूपकारणाभावाच्छरीरे गन्धो न भवेत्, एवं प्रत्येकं रसमात्रस्याप्यभाव उक्तसम्बन्धेन तत्रास्तीति तदभावरूपकारणाभावाद् रसोऽपि शरीरे न भवेत्, एवं भूतचतुष्कप्रकृतिकत्वेऽपि गन्धाभावादीनां प्रतिबन्धकानां सत्त्वाद् गन्धादिकं न स्यादिति भूतचतुष्कप्रकृतिकं शरीरमगन्धमरसमरूपमस्पर्शं च भवेदतो न भूतचतुष्कप्रकृतिकत्वं, किन्तु पृथिव्याद्येकैकभूतप्रकृतिकं शरीरम्, तथा च यच्छरीरं यद्भूतप्रकृतिकं तच्छरीरं तद्भूतेऽन्तर्भवतीति न शरीरे प्रसिद्धभूतभिन्नत्वापत्तिः; न च शरीरस्य ज्ञानादिगुणवत्त्वे परशरीरगुणानां रूपस्पर्शादीनां यथा चाक्षुषस्पर्शनं तथा परसमवेतज्ञानादीनामपि चाक्षुषस्पार्शनप्रसङ्गः स्यादिति वाच्यम्, रूपादिषु जातिविशेषमभ्युपगम्य तादात्म्यसम्बन्धेन रूपान्यतज्जातिमत्त्वेन तज्जातिमतो विषयतासम्बन्धेन चाक्षुषं प्रति, तादात्म्यसम्बन्धेन स्पर्शान्यतज्जातिमतो विषयतासम्बन्धेन स्पार्शनं प्रति च प्रतिबन्धकत्वकल्पनान्निरुक्तजातिमतो ज्ञानादेरपि तादात्म्यसम्बन्धेन प्रतिबन्धकतया विषयतासम्बन्धेन तत्र चाक्षुष-स्पार्शनाद्युत्पत्त्यसम्भवात्, इत्येवं रसादीनामचाक्षुषस्पार्शनत्वनिर्वाहात्; न च शरीरस्यावयवोपचयापचयाभ्यां प्रतिक्षणमन्यान्यभावेनानुभवितुः पूर्वशरीरस्य बालाद्यवस्थस्य विनाशाद् युवाद्यवस्थायां स्मरणं न स्यात्, चैत्रानुभूतस्य मैत्रे स्मरणाभावेनानुभव-स्मरणयोः सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावादिति वाच्यम्, उत्तरोत्तरशरीरं प्रति पूर्वपूर्वशरीरस्य कारणत्वेन पूर्वपूर्वशरीरानुभवजन्यसंस्कारस्योत्तरोत्तरशरीरे संक्रमणसम्भवेन समवायेन स्मरणं प्रति स्वप्रयोज्यसंस्कारवत्त्वेनानुभवस्य कारणतया बालाद्यवस्थशरीरगतानु-

भवस्यापि निरुक्तसम्बन्धेन युवाद्यवस्थशरीरे सत्त्वेन स्मरणसम्भवात्, चैत्र-मैत्र-शरीरसन्तानयोरन्योऽन्यं भिन्नत्वेन चैत्रशरीरगतानुभवजनितसंस्कारस्य मैत्रशरीरे संक्रमणाभावेन चैत्रानुभूतस्य मैत्रेणास्मरणस्याप्युपपत्तेः, दृश्यते च कारणगुणक्रमेण कार्ये गुणसंक्रमः, कथमन्यथा पूर्वघटनाशानन्तरोपजातखण्डघटे कारणगुण-क्रमेण तद्गुणसंक्रमः, एवं च पूर्वशरीरनाशोत्तरोपजातोत्तरशरीरे पूर्वशरीरगुणसंक्रम उक्तदृष्टान्तबलादुपेयत इति; न च कारणगुणक्रमेण ज्ञानादिगुणसंक्रमस्तदा स्याद् यद्यवयविज्ञानादिकं प्रत्यवयवज्ञानादिकं कारणं भवेत्, तथा हेतुताकल्पने च गौरवं सुव्यक्तमेवेति वाच्यम्, फलमुखगौरवस्यादोषत्वात्, अथवाऽणूनां विजातीय-संयोगेनैवावयविकार्यत्वेनाभिमतस्य कार्यस्योपपत्तेरवयव्येव नास्तीति नोक्तकार्य-कारणभावकल्पनागौरवमपि, एवं च शरीरान्तरोत्पादेऽपि शरीरत्वघटकविजातीय-संयोगविशिष्टाणुवृत्तिसंस्कारात् तादृशस्मरणोपपत्तिः, न चातिरिक्तात्माभ्युपगम-पक्षे परात्मनोऽयोग्यत्वादेव न स्वात्मन इव प्रत्यक्षत्वम्, शरीरस्यात्मत्वेऽपि स्वशरीरवत् परशरीरस्यापि योग्यत्वात् स्वात्मन इव परात्मनोऽपि प्रत्यक्षत्वं स्यादिति वाच्यम्, शरीरपरात्मनः चक्षुरादिबहिरिन्द्रियजन्यप्रत्यक्षस्येष्टत्वात्, तत्तदात्ममानसे तत्तदात्मत्वेन हेतुत्वादेव परात्ममानसप्रत्यक्षापत्त्यसम्भवात्, अतिरिक्तात्मवादिनां तु आत्मनो विभुत्वेन स्वात्मना समं यथा मनसः संयोगस्तथा परात्मना सममपि, ततः परात्मनो मानसापत्तिवारणाय तत्तदात्ममानसे तत्त-दात्मत्वेन हेतुत्वं ततो मानसापत्तिवारणेऽपि सामान्यतः प्रत्यक्षापत्तिवारणाय तत्तदात्मप्रत्यक्षत्वावच्छिन्नं प्रत्यपि तत्तदात्मत्वेन हेतुत्वं विनिगमनाविरहात् कल्पनीयमिति गौरवम्; अपि च, अस्मन्मते सावयवस्य शरीरस्याऽऽत्मन इन्द्रिय-संयुक्तसमवायलक्षणसन्निकर्षादेव प्रत्यक्षमुपपद्यते, अन्येषामप्यवयविद्रव्याणां तत एव प्रत्यक्षं सम्भवति, निरवयवस्य त्वणुद्रव्यस्य प्रत्यक्षमेव न भवति, गुणादी-नामपि संयुक्तसमवायादित एव प्रत्यक्षसम्भवात् संयोगस्य पृथक् प्रत्यासत्तित्वं न कल्प्यत इति लाघवम्, परमते तु निरवयवेऽतिरिक्तात्मनि संयुक्तसमवायलक्षण-सन्निकर्षाभावात् तस्य मानसप्रत्यक्षं मनःसंयोगलक्षणसन्निकर्षादेवेति संयोगस्य पृथक् प्रत्यासत्तित्वं कल्पनीयमिति गौरवं स्यात्; न च संयुक्तसमवायमात्रस्य सन्निकर्षत्वे चक्षुःसंयुक्तपरमाणुसमवायस्य द्व्यणुके परमाणुरूपे च सत्त्वात् तयो-रपि प्रत्यक्षं स्यादतस्तद्वारणाय चक्षुःसंयुक्तमहद्भूतरूपवत्समवायत्वेन चक्षुस्सं-युक्तसमवायस्य, परमाणुरूपगततया रूपत्वस्य प्रत्यक्षवारणाय चक्षुस्संयुक्तमहद्भु-

द्भूतरूपवत्समवेतसमवायत्वेन चक्षुस्संयुक्तसमवेतसमवायस्य च सन्निकर्षत्वं वाच्यम्, तथा च त्रसरेणौ चक्षुस्संयुक्तमहदुद्भूतरूपवत्समवायस्य चक्षुस्संयुक्त-महदुद्भूतरूपवत्समवेतसमवायस्य चाभावात् ताभ्यां तत्प्रत्यक्षं नोत्पत्तुमर्हतीति संयोगस्य पृथक् प्रत्यासत्तित्वकल्पनमावश्यकमिति वाच्यम्, द्रव्यवृत्तिलौकिक-विषयतासम्बन्धेन प्रत्यक्षं प्रति समवायेन महत्त्वोद्भूतरूपयोर्द्रव्यसमवेतवृत्ति-लौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति तयोः स्वसमवायिसमवेतत्वसम्बन्धेन च स्वातन्त्र्येणैव कारणत्वस्य कल्पनात्, द्व्यणुके महत्त्वोद्भूतरूपयोः समवायेनाभावा-देव न प्रत्यक्षम्, परमाणुरूपे च महत्त्वोद्भूतरूपयोः स्वसमवायिसमवेतत्वसम्ब-न्धेनाभावादेव च न तत्प्रत्यक्षमिति संयोगस्य पृथक् प्रत्यासत्तित्वाकल्पनेऽपि चक्षुस्संयुक्तद्व्यणुकसमवायादेव त्र्यणुकस्य प्रत्यक्षमुपपत्स्यते, तत्र च महत्त्वो-द्भूतरूपे अपि समवायसम्बन्धेन वर्तेत इति; प्राचीननैयायिकैर्वायोः प्रत्यक्षं नोपे-यत इत्यात्मेतरद्रव्यवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति समवायसम्बन्धे-नोद्भूतरूपं कारणमित्येवं कार्यकारणभावस्तन्मते, अस्मन्मते चात्मा शरीरमेव तत्र चोद्भूतरूपं समवायसम्बन्धेन वर्तत इति आत्मेतरत्वमनिवेश्यैव द्रव्यवृत्तिलौकिक-विषयतासम्बन्धेन प्रत्यक्षं प्रति समवायसम्बन्धेनोद्भूतरूपं कारणमित्येव कार्य-कारणभाव इत्यपि लाघवमित्याहुर्नव्यनास्तिकाः, तत्रोच्यते—

मृतदेहे च चैतन्यमुपलभ्येत सर्वदा ।
देहधर्मादिभावेन, तन्न धर्मादि नान्यथा ॥ ६५ ॥

मृतदेहे चेति प्राणवियुक्तशरीरे चेत्यर्थः । **सर्वथा** जीवच्छरीरकाले येन येन प्रकारेण चैतन्यमुपलभ्यते सर्वेणापि तेन प्रकारेण । जीवच्छरीरकाले केन केन प्रकारेण चैतन्यमुपलभ्यते ? इत्यपेक्षायामाह–**देहधर्मादिभावेने**ति–अत्रादि-पदाद् देहकार्योपग्रहः, तथा च देहधर्मत्व-देहकार्यत्वाभ्यामित्यर्थः, तथा च जीवच्छरीरकाले देहधर्मस्य देहत्वादेर्देहकार्यस्यदेहरूपादेर्देहधर्मत्वदेहकार्यत्वा-भ्यामुपलम्भवन्मृतदेहेऽपि देहत्व-देहरूपादेर्देहधर्मत्व-देहकार्यत्वाभ्यामुपलम्भो भवति यथा तथा जीवच्छरीरकाले देहत्व-देहकार्यत्वाभ्यां देहधर्म-देहकार्यस्य चैतन्यस्योपलम्भवत् मृतदेहेऽपि देहधर्मत्व-देहकार्यत्वाभ्यां चैतन्यस्योपलम्भः स्यादित्यर्थः । **"तन्न धर्मादि नान्यथा"** इत्येवं मुद्रितं चतुर्थचरणमशुद्धं, किन्तु "तत्तद्धर्मादि नान्यथा" इति पाठो युक्तः, यदा मृतदेहेऽपि चैतन्य-

मुपलभ्येत देहधर्मत्व-देहकार्यत्वाभ्यां तदा तत् चैतन्यम्, तद्धर्मादि आदिपदात् तत्कार्यपरिग्रहः, शरीरधर्मभूतं शरीरकार्यं च भवितुमर्हति, अन्यथा मृतदेहे देहधर्मत्व-देहकार्यत्वाभ्यां चैतन्यस्यानुपलम्भे, योग्यानुपलब्ध्याऽभावोऽवसीयत इति योग्यस्य सतश्चैतन्यस्य तदानीमनुपलम्भादभाव एव स्यात्, तथा च न सान्निध्यात् तद्धर्मादीति सम्बध्यते, तथा च चैतन्यं शरीरधर्मभूतं शरीरकार्यभूतं च न, मृतावस्थायां शरीरभावेऽपि तस्याभावात्, यथा शरीरभावेऽपि तत्रासत् घटत्व-घटरूपादि न देहधर्मभूतं न देहकार्यं चेति ॥६५॥

'यद् यद्धर्मवत्कार्यभूतं न तत् तद्भावे न भवति' इति नियम एव व्यभिचारान्न संभवतीत्याशङ्क्य समाधत्ते—

न च लावण्य-कार्कश्य-श्यामत्वैर्व्यभिचारिता ।
मृतदेहेऽपि सद्भावाद् ध्यक्षेणैव संगतेः ॥ ६६ ॥

न चेति । लावण्य-कार्कश्य-श्यामत्वैः शरीरधर्मकार्यैः, व्यभिचारिता मृतदेहसत्त्वेऽपि तत्र तदानीं लावण्यादीनामभावाद् व्यभिचारिता—यद् यद्धर्मादिकं न तत् तद्भावे न भवतीति नियमाभावः, इति न च । तत्र हेतुः—मृतदेहेऽपि सद्भावादिति—लावण्यादीनां मृतदेहेऽपि भावादित्यर्थः । मृतदेहे लावण्यादीनां किं प्रमाणमित्यपेक्षायामाह—अध्यक्षेणैव संगतेरिति—प्रत्यक्षप्रमाणेनैव मृतदेहे लावण्यादीनां परिच्छेदात्, विषयतया प्रत्यक्षं प्रति तादात्म्यसम्बन्धेन कार्यसहभावेन विषयस्य कारणत्वेन तदानीं लावण्यादिलक्षणविषयाभावे तद्विषयकप्रत्यक्षमेव न स्यादिति प्रत्यक्षान्यथानुपपत्त्या लावण्यादयस्तदानीं तत्र सन्तीति भावः ॥ ६६ ॥

ननु मृतदेहे रूपमात्रमुपलभ्यते न तु बलवद्धातूपग्रहप्रभवं लावण्यादि, किञ्च, घटादेः पाकात् पूर्वं सद्भावेऽपि तद्धर्मतत्कार्यभूतं पाकजरूपादिकं तदानीं नास्तीति पाकजरूपादिना व्यभिचारादुक्तनियमोऽप्यसिद्धः न चापक्वघटादिनाशे सत्येव पक्वघटादिरन्य उत्पद्यते, तत्र पाकजरूपादयो न विद्यन्ते किन्तु कारणरूपादिप्रभवा एव रूपादयस्तत्र । पिल्वपाकवादिनो वैशेषिकाः परमाणुष्वेव पाकाद्रूपादिपरावृत्तिमुशन्ति नावयविषु, तेषामाशय इत्थं विश्वनाथेनावेदितः—"अवयविनाऽवष्टब्धेष्ववयवेषु पाको न संभवति, परन्तु वह्निसंयोगेनावयविषु

विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः, पुनश्च पक्वपरमाणुसंयोगाद् द्व्यणुकादिक्रमेण पुनर्महावयवविपर्यन्तमुत्पत्तिः, तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्च [मुक्तावली-का०] इति, व्याख्यातं चेदमित्थं दिनकरेण–"पाको न संभवतीति–रूपादिपरावृत्तिफलकस्तेजःसंयोगो न संभवतीत्यर्थः, रूपपरावृत्तिर्न संभवतीति यावत्, रूपादिनाशं प्रति साक्षात्परम्परासाधारण-सर्वावयवावच्छेदेन तेजःसंयोगस्य हेतुतयाऽवयविनाऽवष्टब्धेष्वयवेषु सत्सु अवयविनि रूपादिनाशो न संभवति, तद्धेतोः सर्वावयवावच्छेदेन तेजःसंयोगस्याभावादिति भावः; न च विद्यमानेऽपि घटादौ सर्वावयवावच्छेदेन तेजःसंयोगः कुतो नोत्पद्यत इति वाच्यम्, तथा सत्यारम्भकसंयोगावच्छेदेनावयविनि तेजः-संयोगोत्पादकाले तदवच्छेदेनावयवेष्वपि नोदना-ऽभिघातयोरन्यतरस्योत्पाद-नियमेनावयवेषु विभागहेतुक्रियोत्पादेनारम्भकसंयोगनाशादवयविनाशापत्तेः; न चावयवेषु तेजोऽभिघातानन्तरं पञ्चमक्षण एवावयविनाशसंभवेन तत्पूर्वमवयविनि रूपादिनाशोत्पादाभ्युपगमे बाधकाभाव इति वाच्यम्; तत्र पूर्वावयविनाशा-ऽवयव्यन्तरोत्पादयोरावश्यकत्वात् पूर्वावयविनि रूपादिपरावृत्तिजनकविजातीय-तेजस्संयोगस्य मानाभावेनाकल्पनात्, अवयविरूपनाशे आश्रयनाशस्य हेतुत्वात्, पाकाजन्यत्वस्य कार्यतावच्छेदककोटौ प्रवेशे गौरवादवयविनाशं विना पाकेनावयविरूपनाशासम्भवादवयविनीलादावयवनीलादेर्हेतुतायां व्यभिचारापत्त्या पाकेनावयविनि नीलाद्युत्पादासम्भव इत्यभिमानः। अवयविषु विनष्टेष्विति–घटा-द्यारम्भकपालादिपरमाणुपर्यन्तेष्वग्निसंयोगेन पूर्वोक्तरीत्या घटादिद्व्यणुकपर्य-न्तेषु नाशसंभवादिति भावः, स्वतन्त्रेषु–कार्यद्रव्यध्वंसविशिष्टेषु। ननु तत्र संस्थान-भेदादिः कथं न प्रतीयते इत्यत आह–तेजसामिति" [दिनकरी–] इति वाच्यम्, एवमपि परमाणुसद्भावेऽपि परमाणुधर्मकार्यभूतपाकजरूपादीनामभावा-दुक्तनियमोऽसिद्धः परमाणुपाकजरूपादिना व्यभिचारात् स्यादेव, वस्तुतोऽवय-विष्वपि पाको नैयायिकसम्मत आदरणीयः, तदाशय इत्यमुपदर्शितो विश्वनाथेन, "तेषामयमाशयः–अवयविनां सच्छिद्रत्वाद् वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवे-ष्ववष्टब्धेष्वपि पाको न विरुध्यते, अनन्तावयवि-तन्नाशकल्पने गौरवम्, इत्थं च सोऽयं घट इत्यादिप्रत्यभिज्ञा सङ्गच्छते, यत्र तु न प्रत्यभिज्ञा तत्रावयवि-नाशोऽपि स्वीक्रियत इति" [मुक्तावली-का०] एतद्व्याख्यानं दिनकरेणेत्थं

कृतम्—"अवष्टब्धेष्वपीति–अवयविनाऽवष्टब्धेष्वपीत्यर्थः, पाकः–रूपादिपरावृत्तिः, न विरुद्ध्यत इति–साक्षात्परम्परासाधारणसकलावयवावच्छेदेन तेजस्संयोगस्य रूपादिनाशहेतुत्वे मानाभावेनानारम्भकसंयोगावच्छेदेन विजातीयतेजःसंयोगादेव रूपादिनाशसम्भवेऽप्यारम्भकसंयोगावच्छेदेन तेजस्संयोगस्याभिघातादेस्तदानीं तत्र सद्भावे मानाभावेन पूर्वोक्तरीत्याऽवयविनाशस्याप्रसक्तेः, सर्वावयवावच्छेदेन तेजःसंयोगस्य रूपादिनाशकत्वेऽपि नाशकतावच्छेदकवैजात्यस्य नोदनत्वाभिघातत्वादिविरुद्धस्यैवाङ्गीकरणीयतया नोदनाभिघातभिन्नतेजस्संयोगाद् रूपादिनाशेऽपि तेनावयविनाशस्यासम्भवात्, अस्तु वा रूपादिनाशकताऽवच्छेदकवैजात्यस्य नोदनाभिघातत्वव्याप्यत्वम्, तथाऽप्यवयव्यभिघातादिकालेऽवयवाभिघातोत्पादनियमे मानाभावः, आस्तां वा तथा नियमः, तथाप्यवयवाभिघातादेर्नियमतो द्रव्यारम्भकसंयोगविरोधिविभागहेतुक्रियाजनकत्वे मानाभाव एव, विभागं प्रति क्रियायास्तत्तद्व्यक्तित्वेनैव हेतुतया तत्तत्क्रियाऽधीनविभागं प्रति तत्तत्पूर्वदेशस्य विशिष्य हेतुतया च तज्जन्यक्रियायास्तादृशविभागहेतुत्वासिद्धेरिति भावः, यदप्युक्तं वैशेषिकैः–अवयविरूपं प्रत्यवयवरूपहेतुताया व्यभिचारापत्त्या नावयविनि पाकेन रूपोत्पाद इति, तदपि न–अवयवरूपादेर्विजातीयरूपादिकं प्रत्येव हेतुतया व्यभिचाराप्रसक्तेः, एतेनावयविरूपनाशे आश्रयनाशहेतुतायां व्यभिचारापत्त्या पाकेनावयविरूपनाशासम्भव इत्यप्यपास्तम्, आश्रयनाशजन्यतावच्छेदककोटौ वैजात्यस्य निवेशनीयत्वादिति । अवयविपाकानभ्युपगमे साधकाभावमुक्त्वा तत्र बाधकमप्याह–अनन्तेति । इत्थं च–अवयविनाशानङ्गीकारे च, प्रत्यभिज्ञा सङ्गच्छत इति पूर्वावयविनाशे तूत्तरोत्पन्नावयवि-पूर्वावयविनोरभेदाभावेनाभेदावगाहिनी प्रत्यभिज्ञा न स्यादिति भाव इति" [दिनकरी] परमाणुपर्यन्तनाशाभ्युपगमो वैशेषिकस्यायुक्त इत्यावेदनायोपाध्यायैरप्युक्तम्–"तद्देशत्व-तत्सङ्ख्या-तत्परिमाणोपर्यवस्थापितकर्परादिपातप्रत्यक्षोपलभ्यत्वाभावापत्तिभिया तत्र परमाणुपर्यन्तनाशानभ्युपगमात्" इति, इत्येवमसिद्धिमाशङ्क्य परिहरति—

न चेल्लावण्यसद्भावो, न स तन्मात्रहेतुकः ।
अत एवान्यसद्भावादस्त्यात्मेति व्यवस्थितम् ॥ ६७ ॥

न चेदिति । चेत्–यदि । लावण्यसद्भावो न मृतदेहे कार्कश्य–श्यामत्व-

योरुपलम्भात् तयोः सद्भावेऽपि लावण्यस्यानुपलम्भान्न तत्सद्भावः, तदा स लावण्यसद्भावः, तन्मात्रहेतुको न देहमात्रनिमित्तको न, देहमात्रनिमित्तकत्वे देहमात्रनिमित्तका देहरूपादयो यथा मृतदेहे वर्तन्ते, तन्नाशादेव च नश्यन्ति, तथा लावण्यमपि तत्र स्यादेव, तन्नाशादेव नश्येत्, यद्यपि किमपि कार्यं नैककारणमात्रप्रभवं 'सामग्री वै जनिका' इति नियमादिति न देहरूपादीनामपि देहमात्रप्रभवत्वम्, सहभाविनो गुणा इत्यभ्युपगन्तृस्याद्वादिमते रूपादिना सहैव देहस्य समुत्पत्तिर्न तु पूर्वक्षणे रूपादिरहितो देहः समुत्पद्यते, तदनन्तरक्षणे तत्र रूपादयः समुत्पद्यन्त इत्यभ्युपगमो येन देहकारणकत्वमपि देहरूपादीनां भवेत्, तथा च देहेतरकारणकत्वाभावे सति देहकारणकत्वं स्वरूपत एवाप्रसिद्धम्, तथापि प्रकृते तन्मात्रहेतुकत्वं तत्सामग्रीसमनियतसामग्रीकत्वं विवक्षितम्, नैयायिकादिमते निर्गुणं द्रव्यमुत्पद्यते, तदनन्तरक्षणे गुणास्तत्र भवन्तीत्येवंस्वरूपे तत्सामग्रीत्यनेन तद्घटिता सामग्री विवक्षिता तत्समनियता सामग्री सैव स्वस्यापि स्वसमनियतत्वं सम्भवत्येव तत्कत्वं तत्प्रभवत्वपर्यवसितं देहादिघटितकारण-कूटात्मकसामग्रीप्रभवे देहरूपादौ समस्ति, स्याद्वादिमते यदा देहोत्पादिका सामग्री तदा तद्रूपाद्युत्पादिका सामग्री, कार्ययोर्देह-तद्रूपाद्योः कथञ्चिद्भेदात् तत्सामग्र्योरपि कथञ्चिद्भेदे समनियतत्वं समस्त्येव, तत्सामग्रीपदेन तदुत्पादक-सामग्री विवक्षितेति देहोत्पादकसामग्रीसमनियतसामग्रीप्रभवत्वं तद्रूपादौ समस्तीति बोध्यम्। ननु देहगतलावण्ये देहोऽपि कारणं तदन्यदपि कारणम्, तच्च कारणं मृतावस्थायां देहादपगच्छति ततो लावण्यमप्यगच्छतीत्यत्राह–अत एवेति–यदभावान्न तदा लावण्यं तदात्मसंयोगविशेषस्वरूपमेव, तद्वशादेव च शरीरेऽवच्छेदकतया चैतन्यमपि, तथा च मृतावस्थायां लावण्याभाववच्चैतन्या-भावस्यापि अन्याभावप्रयोज्यत्वादेवेत्यर्थः, अन्यसद्भावात् लावण्याभावचैत-न्याभावप्रयोजकाभावप्रतियोगिनः शरीरव्यतिरिक्तस्य सद्भावात्, अस्त्यात्मा य एतादृशः पदार्थः स शरीरव्यतिरिक्तश्चैतन्योपादानभूत आत्मपदार्थोऽस्ति, इति एवम्, व्यवस्थितं सिद्धम् ॥ ६७ ॥

ननु मृतदेहे चैतन्याभावे प्राणाभाव एव प्रयोजक इति पराकूतमाशङ्क्य प्रतिक्षिपति—

न प्राणादिरसौ मानं, किं तद्भावेऽपि तुल्यता।
तदभावादभावश्चेदात्माभावे न का प्रमा ॥ ६८ ॥

नेति-'प्राणादिः' इत्यत्राऽऽदिपदात् परिणामविशेषपरिग्रहः। असौ मृतदेहे चैतन्याभावप्रयोजकीभूताभावस्य प्रतियोगी। चैतन्याभावप्रयोजकीभूताभावप्रतियोगी प्राणादिर्न, किन्त्वात्मेत्यत्र किं मानमिति परस्य पृच्छा। उत्तरवादी प्रतिबन्द्योत्तरयति-तद्भावेऽपि तुल्यतेति-प्राणादेरिति शेषः, तथा च प्राणादेश्चैतन्याभावप्रयोजकाभावप्रतियोगित्वेऽपि किं मानमित्यर्थः। पर आह-तद्भावादभावश्चेति-तदभावादित्यनन्तरं चैतन्यस्येति शेषः, प्राणाद्यभावाच्चैतन्यस्याभाव इति यदि प्राणादेश्चैतन्याभावप्रयोजकाभावप्रतियोगित्वे मानं त्वयेष्यत इत्यर्थः, तथा च प्राणादेश्चैतन्यं प्रति कारणत्वे सत्येव प्राणाद्यभावस्य चैतन्याभावप्रयोजकत्वमिति मृतदेहे चैतन्याभावान्यथानुपपत्त्या प्राणाद्यभावसिद्धिवत् जीवच्छरीरे चैतन्यान्यथानुपपत्त्या प्राणादिसद्भावः सिद्ध्यतीत्येवमन्यथानुपपत्तिर्यथा तव मानं तथा जीवच्छरीरे चैतन्यान्यथानुपपत्त्याऽऽत्मसद्भावो मृतदेहे चैतन्याभावान्यथानुपपत्त्याऽऽत्माभाव इति तत्राप्यन्यथानुपपत्तिः प्रमाणं समस्त्येवत्युत्तरवादी आह-आत्माभावे न का प्रमेति-'आत्माभावे' इत्यस्यानन्तरं 'चैतन्यस्याभावः' इत्यनुषज्यते 'न' इत्यनन्तरं च 'इत्यत्र च' इति शेषः, तथा च आत्माभावे चैतन्यस्याभावो न इत्यत्र च का प्रमा? किं प्रमाणं? न किञ्चित् प्रमाणमित्यर्थः, यथा च प्राणाद्यभावे चैतन्याभाव इत्यत्रान्यथानुपपत्तिः प्रमाणं तथा आत्माभावे चैतन्याभाव इत्यत्राप्यन्यथानुपपत्तिः प्रमाणमस्त्येव, प्रमाणस्य चैकस्योभयत्र सत्त्वेऽप्येकत्र तत् प्रमाणं नान्यत्रेत्यस्य वक्तुमशक्यत्वादिति भावः ॥ ६८ ॥

प्राणादिसत्त्वे चैतन्यसत्त्वं प्राणाद्यभावे चैतन्याभाव इत्यन्वय-व्यतिरेकयोः कारणताग्राहकयोः सत्त्वात् ताभ्यां कारणत्वेन क्लृप्तस्य प्राणादेः चैतन्याभावप्रयोजकाभावप्रतियोगित्वं कल्पयितुमुचितमिति पराकूतमाशङ्क्य प्रतिक्षिपति—

तेन तद्भावभावित्वं, न भूयो नलिकादिना।
सम्पादितेऽप्यतत्सिद्धेः, सोऽन्य एवेति चेन्न तत् ॥६९॥

तेनेति-सहार्थे तृतीया। तद्भावभावित्वं तौ भावौ अन्वय-व्यतिरेकौ तद्भावित्वं तत्प्रतियोगित्वम्, तत्र मानमिति शेषः, तथा च प्राणादिना सह चैतन्यस्यान्वयव्यतिरेकप्रतियोगित्वं प्राणादेश्चैतन्याभावप्रयोजकीभूताभावप्रतियोगित्वे मानमित्यर्थः, स्वान्वय-व्यतिरेकनियतान्वय-व्यतिरेकप्रतियोगिचैतन्यकत्वेन

चैतन्यं प्रति हेतुत्वेन कृत्स्नस्य प्राणादेरेव चैतन्याभावप्रयोजकीभूताभावप्रतियोगित्वस्य कल्पनौचित्यादित्याशयः। प्रतिक्षिपति-नेति-स्वान्वयव्यतिरेकनियतान्वयव्यतिरेकप्रतियोगिचैतन्यकत्वमेव प्राणादेरसिद्धमित्यर्थः, तत्र हेतुमाह-भूयो नलिकादिना सम्पादितेऽप्यतत्सिद्धेरिति-भूयः-मरणोत्तरम्, नलिकादिना-आदिपदाद् बस्त्यादिपरिग्रहः, सम्पादितेऽपि अन्तःसञ्चारितेऽपि, वायौ इति शेषः, अतत्सिद्धेः-चैतन्यासिद्धेश्चैतन्यानुत्पत्तेरिति यावत्, तथा च मृतदेहे नलिकादिनाऽन्तःप्रविष्टवायुलक्षणप्राणसत्त्वेऽपि चैतन्यस्याभाव इति तत्सत्त्वे तदभावलक्षणान्वयव्यभिचारात् प्राणादिना सह चैतन्यस्यान्वय-व्यतिरेकनियतान्वयव्यतिरेकत्वमसिद्धमिति भावः। पर आह-सोऽन्य एवेति-सः-नलिकादिनाऽन्तःसञ्चारितो वायुः, अन्य एव-प्राणाद् भिन्न एव न तु प्राणः, तथा च प्राणसत्त्वे चैतन्यानुत्पाद इत्येव नास्ति, कुतोऽन्वयव्यभिचारः? अत्रोत्तरम्-न तत् यदुक्तं स वायुर्न प्राण इति तन्न समीचीनम् ॥ ६९ ॥

स वायुर्न प्राण इत्यस्यायुक्तत्वं तद्वायोः प्राणलक्षणसमन्वयेन व्यवस्थापयति—

वायुसामान्यसंसिद्धेस्तत्स्वभावः स नेति चेत्?।
अत्रापि न प्रमाणं वश्चैतन्योत्पत्तिरेव चेत्? ॥ ७० ॥

वायुसामान्यसंसिद्धेरिति-"प्राणादिस्तु महावायुपर्यन्तो विषयो मतः" [ ] इति, "प्राणोऽपानः समानश्चोदानव्यानौ च वायवः" [ ] इत्यादिवचनात् प्राणे नलिकादिसञ्चारितवायौ च वायुसामान्यस्य-वायुत्वस्य संसिद्धेः-सर्वलोकपरीक्षकसुप्रतीतत्वात्, अन्यवायुतः प्राणे कोष्ठान्तःसञ्चारित्वं विशेषः, सोऽपि नलिकादिना कोष्ठान्तःसंप्रविष्टे वायौ समस्तीति "कोष्ठान्तःसंचारी वायुः प्राणः" [ ] इति प्राणलक्षणं तत्र समस्तीति स्यादेव स एव प्राण इति। पर आह-तत्स्वभावः स नेति-चैतन्यजननस्वभावो नलिकादिना सञ्चारितो वायुर्न भवत्यतो न स प्राणः, तथा च चैतन्यजननस्वभावो वायुः प्राण इत्येव प्राणलक्षणम्, तदभावान्नलिकादिसञ्चारितवायोर्न प्राणत्वमित्यर्थः। अत्रोत्तरवादी आह-इति चेदिति-इति यदि त्वं मन्यस इत्यर्थः। अत्रापि वस्तुगत्या कोष्ठान्तःसन्निविष्टे प्राणवायौ चैतन्यजननस्वभावत्वेऽपि। वो युष्माकं प्रत्यक्षमात्रप्रमाणवादिनां चार्वाकाणाम्। न प्रमाणं प्राणवायुगततया प्रत्यक्षाविषये चैतन्यजननस्वभावत्वे प्रत्यक्षप्रमाणं तावन्नास्त्येव, अनुमानादिकं च नाभ्युपगम्यत

एव भवद्भिः, लोकप्रसिद्धमनुमानादिकमभ्युपेयत एवास्माभिरित्याशयेन पर आह– **चैतन्योत्पत्तिरेव चेदिति**–चैतन्योत्पत्तिरेव चैतन्यजननस्वभावं प्राणं विनाऽनुपपद्यमाना प्राणे चैतन्यजननस्वभावे प्रमाणमिति यदीत्यर्थः ॥ ७० ॥

उत्तरवादी आह—

न तस्यामेव सन्देहात्, तवायं केन नेति चेत्?।
तत्तत्स्वरूपभावेन, तदभावः कथं नु चेत् ॥ ७१ ॥

नेति। निषेधे हेतुः–**तस्यामेव संदेहादिति**–किमियं चैतन्योत्पत्तिः प्राणप्रयोज्या? उताऽऽत्मप्रयोज्या? इत्येवं चैतन्योत्पत्तिविशेष्यकप्राणप्रयोज्यत्वप्रकारकाऽऽत्मप्रयोज्यत्वप्रकारकसंदेहादित्यर्थो न संभवति, एकत्रापि धर्मिणि प्राणप्रयोज्यत्वाऽऽत्मप्रयोज्यत्वयोः सम्भवेन तयोर्विरोधाभावेन एकत्र विरुद्धनानाधर्मप्रकारकं ज्ञानं संशय इति संशयलक्षणाघटनात्, किन्तु प्राणप्रयोज्यत्वतदभावा-ऽऽत्मप्रयोज्यत्व-तदभावेति चतुष्कोटिप्रकारकचैतन्योत्पत्तिविशेष्यकज्ञानरूपसंदेहादित्यर्थः, तत्राऽऽत्मप्रयोज्यत्व-तदभावप्रकारसंदेह आत्मनश्चैतन्योत्पत्तावन्यथासिद्धत्वशङ्कापर्यवसितो विशेषदर्शनान्निवर्तते इति न तत आत्मनश्चैतन्योत्पत्तिं प्रति कारणत्वनिश्चयप्रतिबन्धः, प्राणप्रयोज्यत्वतदभावकोटिकचैतन्योत्पत्तिधर्मिकसंदेहस्तु प्राणस्य चैतन्योत्पत्तावन्यथासिद्धत्वशङ्कापर्यवसितो विशेषदर्शनाभावान्न निवर्तत इति ततः प्राणस्य चैतन्योत्पत्तिं प्रति कारणत्वनिश्चयस्य प्रतिबन्धः स्यादेव, अत एव श्रीहरिभद्रसूरिभिः "तस्यामेव चैतन्योत्पत्तौ संदेहात् प्राणादिकार्यत्वेन" इत्येव व्याख्यातम्, ततः प्राणादिकार्यत्व-तदभावोभयकोटिकचैतन्योत्पत्तिधर्मिकसंदेहादित्यर्थोऽभिमत इति बोध्यम्। पर आह–**तवेति**–तव अतिरिक्तात्मवादिनः। अयं संदेहः, स च 'चैतन्योत्पत्तिरात्मप्रयोज्या नवा?' इत्याकारक आत्मनश्चैतन्यं प्रत्यन्यथासिद्धत्वशङ्कापर्यवसित आत्मनश्चैतन्यं प्रति कारणत्वनिश्चयप्रतिबन्धकः, **केन मानेन न** केन प्रमाणेन प्रतिबन्धान्न भवति?, निरुक्तसंशयाभाव एवाऽऽत्मनश्चैतन्योत्पत्तौ कारणत्वनिश्चयः स्यात्। अत्रोत्तरवादी आह–**इति चेदिति**–एवं यदि त्वं मन्यसे तर्हि तदुत्तरमिदमवधारयेत्यर्थः। **तत्स्वरूपभावेन** तस्य चैतन्यस्याऽऽत्मस्वरूपभावेनाऽऽत्मधर्मानुविधायित्वेन, यद् यद्धर्मानुविधायि तत् तदुपादानकम्, यथा घटो मृद्धर्मानुविधायी मृदुपादानकः, आत्मधर्मानुविधायि च चैतन्यमत आत्मोपादानकमित्येवं

विशेषदर्शनादन्यथासिद्धत्वशङ्कापर्यवसन्नः सन्देहः-चैतन्योत्पत्तिरात्मप्रयोज्या नवेति शङ्का निवर्तत इति भावः । ननु प्राणधर्मस्य जाड्यादेरननुविधायित्वेन चैतन्यस्य प्राणोपादानकत्वं मा भवतु, प्राणसत्त्वे जायमानत्वात् प्राणनिमित्तकत्वं तु स्यादेव, निमित्तनाशादपि नैमित्तिकस्य नाशोऽपेक्षाबुद्धिनाशाद् द्वित्वादिनाशाभ्युपगन्तृभिर्नैयायिकैरिष्ट एवेति मृतदेहे प्राणनाशादेव चैतन्यस्य नाशः, अतिरिक्ताऽऽत्माभ्युपगमेऽपि नित्यस्य तस्य नाशासम्भवान्न तदात्मकोपादाननाशाच्चैतन्यनाशः । न चाऽऽत्मनो नित्यत्वेऽपि तत्संयोगस्यानित्यत्वात् तन्नाशात् तच्छरीरनाश इति वाच्यम्, आत्मनो विभुत्वेन तत्संयोगस्य सार्वत्रिकत्वेन सर्वत्र चैतन्योत्पत्तिरापद्यत इति तस्य चैतन्यनिमित्तत्वासम्भवेन तन्नाशाच्चैतन्यनाशस्याभ्युपगन्तुमशक्यत्वात् । ननु प्राणस्य निमित्तकारणत्वे व्यवस्थिते चैतन्यस्योपादानकारणं किमपि बोध्यं भावकार्यस्य सोपादानत्वनियमात्, तच्च परिशेषादतिरिक्तमात्मैवेति चेत्? न-प्रागुक्तरीत्या शरीरस्यैव चैतन्यं प्रत्युपादानकारणत्वादिति नव्यनास्तिकमते न कश्चिद् दोष इति चेत्? न-सुषुप्त्याद्यवस्थायां प्राणसत्त्वेऽपि ज्ञानादिनाशस्य भावेन व्यतिरेकव्यभिचारेण प्राणनाशस्य ज्ञाननाशं प्रति कारणत्वाभावात्, अत एव प्रतियोगितासम्बन्धेन ज्ञानादिनाशं प्रति स्वप्रतियोगिजन्यत्वसम्बन्धेन विजातीयमनस्संयोगनाशस्य हेतुत्वमित्यपि प्रत्युक्तम्, सुषुप्तौ श्वास-प्रश्वासादिसन्तानानुरोधेन विजातीयमनःसंयोगसत्त्वस्यावश्यकतया विजातीयमनःसंयोगनाशाभावेऽपि ज्ञानादिनाशस्य तदानीं भावेन व्यतिरेकव्यभिचारेण विजातीयमनःसंयोगनाशस्यापि ज्ञानादिनाशं प्रत्यकारणत्वात् । ननु "शरीरे प्राणसञ्चारे कारणं परिकीर्तितम् ।" [ ] इति वचनात् श्वास-प्रश्वाससन्तानलक्षणप्राणसञ्चारं प्रति जीवनयोनियत्नस्य निमित्तत्वम्, जीवनयोनियत्ननाशश्च प्रारब्धादृष्टनाशादेव, जीवनयोनियत्नातिरिक्तज्ञानादिनाशं प्रति विजातीयमनःसंयोगनाशो हेतुरिति चेत्? न-ज्ञानादिगुणमध्यादेकस्य जीवनयोनियत्ननाशस्यादृष्टनाशजन्यत्वस्यावश्यकृप्तत्वे ज्ञानादिगुणनाशस्याप्यदृष्टनाशजन्यत्वस्यैवाभ्युपगन्तुमुचितत्वात्, ज्ञानादिगुणनाशं प्रत्यदृष्टनाशस्य हेतुत्वे व्यवस्थिते सर्वेषामेव ज्ञानादिगुणानामदृष्टविशेषप्रभवत्वस्य स्वीकरणीयतया ज्ञानजनकादृष्टविशेषस्य सुषुप्त्यादिकाले ज्ञानरूपफलोन्मुखतालक्षणपरिपाकाभावाज्ज्ञानप्रतिबन्धकादृष्टविशेषपरिपाकवशाद् वा सुषुप्त्यादिकाले ज्ञानानुत्पादात् विजातीयमनःसंयोगस्य ज्ञानकारणत्ववादिना नास्तिकेनापि अदृष्टविशेषस्तादृश-

संयोगप्रतिबन्धकोऽवश्यमाश्रयणीयः, येनादृष्टविशेषेण मनसो निरिन्द्रियप्रदेशे पुरीतति नाड्यां गमने सति विजातीयमनःसंयोगानुत्पत्त्या सुषुप्त्यादिकाले ज्ञानानुत्पादः, तथा च विजातीयमनःसंयोगमनभ्युपगम्यैवादृष्टविशेषो ज्ञानप्रतिबन्धकः, तदभावाज्ज्ञानोत्पाद इति लाघवम्, अदृष्टविशेषो येन मानेन सिद्ध्यति तेन मानेन शरीरादिव्यतिरिक्तात्मनिष्ठ एव सिद्ध्यति, नास्तिकमते तु तस्यादृष्टस्य संयोगविशेषविशिष्टाणुवृत्तित्वमेव स्वीकरणीयम्, न च तदप्याद्यम्–संयोगविशेषापन्नानेकाण्वात्मकाश्रयकल्पनापेक्षयैकातिरिक्तात्मरूपाश्रयकल्पने लाघवात्, किञ्च, य एव शरीरत्वघटकः संयोगः स एव यद्यात्मत्वघटकस्तदा यत्रैव शरीरत्वं तत्रैवात्मत्वमित्येवं तुल्यव्यक्तिवृत्तित्वेन तल्लक्षणतुल्यत्वरूपजातिबाधकादात्मत्वं जातिर्न स्यात्, अखण्डस्वरूपाभावात् तयोर्जातित्वं नेष्टमेव, यदि तदापि सखण्डोपाधिरूपयोस्तयोरेकसंयोगघटितस्वरूपत्वेन तुल्यवित्तिवेद्यत्वं प्रसज्येत, न चेदमपीष्टम्, अन्धकारे चक्षुरादिना शरीरत्वेन शरीरग्रहणाभावेऽपि 'अहं जानामि, सुखी, दुःखी, यते, इच्छामि' इत्येवमात्मप्रत्यक्षाभ्युपगमादहन्त्वस्यात्मत्वरूपत्वात्, यदि त्वात्मत्वघटकसंयोगः शरीरत्वघटकसंयोगाद् भिन्न एवोररीक्रियते तर्हि आत्मैव शरीराद् भिन्नः किमिति न स्वीक्रियत इति दिक्। परः शङ्कते–कथं न्विति तदभावः चैतन्ये प्राणधर्मानुविधायित्वाभावः, कथं कस्मात्, 'नु' इति वितर्के, अयमाशयः बुभुक्षालक्षणाशनीया-पिपासयोः प्राणधर्मयोरहन्त्वात्मकात्मत्वसामानाधिकरण्येनानुभवस्य 'अहमशनीयावान् अहं पिपासावान्' इत्येवं स्वरूपस्य सद्भावात्, "अन्योऽन्तरात्मा प्राणमयश्च" [ ] इति श्रुतेश्च प्राणस्य चैतन्यत्वं प्रामाणिकमपि नाभ्युपगम्यते यदि, तदाऽनुभवागमादिकदर्थनान्महान् वितर्कावसर इति। अत्रोत्तरमाह–चेदिति–एवं त्वं मन्यसे यदि तदेत्यर्थः ॥ ७१ ॥

प्राणधर्मस्पर्शविशेषादिसामानाधिकरण्येनाहन्त्वस्याप्रमीयमाणत्वान्न चैतन्यस्य प्राणधर्मत्वमित्याशयेनाह—

तद्वैलक्षण्यसंवित्तेर्मातृचैतन्यजे ह्ययम् ।
सुते तस्मिन्न दोषः स्यान्न न भावेऽस्य मातरि ॥ ७२ ॥

तद्वैलक्षण्यसंवित्तेरिति। प्राणधर्मस्पर्शविशेषादितोऽहन्त्वसामानधिकरण्येनाप्रतीयमानाद् वैलक्षण्येनाहन्त्वसामानाधिकरण्येनाशनीया-पिपासयोः संवि-

त्तेरनुभवात् ते अशनीया-पिपासे अदनेच्छा-जलपानेच्छारूपत्वादात्मधर्मावेव, न प्राणधर्माविति न प्राण एवात्मेत्यर्थः । भूतधर्मस्थूलत्व-गौरत्वादिसामानाधिकरण्येनाहन्त्वस्य 'अहं स्थूलः' इति 'अहं गौरः' इत्येवमनुभवात् कायाकारपरिणतं भूतमेवात्मेति प्राचीनचार्वाकमतं नोक्तदोषालिङ्गितमित्याशयवान् आत्मनो भूतपरिणामशरीररूपत्वे प्रागुक्तं दोषं विस्मरन्नेव परः शङ्कते-**मातृचैतन्यजे ह्ययं सुते तस्मिन् न दोषः स्यादिति**-मातृचैतन्यजे-मातृचैतन्यप्रभवे,सुते तस्मिन्-पुत्रशरीरगते चैतन्ये अभ्युपगम्यमाने सति, अयम्-उक्तो दोषः, न स्यात्-न भवेत्, अयमाशयः-चैतन्यं चेतनोपादानकमेव नाचेतनोपादानकमिति नियमबलादेव पूर्वापरचैतन्येषु हेतुतयाऽनुगत आत्माऽभ्युपगम्यते, न च तथाऽऽभ्युपगमनेन किञ्चित् प्रयोजनम्, सुतचैतन्यं प्रति मातृचैतन्यस्य हेतुत्वादेवोक्तनियमोपपत्तेः, मातृचैतन्यं व्यवहितं सत् कथं सुतचैतन्यं प्रत्युपादानमिति तु नाशङ्क्यम्, व्यवहितस्यापि सुषुप्तिप्राक्कालीनविकल्पस्य जागरविकल्पहेतुत्वदर्शनात्; न च मातृचैतन्यं विलक्षणत्वात् सुतचैतन्यं प्रति कारणं न सम्भवतीति वाच्यम्, विलक्षणयोरपि हेतु-हेतुमद्भावस्य दर्शनात्, कथमन्यथा वृश्चिकादिव गोमयादपि वृश्चिकस्य प्रादुर्भावः, तथा च पुत्रचैतन्येऽपि माता-पितृशुक्रशोणिताभ्यासरसायनादिनानाहेतुकत्वमविरुद्धमिति । अत्रोत्तरमावेदयति-**न न भावेऽस्य मातरीति**-अस्य-सुतचैतन्यहेतुचैतन्यस्य, मातरि-मातृशरीरे, **भावे** सत्त्वे भ्युपगम्यमाने सति, 'न न' इत्यनन्तरं दोष इत्यनुवर्तते, दोषो न इति न, निषेधद्वयस्य प्रकृतार्थावधारणपरत्वाद् दोष एवेत्यर्थः, स च दोष इत्थमवसातव्यः-मातृचैतन्यं यदि सुतचैतन्यं प्रति कारणं भवेत् तर्हि गर्भस्थोऽपि बालो मात्रनुभवजन्य-तत्समानविषयकानुभववान् भवेत्, एवं सति मात्रनुभूतमप्यर्थं मातृवत् स्मरेदेव, गोमयाद् वृश्चिकाच्च वृश्चिकप्रादुर्भावो भवतीत्यभ्युपगच्छामो वयमपि, नैतावता विलक्षणयोर्हेतु-हेतुमद्भावः सिद्ध्यति, गोमयप्रभववृश्चिकाद् विजातीयस्यैव वृश्चिकस्य वृश्चिकप्रभवत्वाभ्युपगमात्, तथा च विजातीयवृश्चिकं प्रति गोमयस्य हेतुत्वम्, तद्विजातीयवृश्चिकं प्रति वृश्चिकस्य हेतुत्वमित्येवं विशिष्य हेतुहेतुमद्भावस्य सम्भवेऽपि चैतन्ये विशेषादर्शनाच्चैतन्ये चैतन्यमेव हेतुः, न तु मातृशरीरादिकम्, प्रज्ञामेधादिविशेषेऽप्यन्तरङ्गतया समानजातीयपूर्वाभ्यास एव हेतुः, अन्यथैकमातृ-पितृकयोर्युगपज्जातयोर्यमजयो-

रसायनाद्युपयोगे समानेऽपि कस्यचित् क्वचिद् विषय एव प्रज्ञामेधादिकमिति प्रतिनियमो न भवेत्, रसायनाद्युपयोगस्योभयत्र तुल्यत्वात्, तथा च पूर्व-पूर्वजन्माभ्यासप्रकर्षत एव प्रज्ञामेधादिप्रकर्ष इति पूर्वापरभवानुगाम्येवाऽऽत्मा चैतन्यं प्रत्युपादानं न तु मातृचैतन्यं सुतचैतन्यं प्रत्युपादानमिति । ननु प्रत्यक्षं प्रतीन्द्रियसन्निकर्षस्यानुमित्यादिकं प्रति लिङ्गज्ञानादीनां विशिष्य हेतुत्वस्यावश्यकतया तत एव निर्वाहे ज्ञानं प्रति सामान्यतो ज्ञानस्य हेतुत्वे मानाभाव इति चेत्? न–तत्तज्ज्ञानविशेषकारणाभावकूटस्य सुषुप्तौ ज्ञानानुत्पत्तिप्रयोजकत्वकल्पनापेक्षया ज्ञानाभावस्यैव तत्प्रयोजकत्वे लाघवमिति कारणाभावस्यैव कार्याभावप्रयोजकत्वमिति ज्ञानलक्षणोपयोगस्य ज्ञानहेतुत्वसिद्धेरिति ॥ ७२ ॥

मातृचैतन्यस्य सुतचैतन्यजनकत्वे दोषान्तरमप्याह—

न च संस्वेदजाद्येषु, मात्रभावेन तद् भवेत् ।
प्रदीपज्ञातमप्यत्र, निमित्तत्वान्न बाधकम् ॥ ७३ ॥

न चेति । **संस्वेदजाद्येषु** संस्वेदजाः–यूकाद्याः, आदिपदात् कृमि-दंशादीनामुपग्रहः, तेषु; **मात्रभावेन** स्वजनकस्त्रीशरीराभावेन, **तत्** चैतन्यम्, अनुभवसिद्धस्य तस्यापलापः कर्तुं न शक्यते, **भवेदित्यत्र न चेत्यस्यान्वयान्नैव स्यात्**, तथा च मातृशरीराभावेऽपि यूकादिषु चैतन्यस्य भावेन व्यतिरेकव्यभिचाराच्च मातृशरीरं चैतन्यं प्रति निमित्तकारणमपीत्यभिसन्धिः । यतो निमित्तकारणमपि मातृशरीरं न भवति तत एव **प्रदीपज्ञातमपि** प्रदीपनिदर्शनमपि, यथा दीपाद् दीपान्तरं ततोऽपि दीपान्तरमित्येवमानिर्वाणाद् दीपसन्ततिर्भवति तथा मातृचैतन्यात् सुतचैतन्यमाद्यं ततो द्वितीयसुतचैतन्यं ततस्तृतीयादिसुतचैतन्यमित्येवं चैतन्यसन्ततिरित्येवं निदर्शनमपि । अत्र प्रकृते चैतन्ये । **निमित्तत्वात्** प्रदीपस्य प्रदीपान्तरं प्रति निमित्तकारणत्वात्, **न बाधकं** चैतन्यस्य चैतन्यं प्रति निमित्तकारणत्वाभावान्न पृथगात्मसिद्धिप्रतिकूलम्, चैतन्यं प्रति चैतन्यमेवोपादानकारणमिति चैतन्योपादानकारणतयैवातिरिक्ताऽऽत्मनः सिद्धिरभिमताऽस्माकम्, यथा च शरीरविशेषे मातृशरीरस्य निमित्तकारणत्वं तथा चैतन्यविशेषे मातृशरीरस्य निमित्तकारणत्वमित्यस्य संभवेऽपि सामान्यतश्चैतन्यं प्रति उपादानत्वं यत् कल्पयितुमिष्टं तद् मातृशरीरस्य सुतचैतन्योपादानत्वं संस्वेदजादिषु व्यभिचाराच्च संभवतीत्यात्मैव सामान्यतश्चैतन्योपादानमिति ॥ ७३ ॥

एतदेव फलितमुपदर्शयति—

इत्थं न तदुपादानं, युज्यते तत् कथञ्चन ।
अन्योपादानभावे च, तदेवात्मा प्रसज्यते ॥ ७४ ॥

इत्थमिति—उक्तप्रकारेणेत्यर्थः । नेत्यस्य 'युज्यते' इत्यनेन सम्बन्धः । **तदुपादानं** सुतचैतन्योपादानम् । **तत्** मातृशरीरम् । **कथञ्चन** केनापि प्रकारेण **न युज्यते** न घटते । **अन्योपादानभावे च** मातृशरीरातिरिक्तसुतचैतन्योपादानसद्भावे च । **तदेव** भूतातिरिक्तोपादानमेव आत्मा, **प्रसज्यते** चार्वाकस्यापद्यते । ननु यद्वृद्धि-विकाराभ्यां यद्वृद्धि-विकारौ तत् तस्योपादानम्, यथा दुग्धादिवृद्धि-विकारतो दध्यादिवृद्धि-विकारभावाद् दुग्धादिकं दध्याद्युपादानम्, शरीरवृद्धि-विकारतश्चैतन्यवृद्धिविकारदर्शनाच्चैतन्यस्य शरीरमुपादानमिति चेत्? न—अजगरादिशरीरवृद्धितस्तत्र चैतन्यवृद्धेः सात्त्विकादिपुरुषधौरेयस्य तपउपवासादिना शरीरह्रासतश्चैतन्यह्रासस्य चाभावेन व्यभिचारात्, यत्रापि क्वचित् पुरुषे शरीरवृद्धि-विकारतश्चैतन्यवृद्धि-विकारौ दृश्येते तत्रापीन्द्रियपाटवा-ऽपाटवाभ्यां सहकारिणः शरीरस्य वृद्धि-विकारयोश्चैतन्यवृद्धि-विकारसम्भवात्, अत एव जन्मान्धादेः शरीरस्य वृद्धावपि चक्षुरिन्द्रियपाटवाभावे न चाक्षुषज्ञानवृद्धिः, एवं बधिरादेरपीति । नन्वस्तु इन्द्रियाण्येवाऽऽत्मा, तत्पाटवा-ऽपाटवाभ्यां चैतन्यपाटवा-ऽपाटवयोर्दर्शनादिति चेत्? न—विकल्पासहत्वात्, मिलितानामिन्द्रियाणां ज्ञानाद्याश्रयत्वे चक्षुराद्येकैकेन्द्रियविकलस्यापि त्वाचादिज्ञानानुदयः स्यात्, यत्किञ्चिदिन्द्रियस्य प्रतिनियतस्य ज्ञानाद्याश्रयत्वे तद्विकलस्य किमपि ज्ञानं न स्यात्, चाक्षुषज्ञानस्य चक्षुराश्रयः, त्वाचज्ञानस्य त्वगाश्रय इत्येवं तत्तदिन्द्रियजन्यज्ञानस्य तत्तदिन्द्रियमाश्रय इत्येवमुपगमे, एकत्र शरीरे नाना ऽऽत्मानः प्रसज्यन्त इति चाक्षुषज्ञानाश्रय-स्पार्शनज्ञानाश्रययोरात्मनोर्भेदाद् 'योऽहं स्पृशामि सोऽहं पश्यामि' इति स्पार्शन-चाक्षुषप्रत्यक्षोभयाश्रयतयैकात्मावगाहिप्रतीत्यनुत्पत्तिः, अनुभव-स्मरणयोः सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावाद् यत्रैवानुभवस्तत्रैव स्मरणमिति नियमेन चक्षुषा दृष्टस्य वस्तुनोऽनुभवितुश्चक्षुषो नाशे तदननुभविनाऽन्येनेन्द्रियेण स्मरणानुपपत्तिश्च । चक्षुरादिजन्यनानाज्ञानानामेकमेव नित्यमिन्द्रियमाश्रय इत्यभ्युपगमे त्वात्मन एवेन्द्रियतेति नामान्तरकरणमिति संज्ञामात्र एव विवादः परीक्षकैरुपेक्ष्य इति ॥ ७४ ॥

निरुपादानमेव चैतन्यमुपजायत इति न चैतन्योपादानतयाऽऽत्मसिद्धिरित्यत आह—

न तथाभाविनं हेतुमन्तरेणोपजायते ।
किञ्चिन्नश्यति चैकान्ताद्, यथाऽऽह व्यासमहर्षिः ॥ ७५ ॥

नेति । तथा कार्यरूपतया, **भाविनं** भवनस्वभावम्, **हेतुमन्तरेण** उपादानकारणं विना, **न किञ्चिदुपजायते** नैवोत्पद्यते किमपि, तथाभवनस्वभावस्तुलक्षणपरिणामप्रयुक्तद्रव्यावस्थाविशेषरूपत्वात् तथाभाविपरिणामस्य, न चावस्थाविशेषरूपपरिणामोऽवस्थावद्द्रव्यात्मकपरिणामिनमन्तरेण सम्भवति, यस्य तथाभाविपरिणामलक्षणावस्था तदेवोपादानकारणम् । यथा तथाभाविपरिणामोत्पादो नोपादानकारणमन्तरेण सम्भवति तथा तद्विनाशोऽपि नोपादानकारणमन्तरेण सम्भवतीत्याह-**नश्यति चैकान्तादिति**-'न किञ्चिद्'इत्यस्यात्रापि सम्बन्धः, **एकान्ताद्** द्रव्यपृथग्भावेन, **किञ्चित्** किमपि, **न नश्यति** यतस्तद्विनाशस्तदुत्तरद्रव्यावस्थारूपपरिणाम एव; न च द्रव्यमेव कार्यरूपतया भवति कार्योत्तरावस्थारूपेण परिणमत इत्युत्पाद-विनाशौ द्रव्यमेव, न तु तद्व्यतिरिक्तावुत्पाद-विनाशौ स्यातामिति वाच्यम्, तयोर्द्रव्यात् कथञ्चिद्भिन्नत्वस्याप्यभ्युपगमात्, तदिदमाह सम्मतौ सिद्धसेनदिवाकरो वादिप्रकाण्डः—

"तिण्णित्रि उप्पायाई अभिन्नकाला य भिन्नकाला य ।
अत्थंतरं अणत्थंतरं च दवियाहि णायव्वा ॥ गा० १३२ ।"
[त्रयोऽप्युत्पादादयोऽभिन्नकालाश्च भिन्नकालाश्च ।
अर्थान्तरमनर्थान्तरं च द्रव्येभ्यो ज्ञातव्याः ॥] इति संस्कृतम् ।

उत्पादादयस्त्रयो यदि भिन्नकालाः कथमभिन्नकालाः ?, एवं यदि द्रव्येभ्योऽर्थान्तरभूताः कथमनर्थान्तरभूताः ? इति शिष्यजिज्ञासोपशान्तये किञ्चिद्विशेषावगतये च न्यायविशारदीयैतद्व्याख्यैवोल्लिख्यते—

"अत्रैकप्रतियोगिनिरूपितत्वेन, तद्विशिष्टद्रव्यनिरूपितत्वेन वोत्पाद-स्थिति-विगमानां भिन्नकालता, यथा घटोत्पादसमये, घटविशिष्टमृदुत्पादसमये वा न तद्विनाशः, अनुत्पत्तिप्रसक्तेः; नापि तद्विनाशसमये तदुत्पत्तिः, अविनाशप्रसक्तेः, न च तत्प्रादुर्भावसमय एव तत्स्थितिः, तद्रूपेणावस्थितस्यानवस्थाप्रसक्त्या प्रादुर्भावायोगात्; अतो द्रव्यादर्थान्तरभूतास्ते, अनेकरूपाणामेकद्रव्यरूपत्वायोगात्;

भिन्नप्रतियोगिनिरूपितत्वेन, तद्विशिष्टद्रव्यनिरूपितत्वेन वाऽभिन्नकालता, यथा—कुशूलतद्विशिष्टमृन्नाशघटतद्विशिष्टमृदुत्पाद-मृत्स्थितीनाम्; अत ऐक्यरूपेण द्रव्यादनर्थान्तरभूतत्वम्; इति सम्प्रदायः।

अत्रेदं विविच्यते-उत्पादादय आधारत्वादिवदतिरिक्ता अपि, न त्वाद्यक्षणसम्बन्धादिरूपा एव, क्षण एवाभावात्; तेषां च घटत्वादिना प्रतियोगित्वं मृत्त्वादिना चानुयोगित्वम्, इति 'मृदि घट उत्पन्नः' इत्यादिधीः; द्रव्ये तु पर्यायोपहितरूपेण प्रतियोगित्वम्, तत्र चानुयोगितायाः प्रतियोगिन्येव समावेशाद् द्रव्यस्य नानुयोगित्वम्, यथा-'घटविशिष्टं मृद्द्रव्यमुत्पन्नम्' इति; न चात्र विशेषणस्यैवोत्पादो विषयः, विशिष्टस्यैव प्रतियोगित्वानुभवात्; इतरत्रान्वितस्य घटस्योत्पादेऽन्वयायोगाच्च; न च विशिष्टहेतुकल्पने गौरवम्, घटहेतूनामेव घटविशिष्टहेतुत्वात्; अत एव क्षणहेतूनामेव क्षणविशिष्टहेतुत्वात् सर्वत्राविशिष्टवैस्रसिकोत्पादसिद्धिः; न चैवं 'ज्ञानमुत्पन्नम्' इतिवत् 'आत्मोत्पन्नः' इति व्यवहारः स्यात्, आत्मत्वेनोत्पादाप्रतियोगित्वे तु 'कम्बुग्रीवादिमानुत्पन्नः' इत्यपि न स्यादिति वाच्यम्, गुरुरूपस्यापि प्रकारतावच्छेदकत्ववदुत्पादादिप्रतियोगितावच्छेदकत्वात्; अत एव नित्या-ऽनित्यत्वव्यवहारयोरप्यसाङ्कर्यम्; नन्वेवं 'परमाणुर्नित्यः' इति व्यवहारोऽपि भ्रान्तः स्यात्, परमाणोः परमाणुभावेन नाशस्याप्यभ्युपगमात्; अत एवावयवविभागोत्तरं तथोत्पादप्रतिपादनात्, तदुक्तम्—

"दव्वंतरसंजोगाहि केई दवियस्स बेंति उप्पायं।
उप्पायत्थाऽकुसला विभागजायं ण इच्छंति॥
अणु-दुअणुएहिं दव्वे आरद्धे तिअणुअं ति ववएसो।
ततो अ पुण विभत्तो अणु त्ति जाओ अणू होइ॥
[सम्मतिगाथा-१३५,१३६]" इति।

["द्रव्यान्तरसंयोगेभ्यः केचिद् द्रव्यस्य ब्रुवन्त्युत्पादम्।
उत्पादार्थाऽकुशूला विभागजातं नेच्छन्ति॥
अणुद्व्यणुकैर्द्रव्ये आरब्धे त्र्यणुकमिति व्यपदेशः।
ततश्च पुनर्विभक्तोऽणुरिति जातोऽणुर्भवति॥"] इति संस्कृतम्।

युक्तं चैतत्, प्राक् परमाणुतासत्त्वे स्थूलकार्याभावप्रसङ्गात्; इति चेत्? न—व्यावहारिकनित्यतालक्षणे समुदयविभागरूपस्यैव व्ययस्य प्रवेश्यत्वादिति" इति।

उक्तार्थो व्यासस्यापि सम्मत इत्याह–यथाऽऽह व्यासमहर्षिरिति–व्यासस्य शिष्टत्वं ख्यापयितुं महर्षित्वेनोपादानम्, ततश्चायमेव शिष्टाभ्युपगम इत्यावेदितं भवति, सप्तमस्य सर्वचरणे लघुत्वं षष्ठस्य च गुरुत्वमित्यनुष्टुभि नियमस्यात्र परित्यागो न दोषाय, आर्षत्वादिति बोध्यम् ॥ ७५ ॥

व्यासवचनमुल्लिखति—

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥७६॥

नासतो विद्यत इति । इदं च पद्यं भगवद्गीतायां द्वितीयाध्याये । इदं च पद्यं वेदान्तदर्शनोपष्टम्भकतया शङ्कराचार्येणेत्थं व्याख्यातम्—

"इतश्च शोक-मोहावकृत्वा शीतोष्णादिसहनं युक्तम्, यस्मात् **नासत** इति–असतः–अविद्यमानस्य शीतोष्णादेः सकारणस्य, न विद्यते **भावः** भवनमस्तिता, नहि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं वस्तु सद् भवितुमर्हति, विकारो हि सः, विकारश्च व्यभिचरति, यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत् तथा सर्वो विकारः कारणव्यतिरेकेणानुपलब्धेरसत्, जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेः, कार्यस्य घटादेर्मृदादिकारणस्य तत्कारणस्य च तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वम्; तदसत्त्वे सर्वाभावप्रसङ्ग इति चेत्? न–सर्वत्र बुद्धिद्वयोपलब्धेः–सद्बुद्धिरसद्बुद्धिरिति, यद्विषया बुद्धिर्न व्यभिचरति तत् सत्, यद्विषया व्यभिचरति तदसद्, इति सदसद्विभागे बुद्धितन्त्रे स्थिते, सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते समानाधिकरणे नीलोत्पलवत्, सन् घटः सन् पटः सन् हस्तीत्येवं सर्वत्र तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति, तथा च दर्शितम्, न तु सद्बुद्धिः, तस्माद् घटादिबुद्धिविषयोऽसन् व्यभिचारात्, न तु सद्बुद्धिविषयोऽव्यभिचारात्; घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति चेत्? न–पटादावपि सद्बुद्धिदर्शनात्, विशेषणविषयैव सा सद्बुद्धिरतोऽपि न विनश्यति; अथ सद्बुद्धिवद् घटबुद्धिरपि घटान्तरे दृश्यत इति चेत्? न-पटादावदर्शनात्; सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेत्? न–विशेष्याभावात्, सद्बुद्धिर्विशेषणविषया सती विशेष्याभावे विशेषणानुपपत्तौ किंविषया स्यात्; ननु पुनः सद्बुद्धेर्विषयाभावादेकाधिकरणत्वं घटादिविशेष्याभावे न युक्त-

मिति चेत्? न–सदिदमुदकमिति मरीच्यादावन्यतराभावेऽपि सामानाधिकरण्यदर्शनात्, तस्माद् देहादेर्द्वन्द्वस्य सकारणस्यासतो न विद्यते भाव इति । तथा सतश्च–आत्मनः, अभावः–अविद्यमानता न विद्यते, सर्वत्राव्यभिचारादित्यवोचाम एवमात्मानात्मनोः सदसतोरुभयोरपि दृष्टः–उपलब्धः, अन्तः–निर्णयः, सत् सदेव असदसदेवेति तु अनयोः यथोक्तयोः, तत्त्वदर्शिभिः तदिति सर्वनाम, सर्वं च ब्रह्म, तस्य नाम तदिति, तद्भावस्तत्त्वं–ब्रह्मणो याथात्म्यम्, तद् द्रष्टुं शीलं येषां ते तत्त्वदर्शिनस्तैः, तत् त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियतरूपाणि द्वन्द्वानि 'विकारोऽयमसन्नेव मरीचिजलवन्मिथ्याऽवभासत' इति मनसि निश्चित्य तितिक्षस्वेत्यभिप्रायः" ।

वेदान्तमतरहस्याभिज्ञैर्मधुसूदनसरस्वतीव्याख्या चात्रैवं दृश्यते—

"ननु भवतु पुरुषैकत्वं तथापि तस्य सत्यस्य जडद्रष्टृत्वरूपः सत्य एव संसारः, तथा च शीतोष्णादिसुखदुःखकारणे सति तद्भोगस्यावश्यकत्वात् सत्यस्य च ज्ञानाद् विनाशानुपपत्तेः कथं तितिक्षा? कथं वा सोऽमृतत्वाय कल्पते? इति चेत्? न–कृत्स्नस्यापि द्वैतप्रपञ्चस्यात्मनि कल्पितत्वेन तज्ज्ञानाद् विनाशोपपत्तेः, शुक्तौ कल्पितस्य रजतस्य शुक्तिज्ञानेन विनाशवत् । कथं पुनरात्मानात्मनोः प्रतीत्यविशेषे आत्मवदनात्माऽपि सत्यो न भवेत्? अनात्मवदात्माऽपि मिथ्या न भवेत्? उभयोस्तुल्ययोगक्षेमत्वादित्याशङ्क्य विशेषमाह भगवान्–यत् कालतो देशतो वा परिच्छिन्नं तदसत्, यथा–घटादि जन्मविनाशशीलं प्राक्कालेन परकालेन च परिच्छिद्यते, ध्वंस-प्रागभावप्रतियोगित्वात्, कादाचित्कं कालपरिच्छिन्नमित्युच्यते, एवं देशपरिच्छिन्नमपि तदेव, मूर्तत्वेन सर्वदेशावृत्तित्वात्, कालपरिच्छिन्नस्य देशपरिच्छेदनियमेऽपि देशपरिच्छिन्नत्वेनाभ्युपगतस्य परमाण्वादेस्तार्किकैः कालपरिच्छेदानभ्युपगमाद् देशपरिच्छेदोऽपि पृथगुक्तः, स च किञ्चिद्देशवृत्तिरत्यन्ताभावः, एवं सजातीयभेदो विजातीयभेदः स्वगतभेदश्चेति त्रिविधो भेदो वस्तुपरिच्छेदः, यथा–वृक्षस्य वृक्षान्तराच्छिलादेः पत्रपुष्पादेश्च भेदः, अथवा जीवेश्वरभेदो जीवजगद्भेदो जीवपरस्परभेद ईश्वरजगद्भेदो जगत्परस्परभेद इति पञ्चविधो वस्तुपरिच्छेदः, कालदेशापरिच्छिन्नस्याप्याकाशादेस्तार्किकैर्वस्तुपरिच्छेदाभ्युपगमात् पृथङ्निर्देशः, एवं साङ्ख्यमतेऽपि योजनीयम्, एतादृशस्य असतः शीतोष्णादेः कृत्स्नस्यापि प्रपञ्चस्य भावः सत्ता पारमार्थिकत्वं

स्वान्यूनसत्ताकतादृशपरिच्छेदशून्यत्वम्, **न विद्यते** न संभवति, घटत्वा-ऽघटत्वयोरिव परिच्छिन्नत्वा-ऽपरिच्छिन्नत्वयोरेकत्र विरोधात्, नहि दृश्यं किञ्चित् क्वचित् काले देशे वस्तुनि वा न निषिद्ध्यते, सर्वत्राननुगमात्, नवा सद् वस्तु क्वचिद् देशे काले वस्तुनि वा निषिध्यते, सर्वत्रानुगमात्, तथा च सर्वत्रानुगते सद्वस्तुन्यननुगतं व्यभिचारि वस्तु कल्पितं रज्जुखण्ड इवानुगते व्यभिचारि सर्पधारादिकमिति भावः। ननु व्यभिचारिणः कल्पितत्वे सद् वस्त्वपि कल्पितं स्यात्, तस्यापि तुच्छव्यावृत्तत्वेन व्यभिचारित्वादित्यत आह–**नाभावो विद्यते सत** इति–सदधिकरणकभेदप्रतियोगित्वं हि परिच्छिन्नत्वम्, तच्च न तुच्छव्यावृत्तत्वेन, तुच्छे शशविषाणादौ सत्त्वायोगात्, सदसद्व्यामभावो निरूप्यते इति न्यायात्, एकस्यैव स्वप्रकाशस्य नित्यस्य विभोः सतः सर्वानुस्यूतत्वेन सद्व्यक्तिभेदानभ्युपगमात्, घटः सन्नित्यादिप्रतीतेः सार्वलौकिकत्वेन सतो घटाधिकरणकभेदप्रतियोगित्वायोगात्, **अभावः** परिच्छिन्नत्वं देशतः कालतो वस्तुतो वा, **सतः** सर्वानुस्यूतसन्मात्रस्य, **न विद्यते** न सम्भवति, पूर्ववद्विरोधादित्यर्थः। ननु सन्नाम किमपि वस्तु नास्त्येव, यस्य देश-काल-वस्तुपरिच्छेदः प्रतिषिध्यते, किं तर्हि सत्त्वं नाम परं सामान्यम्, यदाश्रयत्वेन द्रव्य-गुण-कर्मसु सद्व्यवहारः, तदेकाश्रयसमवायसम्बन्धेन सामान्य-विशेष-समवायेषु, तथा चासतः प्रागभावप्रतियोगिनो घटादेः सत्त्वं कारणव्यापारात्, सतोऽपि तस्याभावः कारणनाशाद् भवत्येवेति कथमुक्तम्–"नासतो विद्यते भावो नाभावो विद्यते सतः" इति, एवं प्राप्ते परिहरति-**उभयोरपीत्यर्द्धेन**, उभयोरपि सदसतोः सतश्चासतश्च, **अन्तो** मर्यादा नियतरूपत्वं–यत् सत् तत् सदेव, यदसत् तदसदेवेति **दृष्टो** निश्चितः श्रुति-स्मृति-युक्तिभिर्विचारपूर्वकम्, कैः? **तत्त्वदर्शिभिः** वस्तुयाथात्म्यदर्शनशीलैर्ब्रह्मविद्भिः, न तु कुतार्किकैः, अतः कुतार्किकाणां न विपर्ययानुपपत्तिः, **तु** शब्दोऽवधारणे, एकान्तरूपो नियम एव दृष्टो न त्वनेकान्तरूपोऽन्यथाभाव इति, तत्त्वदर्शिभिरेव दृष्टो नातत्त्वदर्शिभिरिति वा, तथा च श्रुतिः-"सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" [ ] इत्युपक्रम्य "ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो!" [ ] इत्युपसंहरन्ती सदेकं सजातीयविजातीयस्वगतभेदशून्यं सत्यं दर्शयति, "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" [ ] इत्यादिश्रुतिस्तु विकारमात्रस्य व्यभिचारिणो वाचारम्भणत्वेनानृतत्वं दर्शयति, "अन्नेन सौम्य! शुङ्गेनापो मूलमन्विच्छद्भिः

सौम्य ! शुङ्गेन तेजो मूलमन्विच्छ, तेजसा सौम्य ! शुङ्गेन सन्मूलमन्विच्छ, सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" [ ] इति श्रुतिः । सर्वेषामपि विकाराणां सति कल्पितत्वं दर्शयति, सत्त्वं च न सामान्यं तत्र मानाभावात्, पदार्थमात्रसाधारण्यात् सत् सदिति प्रतीत्या द्रव्य-गुण-कर्ममात्रवृत्तिसत्त्वस्य स्वानुपपादकस्याकल्पनात्, वैपरीत्यस्यापि सुवचत्वात्, एकरूपप्रतीतेरेकरूपविषयनिर्वाह्यत्वेन सम्बन्धभेदस्य स्वरूपस्य च कल्पयितुमनुचितत्वात्, विषयस्थानानुगमेऽपि प्रतीत्यनुगमे जातिमात्रोच्छेदप्रसङ्गात्, तस्मादेकमेव सद् वस्तु स्वतः स्फुरणरूपं ज्ञाताज्ञातावस्थाभासकं स्वतादात्म्याध्यासेन सर्वत्र सद्व्यवहारोपपादकम्, सन् घट इति प्रतीत्या तावत् सद्व्यक्तिमात्राभिन्नत्वं घटे विषयीकृतम् न तु सत्तासमवायित्वम्, अभेदप्रतीतेर्भेदघटितसम्बन्धानिर्वाह्यत्वात्, एवं द्रव्यं सद् गुणः सन्नित्यादिप्रतीत्या सर्वाभिन्नत्वं सतः सिद्धम्, द्रव्यगुणभेदासिद्ध्या च न तेषु धर्मिषु सत्त्वं नाम धर्मः कल्प्यते, किं तु सति धर्मिणि द्रव्याद्यभिन्नत्वं लाघवात्, तच्च वास्तवं न सम्भवतीत्याध्यासिकमित्यन्यत्, तदुक्तं वार्तिककारैः—

"सत्तातोऽपि न भेदः स्याद् द्रव्यत्वादेः कुतोऽसतः ।
एकाकारा हि संवित्तिः, सद्द्रव्यं सद्गुणस्था ॥ १ ॥" इत्यादि,

सत्ताऽपि नासतो भेदिका तस्या अप्रसिद्धेः, द्रव्यत्वादिकं तु सद्धर्मत्वान्न सतो भेदकमित्यर्थः, अत एव 'घटाद् भिन्नः पटः' इत्यादिप्रतीतिरपि न भेदसाधिका, घट-पट-तद्भेदानां सदभेदेनैक्यात्, एवं यत्रैव न भेदग्रहस्तत्रैव लब्धपदा सती सदभेदप्रतीतिर्विजयते, तार्किकैः कालपदार्थस्य सर्वात्मकस्याप्युपगमात् तेनैव सर्वव्यवहारोपपत्तौ तदतिरिक्तपदार्थकल्पने मानाभावात्, तस्यैव सर्वानुस्यूतस्य सद्रूपेण स्फुरणरूपेण च सर्वतादात्म्येन प्रतीत्युपपत्तेः, स्फुरणस्यापि सर्वानुस्यूतत्वेनैकत्वान्नित्यत्वं विस्तरेणाग्रिमश्लोके वक्ष्यते, तथा च यथा कस्मिंश्चिद् देशे काले वा घटभिन्नस्य पटादेर्न देशान्तरे कालान्तरे वा घटत्वम्, एवं कस्मिंश्चिद् देशे काले वा घटस्यान्यत्राघटत्वं शक्रेणापि न शक्यते संपादयितुम्, पदार्थस्वभावभङ्गायोगात्, एवं कस्मिंश्चिद् देशे काले वाऽसतो देशान्तरे कालान्तरे वा सत्त्वं कस्मिंश्चिद् देशे काले वा सतोऽन्यत्रासत्त्वं न शक्यते सम्पादयितुं, युक्तिसामान्यात्, अत उभयोर्नियतरूपत्वमेव द्रष्टव्यमित्यद्वैतसिद्धौ विस्तरः, अतः सदेव वस्तु मायाकल्पितासन्निवृत्त्याऽमृतत्वाय कल्पते, सन्मात्रदृष्ट्या च तितिक्षाऽप्युपपद्यत इति भावः" इति ।

उपदर्शितव्याख्यानद्वयं द्वैतवादविद्वेषमूलककदाग्रहविलसितमतोऽनादेयमेव समदृष्टिभिः, किन्तु यथा श्रुतशब्दसमभिव्याहारमात्रोपनिपात्यक्लिष्टमित्थं व्याख्यानं युक्तम्, तद्यथा—

असतः अलीकस्य शशशृङ्गादेः, **भावः** उत्पादः, **न विद्यते** न सम्भवति, असतोऽप्युत्पादे पृथिव्यादिवत् सत्त्वप्रसक्त्याऽसत्त्वं व्याहन्येत, **सतः** पृथिव्यादेर्विद्यमानस्य वस्तुनः, **अभावः** अविद्यमानत्वम्, **न** नास्ति, सतोऽप्यभावे शशशृङ्गादिवदसत्त्वं प्रसज्येत, **उभयोरप्यनयोः** सदसतोरुभयोरपि, **अन्तो** नियमः-यद् यत्रोत्पद्यते तत् तत्र सत्, यच्च यत्र सत् तत् तन्निष्ठाभावाप्रतियोगीत्याकारकः, **दृष्टः**-प्रमितः, प्रमा च दर्शिताकारकं ज्ञानम्, कैः प्रमित इत्यपेक्षायामाह-**तत्त्वदर्शिभिरिति**-परमार्थग्राहिभिरित्यर्थः ॥ ७६ ॥

असतो भावो न भवति सतोऽभावो न भवतीत्यमुमर्थं परेऽपि कीर्तयन्तीत्युपदर्शयति परवचनम्—

नाभावो भावमाप्नोति, शशशृङ्गे तथाऽगतेः ।
भावो नाभावमेतीह, दीपश्चेन्न स सर्वथा ॥ ७७ ॥

नाभावं इति । अभावः तुच्छः, **भावं** पारमार्थिकत्वम्, **नाप्नोति** न प्रतिपद्यते । कुत इत्थमवधारितमित्यपेक्षायामाह-**शशशृङ्गे तथाऽगतेरिति**-तुच्छे शशशृङ्गे भावत्वेन परिच्छेदाभावादित्यर्थः । यथाऽभावो न भावतां प्रतिपद्यते तथा भावोऽप्यभावतां नोपयातीत्याह-**भाव** इति-अतुच्छस्वभावः पारमार्थिकः, **इह** जगति, **अभावं** तुच्छस्वभावं **नैति** न प्राप्नोति । ननु पारमार्थिकोऽपि दीपोऽन्तेऽन्धकारो भवति, अन्धकारश्च प्रकृष्टमहदुद्भूतरूपवत्तेजोऽभावस्वरूपस्तुच्छ एवेत्याशङ्कते-**दीपश्चेदिति**-भावरूपो दीप आलोकाभावात्मकान्धकारस्वरूपतां प्रतिपद्यते इति चेदित्यर्थः । उत्तरयति-**न स सर्वथेति**। **स** दीपस्यान्धकारलक्षणपरिणामः, **सर्वथा** एकान्ततः, **न** प्रक्रमादभावरूप इति सर्वथाऽभावरूपो नेत्यर्थः, दीपरूपेण परिणतानां भास्वरपुद्गलानामेव तमोरूपेण परिणामाद् भास्वरपरिणामत्यागेऽपि द्रव्यत्वापरित्यागात् तमसो द्रव्यरूपतयैव स्याद्वादिभिरभ्युपगमादित्याशयः ।

अत्र शिष्यबुद्धिवैशद्यार्थं सोपस्कारं तमसो द्रव्यत्वव्यवस्थापकमुपाध्यायवचननिकुरम्बमुपदर्श्यते—

"तेजसोऽतिविनिवृत्तिरूपता, स्वीकृता तमसि या कणाशिना।
द्रव्यतां वयममी समीक्षिणस्तत्र पत्रमवलम्ब्य चक्ष्महे ॥" [ ]

तमो द्रव्यं रूपवत्त्वाद् घटवत्, अत्र पक्षस्य तमसः प्रसिद्धिः प्रत्यक्षादेव; न च रूपवत्त्वलक्षणस्य हेतोस्तत्रासिद्धिरिति वाच्यम्, सार्वजनीनतमोनीलमिति प्रत्यक्षप्रतीतित एव तमसि रूपवत्त्वप्रसिद्धिः, बाधकाभावेनोक्तप्रतीतेर्भ्रमत्वासम्भवात्; न च यत्रोद्भूतरूपवत्त्वं तत्रोद्भूतस्पर्शवत्त्वमिति व्याप्तेस्तमसि उद्भूतरूपवत्त्वे उद्भूतस्पर्शवत्त्वापत्तिस्तमसि रूपवत्त्वप्रतीतेर्बाधिका, इन्द्रनीलमणिप्रभासहचरितनीलभागे उद्भूतरूपवत्त्वमस्त्युद्भूतस्पर्शवत्त्वं च नास्तीति व्यभिचारान्नोक्तव्याप्तिरिति नाशङ्कनीयम्, स्मर्यमाणारोपेणैवेन्द्रनीलप्रभायां नीलधीसम्भवाद् गौरवादेवेन्द्रनीलप्रभासहचरितनीलभागस्याकल्पनेनोक्तव्यभिचाराभावात्, कुङ्कुमादिपूरितस्फटिकभाण्डे बहिरारोप्यमाणपीताश्रयेऽपि न व्यभिचारः, तत्रापि स्मर्यमाणारोपेणैव पीतधीनिर्वाहाद् बहिष्पीतद्रव्याकल्पनात्, बहिर्गन्धोपलब्धेस्तु वाय्वाकृष्टानुद्भूतरूपभागान्तरेणैवोपपत्तेरिति वाच्यम्, यत्रोद्भूतरूपवत्त्वं तत्रोद्भूतस्पर्शवत्त्वमिति व्याप्तौ मानाभावात्, प्रभायामुद्भूतभास्वरशुक्लरूपवत्त्वमस्ति न चोद्भूतस्पर्शवत्त्वं तत्र समस्तीति व्यभिचारणोक्तव्याप्तेरसम्भवाच्च;न च यत्र यत्रोद्भूतनीलरूपवत्त्वं तत्रोद्भूतस्पर्शवत्त्वमित्येव नियमः; प्रभायां चोद्भूतभास्वरशुक्लरूपवत्त्वमेव नोद्भूतनीलरूपवत्त्वमिति नोक्तनियमे तत्र व्यभिचारः, धूमे चोद्भूतनीलरूपवति उद्भूतस्पर्शवत्त्वमपि समस्त्येवेति न तत्र व्यभिचारः, धूमस्योद्भूतस्पर्शवत्त्वादेव चोद्भूतस्पर्शवद्धूमसंयोगाच्चक्षुषो जलनिपात इति वाच्यम्, अश्रुपातं प्रति चक्षुर्धूमसंयोगत्वेनैव हेतुत्वस्य कल्पनेन गौरवेणोद्भूतस्पर्शवद्धूमसंयोगत्वेन हेतुत्वाकल्पनाद् धूमे उद्भूतस्पर्शासिद्ध्या यत्रोद्भूतनीलरूपवत्त्वं तत्रोद्भूतस्पर्शवत्त्वमिति नियमस्य धूमे व्यभिचारतोऽसम्भवात्, त्रसरेणोश्चाक्षुषप्रत्यक्षं भवति न तु स्पार्शनमिति तदनुरोधेन तत्रोद्भूतरूपवत्त्वमुपेयते न तूद्भूतस्पर्शवत्त्वम्, तथा च नीलित्रसरेणावुद्भूतनीलरूपवत्युद्भूतस्पर्शाभावेन व्यभिचाराच्च; न चावयविन्यपाकजोद्भूतस्पर्शवत्त्वमवयवगतोद्भूतस्पर्शमन्तरा न सम्भवतीत्यवयविगतोद्भूतस्पर्शं प्रति अवयवगतोद्भूतस्पर्शः कारणम्, तथा च पाटितपटसूक्ष्मावयवे उद्भूतस्पर्शवत्पटपरम्परावयवत्वाद् यथोद्भूतस्पर्शवत्त्वानुमानं तथा नीलित्रसेरणावप्युद्भूतस्पर्शवदवयविपरम्परावयवत्वादुद्भूतस्पर्शवत्त्वानुमानं भविष्यतीति तत्राप्युद्भूतस्पर्शवत्त्वं समस्त्येवेति न व्यभिचार इति वाच्यम्, अनुद्भूतरूपस्योद्भूतरूप-

जनकताया इवानुद्भूतस्पर्शस्यापि निमित्तभेदसंसर्गेणोद्भूतस्पर्शजनकतासम्भवाद् दृष्टान्तासम्प्रतिपत्तेः, निमित्तभेदसंसर्गेणोद्भूतानुद्भूते भवत इत्युदयनाचार्यस्यापि सम्मतम्, तदुक्तं कुसुमाञ्जलौ–

"निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥ १ ॥" इति ।

अत्र पूर्वार्द्धाभिमतार्थस्फुटीकरणं तत्रैवेत्थम्–"उपनायकादृष्टविशेषसहाया हि परमाणवो द्रव्यविशेषमारभन्ते, तेषां विशेषादुद्भवविशेषाः, [उद्भूतानुद्भूतभेदाः] प्रादुर्भवन्ति, तथा स्वभावद्रवा अप्यापो निमित्तभेदप्रतिबद्धद्रवत्वाः कठिनं करकाद्यारभन्ते, इत्यादि स्वयमूहनीयम्" इति ।

इदं च वर्द्धमानोपाध्यायेनेत्थं व्याख्यातम्–"निमित्तभेदेति–यद्यप्युद्भूतानुद्भूतपरमाणुरूपादेव तत्कार्यमुद्भूतमनुद्भूतं चोत्पद्यत इति निमित्तभेदस्तत्राप्रयोजकः, तथाऽपि साक्षात्कारप्रयोजकतयोद्भूतत्वकल्पनात् परमाणुगुणेषु तन्नास्तीत्यदृष्टविशेषादेवानुद्भूतरूपादप्युद्भूतरूपं जायत इत्यभ्युपेयम्, न च याऽवयविरूपवृत्तिजातिः सा परमाणुरूपवृत्तिरिति व्याप्तिः, चित्रत्वजातौ व्यभिचारात्, 'उद्भवानुद्भवादयः' इत्यतद्गुणसंविज्ञानबहुव्रीहिणा कठिनकरकाविद्युदादीनां सङ्ग्रह इत्यप्याहुः, 'देवताः' इत्यत्राऽऽराधनीयतामासादयन्तीत्यध्याहार्यम्, उपनायकेति–परमाणुक्रियाजनकमदृष्टमित्यर्थः" इति ।

अपि च त्रसरेणावुद्भूतरूपवद् यद्युद्भूतस्पर्शोऽप्युपेयते तदा तत्स्पर्शस्य स्पार्शनप्रत्यक्षप्रसङ्गः, स्पर्शनप्रत्यक्षे महत्त्वविशेषः कारणम्, महत्त्वविशेषश्च त्रसरेणौ नास्तीति न तत्स्पर्शस्पार्शनमिति चेत्? न–एकत्वविशेस्य स्पार्शनप्रत्यक्षं प्रति कारणत्वमभ्युपगम्य तदभावान्न तत्स्पर्शस्पार्शनमित्यपि विनिगमनाविरहादापद्येत। आश्रयत्वाचाभावस्य द्रव्यान्यसत्त्वाचं प्रति प्रतिबन्धकत्वात् त्रसरेणुरूपाश्रयस्य त्वाचप्रत्यक्षाभावेन तदात्मकप्रतिबन्धकसद्भावान्न त्रसरेणुस्पर्शस्पार्शनम्, चतस्रेणुस्पार्शनानुरोधेन प्रतिबध्यकोटौ द्रव्यान्यत्वनिवेशः, घटादिगता सत्तादिजातिरेव परमाण्वादिगताऽपीति परमाण्वाद्यात्मकाश्रयत्वाचाभावस्य तत्र सत्त्वात् तत्त्वाचप्रत्यक्षानुपपत्तिः स्यादतः प्रतिबध्यकोटौ सत्त्वस्य प्रवेश इति चेत्? न–उद्भूतस्पर्शाभावस्यैव लाघवेन तत्स्पार्शनप्रतिबन्धकत्वेन त्र्यणुकस्पर्शस्यानुद्भूतत्वकल्पनया तत्स्पार्शनापत्त्यसम्भवात्, घट-पटसंयोगादीनां त्वाचप्रत्यक्षं भवति,

प्रभाघटसंयोगादीनां च त्वाचप्रत्यक्षं न भवति, उद्भूतत्वाऽनुद्भूतत्वे च विशेषगुणावेव कल्प्येते न सामान्यगुणाविति घट-पटसंयोगादितो घट-प्रभा-संयोगादीनां वैजात्यमभ्युपेत्य तद्रूपेण त्वाचप्रत्यक्षप्रतिबन्धकत्वकल्पनापेक्षयोक्तवैजात्यस्थाने त्वगग्राह्यत्वस्वभाव एव कल्पनीयः, येषां त्वाचप्रत्यक्षं न भवति तेषु त्वगग्राह्यत्वस्वभाव इति तत एव त्रसरेणुस्पर्शस्यापि न स्पार्शनमिति न तदनुरोधेनोक्तप्रतिबध्यप्रतिबन्धकभावकल्पनमपि न्याय्यम् ।

साम्प्रदायिकास्तु रत्नप्रभाचार्यादयः "यत्रोद्भूतरूपवत्त्वं तत्रोद्भूतस्पर्शवत्त्वमिति नियमोऽपि न नः प्रतिकूलः, यतस्तमसि पवनाभिव्यज्यमानः शीतस्पर्शोऽप्यनुभूयत एव, अत उद्भूतस्पर्शवत्त्वमपि तत्र" इत्यामनन्ति ।

अथ समवायसम्बधेन नीलत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन पृथिवीत्वावच्छिन्नस्य कारणत्वमिति तमसि नीलरूपवत्त्वे पृथिवीत्वमापद्येतेति चेत्? न—स्याद्वादिनामस्माकं मते स्वभावविशेषस्यैव विशिष्टनीलनियामकत्वात्, कथमन्यथा पृथिवीत्वाविशेषेऽपि क्वचिन्नीलं क्वचिन्नीलतरं क्वचिन्नीलतमादीत्येवं नीलविशेषसम्भवः, कणादमतानुयायिनोऽपि समवायसम्बन्धेन नीलं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलं कारणमित्यवयवनीलादवयविनीलोत्पत्तिसंभवेन समवायसम्बन्धावच्छिन्ननीलत्वावच्छिन्नकार्यतानिरूपितताद्रात्म्यसम्बन्धावच्छिन्नपृथिवीत्वावच्छिन्नकारणत्वरूपस्य पृथिव्या नीलसमवायिकारणत्वस्याभावात्; न च कपालाद्यवयवगतनीलं स्वसमवायिसमवेतत्वसम्बन्धेन यथा घटाद्यवयविनि वर्तते तथा कपालादिगतनीलेऽपि वर्तत इति कपालादिनीलेऽप्युक्तकारणबलान्नीलोत्पत्तिः स्यादिति वाच्यम्, समवायसम्बन्धेन जन्यसत्त्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यत्वावच्छिन्नं कारणमिति समवायसम्बन्धावच्छिन्नजन्यसत्त्वावच्छिन्नकार्यतानिरूपितताद्रात्म्यसम्बन्धावच्छिन्नकारणतावच्छेदकस्य द्रव्यत्वस्याभावादेव जन्यसतो नीलस्य नीले उत्पत्त्यापत्त्यसम्भवात्; नन्वपाकजनीलस्योक्तदिशा पृथिवीत्वेन कारणत्वानभ्युपगमतोऽपि अवयविन्युत्पत्तिनिर्वाहेऽपि पाकजनीलोत्पत्त्यनुरोधेन पृथिवीत्वेन कारणत्वमवश्यमभ्युपेयम्, अन्यथा नीलजनकविजातीयतेजस्संयोगलक्षणपाकस्य समवायेन पृथिव्यामिव समवायेन जलादावपि सम्भवेन तत्रापि नीलोत्पत्तिः स्यादिति चेत्? न—व्याप्यधर्मस्य कार्यतावच्छेदकत्वे सम्भवति व्यापकधर्मस्यान्यथासिद्धत्वान्न कार्यतावच्छेदकत्वमिति

तादात्म्यसम्बन्धावच्छिन्नपृथिवीत्वावच्छिन्नकारणतानिरूपितसमवायसम्बन्धावच्छिन्नपाकजनीलनिष्ठकार्यतावच्छेदकत्वस्य नीलत्वावान्तरजातिविशेषस्यैव कल्पयितुमुचितत्वेन तस्य वैजात्यस्य तमोनीलेऽभावेन तस्य पृथिवीं विनाऽप्युत्पत्तिसंभवेन तदुत्पत्त्या तमसि पृथिवीत्वापत्त्यसंभवात्।

ननु समवायेन जन्यद्रव्यत्वावच्छिन्नं प्रति तादात्म्येन स्पर्शवत्त्वावच्छिन्नस्य कारणत्वात् तमसो जन्यद्रव्यत्वे स्पर्शवदवयवारभ्यत्वं स्यादिति चेत्? न-तमोऽवयवानां स्पर्शवत्त्वेन तत्र स्पर्शवदवयवारभ्यत्वस्येष्टत्वात्, यत्र द्रव्यजनकातिशयस्तत्र द्रव्यमुत्पद्यत इति नियमेन तमोऽवयवानां स्पर्शशून्यत्वेऽपि वा तमोलक्षणद्रव्यजनकशक्त्याख्यातिशयवत्त्वात् तेषु तमोद्रव्योत्पत्तिसम्भवाच्च, अन्त्यावयविनि घटादौ स्पर्शवत्त्वस्य सत्त्वेन तत्र द्रव्योत्पत्तेरभावेन द्रव्यनिष्ठकार्यतानिरूपितकारणताया अधिकदेशवृत्तिना स्पर्शवत्त्वेनावच्छेदासम्भवादन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वमिति नियमस्य त्वयाऽप्युररीकृतत्वेन समवायेन द्रव्यत्वावच्छिन्नं प्रति तादात्म्येन स्पर्शवत्त्वेन कारणत्वस्य कल्पयितुमशक्यत्वात्; न चान्त्यावयविभिन्नत्वे सति स्पर्शवत्त्वं द्रव्यजनकताऽवच्छेदकम्, तत्र न व्यभिचार इति वाच्यम्, द्रव्यसमवायिकारणत्वमेवावयवत्वम्, अवयवभिन्नत्वे सत्यवयवित्वमेवान्त्यावयवित्वम्, द्रव्यसमवायिकारणभिन्नभिन्नत्वं द्रव्यसमवायिकारणत्वमेव पर्यवस्यति, स्पर्शवत्त्वनिवेशसाफल्याय द्रव्यसमवायिकारणभिन्नत्वेनावयविनमुपादाय तद्भिन्नत्वं किमिति निवेश्यम्, तथा च द्रव्यसमवायिकारणं स्पर्शवदेव भवतः सम्मतमिति स्पर्शवत्त्वमव्यावर्तकत्वान्न निवेश्यम्, एवं च द्रव्यसमवायिकारणत्वेन द्रव्यसमवायिकारणत्वं तत्र चाऽऽत्माऽऽश्रयात्; ननूक्तदोषसंभवादन्त्यावयविभिन्नत्वं कारणकोटौ न निवेश्यते, किन्तु समवायेन द्रव्यत्वावच्छिन्नं प्रति तादात्म्येन स्पर्शवत्त्वेनैव कारणत्वम्, जन्यद्रव्यत्वावच्छिन्नं प्रति अन्त्यावयवित्वेन प्रतिबन्धकत्वादन्त्यावयविनि द्रव्यानुत्पत्तेर्न दोष इति चेत्? न-उक्तरीत्या दोषापाकरणेऽपि नव्यैश्चक्षुरादिष्वनुद्भूतस्पर्शानभ्युपगमेन तदवयवेष्वपि स्पर्शस्य तन्मतेऽभावेऽपि निःस्पर्शैरेव तैश्चक्षुरादिजन्यद्रव्यस्योत्पादेन व्यभिचारेण जन्यद्रव्यत्वावच्छिन्नं प्रति स्पर्शवत्त्वेन कारणत्वासम्भवात्, चक्षुरादयो वा नान्त्यावयविनः, दूरदेशव्यवस्थितद्रव्यग्राहयर्थमधिष्ठानस्थितस्याल्पपरिणामस्यापि चक्षुषो बाह्यालोकसहकारेण बहिर्निर्गतस्य महच्चक्षुरारम्भकत्वस्योररीकारेण नव्यमते स्पर्शरहितस्यैव तस्य जन्यद्रव्यारम्भकत्वेन व्यभिचारादुक्तहेतुत्वासम्भवात्; न

च द्रव्यारम्भकत्वान्यथानुपपत्त्या चक्षुराद्यवयवेषु चक्षुरादिषु चानुद्भूतस्पर्शोऽङ्गीकर्तव्य इति वाच्यम्, अनन्तानुद्भूतस्पर्शकल्पनामपेक्ष्य येषु येषु जन्यद्रव्योत्पत्तिस्तेषु जन्यद्रव्यजनकतावच्छेदकवैजात्यकल्पनाया एवोचितत्वात्, न च समवायसम्बन्धेन जन्यद्रव्यं प्रति तादात्म्यसम्बन्धेन मूर्तत्वेन मूर्तस्य कारणत्वमस्त्विति वाच्यम्, मूर्तत्वस्य मनस्यपि सत्त्वेन तत्र जन्यद्रव्यानुत्पत्त्या व्यभिचारात्; न च मनसि तादात्म्येन मूर्तरूपकारणस्य भावेऽपि विजातीयसंयोगरूपहेत्वन्तराभावादेव द्रव्यान्तरानुत्पत्तिरिति वाच्यम्, यत्क्रियया घटे मनसि चानारम्भकः संयोगो जनितस्तत्क्रियाजन्यताऽवच्छेदाय संयोगे वैजात्यस्यावश्यकत्वात्, उक्तवैजात्यस्य क्वचिन्नोदनाख्यसंयोगे क्वचिच्चाभिघाताख्यसंयोगे सत्त्वमिति नोदनत्वादिना साङ्कर्यं स्यादिति तत्परिहाराय निरुक्तवैजात्यव्याप्यं नोदनत्वमन्यदमन्यच्च तदसमानाधिकरणं नोदनत्वं तथा निरुक्तवैजात्यव्याप्यमभिघातत्वमन्यदन्यच्च तदसमानाधिकरणमभिघातत्वमित्येवं नानानोदनत्वाऽभिघातत्वानां कल्पनीयत्वात्; न च मनोऽन्यमूर्तत्वेन जन्यद्रव्यं प्रति कारणत्वम्, घटादौ जन्यद्रव्योत्पत्तेर्जन्यद्रव्यत्वावच्छिन्नं प्रत्यन्त्यावयवित्वेन प्रतिबन्धकत्वकल्पनया वारणेऽपि गौरवात्, एवं च जन्यद्रव्यजनकताऽवच्छेदकतया जातिकल्पने, मनसि द्रव्यानुत्पत्तये द्रव्यजनकविजातीयसंयोगकल्पने द्रव्यानारम्भकसंयोगे तत्क्रियाजन्यतावच्छेदकवैजात्यकल्पने, तत्साङ्कर्यपरिहाराय निरुक्तवैजात्यव्याप्यनोदनत्वादिकल्पने, तत्तद्वैजात्यावच्छिन्नं प्रति कारणस्य कल्पने च गौरवाद् वरं शक्त्याख्योऽतिशय एवानतिप्रसक्तो द्रव्यजनकः कल्प्यते, तस्यातिशयस्य तमोऽवयवेऽपि भावात् ततो निःस्पर्शेऽपि तमोऽवयवे तमस उत्पत्तिर्निराबाधेति सूक्ष्मं विभावनीयम्।

अथ तमसो द्रव्यत्वे आलोकनिरपेक्षचक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वं न स्यात्, द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति समवायसम्बन्धेनालोकसंयोगस्य हेतुत्वात् तमसि चालोकसंयोगस्याभावात्, एकत्रावस्थितयोः संयोगो भवति, आलोकतमसोश्च विरोधेनैकत्र स्थानायोगात्; न च स्वस्मिन्न स्वप्रतियोगिकसंयोगः, संयोगो हि द्वयोर्भवति नैकस्यैवेत्यालोकान्तरासमवधाने आलोके आलोकसंयोगो नास्ति, अथ च तस्य द्रव्यस्य सतश्चाक्षुषप्रत्यक्षं भवतीति तत्र व्यभिचारेण नोक्तकार्यकारणभावसम्भव इति वाच्यम्, यत्क्रियया यः संयोग उपजायते तत्प्रतियोगिकत्वं तत्संयोगस्येत्यालोकक्रियया ऽऽलोकगगनसंयोगो

भवतीत्यालोकगगनसंयोग आलोकप्रतियोगिकः, स चालोके समस्तीति तत्रापि व्यभिचाराप्रसक्तेः; न च तेजोमात्रमालोक इति सुवर्णमपि तेजोरूपत्वादालोकस्तेन सह यो गगनसंयोगः सोऽप्यालोकसंयोगस्तस्य बहलतमे तमसि विद्यमाने सुवर्णे सत्त्वाच्चक्षुःसंयोगस्यापि तत्र भावाच्चाक्षुषप्रत्यक्षं स्यादिति वाच्यम्, महद्दुद्भूतानभिभूतरूपवदालोकसंयोगत्वेनालोकसंयोगस्य द्रव्यचाक्षुषं प्रति कारणत्वात्, सुवर्णस्याभिभूतरूपवत्त्वेन तत्संयोगस्य निरुक्तकारणावच्छेदकधर्मानाक्रान्तत्वात्; ननु यत्र घटे पृष्ठावच्छेदेनाऽऽलोकसंयोगश्चक्षुस्त्वग्रावच्छेदेन तस्य घटस्य सम्भृतसामग्रीकत्वेन चाक्षुषापत्तिरिति चेत्? न—चक्षुस्संयोगावच्छेदकावच्छिन्नाऽऽलोकसंयोगत्वेन चाक्षुषं प्रति कारणत्वे उक्तदोषाभावात्; न च चक्षुस्संयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन, आलोकसंयोगावच्छेदकावच्छिन्नचक्षुस्संयोगत्वेन वा चाक्षुषं प्रति कारणत्वमित्यत्र विनिगमनाविरह इति वाच्यम्, उद्द्योतस्थपुरुषस्यान्धकारस्थवस्तुसाक्षात्कारानुदयस्य विनिगमकत्वात्; तत्रालोकसंयोगावच्छेदकावच्छिन्नचक्षुस्संयोगस्य सत्त्वात्, तस्य चक्षुस्संयोगस्य यथाऽऽलोकसंयोगावच्छेदकावच्छिन्नत्वं तदाश्रयस्य चक्षुष आलोकदेशेऽवस्थानात्, तथा आलोकसंयोगानवच्छेदकावच्छिन्नत्वमपि, तदाश्रयस्य चक्षुष आलोकविरहितेऽन्धकारस्थवस्तुदेशेऽप्यवस्थितेरत आलोकसंयोगानवच्छेदकानवच्छिन्नचक्षुस्संयोगत्वेन हेतुत्वे उद्द्योतस्थपुरुषचक्षुषोऽन्धकारस्थवस्तुना संयोगस्य निरुक्तकारणताऽवच्छेदकधर्मानाक्रान्तत्वान्न ततोऽन्धकारस्थवस्तुसाक्षात्कार इति तदनुदय उपपद्यत इति नाशङ्क्यम्, गौरवेण तथा हेतुत्वासम्भवात्, अन्धकारस्थस्य पुंस उद्द्योतस्थवस्तुनो ग्रहणं भवति तस्य निरुक्तहेतुत्वाभ्युपगमेऽभावापत्तेः, अन्धकारस्थपुरुषचक्षुष उद्द्योतस्थवस्तुना संयोगस्याऽऽलोकसंयोगानवच्छेदकान्धकारस्थदेशावच्छिन्नत्वात्, तदाश्रयस्य चक्षुषोऽन्धकारस्थदेशेऽप्यवस्थितेः; अत एव 'समवायेनाऽऽलोकाभावान्यलौकिकचाक्षुषं प्रति स्वावच्छेदकावच्छिन्नसंयोगवच्चक्षुस्संयुक्तमनःप्रतियोगिकविजातीयसंयोगसम्बन्धेनाऽऽलोकसंयोगस्य हेतुत्वम्, कार्यतावच्छेदककोटावालोकाभावान्यत्वनिवेशात् स्वावच्छेदकेत्यादिसम्बन्धेनाऽऽलोकसंयोगस्याऽऽत्मन्यभाव एव समवायेनाऽऽलोकाभावविषयकलौकिकचाक्षुषस्योत्पादेन व्यभिचारस्य नावकाशः, लौकिकत्वनिवेशादात्मनि समवायेनाऽऽलोकाभावान्यविषयकालौकिकसामान्यलक्षणादिप्रत्यासत्तिजन्यचाक्षुषस्य स्वावच्छेदकावच्छिन्नेत्यादिसम्बन्धेनालोकसंयोगाभावे भावेऽपि न व्यभि-

चारः, विभोरात्मन आलोकेनापि समं संयोगोऽस्ति, स च संयोगः समवायेनात्मनि वर्तते, किन्तु स न कारणम्, किन्तु यस्य द्रव्यस्य चक्षुषा प्रत्यक्षं भवति तेन द्रव्येण सममालोकसंयोगः कारणम्, स च साक्षात्सम्बन्धेनाऽऽत्मनि वर्तत इति स्वावच्छेदकेत्यादिपरम्परासम्बन्धस्य कारणतावच्छेदकसम्बन्धतयोपादानम्, मनस्संयोगोऽप्यात्मनि सर्वदैव वर्तत इति तथाभूतसंयोगसम्बन्धेनाऽऽलोकसंयोगस्य न कारणत्वमिति परम्परासम्बन्धघटकतया मनःप्रतियोगिकविजातीयसंयोगस्योपादानम्' इत्यपि न निरवद्यम्, सम्बन्धगौरवात्, किञ्चिदवयवावच्छेदेनाऽऽलोकसंयुक्तेनैव चक्षुषाऽन्धकारवद्भित्तिसंयोगे वस्तुग्रहणप्रसङ्गाच्च; विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे यद्विषयस्य प्रत्यक्षं तत्रैव समवायेन सन् आलोकसंयोगः कारणमित्यन्धकारस्थभित्त्यादिविषयेण सममालोकसंयोगाभावात् तत्प्रत्यक्षापत्तिर्न संभवति, आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे तु निरुक्तसम्बन्धेन येन केनापि सममालोकसंयोगस्याऽऽत्मनि सत्तया कारणसम्पत्तेरालोकासंयुक्तस्याप्यन्धकारस्थभित्त्यादिवस्तुनश्चक्षुस्संयुक्तस्य चाक्षुषप्रत्यक्षं स्यादतो विषयनिष्ठप्रत्यासत्त्यैव द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यालोकसंयोगत्वेन हेतुत्वमिति तमसो द्रव्यत्वे आलोकनिरपेक्षचक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वं न स्यात्; [इति पूर्वपक्षिणः] इति चेत् ?

न–अलोकं नाऽपि रात्रिञ्चराणां घूकादीनां द्रव्यचाक्षुषोदयाद् व्यभिचारेण द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यालोकसंयोगत्वेन हेतुत्वासम्भवात्; न च चैत्रादिचाक्षुष एवाऽऽलोकसंयोगत्वेन हेतुत्वान्न व्यभिचार इति वाच्यम्, तथाऽप्यञ्जनादिसंस्कृतचक्षुषां तस्करादीनां रात्रावालोकमन्तरेणैवान्धकारस्थितधनादिचाक्षुषप्रत्यक्षोदयाद् व्यभिचारात्; न चाऽऽलोकसंयोगस्याञ्जनाद्यसंस्कृतचैत्रादिचक्षुर्जन्यचाक्षुषे कारणत्वम्, अञ्जनादिसंस्कृतचक्षुर्जन्यप्रत्यक्षस्योक्तकार्यताऽवच्छेदकानाक्रान्तत्वेनाऽऽलोकसंयोगं विना भावेऽपि न व्यभिचारः, अञ्जनादीनां चाञ्जनादिजन्यचाक्षुषे पृथगेव हेतुत्वम्, व्यभिचारेण च सामान्यतश्चाक्षुषत्वावच्छिन्नं प्रति नाञ्जनादीनां नाप्यालोकसंयोगस्य हेतुत्वमिति वाच्यम्, अननुगमात्, प्रत्यक्षत्वव्याप्यजातेश्चाक्षुषत्वस्य जन्यमात्रवर्तिनः किञ्चिद्धर्मावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वस्य नियमेन तदवच्छिन्नं प्रति चक्षुरादीनां कारणत्वस्याऽऽवश्यकतयाऽऽलोकसंयोगाञ्जनादिसंस्काराभावेऽपि तद्बलाच्चाक्षुषसामान्योत्पत्त्यापत्तेश्चेत्यत आलोकाद्युद्बोध्यक्षयोपशमरूपयोग्यताया एवानुगत

त्वेन द्रव्यचाक्षुषत्वावच्छिन्नं प्रति हेतुत्वौचित्यात्; किञ्च चक्षुस्संयोगावच्छेदकावच्छिन्नालोकसंयोगस्य द्रव्यचाक्षुषं प्रति हेतुत्वे कारणशरीराविष्टस्य चक्षुषः कारणत्वावच्छेदकत्वेनान्यथासिद्धत्वादहेतुत्वं स्यात्; अपि च चक्षुस्संयोगावच्छेदकावच्छिन्नालोकसंयोगत्वापेक्षयाऽऽलोकत्वस्य लघुत्वेन तस्यैव द्रव्यचाक्षुषत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वं कल्पयितुमुचितम्, चक्षुस्संयोगावच्छिन्नसंयोगस्य कारणतावच्छेदकसम्बन्धत्वकल्पनया चात्राप्यतिप्रसङ्गवारणं सम्भवति, अवच्छेदकधर्मगौरवापेक्षयाऽवच्छेदकसम्बन्धगौरवस्याभ्यर्हितत्वात्, न च चक्षुस्संयोगावच्छिन्नसंयोगसम्बन्धेनाऽऽलोकस्यालोकवृत्तित्वमित्यालोकात्मकद्रव्यचाक्षुषस्य निरुक्तसम्बधेनालोकमन्तरेणापि भावाद् व्यभिचारेण न सामान्यतो द्रव्यचाक्षुषत्वावच्छिन्नं प्रति निरुक्तसम्बन्धेनाऽऽलोकस्य हेतुत्वम्, किन्तु सुवर्णभिन्नं यत् तेजस्तद्भिन्नद्रव्यचाक्षुषं प्रति चक्षुस्संयोगावच्छिन्नसंयोगसम्बन्धेनालोकस्य हेतुत्वं वाच्यम्, सामान्यतस्तेजोभिन्नद्रव्यचाक्षुषं प्रति तथाहेतुत्वे सुवर्णस्य तेजस्त्वेन तत्प्रत्यक्षस्य निरुक्तकार्यतावच्छेदकधर्मानाक्रान्तत्वादालोकं विनाऽपि तत्प्रत्यक्षमापद्येत, अतः सुवर्णभिन्नत्वं तेजसो विशेषणम्, तथा च लाघवात् तमोऽन्यद्रव्यचाक्षुषं प्रति तमसः प्रतिबन्धकत्वमेव न्याय्यम्, महदुद्भूतानभिभूतरूपवदालोकत्वापेक्षया तमोऽभावत्वेन हेतुत्वे लाघवाच्च, एवं च तमसो द्रव्यत्वेऽपि तच्चाक्षुषप्रत्यक्षस्य निरुक्तकार्यतावच्छेदकधर्मानाक्रान्ततया तमोऽभावाभावेऽपि तत् स्यादेवेति ।

किञ्चान्वयव्यतिरेकाभ्यामभावज्ञाने प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्यान्वय-व्यतिरेकाभ्यां हेतुत्वस्यावधारितत्वेन तमसस्तेजोविशेषाभावरूपत्वे तेजोविशेषरूपप्रतियोगिज्ञानं विना तज्ज्ञानं न स्यात्; ननु आलोकं जानतामेव तमःप्रत्यक्षस्वीकारेण तेजोज्ञानं विना तमोज्ञानं न स्यादितीष्टापत्तिरेव, तदाहुरुदयनाचार्याः-' गिरिदरीविवरवर्तिनो यदि योगिनो न ते तिमिरावलोकिनः, तिमिरावलोकिनश्चेद् नूनं स्मृताऽऽलोकाः" [ ] इति, इति चेत्? न-तेजसोऽप्रतिसन्धानेऽपि तमोऽनुभवस्य प्रत्यक्षसिद्धत्वात्। अथाभावज्ञानसामान्यं प्रति अभावप्रत्यक्षसामान्यं प्रति वा न प्रतियोगिज्ञानं कारणम्, प्रतियोगिनो घटपटादेरग्रहेऽपि सर्वं प्रमेयं सर्वं वाच्यं सर्वं ज्ञेयमित्येवं प्रमेयत्व-वाच्यत्व-ज्ञेयत्वादिनाऽभावज्ञानस्याभावत्वलक्षणसामान्यलक्षणालौकिकप्रत्यासत्त्या निखिलाभावविषयकालौकिकप्रत्यक्षस्य चोत्पादेन व्यतिरेकव्यभिचारात्; तदभावलौकिकप्रत्यक्षे तज्ज्ञानं हेतु-

रिति विशिष्य कार्यकारणभावोऽप्यभावज्ञान-प्रतियोगिज्ञानयोर्न सम्भवति, अत्यन्ताभावस्य प्रतियोगि-तत्प्रागभाव-तद्ध्वंसैतत्त्रितयप्रतियोगिकत्वमित्यभ्युपगन्तॄणां प्राचीननैयायिकानां मते घटात्यन्ताभावस्य घट-तत्प्रागभाव-तद्ध्वंसप्रतियोगिकत्वेऽपि तत्त्रितयाग्रहे घटात्मकप्रतियोगिमात्रग्रहेऽपि घटात्यन्ताभावलौकिकप्रत्यक्षोदयात्, समनियतानामभावानामैक्यमित्यभ्युपगच्छतां नव्यनैयायिकानां मते समनियतैकत्व-परिणामाद्यभावानामैक्यमिति तत्रैकत्वाभावस्य परिमाणादिरपि प्रतियोगीति प्रतियोगिनः परिमाणादेरग्रहेऽप्येकत्वमात्रग्रहालौकिकप्रत्यक्षोदयाच्च; अथ तदभावलौकिकप्रत्यक्षे तदभावयत्किञ्चित्प्रतियोगिज्ञानत्वेन हेतुत्वान्नोक्तव्यभिचार इति चेत्? न-इत्थं विशिष्य हेतुत्वे मानाभावात्, वह्न्यादिज्ञानशून्यस्यापि पुंसः सन्निकृष्टे ह्रदादावन्तत इदन्त्वादिनाऽपि वह्न्याद्यविशेषिततदभावलौकिकप्रत्यक्षस्येष्टत्वात्; नन्वत्र वह्निर्नास्तीत्येवं वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्निविशिष्टाभावलौकिकप्रत्यक्षं वह्निज्ञानं विना न भवतीति वह्न्यात्मकप्रतियोगिविशेषिताभावप्रत्यक्षं प्रति वह्न्यात्मकप्रतियोगिज्ञानं कारणम्, एवमन्यस्याप्यभावस्य प्रतियोगिविशेषितस्य प्रत्यक्षं प्रति तत्प्रतियोगिज्ञानं कारणमिति चेत्? न-विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणतया तत एव वह्निर्नास्तीति प्रत्यक्षस्य वह्नित्वविशिष्टवैशिष्ट्यावगाहिनो विशेषणतावच्छेदकवह्नित्वप्रकारकज्ञानसाध्यत्वसम्भवात् स्वातन्त्र्येणाभावलौकिकप्रत्यक्षं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानत्वेन कारणत्वाकल्पनात्; तमसस्तेजोऽभावरूपत्वेऽपि तेजोविशेषिताभावरूपत्वेन तत्प्रत्यक्षस्य तेजोज्ञानं विनाऽसम्भवेऽपि तदविशेषितरूपेण तत्प्रत्यक्षस्य तेजोज्ञानं विनाऽप्यभ्युपगमे दोषाभावादिति चेत्? न-प्रतियोगिज्ञानस्याभावप्रत्यक्षं प्रति कारणत्वाभावे प्रतियोगिज्ञानं विना प्रतियोगिविशेषिताभावज्ञानस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोगिवैशिष्ट्यावगाहिनो विशिष्टवैशिष्ट्यावगाहिज्ञानकारणविशेषणतावच्छेदकप्रकारकज्ञानाभावादनुत्पादेऽपि प्रतियोग्यविशेषिताभावप्रत्यक्षं 'न' इत्याकारकमापद्येत; न चाभावज्ञानमभावत्वप्रकारकमिति विशिष्टज्ञानरूपस्य तस्य विशेषणीभूताभावत्वज्ञानसाध्यत्वेनाभावस्येदन्त्वेनापि रूपेण पूर्वमग्रहादापादकाभावादेव न 'न' इत्याकारकस्याभावप्रत्यक्षस्यापत्तिसम्भव इति वाच्यम्, प्रथममभावाऽभावत्वयोर्निर्विकल्पके सति तदात्मकविशेषणज्ञानरूपकारणबलादभाव इत्याकारकप्रत्यक्षस्यापत्तेर्दुर्वारत्वात्; न चाभावत्वमात्रेणाभावप्रत्यक्षस्येष्टत्वम्, 'शून्य-

मिदं दृश्यते' इत्यादिप्रत्ययात्, शून्यत्वस्याभावत्वेन रूपेणाभाववत्त्वरूपत्वात्, इत्थमेवाभावत्वस्य भावभेदस्य पिशाचादिभेदवद् योग्यस्य घटो नास्तीत्यादौ स्वरूपतो भानमपि प्राचां सम्भवदुक्तिकम्, अभावप्रत्यक्षस्य प्रतियोग्यविशेषिताभावविषयकस्याभाव इत्येवमुल्लेखो भवति, 'न' इत्येवमुल्लेखस्तु न भवति, तत्र नञुल्लेखस्य प्रतियोगिवाचकपदनियतत्वं प्रयोजकमिति प्रतियोगिवाचकपदसमवधाने सत्येव नञुल्लेखो नान्यथेति वाच्यम्, अन्धकारे विद्यमाने वह्न्यभावादौ यथा शून्यमिदमिति प्रत्ययो भवति तथा ह्रदादावपि विद्यमाने वह्न्यभावादौ शून्यमिदमिति प्रत्ययापत्तेः; अभावप्रत्यक्षे योग्यधर्मावच्छिन्नज्ञानत्वेन हेतुत्वान्नायं दोष इति मन्दम्, योग्यधर्माणामननुगतत्वात्, प्रत्येकं योग्यतत्तद्धर्मावच्छिन्नज्ञानत्वेनाभावत्वप्रत्यक्षं प्रति कारणत्वस्य व्यभिचारेणासम्भवात्, घटत्व-पटत्वाद्यन्यतमत्वेन योग्यधर्मानुगमस्य घटत्व पटत्वाद्यन्यतमधर्मावच्छिन्नज्ञानत्वेन कारणत्वस्य व्यभिचाराभावेन सम्भवेऽपि अन्यतमत्वस्य भेदकूटावच्छिन्नप्रतियोगिताकभेदरूपस्य दुर्ज्ञेयकूटत्वघटितत्वेन दुर्ज्ञेयतया तद्रूपेण कारणत्वस्यापि दुर्ज्ञेयत्वात्, कूटत्वस्यैकविशिष्टापररूपत्वेन तत्र विशेष्यविशेषणभावे विनिगमनाविरहेण विशिष्टस्वरूपस्यानेकत्वप्रसक्त्या तद्घटितस्य निरुक्तकारणतावच्छेदकधर्मस्यानेकत्वेनावच्छेदकभेदेनावच्छेद्यकारणताभेदस्यानन्तकार्यकारणभावप्रसक्त्या गौरवात्, पिशाचत्वाद्ययोग्यधर्मावच्छिन्नस्य ग्रहेऽपि पिशाचो नायमित्येवं पिशाचाद्यतीन्द्रियपदार्थभेदात्मकाभावप्रत्यक्षस्योत्पादेन व्यभिचारेण योग्यधर्मावच्छिन्नज्ञानत्वेन हेतुत्वासम्भवाच्च ।

अथ प्रत्यक्षमात्रे इन्द्रियसन्निकर्षस्य कारणत्वेनेन्द्रियसन्निकर्षं विना नाभावप्रत्यक्षम्, तथा च 'न' इत्याकारकाभावप्रत्यक्षवारणायेन्द्रियसम्बद्धविशेषणताया एव प्रतियोगिविशेषिताभावप्रत्यक्षहेतुत्वम्, न चेन्द्रियस्य चक्षुस्त्वगादिभेदभिन्नत्वेन तदनुगमकस्य शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वरूपस्येन्द्रियत्वस्य गुरुतरस्य प्रवेशो न सम्भवतीति सामान्यतस्तथा कार्यकारणभावासम्भवात् तत्तदिन्द्रिययोग्यप्रतियोगिविशेषिताभावप्रत्यक्षं प्रति तत्तदिन्द्रियविशेषणताया हेतुत्वे गौरवात् पृथक् प्रतियोगिधीहेतुतैव युक्ता; न च प्रतियोगिविशेषिताभावप्रत्यक्ष प्रति प्रतियोगिज्ञानस्य कारणत्वेऽपि प्रतियोगिज्ञानसत्त्वेऽपीन्द्रियसन्निर्षबलान्नेत्याकारकप्रत्यक्षापत्तिरिति वाच्यम्, उपस्थितस्य प्रतियोगिनोऽभावे वैशिष्ट्यभाने बाधकाभावात्, न च 'अभावो न घटीयः'

इत्यादिबाधधीदशायां बाधेन प्रतिबन्धादभावांशे प्रतियोगितासम्बन्धेन घटस्य भानासम्भवात् 'न' इत्येवं प्रतियोग्यविशेषिताभावप्रत्यक्षापत्तिरिति वाच्यम्, यतः 'अभावो न घटीयः' इति बाधज्ञानमभावत्वावच्छेदेनाभावे प्रतियोगित्वसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगिताकाभावमवगाहते ? अभावत्वसामानाधिकरण्येन वा ?, आद्ये प्रतियोगित्वसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावस्याप्यभावतया प्रतियोगितासम्बन्धेन घटवति तत्र घटाभावावगाहनेनाहार्यत्वं स्यात्, तथा च तस्याभावविशेष्यकप्रतियोगित्वसम्बन्धेन घटप्रकारकबुद्धिं प्रति न प्रतिबन्धकत्वम्, तेन सम्बन्धेन तद्धर्मिकतद्वत्ताबुद्धिं प्रति अनाहार्याप्रामाण्यज्ञानानास्कन्दिततद्धर्मिकतत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावनिश्चयस्यैव प्रतिबन्धकत्वात्; द्वितीये अवच्छेदकावच्छेदेन तद्वत्ताबुद्धिं प्रत्येव सामानाधिकरण्येन तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वं न तु सामानाधिकरण्येन तद्वत्ताबुद्धिं प्रति, तथा च अभावत्वसामानाधिकरण्येन प्रतियोगित्वसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगिताकाभावप्रकारिकाया 'अभावो न घटीयः' इति बाधधियोऽभावत्वसामानाधिकरण्येन घटबुद्धिं प्रत्यप्रतिबन्धकत्वात् तदृशायामपि प्रतियोगिनो घटस्योपस्थितस्याभावे वैशिष्ट्यभानसम्भवेन घटो नेत्येव प्रत्यक्षं भवेत्, न तु घटरूपप्रतियोग्यविशेषितस्याभावस्य नेत्याकारकप्रत्यक्षम्; न च सामान्यतोऽभावो न घटीय इति धियो न घटीय इत्यंशे प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेन नञर्थाभावे घटवैशिष्ट्यविषयकत्वेन न तदंशे प्रतियोगितासामान्येन घटवैशिष्ट्यविषयकत्वम्, किन्त्वभावपदार्थेऽभावसामान्ये प्रतियोगितासामान्येन घटनिष्ठप्रतियोगिताकाभाववैशिष्ट्यविषयकत्वम्, एवं च तस्या यया कयाचिदपि प्रतियोगितया घटप्रकारकाभावविशेष्यकधीविरोधित्वमित्येकस्यामेव तस्यां बुद्धौ परस्परविरोधिद्वयविषयकत्वेनाहार्यत्वमित्यनाहार्यत्वाभावादप्रतिबन्धकत्वेन प्रतियोगितासामान्येन घटबाधग्रहरूपत्वाभावेऽपि 'अभावः संयोगादिसम्बन्धावच्छिन्नप्रतियोगितया न घटीयः' इति धीर्नञर्थाभावे संयोगसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेनैव घटस्य वैशिष्ट्यमवगाहते, न तु संयोगसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेनाभावे घटस्य वैशिष्ट्यमित्यनाहार्यरूपायास्तस्याः संयोगसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेन घटप्रकारकाभावविशेष्यकबुद्धिविरोधित्वं संयोगसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताक-

निश्चयत्वेन स्यादेव, तथा च तद्बुद्ध्यात्मकबाधबुद्धिकाले संयोगसम्बन्धावच्छिन्न-प्रतियोगितासम्बन्धेन घटस्याभावे वैशिष्ट्यभानप्रतिबन्धात् संयोगेन घटाभावस्य 'न' इत्याकारकप्रत्यक्षापत्तिरिति वाच्यम्, संयोगादिसम्बन्धावच्छिन्नप्रतियोगिता-सम्बन्धेनाभावो न घटीय इति बाधधीकाले संयोगादिसम्बन्धावच्छिन्नप्रति-योगितासम्बन्धेनैवाभावे घटवैशिष्ट्यभानप्रतिबन्धो न तु प्रतियोगितासम्बन्धा-वच्छिन्नप्रतियोगितासम्बन्धेन, तं प्रति तस्या बाधधीत्वाभावादिति प्रतियोगिता-सम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेन घटस्य प्रकारतयाऽभावे भानसंभवेन प्रतियोगिनो घटस्योपस्थितस्याभावे वैशिष्ट्यविषयकत्वेन घटो नेत्याकारकस्य प्रतियोगिविशेषिताभावप्रत्यक्षस्यैवोत्पादात्, घटत्वाद्यवच्छिन्नप्रकारत्वान्यप्रकार-त्वानिरूपिताभावविषयताकप्रत्यक्षे घटादिधियो हेतुत्वस्याऽऽवश्यकत्वाच्च, घटज्ञानं विनाऽपि पटाभावत्वादिना घटाभावावगाहिप्रत्यक्षस्योत्पादेन व्यभिचाराद् घट-निष्ठप्रतियोगिताकाभावप्रत्यक्षं प्रति घटज्ञानत्वेन कारणत्वस्य वक्तुमशक्यत्वात्, पटाभावत्वादिना घटाभावप्रत्यक्षस्य तु घटत्वावच्छिन्नप्रकारत्वान्यपटत्वावच्छिन्न-प्रकारतानिरूपिताभावविषयताकत्वेन निरुक्तकार्यतावच्छेदकधर्मानाक्रान्ततया घटज्ञानं विना भावेऽपि न व्यभिचारः, तस्य पटत्वावच्छिन्नप्रकारत्वान्यप्रकारत्वा-निरूपिताभावविषयताकप्रत्यक्षत्वेन पटज्ञानकार्यत्वात्, इत्थं चाभावत्वाभाव-योर्निर्विकल्पकं प्रत्यक्षं यथा घटत्वावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपिताभाव-विषयताकम्, तथा पटत्वावच्छिन्नप्रकारकान्यप्रकारतानिरूपिताभावविषयताकम्, एवं मठत्वावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपिताभावविषयताकमपीत्येवं घट-पटादिसकलप्रतियोगिज्ञानकार्यतावच्छेदकाक्रान्ततया तस्य यत्किञ्चित्प्रतियोगि-ज्ञानेऽसम्भवात्, प्रत्येकं यावत्प्रतियोगिज्ञानस्य च चर्मचक्षुषामभावेन कारणा-भावादेवासम्भवात्, अभावत्वांशे निर्विकल्पकमभावांशे यत्किञ्चिद्घटादिवैशिष्ट्या-वगाहिप्रत्यक्षं तु यत्किञ्चिद्घटादिलक्षणप्रतियोगिज्ञानकार्यतावच्छेदकाक्रान्तत्वाद् घटाद्यात्मकप्रतियोगिज्ञानसाध्यमेवेति तस्य भवत्येव घटादिज्ञानतो भावः, इदन्त्वेन तमःप्रत्यक्षमपि अभावांशे निर्विकल्पकवत् प्रतियोगित्वसम्बन्धावच्छिन्नघटत्वाद्य-वच्छिन्नप्रकारताभिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावविषयता-कप्रत्यक्षत्वरूपकार्यतावच्छेदकधर्माक्रान्तमिति प्रत्येकं यावद्घटादिज्ञानजन्यमिति यावद्घटादिज्ञानाभावे तन्नोपपद्यते इति वाच्यम्, उक्तरीत्याऽभावाऽभावत्वयो-र्निर्विकल्पकासम्भवेऽपि केवलाभावत्वस्य निर्विकल्पकापत्तेः; तत्राभावस्याविषय-

त्वेनाभावविषयताकत्वघटितनिरुक्तकार्यतावच्छेदकधर्मानाक्रान्ततया यावत्प्रतियोगिज्ञानानपेक्षणात्; न चाभावत्वस्य भावभिन्नत्वरूपस्य समवाय-स्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावरूपस्य वा सखण्डोपाधिरूपत्वेन किञ्चिद्धर्मरूपेणैव भानं न स्वरूपत इति तन्निर्विकल्पकं न संभवत्येवेति वाच्यम्, अभावत्वस्याखण्डत्वात्, अन्यथाऽभावविशिष्टबुद्धावपि तन्निर्विकल्पकायोगात्, न चेष्टापत्तिः, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वेन अभावत्वस्य विशेषणस्य निर्विकल्पकज्ञानं विनाऽभावविशिष्टबुद्ध्यनापत्तेः; किञ्च घट-पटौ' न इति। प्रत्यक्षनिरूपिताभावविषयतायाः प्रतियोगित्वसम्बन्धावच्छिन्नघटत्वपर्याप्तावच्छेदकतानिरूपितप्रकारत्वान्यघटत्व-पटत्व-द्वित्वैतत्त्रितयपर्याप्तावच्छेदकतानिरूपितप्रकारतानिरूपितत्वेन घटत्वादिप्रत्येकपर्याप्तावच्छेदकतानिरूपितप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारताभिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारत्वानिरूपितत्वाभावाद् घटादिप्रतियोगिज्ञानकार्यतावच्छेदकानाक्रान्ततादृशप्रत्यक्षस्य घटादिप्रतियोगिज्ञानविरहेऽप्यापत्तिः, घटत्वाद्यवच्छिन्नप्रकारत्वस्य घटत्वादिनिष्ठावच्छेदकतानिरूपितप्रकारतात्वेनैव प्रवेशे घटत्व-पटत्व-द्वित्वैतत्त्रितयावच्छिन्नप्रकारताया घटत्वनिष्ठावच्छेदकतानिरूपितत्वेन तद्भिन्नप्रकारत्वानिरूपिताभावविषयताकप्रत्यक्षत्वलक्षणकार्यतावच्छेदकाक्रान्तत्वेन घटादिज्ञानजन्यतया घटादिज्ञानं विना तदापत्त्यसम्भवेऽपि नीलघटाद्यभावप्रत्यक्षस्यापि केवलघटादिज्ञानकार्यतावच्छेदकाक्रान्तत्वेन तस्य केवलघटादिज्ञानतोऽभावेनान्वयव्यभिचारस्य वारणाय घटत्वादिपर्याप्तावच्छेदकतानिरूपितप्रकारत्वान्यप्रकारतानिरूपिताभावविषयताकप्रत्यक्षत्वस्यैव घटादिज्ञानकार्यतावच्छेदकत्वस्य स्वीकरणीयतयोक्तदोषोद्धारासम्भवात्, तस्मादभावप्रत्यक्षे प्रतियोगिज्ञानस्योक्तदिशा कार्यकारणभावो न युक्तः, किन्तु घटत्वाद्यवच्छिन्नप्रकारतानिरूपितविषयताकप्रत्यक्षत्वावच्छिन्नं प्रति घटत्वादिनिष्ठप्रकारताकज्ञानत्वावच्छिन्नं कारणमित्येव कार्यकारणभावो युक्तः, यथा घटवद् भूतलमिति प्रत्यक्षं घटत्वावच्छिन्नप्रकारानिरूपितविषयताकप्रत्यक्षत्वरूपकार्यतावच्छेदकाक्रान्तत्वाद् घटत्वप्रकारकज्ञाने सत्येव भवति तथा घटो नेत्येवं प्रतियोगिविशेषिताभावप्रत्यक्षमपि निरुक्तकार्यतावच्छेदकधर्माक्रान्तत्वाद् घटत्वप्रकारकज्ञाने सत्येव भवतीत्येतावतैव प्रतियोगिज्ञानं विना प्रतियोगिविशेषिताभावप्रत्यक्षापत्त्यसम्भवात् शुद्धाभावप्रत्यक्षं तु घटत्वाद्यवच्छिन्नप्रकारतानिरूपितविषयताकप्रत्यक्षत्वरूपकार्यतावच्छेदकानाक्रान्तमपि विशेषणतासन्निकर्षतासन्निकर्षमात्रेण नापादयितुं

शक्यते, विशेषणतासन्निकर्षस्य प्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावविषयताकप्रत्यक्षत्वावच्छिन्नं प्रत्येव कारणत्वेन शुद्धाभावप्रत्यक्षस्य निरुक्तकार्यतावच्छेदकानाक्रान्ततया विशेषणतासन्निकर्षाजन्यत्वात्, इत्थं कल्पनायां कोटिप्रतियोगिज्ञानहेतुत्वाकल्पनलाघवमपीति; न च 'अभावो न घटीयः' इति प्रत्यक्षे व्यभिचारः, उक्तप्रत्यक्षस्यापि न घटीय इत्यंशे प्रतियोगित्वसम्बन्धावच्छिन्न प्रतियोगितासम्बन्धावच्छिन्नप्रकरतानिरूपिताभावविषयताकप्रत्यक्षत्वरूपविशेषणतासन्निकर्षनिष्ठकारणतानिरूपितकार्यतावच्छेदकधर्माक्रान्तत्वेन विशेषणतासन्निकर्षादुत्पत्तिसंभवात्, यदि च प्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावविषयताकप्रत्यक्षस्य विशेषणतासन्निकर्षादुत्पत्त्यभ्युपगमे प्रतियोगितामात्रेण द्रव्यं नास्ति मेयं नास्तीत्यादिप्रत्यक्षस्यापत्तिः, तस्यापि प्रतियोगित्वसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नद्रव्यनिष्ठप्रकारतानिरूपिताभावनिष्ठविषयताकत्वस्य निरुक्तसम्बन्धावच्छिन्नमेयादिनिष्ठप्रकारतानिरूपिताभावनिष्ठविषयताकत्वस्य भानेन विशेषणतासन्निकर्षजन्यत्वसम्भवात्, द्रव्यमेयादिरूपप्रतियोगिज्ञानं विनैव तस्यापादनीयत्वेनेष्टापत्तेरसम्भवादिति विभाव्यते, तदा प्रकारीभूतकिञ्चिद्धर्मावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावविषयताकप्रत्यक्षं प्रति विशेषणतासन्निकर्षस्य हेतुत्वं प्रतियोगितामात्रेणेत्यत्र मात्रपदस्य द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताव्यवच्छेदकतया प्रतियोगितामात्रेण द्रव्यं नास्तीत्यादेर्निरुक्तकार्यतावच्छेदकानाक्रान्ततया विशेषणतासन्निकर्षाजन्यत्वेन न विशेषणतासन्निकर्षतस्तदापत्तिसम्भवः, द्रव्यत्वावच्छिन्नप्रतियोगितासम्बन्धेन द्रव्यं नास्ति मेयत्वाद्यवच्छिन्नप्रतियोगितासम्बन्धेन मेयं नास्तीत्यादिप्रत्यक्षं तु द्रव्यत्वादेः प्रकारत्वे सत्येव स्यात्, तथा च तस्य द्रव्यत्वादिप्रकारकज्ञानकार्यतावच्छेदकद्रव्यत्वाद्यवच्छिन्नप्रकारतानिरूपितविषयताकप्रत्यक्षत्वधर्माक्रान्तत्वेन तं प्रति द्रव्यत्वादिप्रकारकज्ञानस्य कारणत्वेन द्रव्यत्वादिना द्रव्यादिज्ञानं विना नापत्तिसंभव इति, विशेषणतासन्निकर्षाजायमाने च प्रकारीभूतकिञ्चिद्धर्मावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावविषयताकप्रत्यक्षेऽभावेऽभावत्वमपि भासत एव, अभावस्याविषयीकरणे अभाव इति नेति नास्तीत्याकारोल्लेख एव न स्यात्, अभावत्वं चाखण्डोपाधिरेवेति तन्निष्ठनिरवच्छिन्नप्रकारताकत्वमेवोक्तप्रत्यक्षे, निरवच्छिन्नतन्निष्ठप्रकारताकबुद्धौ निरवच्छिन्नतन्निष्ठविषयताकज्ञानं कारणमिति अभावत्वनिष्ठनिरवच्छिन्नप्रकारताकनिरुक्ताभावप्रत्यक्षकारणतयाऽभावत्वं निर्वि-

कल्पकं चाङ्गीकरणीयम्, तथा च तमसोऽभावरूपत्वेऽपि तत्प्रत्यक्षे न प्रतियोगिज्ञानं कारणम्, अभावप्रत्यक्षत्वावच्छिन्नं प्रति प्रतियोगिज्ञानत्वेन कारणत्वस्योक्तदिशाऽपास्तत्वादिति चेत् ?

न–शुद्धाभावप्रत्यक्षवारणायाभावप्रत्यक्षे प्रतियोगिज्ञानस्य कारणत्वमङ्गीकृत्य प्रकारीभूतकिञ्चिद्धर्मावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावविषयताकप्रत्यक्षं प्रति विशेषणतासन्निकर्षस्य हेतुत्वाभ्युपगमेऽपि घटाभावपटाभावयोरुभयोरिन्द्रियस्य स्वसंयुक्तविशेषणतासन्निकर्षे सति घटाभावांशे प्रतियोगिविशेषितस्य पटाभावांशे च प्रतियोग्यविशेषितस्य समूहालम्बनप्रत्यक्षस्य प्रसङ्गात्, उक्तसमूहालम्बनप्रत्यक्षस्यापि घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नघटनिष्ठप्रकारतानिरूपिताभावविषयताकत्वेन विशेषणतासन्निकर्षकार्यतावच्छेदकनिरुक्तधर्माक्रान्तत्वेन विशेषणतासन्निकर्षजन्यत्वात्, किञ्चोक्तदिशा विशेषणतासन्निकर्षाऽभावप्रत्यक्षयोः कार्यकारणभावे इदन्त्वादिनाऽभावप्रत्यक्षं न स्यात्, न स्याच्च 'अभावप्रतियोगी घटः' इत्यादिप्रत्यक्षम्, तयोर्विशेषणतासन्निकर्षकार्यतावच्छेदकप्रकारीभूतकिञ्चिद्धर्मावच्छिन्नप्रकारतानिरूपिताभावविषयताकप्रत्यक्षत्वरूपधर्मानाक्रान्तत्वेन विशेषणतासन्निकर्षाजन्यत्वात्, इदन्त्वादिनाऽभावप्रत्यक्षादौ कारणान्तरकल्पने चातिगौरवम्; अथ, अभावत्वप्रकारकघटाद्यभावविषयकप्रत्यक्षे घटत्वादिना घटादिज्ञानस्य हेतुत्वम्, एवं च पटाभावत्वेन भूतले न घटाभावादिज्ञानम्, यतस्तस्याभावत्वप्रकारकघटाभावविषयकप्रत्यक्षत्वस्यावश्यम्भावेन तदवच्छिन्नकारणस्य घटज्ञानस्य तत्राभावात्, किन्तु पटवति भूतले पटाभावत्वेन पटाभावस्यारोप्याऽऽरोपरूपमेव तत्, तस्याभावत्वप्रकारकपटाभावविषयकाऽऽरोपात्मकप्रत्यक्षरूपस्य तस्य कारणीभूतपटज्ञानसद्भावात्, तथा चेदन्त्वेन तमःप्रत्यक्षस्याभावत्वप्रकारकाऽऽलोकाभावविषयकप्रत्यक्षत्वाभावादालोकज्ञानं न कारणमिति तदन्तरेण तस्य संभवः स्यादिति चेत् ? न–घटवद् भूतलमितिज्ञानानन्तरम् 'अभाववद् भूतलम्' इति प्रत्यक्षप्रसङ्गात्, तस्य प्रत्यक्षस्याभावत्वेनाभावसामान्यावगाहिनो घटाभावविषकत्वाऽभावत्वप्रकारकत्वयोः सत्त्वेन घटत्वेन घटज्ञानकार्यत्वात्, अभावस्य भूतले यदसंसर्गज्ञानं तद्रूपप्रतिबन्धकस्याभावेनासंसर्गाग्रहरूपापादकस्य सत्त्वात्; किञ्च भवतु येन केनापि प्रकारेण घटाभावज्ञाने घटज्ञानस्य कारणत्वं तावताऽप्यभावज्ञाने प्रतियोगिज्ञानापेक्षा सिद्ध्यत्येव, तथा च तमस्त्वं यद्यालोकाभावत्वरूपं स्यात्, तदा

तमस्त्वप्रकारकं तमःप्रत्यक्षमप्यभावत्वप्रकारकालोकाभावविषयकप्रत्यक्षरूपमालोकज्ञानजन्यमालोकज्ञानं विना नैव भवेत्, भवति चालोकज्ञानं विनापि तमस्त्वप्रकारकं तमःप्रत्यक्षमिति भावत्वव्याप्यमेव तमस्त्वमतस्तमसो भावत्वमेव साधयतीति प्रतिकूलाभिप्रायमिदं देवानांप्रियस्य ।

एवं चाभावलौकिकप्रत्यक्षस्य घटत्वाद्यन्यतमत्वविशिष्टविषयकत्वनियमाद् विशेषसामग्रीं विना सामान्यसामग्रीमात्रात् कार्यानुत्पत्तेर्नाभावनिर्विकल्पकं, 'न' इत्याकारकप्रत्यक्षं वा, अभावलौकिकप्रत्यक्षस्य विशेषो घटत्वाद्यन्यतमत्वविशिष्टविषयकप्रत्यक्षं तत्सामग्री घटत्वादिविशेषणज्ञानरूपा तस्या अभावात्; न चाभावलौकिकप्रत्यक्षत्वं यदि घटत्वादिविशिष्टविषयकप्रत्यक्षत्वस्य व्यापकं स्यात् तदा व्याप्यधर्मावच्छिन्नसामग्रीत्वाद् घटत्वादिविशिष्टविषयकप्रत्यक्षकारणीभूतघटत्वादिविशेषणज्ञानघटितसामग्री विशेषसामग्री भवेत्, अभावलौकिकप्रत्यक्षत्वावच्छिन्नसामग्री व्यापकधर्मावच्छिन्नसामग्रीत्वात् सामान्यधर्मावच्छिन्नसामग्री स्यात्, न चैवम्, घटत्वादिविशिष्टविषयकप्रत्यक्षत्वस्य 'अयं घटः' इत्यादिप्रत्यक्षेऽपि सत्त्वेन तत्राभावलौकिकप्रत्यक्षत्वस्याभावादिति घटत्वादिविशेषणज्ञानं विनाऽप्यभावलौकिकप्रत्यक्षस्य युक्तत्वे कथं नाभावनिर्विकल्पकं 'न' इति प्रत्यक्षं वेति वाच्यम्, कार्यतावच्छेदकीभूततद्धर्माश्रययत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणताऽवच्छेदकं यावत् प्रत्येकं तत्तदवच्छिन्नसत्त्वेऽवश्यं तद्धर्मावच्छिन्नोत्पत्तिरित्येवं नियमात् प्रकृते कार्यतावच्छेदकीभूतस्तद्धर्मोऽभावलौकिकप्रत्यक्षत्वं तदाश्रययत्किञ्चिद्व्यक्तिर्घटाभावत्वेन घटाभावविषयकप्रत्यक्षव्यक्तिः, तन्निष्ठकार्यता विशिष्टबुद्धित्वावच्छिन्नकार्यता तन्निरूपितकारणतावच्छेदकं विशेषणविषयकबुद्धित्वावच्छिन्नकारणतावच्छेदकं विशेषणविषयकबुद्धित्वम्, एवं निरुक्तयत्किञ्चिद्व्यक्तिनिष्ठकार्यता अभावलौकिकप्रत्यक्षत्वावच्छिन्नकार्यताऽपि भवति तन्निरूपितकारणतावच्छेदकं विशेषणतासन्निकर्षत्वादिकमपि, तत्तदवच्छिन्नसत्त्वेऽवश्यमभावलौकिकप्रत्यक्षत्वावच्छिन्नोत्पत्तिरिति नाभावनिर्विकल्पकं, नवा 'न' इत्याकारकप्रत्यक्षं च, कार्यतावच्छेदकीभूततद्धर्मव्याप्यधर्मावच्छिन्नयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं यावत् प्रत्येकं तत्तदवच्छिन्नसत्त्वेऽवश्यं तद्धर्मावच्छिन्नोत्पत्तिरित्येवं नियमो यदि भवेद् न भवेदपि अभावलौकिकप्रत्यक्षे घटत्वादिविशेषणज्ञानापेक्षा, विशिष्टबुद्धित्वधर्मस्याभावलौकिकप्रत्यक्षत्वधर्मा-व्याप्यत्वात्, न चैवम्, उक्तनियमाभ्युपगमे व्याप्तिज्ञानपरामर्शयोः सत्त्वे बाधधी-

सत्त्वेऽप्यनुमित्यापत्तेः, व्याप्तिज्ञानपरामर्शकार्यतावच्छेदकस्तद्धर्मोऽनुमितित्वं, तद्व्याप्यधर्मो विशिष्टबुद्धित्वं न भवति, तस्य विशिष्टालौकिकप्रत्यक्षशाब्दबोधादावपि सत्त्वेन तत्रानुमितित्वाभावात्, बाधनिश्चयस्तु विशेष्टबुद्धित्वावच्छिन्नं प्रत्येव प्रतिबन्धक इति तदभावो विशिष्टबुद्धित्वावच्छिन्नं प्रत्येव कारणमिति बाधनिश्चयाभावत्वं विशिष्टबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकमेवेति व्याप्तिज्ञान-परामर्शकार्यतावच्छेदकीभूतानुमितित्वधर्मव्याप्यधर्मावच्छिन्नानुमितिव्यक्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकयावदन्तर्गतं बाधनिश्चयाभावत्वं न भवतीति तदवच्छिन्नसत्त्वमनुमित्युत्पत्तौ नापेक्षितमिति बाधनिश्चये सत्यपि व्याप्तिज्ञान-परामर्शाभ्यामनुमित्यापत्तेः, कार्यतावच्छेदकीभूततद्धर्माश्रययत्किञ्चिद्व्यक्तिनिष्ठेत्यादिनियमे तु व्याप्तिज्ञान-परामर्शकार्यतावच्छेदकीभूतानुमितित्वाश्रययत्किञ्चिदनुमितिव्यक्तिनिष्ठविशिष्टबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकयावदन्तर्गतबाधनिश्चयाभावत्वावच्छिन्नसत्त्वेऽवश्यमनुमितित्वावच्छिन्नोत्पत्तिरिति बाधधीकाले बाधधीनिश्चयाभावत्वावच्छिन्नसत्त्वाभावेनानुमित्यापत्त्यसम्भवः, कार्यतावच्छेदकीभूततद्धर्मव्याप्यव्यापकधर्मावच्छिन्नयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं यावत् प्रत्येकं तत्तदवच्छिन्नसत्त्वेऽवश्यं तद्धर्मावच्छिन्नोत्पत्तिरित्युक्तौ विशेषणतासन्निकर्षकार्यतावच्छेदकीभूताभावलौकिकप्रत्यक्षत्वव्याप्यतत्तदभावलौकिकप्रत्यक्षत्वव्यापकघटत्वादिविशिष्टवैशिष्ट्यविषयकप्रत्यक्षत्वावच्छिन्नयत्किञ्चिदभावलौकिकप्रत्यक्षव्यक्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकघटत्वादिप्रकारकज्ञानत्वरूपविशेषणतावच्छेदकप्रकारकज्ञानत्वात्मकयावदन्तर्गतधर्मावच्छिन्नसत्त्वेऽवश्यमभावलौकिकप्रत्यक्षोत्पत्तिरिति घटत्वादिप्रकारकज्ञानतो जायमानमभावलौकिकप्रत्यक्षं घटत्वादिविशिष्टवैशिष्ट्यावगाह्येव भवति, निर्विकल्पाभावप्रत्यक्ष–'न' इत्याकारकप्रत्यक्षयोरभावलक्षणस्येष्टस्य सिद्धेः सम्भवेऽप्युक्तनियमो गौरवादेव नाभ्युपगन्तुं शक्यः, तथानियमोररीकारेऽपि तमसोऽभावरूपत्वेऽप्यालोकरूपप्रतियोगिज्ञानं विनाऽपि तमस्त्वेन प्रत्यक्षं सम्भवतीति यदभीष्टं तन्न सिद्ध्यति; अभावप्रत्यक्षं प्रति प्रतियोगिज्ञानत्वेन प्रतियोगिज्ञानस्य कारणत्वानभ्युपगमेऽपि तमस्त्वस्य तेजोऽभावत्वरूपत्वेन तद्रूपेण तत्प्रत्यक्षे उक्तनियमादप्यालोकत्वप्रकारकज्ञानस्यापेक्षितत्वात्, नवा घटत्वाद्यवच्छिन्नप्रकारत्वातिरिक्तप्रकारत्वानवच्छिन्नाभावत्वलौकिकविषयतावच्छिन्नाभावलौकिकविषयताकप्रत्यक्षे, घटत्वाद्यतिरिक्तधर्मावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकार-

त्वानिरूपितत्वे सत्यभावत्वविषयतावच्छिन्नाभावलौकिकविषयताकप्रत्यक्षे वा घटत्वाद्यवच्छिन्नप्रकारताकज्ञानहेतुत्वेऽपि निर्वाहः, तमोविषयतायास्तमस्त्वविषयतावच्छिन्नत्वेऽभावत्वविषयतावच्छिन्नत्वनियमात् तमस्त्वस्य तेजोऽभावत्वानतिरिक्तत्वात्, उक्तकार्यकारणभावेऽभावलौकिकविषयतायामभावत्वविषयतावच्छिन्नत्वनिवेशे गौरवाच्च तमसो द्रव्यत्वस्यैव युक्तत्वादिति दिक् ।

किञ्च, नालोकप्रतियोगिकाभावमात्रं तमोव्यवहारविषयः, एकालोकवत्यप्यालोकान्तराभावसत्त्वेन तमोव्यवहारापत्तेः, नवा आलोकत्वावच्छिन्नप्रतियोगिताकाभावलक्षण आलोकसामान्याभावस्तमोव्यवहारविषयः, संयोगसम्बन्धेनालोकवत्यपि समवायसम्बन्धावच्छिन्नालोकत्वावच्छिन्नप्रतियोगिताकाभावसत्त्वात् तमोव्यवहारापत्तेः; न च संयोगसम्बन्धावच्छिन्नालोकत्वावच्छिन्नप्रतियोगिताकाभावस्तमोव्यवहारविषयः, आलोकान्तरासंयुक्ते आलोकेऽपि संयोगसम्बन्धेनाऽऽलोकस्यासत्त्वे संयोगसम्बन्धावच्छिन्नालोकत्वावच्छिन्नप्रतियोगिताकाभावसत्त्वात् तमोव्यवहारापत्तेः, नापि आलोकान्यवृत्तित्वविशिष्टसंयोगसम्बन्धावच्छिन्नालोकत्वावच्छिन्नप्रतियोगिताकाभावस्तमोव्यवहारविषयः, आलोकभिन्नेऽन्धकारे संयोगसम्बन्धेनाऽऽलोको नास्तीत्यालोकान्यान्धकारवृत्तित्वविशिष्टसंयोगसम्बन्धावच्छिन्नालोकत्वावच्छिन्नप्रतियोगिताकाभावस्यान्धकारे सत्त्वेनान्धकारेऽन्धकार इति व्यवहारापत्तेः; न च आलोकान्यद्रव्यवृत्तित्वविशिष्टसंयोगसम्बन्धावच्छिन्नालोकत्वावच्छिन्नप्रतियोगिताकाभावस्तमोव्यवहारविषयः, अन्धकारस्यालोकान्यत्वेऽपि द्रव्यत्वाभावान्न तद्वृत्तित्वविशिष्टनिरुक्ताभावस्तत्रेति नान्धकारेऽन्धकार इति व्यवहारापत्तिरिति वाच्यम्, त्वदात्मनो द्रव्यत्वेनालोकान्यत्वेन निरुक्ताभावस्त्वदात्मन्यस्तीति त्वदात्मन्यन्धकारव्यवहारापत्तेः; न च कदाचिदालोकसंसर्ग्यत्वद्वृत्तित्वविशिष्टः संयोगसम्बन्धावच्छिन्नालोकत्वावच्छिन्नप्रतियोगिताकाभावस्तमोव्यवहारविषयः, स्वस्मिन् स्वप्रतियोगिकसंयोगसम्बन्धानुयोगित्वाभावेनालोक आलोकसंसर्ग्येव न भवति, त्वदात्मा कदाचिदालोकसंसर्गी भवति सर्वमूर्तसंयोगिनस्तस्यालोकसंसर्गित्वस्यापि भावात्, किन्तु त्वद्भिन्नो न भवतीति नालोके त्वदात्मनि च तमोव्यवहारापत्तिरिति वाच्यम्, कदाऽप्यालोकसंसर्गो यत्र नास्ति तत्रापि घोरनरकादौ तमोव्यवहारस्य श्रुत्यादौ प्रतिपादनाद् निरुक्तालोकाभावस्य तत्राभावेन तमोव्यवहाराभावप्रसङ्गात्, अवतमसे किञ्चिदालोकसत्त्वेनाऽऽलोकसामान्याभावाभावाच्च तमोव्यवहारो न स्यात् ।

किञ्च, निरुक्ताऽऽलोकाभावघटकानां यावतां पदार्थानामप्रतिसन्धानेऽपि तमस्त्वप्रतिसन्धानान्नोक्ताभावत्वरूपं तमस्त्वम्, किन्तु घटत्वादिवज्जातिरूपमेव तत्; अत एव 'यावतामालोकानां मध्यादेकस्याप्यालोकस्य सत्त्वे तमोव्यवहारो न भवति तावदालोकनिष्ठबहुत्वविशेषावच्छिन्नप्रतियोगिताकाभावस्तमः' इत्यपि निरस्तम्, तादृशबहुत्वविशेषस्याज्ञानेऽपि तमोव्यवहारस्य भावेन तदवच्छिन्नप्रतियोगिताकाभावस्य तमोरूपत्वासम्भवात्, निरुक्तबहुत्वविशेषावच्छिन्नप्रतियोगिताकाभावस्य तमस्त्वम्, तादृशयावदालोकविषयकबुद्धिविशेषविषयत्वावच्छिन्नप्रतियोगिताकाभावस्य वा तमस्त्वमित्यत्र विनिगमकस्य कस्यचिदुपदर्शयितुमशक्यत्वेन विनिगमनाविरहादनन्तानां निरुक्ताभावानां तमोरूपत्वकल्पनापेक्षयाऽतिरिक्ततमोद्रव्यकल्पनाया एव लाघवादौचित्याच्च; यदि चाखण्डाभाव एव तमः, तमस्त्वं वाऽखण्डमेवेति नोक्तदोष इति विभाव्यते, तर्हि द्रव्यरूप एव तमसि तमस्त्वमखण्डं सामान्यं वेति किमिति न कल्प्यते ।

किञ्च, अभावे उत्कर्षा-ऽपकर्षौ न भवतः, तमसि तूत्कर्षा-ऽपकर्षौ प्रतीयेते, यद्बलादन्धतमसा-ऽवतमसादिव्यवहारविशेषस्तत्र भवतीति भावत्वमेव तस्य युक्तम्; न च महदुद्भूतानभिभूतरूपवत्तेजोऽभावकूटवत्त्वमन्धतमसम्, कतिपयतदभाववत्त्वं चावतमसमित्येतावतैवोपपत्तिरिति वाच्यम्, दिने महदुद्भूतानभिभूतरूपवतां यावतां तेजसां नास्ति सम्भवस्तावत्तेजोऽभावकूटवत्त्वस्य दिवा प्रकृष्टालोकेऽपि सत्त्वेन तदानीमप्यन्धतमसव्यवहारप्रसङ्गात्; यदि च महदुद्भूतानभिभूतरूपवत्तेजोभावत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वावच्छिन्नवत्त्वमेवान्धतमसमिति नैकस्यापि प्रकृष्टालोकस्य सत्त्वे निरुक्तकूटान्तर्गतस्य तदभावस्यासत्त्वादन्धतमसापत्तिरिति विभाव्यते, तदाऽपि कतिपयतदभावरूपावतमससत्त्वेन दिवा प्रकृष्टालोकेऽवतमसव्यवहारापत्तिः स्यादेव; न च निरुक्तकूटत्वाविवक्षायां छायायामपि महदुद्भूतानभिभूतरूपवद् यावत्तेजोऽभावसत्त्वेनान्धतमसव्यवहारस्य कतिपयतदभावसत्त्वेनावतमसव्यवहारस्य च वारणायोपदर्शितान्धतमसा-ऽवतमसलक्षणयोः स्वन्यूनसङ्ख्यबाह्यालोकसंवलने सतीति विशेषणदानस्यावश्यकत्वाद् यथा छायायां निरुक्ताभावे स्वाधिकसङ्ख्यबाह्याऽऽलोकसमवहिते स्वन्यूनसङ्ख्यबाह्यालोकसंवलनाभावादतिव्याप्तिवारणं तथा दिनेऽपि प्रकृष्टालोके निरुक्ताभावे स्वाधिकसङ्ख्यबाह्यालोकसंवलिते स्वन्यूनसङ्ख्यबाह्यालोकसंवलनाभावान्नान्धतमसा-ऽवतमसव्यवहारापत्तिरिति वाच्यम्,

तद्दिने यावन्तो बाह्यालोकास्तदपेक्षया तद्दिनातिरिक्तानन्तदिनबाह्यालोकानामभावा एतद्दिनवृत्तयोऽधिका एवेति तेषु स्वन्यूनसङ्ख्यबाह्यालोकसंकलनमस्त्येवेति प्रकृष्टालोके दिनेऽन्धतमसा-ऽवतमसव्यवहारापत्तेरुक्तविशेषणदानेऽप्यपरिहारात्, महदुद्भूतानभिभूतरूपवद् यावत्तेजोऽभावत्वस्याप्रतिसन्धानेऽप्यन्धतमसत्वस्य, कतिपयतदभावत्वस्याप्रतिसन्धानेऽप्यवतमसत्वस्य चानुभवाच्च न महदुद्भूतानभिभूतरूपवद् यावत्तेजोऽभावस्वरूपमन्धतमसं कतिपयतदभावस्वरूपमवतमसमिति विभजनं युक्तम्। एतेन 'रूपत्वग्राहकतेजस्संवलितो रूपत्वावान्तरजातिविशेषग्राहकयावत्तेजःसंसर्गाभावोऽवतमसम्, यतोऽवतमसे रूपसामान्यप्रत्यक्षं भवति, रूपविशेषाश्च शुक्लादयः शुक्लत्वादिभिर्नोपलभ्यन्त इति, रूपत्वावान्तरजातिविशेषग्राहकतेजःसंवलितः प्रौढप्रकाशकयावत्तेजःसंसर्गाभावश्छाया, यतश्छायायां विद्यमानानां पदार्थानां शुक्लत्वादिना शुक्लादिकं प्रत्यक्षेणानुभूयते, किन्तु विशिष्टालोके यथा शुक्लादीनां प्रौढप्रकाशो भवति तथा न तत्रेति, यावदालोकाभावश्चान्धतमसम्, यतस्तत्र रूपसामान्यमपि न प्रत्यक्षगोचरचरं भवति' इति निरस्तम्, निरुक्तस्वरूपाणामवतमसादीनां चक्षुरयोग्यज्ञानघटितस्वरूपत्वेन ,चक्षुषोऽयोग्यत्वेनाचाक्षुषत्वप्रसङ्गात्, रूपत्वसामान्यमात्रग्राहकतेजसि जातिविशेष एव कश्चित्, एवं रूपत्वावान्तरग्राहकतेजसि च तदन्य एव जातिविशेषः कश्चित्, तत्तद्रूपेणैव निरुक्तावतमसादिस्वरूपे तेजःसन्निवेशाज्ज्ञानघटितत्वाभावेन चाक्षुषत्वसंभवेऽपि प्रमाणाभावेन तादृशजात्यसिद्ध्या तत्तज्ज्ञानविशेषपरिचायितजातिविशेषविशिष्टालोकनिवेशासंभवाच्च।

किञ्च, दीपाद्यालोकापसारणेऽन्धकारोऽयमुत्पन्नो दीपाद्यालोकागमनेऽन्धकारोऽयं विनष्ट इत्यादिप्रतीतयः समुपजायन्ते, तमस आलोकात्यन्ताभावरूपत्वे त्वत्यन्ताभावस्य नित्यत्वात् तत्रोत्पाद-विनाशयोरभावादुक्तप्रतीतीनां भ्रमत्वं स्यात्, विना च बाधकं तथाकल्पनमयुक्तम्। "आलोकसंसर्गाभावसमुदाय एवान्धकारः, तत्रालोकात्यन्ताभावरूपसमुदायिनो नित्यत्वेऽप्यालोकप्रागभावरूपसमुदायिनो विनाशित्वात् तद्व्यतिरेकप्रयुक्तो निरुक्तसमुदायलक्षणान्धकारस्य विनाशः, आलोकध्वंसरूपसमुदायिन उत्पत्तिमत्वात् तदुत्पत्तिप्रयुक्ता निरुक्तसमुदायलक्षणान्धकारस्याप्युत्पत्तिरिति नोत्पाद-विनाशप्रतीत्योर्भ्रमत्वम्, दृश्यते च राशिष्वेकापगमप्रयुक्तो विनाशः, एकस्य तद्घटकतयोत्पादत उत्पादः" इत्यभिप्रायकम् "आलोकसंसर्गाभावसमुदाय एवान्धकारः, तत्र राशिष्विव किञ्चित्

समुदायिव्यतिरेकप्रयुक्त एव विनाशः, एवमुत्पत्तिप्रत्ययोऽप्यूह्यः" इति शशधरशर्मणो वचनं न रमणीयम्, राशयः खलु पञ्च-षट्सप्तादिसमुदायात्मका भवन्ति, तत्र विशेषा वर्तन्त इति तत्र षट्समुदायात्मके राशौ षट्त्वलक्षणो बहुत्वविशेष एव राशिर्भवति, न तु षण्णां समुदायरूपो राशिस्तदानीं विद्यते इति षट्सु पर्याप्ता बहुत्वसङ्ख्या षण्णामभावाद् विनश्यति, पञ्चसमुदायात्मकराशौ च पञ्चत्वसङ्ख्यालक्षणो बहुत्वविशेष उत्पद्यत इत्येवमाश्रयनाशोत्पादप्रयोज्यौ बहुत्वविशेषनाशोत्पादाविति 'कार्यविशेषात् कारणविशेषप्रतीतिरुपजायते' इति न्यायाद् राशिषु बहुत्वविशेषनाशोत्पादाभ्यां तदाश्रयनाशोत्पादप्रतीत्युपपत्तावपि प्रकृते अत्यन्ताभावप्रागभावध्वंसात्मके समुदाये सङ्ख्याया एवाभावात्, अभावे गुणरूपायाः सङ्ख्याया अनभ्युपगमात्, यद्यपि—

"द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः।
अपेक्षाबुद्धिनाशाच्च तेषां नाश उदाहृतः॥ १॥ [कारिकावली]

इति वचनान्नैयायिक-वैशेषिकमते नाश्रयोत्पाद-विनाशाभ्यां सङ्ख्यारूपबहुत्वविशेषस्य नाशोत्पादौ, तथाऽप्यपेक्षाबुद्धिव्यङ्ग्यत्वमेव द्वित्वादीनां न त्वपेक्षाबुद्धिजन्यत्वं, किन्त्वाश्रयजन्यत्वमेवेत्याश्रयोत्पादत एव तदुत्पाद आश्रयनाशादेव च तद्विनाशः; आलोकसंसर्गाभावसमुदायोऽन्धकार इति यदुच्यते तत्र समुदायेऽत्यन्ताभाव आलोकत्वावच्छिन्नप्रतियोगिताकः प्रवेष्टुमर्हति, ध्वंस-प्रागभावौ च न सामान्यधर्मावच्छिन्नप्रतियोगिताकाविति यावन्त आलोकध्वंसा आलोकप्रागभावाश्च ते सर्वेऽपि प्रत्येकं निरुक्तसमुदाये यदि सन्निविष्टास्तदा विनष्टाऽऽलोकप्रागभावानां भाव्यालोकध्वंसानां नैकदा समवधानमिति तद्घटितसमुदायो न क्वचिदपि काले वर्तत इति तत्समुदायलक्षणस्यान्धकारस्य सर्वदाऽसत्त्वान्न तस्य कदाचिदपि प्रतीतिः स्यात्, येषामेवाऽऽलोकप्रागभावानां येषामेव चालोकध्वंसानामेकदा समवधानं तेषामेव कतिपयानां यदि निरुक्तसमुदाये सन्निवेशस्तदा यत्प्रागभावप्रतियोगिन आलोकस्योत्पादस्तस्यैवालोकप्रागभावस्य विनाशोऽन्ये चालोकप्रागभावास्तत्स्वरूपसन्निविष्टा विद्यन्त एवेति यत्किञ्चिदालोकभावेऽपि तदन्यालोकप्रतियोगिककतिपयाऽऽलोकप्रागभावघटितनिरुक्तसमुदायस्वरूपान्धकारस्य सत्त्वात्—यत्किञ्चिदालोकसमवधानेऽप्यन्धकारप्रतीतिः स्यात्,

एवं निरुक्तसमुदायस्वरूपसन्निविष्टाश्च विद्यमाना एव कतिपयालोकध्वंसाः, तेषां न यत्किञ्चिदालोकापसारणत उत्पाद इत्यन्धकारोत्पादप्रतीतिर्न स्यात्; यदि चालोका इवान्धकारा अप्यनन्ता एव न त्वेक एवान्धकार इति निरुक्तसमुदायलक्षणान्धकारस्वरूपे न यावतामालोकध्वंसानां यावतामालोकप्रागभावानां च प्रवेशो नवा कतिपयालोकध्वंसानां कतिपयालोकप्रागभावानां च प्रवेशः, किन्तु यस्यान्धकारस्य यदालोकप्रादुर्भावतो विनाशस्तदन्धकारे निरुक्तसमुदायस्वरूपे तदालोकप्रागभावो निविशते, यदालोकापगमतश्चोत्पादस्तदालोकध्वंसो निविशते, इत्येवं प्रतिनियतस्यैवैकस्यालोकस्य प्रागभावः प्रतिनियतस्यैवैकस्यालोकस्य ध्वंसस्तत्समुदायनिविष्टः, आलोकसामान्याभावस्तु प्रत्येकं तत्तदालोकविशेषाणामपि विरोधीति स एक एव निरुक्तसमुदायस्वरूपे निविशते, एवं च निरुक्तसमुदायघटकालोकविशेषध्वंसोत्पत्तिप्रयुक्त उत्पादो निरुक्तसमुदायघटकालोकविशेषप्रागभावविनाशप्रयुक्तो विनाशश्च निरुक्तसमुदायरूपेऽन्धकारे उपपद्येते इति विभाव्यते, तदाऽनन्तोक्तसमुदायस्वरूपान्धकारतदुत्पादविनाशकल्पनाऽपेक्षयाऽतिरिक्तद्रव्यरूपान्धकारस्यैवोत्पाद-विनाशशालिनोऽनन्तस्य कल्पनमुचितम्, तथा चालोकसंसर्गाभावसमुदायस्वरूपताऽन्धकारस्य सम्भवत्येव नेति न तस्य राशिष्विव किञ्चित्समुदायिव्यतिरेकादिप्रयुक्तविनाशादिकल्पना भद्रा, राशीनां च न समूहरूपत्वमेव, समूहविलक्षणमहदेकोत्पादाद्यनुभवाच्च, ततः स्वाभाविकावेव राशिषूत्पाद-विनाशौ न तु किञ्चित्समुदायिव्यतिरेकप्रयुक्तो विनाशः, किञ्चित्समुदाय्युत्पादप्रयुक्त उत्पादो वेति न राशीनां दृष्टान्तताऽपि सम्भवतीति ।

अपि च, तमसोऽभावरूपत्वे तत्र नीलरूपवत्त्वाद्यभावादिदं नीलमित्यादिप्रतीतीनां भ्रमत्वं कल्पनीयम्, तथा योग्ये तस्मिन् नीलरूपाभावस्य योग्यत्वान्नेदं नीलमित्यादिसाक्षात्कारः कस्मान्न भवतीत्यतस्तत्र नेदं नीलमित्यादिसाक्षात्कारे वस्तुस्वरूपस्यादृष्टविशेषस्य वा दोषस्य वा प्रतिबन्धकत्वं कल्पनीयम्, तमोविशेष्यकतेजोऽभावत्वप्रकारकज्ञानादीनामप्रामाण्यज्ञानानास्कन्दितानां सत्त्वे नेदं नीलमित्यादिसाक्षात्कारो भवत्येवेति अप्रामाण्यग्रहाभावविशिष्टतेजोऽभावत्वप्रकारकज्ञानाद्यभावविशिष्टस्य वस्तुस्वरूपादेर्नेदं नीलमित्यादिसाक्षात्कारं प्रति प्रतिबन्धकत्वमित्यप्रामाण्यग्रहाभावविशिष्टतेजोऽभावत्वप्रकारकज्ञानादीनामुत्तेजकत्वं कल्पनीयमित्यतिगौरवम् ।

यत्तु "तमसो द्रव्यत्वे प्रौढालोकमध्ये सर्वतो घनतरावरणे तमो न स्यात्, तेजोऽवयवेन तत्र तमोऽवयवानां प्रागनवस्थानात्, सर्वतस्तेजःसंकुले वाऽन्यतोऽप्यागमनासम्भवात्" इति वर्द्धमानेनोक्तम्, तदसत्–'यद् द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयम्' इति व्यासेरन्धकारद्रव्यं तेजोद्रव्यध्वंसजन्यमिति तेजउपादानाणूपादेयमिति तेजोऽवयवव्यतिरिक्ततमोऽवयवानामभावेन तेजोऽवयवेन सह तमोऽवयवानां प्रागनवस्थानेऽपि सर्वतस्तेजःसंकुले देशे देशान्तरात् तमोऽवयवानामनागमनेऽपि तत्र स्थितैरेव तेजोऽणुभिरन्धकारारम्भस्वीकारात्, एकजातीयेभ्य एवाणुभ्यः सहकारिविशेषसहकृतेभ्यः पृथिवी-जल-तेजो-वायूनां विजातीयानामपि पुद्गलत्वेनैकजातीयानामारम्भस्वीकारेण पार्थिवाणुभिः पार्थिवस्यैव जलाणुभिर्जलस्यैवेत्येवं नियतारम्भस्य निरासात् ।

प्रतीयते च 'तमश्चलति, छाया गच्छति, इयं छाया अस्याश्छायायाः परा, इयं पुनरपरा, इदं तम एतस्माद् दूरं तस्माच्चान्तिकम्, इमे छाया–तमसी संयुक्ते; इमे पुनर्विभक्ते' इत्येवं गतिमत्त्व-परत्वा-ऽपरत्व-संयोग-विभागादिभिः, तेन गुणवत्त्व-क्रियावत्त्वलक्षणद्रव्यसाधर्म्यात् तमो द्रव्यमेव, तस्याभावत्वे गतिमत्त्व-परत्वापरत्व-संयोग-विभागादिप्रत्ययानामनुत्पत्तिः स्यात्, अभावे गुणक्रियादेरभावात्; न च छायावतः पुरुषस्य चलने एव छाया चलतीति प्रतीतिः, छायाया द्रव्यत्वे च स्वाभाविकतद्गतेराश्रयगत्यनुविधाननियमो नोपपद्येत इति वाच्यम्, पद्मरागमणेर्द्रव्यस्य प्रभाऽपि द्रव्यमेव, अथापि पद्मरागे चलति सति तत्प्रभा चलतीति स्वाभाविक्या अपि प्रभागतेराश्रयीभूतपद्मरागगत्यनुविधानस्य दर्शनात्; यदि च पद्मरागमणौ तिष्ठत्येव तत्समीपवर्तिकुड्याद्यावरणभङ्गे तत्प्रभा सुदूरमपि गच्छतीति तद्गतेराश्रयगतिमन्तरेणापि भावादाश्रयगत्यनुविधाननियमो नास्तीति विभाव्यते, तदैतत्तुल्यं प्रकृतेऽपि, पुरुषस्य तिष्ठत एव तन्निकटतरकुड्याद्यावरणभङ्गे तच्छायाया अपि गतेरवलोकनात्, तदिदमुक्तम्—

"तमः खलु चलं नीलं परापरविभागवत् ।
इतर[प्रसिद्ध]द्रव्यवैधर्म्याद् नवभ्यो भेत्तुमर्हति ॥१॥ [ ] इति ।

निबिडं तमः, घनतरं तमः, तमोनिकरं, तमोलहरीत्यादिशब्दैर्व्यपदिश्यमानत्वात् तमो द्रव्यं किरणादिवत्, अभावरूपत्वे तमसो घनतरादिशब्दैर्व्यपदिश्यमानत्वं न स्यादित्यामनन्ति रत्नप्रभसूरयः ।

तमस आलोकाभावरूपत्वे 'नात्रालोकः' इत्येतावतैव तमसोऽवगतौ 'नात्रालोकः किन्त्वन्धकारः' इति व्यवहारो न स्यादित्युक्तव्यवहारादप्यालोकाभावाद् भिन्नं तमः; न च यथा 'नात्र घटः, किन्तु तदभावः' इत्यत्र 'नात्र घटः' इत्यस्य विवरणपरं 'किन्तु तदभावः' इति वचनं तथा 'नात्रालोकः' इत्यस्य विवरणपरं 'किन्त्वन्धकार' इति वाच्यम्, विवरणपरतां विनाऽपि स्वारसिकप्रयोगदर्शनात्, अपकृष्टालोकसत्त्वेऽप्यन्धकारव्यवहारो भवति, स तमस आलोकाभावरूपत्वे न स्यात्, आलोकाभावस्य तत्राभावात्; ननु यत एवापकृष्टालोकसत्त्वेऽन्धकारव्यवहारो भवति तत एव नालोकसामान्याभावस्तमः, किन्तूत्कृष्टालोकाभावस्तम इति चेत्? यत्रोत्कृष्ट आलोकस्तत्रापकृष्टं तमः, उत्कृष्टेन चापकृष्टस्याभिभव इति वस्तुस्थितावालोकस्य य उत्कर्षः स तमसोऽपकर्षेण निरूपित इति तदुत्कर्षप्रतियोग्यपकर्षशालित्वेन तमसि द्रव्यत्वसिद्धेः, अभावेऽपकर्षासम्भवात्, यत्र चापकृष्ट आलोकस्तत्र तेनोत्कृष्टं तमो नाभिभूतमिति तद्व्यवहारो भवति, यत्र तूत्कृष्ट आलोकस्तत्र तेनापकृष्टं तमोऽभिभूतमिति तद्व्यवहारो न भवतीत्येव कल्पना युक्ता; न चात्रालोकस्योत्कर्षापकर्षावालोकान्तरापेक्षयैव न तु तमोऽपेक्षयेति नालोकोत्कर्षप्रतियोग्यपकर्षशालित्वं तमसो येन द्रव्यत्वं तस्य सिद्ध्येदिति वाच्यम्, यादृशोत्कृष्टालोकसमवधाने न तमोव्यवहारस्तादृशोत्कृष्टालोकस्याप्युत्कृष्टतरालोकापेक्षयाऽपकृष्टत्वेन तदभावस्तमो न भवेत्, उत्कृष्टालोकाभावस्यैव भवता तमोरूपत्वाभ्युपगमात्, तस्योत्कृष्टालोकाभावत्वात्, यदि च सोऽप्यालोकः स्वापेक्षयाऽपकृष्टालोकापेक्षयोत्कृष्ट इति तदभावो भवत्येवोत्कृष्टालोकाभावः, तदा योऽप्यपकृष्टालोकोऽभिमतो यत्सत्त्वेऽपि तमोव्यवहारो भवति सोऽपि स्वापेक्षयाऽपकृष्टापकृष्टतरापकृष्टतमालोकापेक्षयोत्कृष्ट इति तदभावः स्यादेवोत्कृष्टालोकाभावः, तथा चापकृष्टालोकस्याप्युक्तदिशोत्कृष्टालोकतया तत्सत्त्वे उत्कृष्टालोकाभावस्यासत्त्वेन तमोव्यवहारो न भवेत्, अत एवालोकस्य तमोऽपेक्षयैवोत्कृष्टत्वादिकं वाच्यमिति भवत्यालोकोत्कर्षप्रतियोग्यपकर्षशालित्वेन तमसो द्रव्यत्वम्।

"तेजःप्रतियोगिकाभावेनैव तमोव्यवहारः, तत्र तत्तत्तेजोज्ञानं प्रतिबन्धकम्" इति शेषानन्तवचनम् "अपकृष्टालोकसत्त्वे तदन्यतेजःप्रतियोगिकाभावेनान्धकारव्यवहारो भवति, तत्र व्यवहर्तव्यस्य तेजःप्रतियोगिकाभावरूपतमसो ज्ञानं विद्यते, तमोव्यवहारेच्छा च समस्ति, अपकृष्टालोकात्मकतेजोज्ञानं च न तमो-

व्यवहारे प्रतिबन्धकं किन्तु प्रकृष्टालोकात्मकतेजोज्ञानम्, तच्च तदानीं नास्ति, ततः प्रतिबन्धकाभावोऽपि विद्यते इति सम्भृतसामग्रीकत्वात् तमोव्यवहारो भवति, प्रकृष्टालोकसत्त्वे तु व्यवहर्तव्यतेजःप्रतियोगिकाभावरूपतमोज्ञान-तद्व्यवहारेच्छयोः सत्त्वेऽपि प्रकृष्टालोकात्मकतेजोज्ञानरूपप्रतिबन्धकसत्त्वेन तदभावरूपकारणाभावात् सामग्र्यभावेन न तमोव्यवहारः" इत्यभिप्रायकं त्वत्यनादरणीयम्, प्रतिबन्धक-तदभावरूपकल्पनेन स्पष्टगौरवात्, व्यवहर्तव्यज्ञाने सति सत्यां च व्यवहारेच्छायां व्यवहारेऽधिकानपेक्षणाच्च ।

प्राभाकरास्तु–"तेजोज्ञानाभाव एव तमः, न चाभावे नीलरूपाभावाद् भ्रमात्मकज्ञानस्य चानभ्युपगमान्नीलं तम इति प्रतीतिर्न स्यादिति वाच्यम्; स्मृतनीलिम्ना सममालोकज्ञानाभावस्यासंसर्गाग्रहरूपाया एव तस्या अभ्युपगमात्, अत एवालोकाभाववद् गर्भगृहं प्रविशतः प्रथममालोकाग्रहे 'नीलं तमः' इति धीः, तदुक्तम्–"अप्रतीतावेव प्रतीतिभ्रमो मन्दानाम्" इत्याहुः, तदप्यसत्– आलोकज्ञानस्य मनोमात्रग्राह्यत्वेन तदभावस्यापि मनोमात्रग्राह्यतया 'तमः पश्यामि' इति प्रतीत्या चाक्षुषतया प्रमितस्य तमसस्तद्रूपत्वासम्भवात्, न च तमो न चाक्षुषं निमीलितनयनस्यापि प्रमातुः प्रतीतिविषयत्वादिति वाच्यम्, तदानीमर्थान्तरस्यैव प्रतीतेः, निमीलितनयनस्य तमःप्रतीतौ च नयनोन्मीलनात् पूर्वं तस्य गेहे तमोऽस्ति न वेति संशयो न भवेत्, गर्भगृहे च तमःप्रत्ययो भ्रम एव, आलोकज्ञानाभावोपपत्तये तत्रावश्यं स्वीकरणीयादालोकज्ञानप्रतिबन्धकदोषान्निरुक्तभ्रमसंभवात् ।

आरोपितं नीलं रूपं तम इति कन्दलीकारमतमपि न युक्तम्, नीलीद्रव्योपरक्तेषु वस्त्र-चर्मादिषु नीलरूपप्रत्ययो नीलीद्रव्योपरागादारोपात्मक एव न तु वास्तविक इति तत्रारोपितं नीलं रूपं समस्तीति तमोव्यवहारप्रसङ्गात्, किञ्चाऽऽरोपितनीलरूपस्यैव तमस्त्वे 'नीलं तमः' इत्यत्र नीलरूपस्यैव तादात्म्येन तमस्यन्वय इति नीलपदं नीलरूपार्थकमेव तत्र न तु नीलरूपवदर्थकम्, तमःपदं च तमःशब्दवाच्यपरम्, तथा च 'नीलं तमः' इत्यनेन नीलरूपत्वावच्छिन्नविशेष्यतानिरूपिततमःपदवाच्यत्वावच्छिन्नप्रकारताकशाब्दबोधो भवतीति वाच्यम्, एवं "गुणे शुक्लादयः पुंसि, गुणिलिङ्गास्तु तद्वति" [अम० को० १, ५,१७] इत्यनुशासनेन शुक्लादिपदजन्यशुक्लत्वाद्यवच्छिन्नमुख्यविशेष्यताकशाब्दबोधे पुलिङ्गकशुक्लादिपदशक्तिज्ञानजन्योपस्थितेर्हेतुत्वेन 'नीलस्तमः' इति

प्रयोगः प्रसज्येत, न च 'नीलं तमः' इत्यत्र नीलस्य तमोविशेषणत्वमेव, तथा च नीलपदजन्यनीलत्वावच्छिन्नमुख्यविशेष्यताकशाब्दबोधो नात उपजायत इत्यनुक्तलिङ्गविशेषणपदानां विशेष्यलिङ्गताया औत्सर्गिकत्वात् नीलपदे क्लीबत्वम्, अनुक्तलिङ्गेति विशेषणपदविशेषणतयोपादानाद् 'वेदाः प्रमाणम्' 'प्रत्यक्षानुमानशब्दाः प्रमाणानि' 'पितरो देवता' 'मैथिली रामदाराः' इत्यादौ विशेषणपदानां विशेष्यलिङ्गत्वाभावेऽपि न क्षतिरिति वाच्यम्, आरोपितं नीलं रूपं तमः, नीलरूपान्तरं च न तम इत्येवं नीलं सामान्यम्, तमस्त्वारोपितं नीलरूपमेवेति विशेषः, सामान्य-विशेषयोर्मध्ये सामान्यस्य व्यभिचरितत्वेन तस्यैवेतरव्यावर्तकत्वेन विशेषो विशेषणम्, विशेषस्त्वव्यभिचरित एव तस्येतरव्यावर्तकत्वात् सामान्यं न विशेषणम्, तथा च नीलस्य सामान्यतया विशेष्यत्वात् तमोविशेषणत्वाभावे न तल्लिङ्गकत्वमिति 'नीलस्तमः' इति प्रयोग आपद्येत, विशेषण-विशेष्यभावे कामचाराभिधानस्य परस्परव्यभिचारितदुभयविषयत्वादिति ।

नीलारोपविशिष्टस्तेजस्संसर्गाभावस्तम इति शिवादित्यमतमपि न युक्तम्, विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयस्याभावबुद्धौ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य च कारणत्वेन निरुक्तस्वरूपतमसो ज्ञानस्य नीलारोपविशिष्टवैशिष्ट्यावगाहिबुद्धित्वेन नीलारोपात्मकविशेषणतावच्छेदकप्रकारकनिश्चयं विनाऽभावबुद्धित्वेन च प्रतियोगितावच्छेदकीभूततेजस्त्वविशिष्टतेजोरूपप्रतियोगिज्ञानं विनाऽसम्भवप्रसङ्गात्, भवति च नीलारोपाद्यग्रहेऽपि तमोबुद्धिरतो नोक्तस्वरूपं तमः, निरुक्ततमःस्वरूपघटकतयैव नीलारोपस्य प्रविष्टत्वेन तादृशतमस्त्वावच्छिन्नधर्मिकनीलारोपस्यात्माश्रयाद्ययोगाच्च । तस्माज्जाड्यलीमिव स्याद्वादगिरं समाकर्ण्यैकान्तवादिनः सुखं ध्वान्तेऽभावत्वभ्रमलक्षणं विषमुद्वमन्तु, स्वीकुर्वन्तु चैकान्तान्न किञ्चिदुत्पद्यते न वा विनश्यति किन्तु सर्वं वस्तूत्पाद-व्यय-ध्रौव्यात्मकत्रिलक्षणसत्त्वशालीति ॥ ७७ ॥

उपसंहरति —

एवं चैतन्यवानात्मा, सिद्धः सततभावतः ।
परलोक्यपि विज्ञेयो, युक्तिमार्गानुसारिभिः ॥ ७८ ॥

एवमिति । एवम् उक्तेन प्रकारेण, उक्तयुक्त्येति यावत् । चैतन्यवान् ज्ञानवान्, ज्ञानोपादानमिति यावत् । आत्मा भूतव्यतिरिक्तः, सिद्धः प्रमाण-

निश्चितः । सोऽयमात्मा सततभावतः सर्वकालवृत्तित्वाद्, अनादिनिधनत्वादिति यावत् । परलोक्यपि परभवानुगाम्यपि । युक्तमार्गानुसारिभिरिति उपाध्यायसम्मतः पाठः, तदर्थस्तैः "उपपत्तिसहितागमानुगृहीतमतिभिः" इति कृतः, युक्तिमार्गानुसारिभिरिति श्रीहरिभद्रसूरिसम्मतः पाठः, तैः "नान्यतो भिन्नजातीयमेव असद् वा सद् भवति अतिप्रसङ्गादिति तत्त्वदर्शिभिः" इत्यर्थो दर्शितः । विज्ञेयो ज्ञातव्यः, आत्मनः परलोकित्वप्रसिद्धिमित्थमुपदर्शितवन्तः श्रीमन्तो यशोविजयोपाध्यायाः–आद्यचैत्रशरीरधर्माणामव्यवहितपूर्ववर्तिचैत्रशरीरधर्मानुविधायित्वात्, युवशरीरे तथादर्शनात्, अनुगतकार्मणशरीरसिद्ध्या तज्जन्यभोगाश्रयस्य परलोकित्वसिद्धेः; न च घटे घटजन्यत्वस्येव शरीरे शरीरजन्यत्वस्यापि न नियम इति वाच्यम्, आत्मनः क्रियावत्त्वेन चेष्टारूपतत्क्रियानियामकशरीरत्वस्याद्यशरीरहेतुकर्मणि स्वीकारादिति ॥ ७८ ॥

परप्रश्नमुद्भाव्य समाधत्ते—

सतोऽस्य किं घटस्येव, प्रत्यक्षेण न दर्शनम् ? ।
अस्त्येव दर्शनं स्पष्टमहंप्रत्ययवेदनात् ॥ ७९ ॥

सतोऽस्येति । सतः भावरूपस्य सतः । अस्य आत्मनः । घटस्येव घटस्य यथा प्रत्यक्षेण दर्शनं तथा । प्रत्यक्षेण प्रत्यक्षप्रमाणेन । दर्शनं ज्ञानं, प्रत्यक्षज्ञानमिति यावत् । किं न भवति ? सतोऽपि भावभूतस्यात्मनो योग्यस्यानुपलब्ध्याऽभाव एवेत्यभिप्रायः । प्रत्यक्षेण दर्शनमस्त्येवात्मन इति नानुपलब्ध्या तस्याभाव इति समाधत्ते–अस्त्येव दर्शनमिति–आत्मनः प्रत्यक्षमस्त्येवेत्यर्थः । तत्र हेतुः–स्पष्टमहंप्रत्ययवेदनादिति–साक्षादहंप्रत्ययस्यानुभवसिद्धत्वादित्यर्थः, व्याप्त्यादिग्रहमन्तरेण जायमानस्याहमिति प्रत्ययस्य प्रत्यक्षत्वापलापासम्भवात्, यतोऽयमात्मा योग्यो न वा ? यदि योग्यस्तदा प्रत्यक्षेणैव तद्ग्रहणसम्भवान्न तत्र व्याप्त्यादिग्रहणापेक्षा, द्वितीये आत्मत्वविशिष्टस्यायोग्यत्वे साध्याप्रसिद्ध्या तेन समं कस्यापि व्याप्तिग्रहणाभावेनानुमानासम्भवात्; एतेन "तत्रात्मा तावत् प्रत्यक्षतो न गृह्यते" इति न्यायभाष्योक्तमप्यपास्तम्, अनुमानस्य प्रत्यक्षपूर्वकत्वेन प्रत्यक्षाभावे तेन समं कस्यापि लिङ्गस्य व्याप्तिग्रहणाद्यभावेनाऽऽत्मनोऽसिद्धिप्रसङ्गात्; न चाऽऽत्मनः प्रत्यक्षत्वे तदात्मकस्य शरीरभेदस्यापि प्रत्यक्षत्वाच्छरीरभेदग्रहस्य शरीराभेदबुद्धिं प्रति प्रतिबन्धकत्वादात्मनि

शरीरभेदभ्रमो न स्यादिति चेत् ? न–धर्मिस्वरूपस्य शरीरभेदस्य धर्मिभावेनात्मत्वेन ग्रहेऽपि शरीरभेदत्वेन शरीरभेदप्रकारकात्मविशेष्यकज्ञानस्याभावात् तस्यैव शरीराभेदप्रकारकात्मविशेष्यकज्ञानप्रतिबन्धकत्वेन तदभावाच्छरीराभेदप्रकारकात्मविशेष्यकज्ञानसम्भवात्, तथा चात्मोपलब्धेरेव सद्भावेन नानुपलब्ध्याऽऽत्माऽभावनिश्चयः; यदि च चक्षुरिन्द्रियेणाऽऽत्मा नोपलभ्यत इति तदनुपलब्ध्याऽऽत्माभावनिश्चयस्तदा वाय्वादिरपि चक्षुषा नोपलभ्यत इति चक्षुरिन्द्रियजन्योपलब्ध्यभावाद् वाय्वादेरप्यभावः प्रसज्येत; न चानुपलब्धिमात्रस्याभावसाधकत्वमपि, अन्यथा स्वगृहान्निर्गतो वराकश्चार्वाको न गृहमासादयेत्, पुत्रादिभिस्तददृष्ट्या तदभावसिद्धेः, स्वयमपि बहिर्गतश्चार्वाकः स्वगृहस्थितान् पुत्रादीन् न पश्यतीत्यनुपलब्ध्या पुत्र-धनाद्यभावावधारणाच्छोकविकलो बहु विक्रोशेत, चार्वाकस्य स्वपुत्राद्यनुपलब्धिदशायामपि यदि पुत्रादिसत्त्वं तदा व्यभिचारेण नानुपलब्धेरर्थाभावसाधकत्वम्; अथ सन्निकृष्टेऽधिकरणे पुत्राद्यत्यन्ताभावग्रहेऽपि तद्ध्वंसस्याग्रहान्न शोक इति चेत् ? तथापि पुत्राद्युपलम्भहेतुचक्षुराद्यनुपलम्भेन चक्षुरादीनामभावात् चक्षुरादिना पुत्राद्यनुपलम्भेन परावृत्तस्य तस्य मूढता स्यात्, तदिदमुक्तम्—

"स्वगृहान्निर्गतो भूयो न तदाऽऽगन्तुमर्हति" [ ] इति; अथ चक्षुरादिसंभावनासत्त्वान्न तदनुपलब्ध्या तदभावसिद्धिः, संभावनाविरहविशिष्टाया एव तदनुपलब्धेस्तदभावसाधकत्वादिति चेत् ? तर्ह्यात्मनोऽपि संभावनासत्त्वान्न तदनुपलब्ध्या तदभावसिद्धिः ।

~ आत्मनोऽनुपलब्धिमात्रेण नाभावसिद्धिरित्यत्रोदयनाचार्या इत्थं परामृशन्ति, तथा च तद्ग्रन्थः—

"चार्वाकस्त्वाह–किं योग्यताविशेषाग्रहेण यन्नोपलभ्यते तन्नास्ति, विपरीतमस्ति, न चेश्वरादयस्तथा, ततो न सन्तीत्येतदेव ज्यायः, एवमनुमानादिविलोप इति चेत् ? नेदमनिष्टम्, तथा च लोकव्यवहारोच्छेद इति चेत् ? न–संभावनामात्रेण तत्सिद्धेः, संवादेन च प्रामाण्याभिमानादिति, अत्रोच्यते—

"दृष्ट्यदृष्ट्योर्न संदेहो, भावाभावविनिश्चयात् ।
अदृष्टिबाधिते हेतौ, प्रत्यक्षमपि दुर्लभम् ॥ १ ॥" [ ]

संभावना हि संदेह एव, तस्माच्च व्यवहारस्तस्मिन् सति स्यात्, स एव तु

कुतः ? दर्शनदशायां भावनिश्चयात्, अदर्शनदशायामभावावधारणात्, तथा च गृहाद् बहिर्गतश्चार्वाको वराको न निवर्तेत, प्रत्युत पुत्र-दार-धनाद्यभावावधारणात् सोरस्ताडं शोकविकलो विक्रोशेत; स्मरणानुभवान्नैवमिति चेत् ? न-प्रतियोगिस्मरण एवाभावपरिच्छेदात्; परावृत्तोऽपि कथं पुनरासादयिष्यति ? सत्त्वादिति चेत् ? अनुपलम्भकालेऽपि तर्हि सन्तीति न तावन्मात्रेणाभावावधारणम्; तदैवोत्पन्ना इति चेत् ? न-अनुपलम्भेन हेतूनां बाधात्, अबाधे वा स एव दोषः, अत एव प्रत्यक्षमपि न स्यात्, तद्धेतूनां चक्षुरादीनामनुपलम्भबाधितत्वात्, उपलभ्यन्त एव गोलकादय इति चेत् ? न-तदुपलब्धेः पूर्वं तेषामनुपलम्भात्, न च यौगपद्यनियमः, कार्यकारणभावादिति; एतेन 'न परमाणवः सन्त्यनुपलब्धेः, न ते नित्या निरवयवा वा पार्थिवत्वात्, घटादिवत्', 'न पाथसीयपरमाणुरूपादयो नित्याः, रूपादित्वात्, दृश्यमानरूपादिवत्', न रूपत्व-पार्थिवत्वादि नित्याकार्यातीन्द्रियसमवायि जातित्वात्, शृङ्गत्ववत्; नेन्द्रियाणि सन्ति योग्यानुपलब्धेः, अयोग्यानि च शशशृङ्गप्रतिबन्धिनिरसनीयानीत्येवं स्वर्गा-ऽपूर्व-देवतानिराकरणं नास्तिकानां निरसनीयमिति" ।

अत्र वर्द्धमानोपाध्यायस्य कतिपयपङ्क्तिव्याख्यानं यथा—

"सम्भावनेति–उत्कटकोटिकसंशयमात्रेणेत्यर्थः । दृष्टयदृष्ट्योरिति सप्तमीद्विवचनान्तम्, दर्शने तत्सत्तानिश्चयाददर्शने चाभावनिश्चयान्न संदेहः, प्रत्यक्षहेतौ गोलकादावदृष्ट्या–अनुपलब्ध्या बाधिते हेत्वभावात् प्रत्यक्षमपि न स्यादित्यर्थः । तथा चेति-पुत्रादिभिस्तस्यादर्शनात् स न स्यादिति गृहं न प्रत्यावर्तेतेत्यर्थः । प्रत्युतेति–पुत्रादेरदर्शनादित्यर्थः । ननु नाप्रत्यक्षं प्रमाणमिति चार्वाकसिद्धान्तादनुपलब्धिः प्रत्यक्षसहकारिणी, न च गेहाद् बहिर्गमनेऽधिकरणेन सहेन्द्रियसन्निकर्षोऽस्तीति न पुत्राद्यभावनिश्चयः स्यात्, सन्निकृष्टे देशे चाभावनिश्चयेऽपि ध्वंसानिश्चयान्न शोकः स्यात्, अत एव पर्वतपरभागेन सहेन्द्रियासन्निकर्षान्नाग्न्यभावनिश्चय इति तत्र संशयादनुमानप्रवृत्तिः, अत्राहुः–अधिकरणज्ञानमात्रमभावधीहेतुः, न तु तदिन्द्रियसन्निकर्षोऽपि, अत एव देवताद्यभावस्तदधिकरणासन्निकर्षेऽपि गृह्यते इति चार्वाकसिद्धान्तमाश्रित्योक्तम् । पुत्रादेः स्मरणान्नैवं करोतीत्याह–स्मरणेति–स्मरणादिति वक्तव्ये अनुभवग्रहणं तत्र प्रमाणसूचनार्थम् । पुत्रादिस्मरणं तदभावग्रहेऽनुकूलमेव, प्रतियोगिज्ञानं

विना तदग्रहादित्याह–प्रतियोगीति । अनुपलम्भकाल इति–तथा चानुपलब्धिमात्रमभावसंशये हेतुर्न तन्निश्चायकमित्यर्थः, हेतूनां पुत्राद्युत्पादकानामित्यर्थः, स एवेति–नानुपलब्धिमात्रेणाभावनिश्चय इत्यर्थः । अत एवेति–हेतूनां बाधादेवेत्यर्थः । ननु चक्षुरादीनामपि स्वोपलब्धिकाले सत्त्वमन्यदा त्वसत्त्वमिष्यत एवेत्यत आह–न चेति–उपलम्भेन्द्रिययोर्युगपदुत्पन्नयोः पौर्वापर्याभावादित्यर्थः । एतेनेति–अनुपलम्भमात्रस्यासाधकत्वेन हेत्वन्तरस्य चाश्रयासिद्ध्यादिनेत्यर्थः" इति ॥ ७९ ॥

उक्तप्रत्ययो न प्रमेति स्वाभिप्रायं पर आशङ्कते—

भ्रान्तोऽहं गुरुरित्येष, सत्यमन्यस्त्वसौ मतः ।
व्यभिचारित्वतो नास्य, गमकत्वमथोच्यते ॥ ८० ॥

भ्रान्तोऽहमिति । अहं गुरुरित्यहंत्वावच्छिन्नविशेष्यकगुरुत्वप्रकारकः प्रत्ययो भ्रान्तः, गुरुत्वाभाववत्यहंत्ववत्यात्मनि गुरुत्वप्रकारकज्ञानत्वात्, शुक्तौ रजतत्वज्ञानवत्, इति पराशङ्कायां घटस्य कदाचिद् भ्रमविषयत्वेऽपि न नाम घटो नास्त्येव जगति, तथाऽऽत्मनः कदाचिद् भ्रमविषयत्वेऽपि नासन् स इत्याशयेनोत्तरयति—सत्यमिति-अहं गुरुरित्येष प्रत्ययो भ्रम इति यदुक्तं तत् सत्यमित्यर्थः । तु पुनः । असौ 'अहं जाने, अहं करोमि, अहं सुखी, अहं दुःखी' इत्यादिप्रमारूपोऽहंप्रत्ययः । अन्यः अहं गुरुरित्यादिभ्रमात्मकप्रत्ययतो भिन्नः । मतः अङ्गीकृतः, यस्य प्रमात्मकं ज्ञानं क्वचिदपि नास्ति तस्यैवासत्ख्यातिस्त्वापि प्रमाणाग्राह्यत्वात् सम्मतः, आत्मनस्तु प्रमात्मकज्ञानमप्यस्तीति न प्रमाणाग्राह्यत्वादसत्ख्यातिग्राह्यत्वेनालीकत्वमात्मन इत्यभिसन्धिः । दुर्दुरूटः पर आह—व्यभिचारित्वतो नास्य गमकत्वमिति–अस्य–येनोपयोगेनाहं गुरुरहं स्थूलोऽहं सुख्यहं दुःख्यहं जानेऽहं करोमीत्यादिकः प्रत्ययो भवति तस्याहंप्रत्ययजनकोपयोगस्य, व्यभिचारित्वतः–अर्थाभावेऽपि प्रत्ययजनकत्वतो भ्रमजनकत्वात्, न गमकत्वं–न प्रमाणत्वम्, अथेत्याशङ्कायामित्येवं त्वमाशङ्कसे, तत्र समाधानमुच्यते ॥ ८० ॥

प्रत्यक्षस्यापि तत् ताज्यं, तत्सद्भावाविशेषतः ।
प्रत्यक्षाभासमन्यच्चेद्, व्यभिचारि न साधु तत् ॥ ८१ ॥

प्रत्यक्षस्यापीति-चक्षुरादिप्रत्यक्षप्रमाणस्यापीत्यर्थः, प्रत्यक्षात्मकज्ञानस्यापीति

वा । तत् प्रमाणत्वं गमकत्वं वा । त्याज्यं त्यक्तव्यम् । तत्र हेतुः—तत्सद्भावाविशेषत इति- भ्रमजनकत्वाविशेषात्, द्विचन्द्रादिप्रत्यक्षभ्रमजनके चक्षुरादौ तत्सद्भावात्, व्यभिचारित्वसद्भावाविशेषादिति वा, द्विचन्द्रादिप्रत्यक्षस्यापि भ्रान्तत्वात् । अथ प्रत्यक्षाऽऽभासं द्विचन्द्रादिप्रत्यक्षम्, अन्यत् प्रत्यक्षादर्थान्तरभूतम्, तत्र व्यभिचारित्वहेत्ववगमाय विशेषणं—व्यभिचारीति–विसंवादिव्यवहारजनकमित्यर्थः, तत् द्विचन्द्रादिप्रत्यक्षम् । न साधु न प्रमारूपम्, न प्रत्यक्षरूपं तदिति वा, तथा च भ्रमाजनकत्वलक्षणं प्रामाण्यं नात्राभिप्रेतं येन चक्षुरादेर्द्विचन्द्रादिभ्रमजनकस्य तदभावात् प्रामाण्यं न स्यात्, किन्तु प्रमाजनकत्वमेव प्रामाण्यम्; तच्च चक्षुरादिप्रत्यक्षप्रमाणे घटादिप्रत्यक्षप्रमाजनकत्वादक्षतमिति हृदयमिति चेत् ? ॥ ८१ ॥

अत्रोत्तरमाह—

अहंप्रत्ययपक्षेऽपि, ननु सर्वमिदं समम् ।
अतस्तद्वदसौ मुख्यः, सम्यक् प्रत्यक्षमिष्यताम् ॥ ८२ ॥

अहंप्रत्ययपक्षेऽपीति–मयोपन्यस्ते अहंप्रत्ययपक्षेऽपीत्यर्थः, । ननु इत्याक्षेपार्थकः । इदं सर्वं प्राक् प्रकटीकृतं पराभिप्रेतम् । समं तुल्यम्, असत्यहंप्रत्ययपरित्यागेन सत्यहंप्रत्ययमादाय अहंप्रत्ययजनकोपयोगस्य प्रमाणत्वाविरोधात्, दुष्टकारणजन्यत्वा-ऽदुष्टकारणजन्यत्वाभ्यामहंप्रत्ययस्यापि द्वैविध्यसम्भवात्, तथा च प्रमाणग्राह्यत्वान्नालीकत्वमात्मनः, अपि तु पारमार्थिकत्वमेव, अतः उक्तसाम्यात् । तद्वत् सत्यघटप्रत्ययवत् । असौ 'अहं जाने, अहं सुखी, अहं दुःखी'इत्यादिप्रत्ययः । मुख्यः सद्व्यवहारजनकः । सम्यक् प्रत्यक्षं प्रमाणात्मकप्रत्यक्षम् । इष्यतां स्वीक्रियताम्, तथा च प्रमात्मकप्रत्यक्षविषयत्वादस्त्येवामेत्यर्थः ॥ ८२ ॥

ननु 'अहं जाने' इत्यादिप्रत्ययो भ्रान्तो न, अहं गुरुरिति प्रत्ययश्च भ्रान्त इत्येवं प्रत्ययद्वैविध्यं तदा स्याद् यदि भ्रान्तत्वाऽभ्रान्तत्वव्यवस्थितौ किमपि विनिगमकं भवेत्, तदेव तु नास्तीत्याक्षेपप्रतिक्षेपायाह—

गुर्वी मे तनुरित्यादौ, भेदप्रत्ययदर्शनात् ।
भ्रान्तताऽभिमतस्यैव, सा युक्ता नेतरस्य तु ॥ ८३ ॥

गुर्वीति । गुर्वी गुरुत्ववती, मे मम, तनुः शरीरम्, इत्यादौ इत्यादि-

प्रयोगे, आदिपदाद् गौरी मे तनुरिति प्रयोगस्य परिग्रहः। **भेदप्रत्ययदर्शनात्** षष्ठ्यन्तास्मच्छब्दवाच्यात्मना समं प्रथमान्ततनुशब्दवाच्यस्य शरीरस्य भेदप्रत्ययानुभवात्, यतश्चैवं ततः, **अभिमतस्यैव** आत्मनः शरीराभिन्नत्वे त्वया बाधकत्वेनाङ्गीकृतस्यैवाहं गुरुरित्याद्यहंप्रत्ययस्य, **सा** भ्रान्तता, **युक्ता** युज्यते, बाधितविषयकज्ञानस्य भ्रान्तत्वे सर्वेषामविवादात्। **तु** पुनः, **इतरस्य** 'अहं जाने' इत्यादिप्रत्ययस्याऽऽत्मनि शरीरभेदप्रत्ययनिबन्धनस्य, **न** भ्रान्तता न युक्ता, तत्र बाधकानवतारात्। एतत्तात्पर्यमित्थमुशन्ति उपाध्यायाः—

"अत्र षष्ठ्या यद्यपि सम्बन्धमात्रमर्थः, तथाऽपि तस्या भेदनियतत्वेन शरीरेऽहंत्ववद् भेदस्य शाब्दबोधोत्तरमाक्षेपलभ्यत्वेन गुरुत्वे मद्भिन्नवृत्तित्वेनोक्तप्रत्ययेऽहंत्वव्यधिकरणप्रकारकत्वलक्षणभ्रमत्वग्रहः' इति वदन्ति, 'भेदविशिष्टः सम्बन्ध एव षष्ठ्यर्थः, 'राहोः शिरः' इत्यादौ तु बाधाद् भेदांशस्त्यज्यते' इत्यन्ये, यद्यपि 'ममाऽऽत्मा' इत्यादावपि षष्ठीप्रयोगो दृश्यते तथापि गुरुत्वादावेवाहंत्वव्यधिकरणत्वम्, अन्यत्र क्लृप्तत्वात्, इदन्त्वसंवलितत्वाच्च; न तु ज्ञानादावित्यत्र तात्पर्यम् ॥ ८३ ॥

ननु इन्द्रियत्वेनेन्द्रियजन्यज्ञानमेव प्रत्यक्षम्, अहंप्रत्ययस्तु नेन्द्रियत्वेनेन्द्रियजन्य इति न प्रत्यक्षरूपः, प्रत्यक्षज्ञानविषयत्वेनैव विषयः प्रत्यक्षपदव्यपदेश्यो भवतीति प्रत्यक्षाविषयश्चात्मा प्रत्यक्षव्यपदेशभागपि न भवितुमर्हति; स्वातिरिक्तज्ञानं विनाऽप्यपरोक्षत्वेन प्रतिभासनात् प्रत्यक्ष आत्मेति चेत्? स्वातिरिक्तज्ञानं विनाऽपरोक्षत्वेन प्रतिभासनमेव विकल्पकवलितम्, तथाहि—स्वप्रतीतौ व्यापारो वा? चिद्रूपस्य सत्ता वा तत्? नाद्यः, कर्मणीव स्वात्मनि व्यापारानुपलम्भात्, न द्वितीयः, स्वतःप्रकाशायोगात्, स्वतःप्रकाशाभावादेव च स्वसंविदितज्ञानविषयत्वेन स्वातिरिक्तज्ञानं विनाऽपरोक्षत्वेन प्रतिभासनमपि न युक्तम्, ज्ञानस्य स्वसंविदितत्वासिद्धेः, सिद्धौ वा स्वसंवेदनमिन्द्रियाजन्यत्वान्न प्रत्यक्षम्, लिङ्गाद्यजन्यत्वाच्च नानुमानादिरूपमिति प्रसिद्धप्रमाणेष्वनन्तर्भावादतिरिक्तं प्रमाणं प्रसज्येत; अथ घटज्ञानं घटमहं जानामीत्येवंरूपम्, पटज्ञानं पटमहं जानामीत्येवंरूपमित्येवं सर्वज्ञानानां घटमहं जानामीत्याद्याकारत्वात् प्रत्यक्षेणैव स्वविषयत्वसिद्धिरिति चेत्? न—घटमहं जानामीति घटविषयकज्ञानवानहमित्येवं स्वरूपम्, न तु घटविषयकज्ञानात्मकस्वविषयकज्ञानवानहमित्येवंस्वरूपमिति तत्र ज्ञाने घटविषयकत्वग्रहेऽपि स्वस्य ज्ञानविषयत्वाग्रहात्, नहि स्वं स्वविषयकं

भवतीति स्वस्य स्वाविषयत्वेन स्वविषयत्वाविषयत्वात्, स्वस्य स्वविषयत्वविषयकत्वे वा घटज्ञानज्ञानवानहमित्याकार उक्तज्ञानस्य प्रसज्येत ।

किञ्च, घटमहं जानामीति ज्ञाने घटात्मकविषयरूपकर्मण आत्मरूपकर्तुर्ज्ञानलक्षणक्रियाया भानं भवतीति कर्म-कर्तृ-क्रियात्मकत्रिपुटीप्रत्यक्षस्वरूपे तस्मिन् परसमवेतक्रियाजन्यफलशालित्वं करणव्यापारविषयत्वं वा विषयस्य कर्मत्वम्, क्रियायाः कृतेर्वा समवायित्वलक्षणमात्मनः कर्तृत्वम्, धात्वर्थत्वं कृतिजन्यत्वं वा ज्ञानस्य क्रियात्वमयोग्यत्वान्न भासत इति न तादृशत्रिपुटीप्रत्यक्षात् स्वसंविदितत्वसिद्धिः, अन्यथा घटं चक्षुषा पश्यामीति व्यवहारात् करणविषयत्वमपि सिध्येत्; किञ्च, ज्ञान-प्रवृत्त्योः समानविषयत्वप्रत्यासत्त्या कार्यकारणभाव इति ज्ञानं यद्यर्थविषयकं न स्यात् तदा ततोऽर्थे प्रवृत्तिर्न भवेदिति प्रवर्तकत्वानुरोधेन ज्ञानस्यार्थविषयकत्वम्, ज्ञानाच्च ज्ञानस्वरूपे न कश्चित् प्रवर्तत इति प्रवर्तकत्वाप्रयोजकेन स्वविषयत्वेन ज्ञानस्यार्थविषयकप्रवृत्तौ कारणत्वं गौरवान्न सम्भवतीत्यर्थमात्रविषयक एव व्यवसाय इत्यभ्युपगमः श्रेयान् ।

अपि च विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वेनेदन्त्वविशिष्टज्ञानवैशिष्ट्यमात्मन्यवगाहमानस्याहमिदं जानामीति ज्ञानस्य विशिष्टबुद्धितया विशेषणीभूतस्य घटज्ञानस्य ज्ञाने सत्येव संभवेन स्वप्रकाशे न तस्य संभवः, ज्ञानस्य पूर्वमज्ञातत्वेन प्रकारत्वानुपपत्तेः; न चाभावत्वस्य पूर्वमज्ञानेऽप्यभावत्वविशिष्टबुद्ध्युत्पत्तेस्तत्र व्यभिचारवारणाय समानवित्तिवेद्यभिन्नविशेषणज्ञानत्वेन विशिष्टबुद्धौ हेतुत्वाज्ज्ञानरूपविशेषणस्य विशेष्यीभूतात्मसमानवित्तिवेद्यतया पूर्वं तज्ज्ञानाभावेऽपि तद्विशिष्टात्मबोधरूपस्य स्वप्रकाशस्य नानुपपत्तिरिति वाच्यम्, यद्धि येन विना न भासते तत् तत्समानवित्तिवेद्यं-तद्ग्रहसामग्रीनियतग्रहसामग्रीकमित्यर्थः, न च ज्ञानाभाने आत्माऽभानमित्यस्ति, ज्ञानाभानेऽपि 'अहं सुखी' इति ज्ञाने आत्मभानस्य सर्वसिद्धत्वात्, अपि च, प्रत्यक्षविषयतायामिन्द्रियसन्निकर्षस्य नियामकत्वान्नियामकीभूतेन्द्रियसन्निकर्षानाश्रयस्य ज्ञानस्य कथं प्रत्यक्षविषयत्वम् ।

न च ज्ञानं स्वात्मकप्रत्यक्षजनकम्, तथा च स्वात्मकप्रत्यक्षाजनकस्य ज्ञानस्य कथं वा स्वात्मकप्रत्यक्षविषयत्वम्, यत्र प्रत्यक्षविषयत्वं तत्र प्रत्यक्षजनकत्वमित्येवं प्रत्यक्षविषयत्व-प्रत्यक्षज्ञानजनकत्वयोर्व्याप्यव्यापकभावेन प्रत्यक्षजनकत्वलक्षणव्यापकाभावात् प्रत्यक्षविषयत्वलक्षणव्याप्याभावस्य तत्र प्राप्तेः; न च संस्कारस्मृत्याद्युपनीततत्तादौ प्रत्यभिज्ञानाद्यात्मकप्रत्यक्षाजनकेऽपि प्रत्यभिज्ञानाद्यात्मक-

प्रत्यक्षविषयत्वमस्तीति व्यभिचारान्नोक्तव्याप्यव्यापकभावः संभवतीति वाच्यम्, अतीता-ऽनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यप्रत्यक्षविषयत्वं यत्र तत्र प्रत्यक्षजनकत्वमित्येवं व्याप्यव्यापकभावे निरुक्तव्यभिचारस्याप्रतिपन्थित्वात्, वस्तुतो लौकिकप्रत्यक्षविषयत्वं यत्र तत्र प्रत्यक्षजनकत्वमित्येव व्याप्यव्यापकभावः, साक्षात्करोमीत्यनुभवसिद्धविषयताया एव लौकिकविषयतात्वेन तत्तां साक्षात्करोमीत्यनुभवाभावात् तत्तानिष्ठविषयता न लौकिकविषयतेति तत्तायां प्रत्यक्षजनकत्वाभावेऽपि न व्यभिचारः, तथा च स्वात्मकप्रत्यक्षाजनके स्वस्मिन्नौकिकसाक्षात्कारविषयता न स्यात्, तेनातीतानागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यप्रत्यक्षविषयत्वं यत्र तत्र प्रत्यक्षजनकत्वमिति नियमे विद्यमानत्वरूपसामान्यलक्षणप्रत्यासत्तेरतीतानागतगोचरसाक्षात्कारजनकप्रत्यासत्तित्वाभावात् तज्जन्यस्य विद्यमानत्वेन रूपेण सकलविद्यमानप्रत्यक्षस्यातीतानागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यप्रत्यक्षस्य विषयत्वं सकलविद्यमानात्मकविषये समस्ति न तत्र प्रत्यक्षजनकत्वमिति व्यभिचारः स्यात् तद्वारणायोक्तनियमे अतीतानागतत्वस्थानेऽजनकत्वनिवेशस्यावश्यकत्वे प्रत्यासत्त्यादिभागमपहायाजनकविषयसाक्षात्कारान्यप्रत्यक्षविषयत्वं यत्र तत्र प्रत्यक्षजनकत्वमित्येवं नियमस्य कल्पने स्वात्मकप्रत्यक्षे ज्ञानस्याजनकत्वेन ज्ञानस्य प्रत्यक्षमजनकविषयसाक्षात्कार एव तदन्यो न भवतीति निरुक्तप्रत्यक्षविषयत्वं तत्र नास्तीति प्रत्यक्षाजनकत्वेऽपि नोक्तनियमहानिरिति तत्र स्वात्मकप्रत्यक्षविषयता न बाधितेत्युक्तावपि न क्षतिः। किञ्च, लाघवादिन्द्रिययोग्यतावच्छेदकं लौकिकविषयत्वमेव, तच्च ज्ञाने समस्तीति ज्ञानमिन्द्रिययोग्यमभ्युपगन्तव्यम्, बाह्येन्द्रियव्यापारमन्तरेणाप्यनुभूयमानत्वान्न तद् बाह्येन्द्रिययोग्यमिति परिशेषान्मनोग्राह्यत्वसिद्धौ न स्वप्रकाशत्वम्; किञ्च, सर्वज्ञानानां स्वप्रकाशत्वं भवद्भिरिष्यते, तथा चानुमित्यादिकमपि विषयांशे परोक्षरूपं स्वांशे प्रत्यक्षरूपमिति प्रत्यक्षत्वाभाववति वह्न्यादिविषयकत्वविशिष्टानुमितिस्वरूपेऽनुमितित्वं वर्तते, अनुमितित्वाभाववति घटादिप्रत्यक्षे प्रत्यक्षत्वं वर्तते इत्येवं परस्पराभावसामानाधिकरण्यं स्वविषयकानुमितिस्वरूपे प्रत्यक्षत्वमनुमितित्वं चास्तीत्येवमेकाधिकरणवृत्तित्वमित्येवमनुमितित्वादिना साङ्कर्यात् प्रत्यक्षत्वं जातिर्न स्यात्; न च स्वविषयत्वे ज्ञानानपेक्षत्वं प्रत्यक्षत्वमुपाधिरेव न तु जातिः, उपाधेश्च साङ्कर्यं न बाधकमिति वाच्यम्, एकत्र ज्ञानापेक्षानपेक्षयोर्विरोधात्; न च भ्रमे धर्मविषयकत्वावच्छेदेन दोषापेक्षत्वं

धर्मिविषयकत्वावच्छेदेन दोषानपेक्षत्वमित्येवमवच्छेदकभेदेनोभयोरेकत्र समावेशोपपत्तेर्यथा न विरोधस्तथाऽनुमित्यादावपि वह्न्यादिविषयकत्वावच्छेदेन व्याप्त्यादिज्ञानापेक्षा स्वविषयकत्वावच्छेदेन तदनपेक्षेत्येवमवच्छेदकभेदेनोभयोरेकत्र समावेशोपपत्तेर्न विरोध इति वाच्यम्, दोषापेक्षे भ्रमे तदनपेक्षानभ्युपगमात् धर्म्यंशे स्वभावादेव भ्रमस्याभ्रमत्वात्।

किञ्च, ज्ञानजन्यतानवच्छेदकं यत्किञ्चिज्जन्यतावच्छेदकं यद्विषयत्वं तदवच्छेदेन तस्य प्रत्यक्षत्वम्, यथा चक्षुरादिजनिते घटादिप्रत्यक्षे घटादिविषयत्वं ज्ञानजन्यतानवच्छेदकमथ च चक्षुरादीन्द्रियजन्यतावच्छेदकम्, अतो घटादिविषयत्वावच्छेदेन घटादिज्ञानस्य प्रत्यक्षत्वं भवति, वह्न्यनुमित्यादौ तु वह्निविषयत्वं यद्यपि किञ्चिज्जन्यतावच्छेदकं तथाऽपि व्याप्त्यादिज्ञानजन्यतावच्छेदकत्वान्न ज्ञानजन्यतानवच्छेदकमिति न वह्न्यनुमित्यादेर्वह्निविषयत्वावच्छेदेन प्रत्यक्षत्वम्, तथा च स्वप्रकाशवादे ज्ञानमात्रस्य यत् स्वविषयत्वं तत् ज्ञानजन्यतानवच्छेदकमपि न किञ्चिज्जन्यतावच्छेदकमिति न स्वविषयत्वावच्छेदेन ज्ञानस्य प्रत्यक्षत्वं स्यात्; न च ज्ञानसामग्रीतो जायमाने ज्ञानत्वावच्छिन्ने स्वविषयत्वं समस्तीति स्वविषयकज्ञानत्वावच्छिन्नं प्रत्येव ज्ञानसामग्र्याः कारणत्वाज्ज्ञानसामग्रीजन्यतावच्छेदकं स्वविषयत्वमिति वाच्यम्, ज्ञानत्वावच्छिन्नं प्रत्येव ज्ञानसामग्र्याः कारणत्वेन ज्ञानत्वस्यैव केवलस्य ज्ञानसामग्रीजन्यताऽवच्छेदकत्वात्, प्रत्यक्षादिज्ञानविशेषसामग्रीजन्यता प्रत्यक्षादिज्ञानविशेष एव वर्तते, स्वविषयत्वं तु ज्ञानमात्रे वर्तत इत्यतिप्रसक्तत्वेनान्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वमिति नियमेन ज्ञानविशेषसामग्रीजन्यतावच्छेदकत्वस्याप्यभावात्; न च वित्तेरवश्यवेद्यत्वात् स्वप्रकाशत्वम्, वस्तुसत्त्वे तज्ज्ञानमेव प्रमाणमिति यन्न ज्ञायते तन्नास्तीति ज्ञानाधीनमेव वस्तुसत्त्वमिति घटज्ञानस्य घटज्ञानज्ञानतः सत्त्वम्, तस्यापि तज्ज्ञानतः सत्त्वमिति परप्रकाशे यज्ज्ञाने विश्रान्तिः, अर्थाद् यज्ज्ञानस्य ज्ञानं न जातं तस्य ज्ञानस्य ज्ञानाभावात् तदधीनसत्त्वाभावे तद्विषयीभूतज्ञानस्यासत्त्वमेवं तज्ज्ञानविषयस्याप्यसत्त्वमित्येवमाद्यव्यवसायलक्षणज्ञानस्याप्यसत्त्वतस्तद्विषयस्याप्यसत्त्वमापद्यत इत्यतो वित्तेरवश्यवेद्यत्वस्याभ्युपगन्तव्यस्य रक्षणार्थं स्वप्रकाशत्वं स्वीकरणीयमिति वाच्यम्; सर्वासां वित्तीनां ज्ञानज्ञानत्वेनावश्यवेद्यत्वस्य स्वप्रकाशत्वं विनाऽप्युपपत्तेः, परप्रकाशे तस्यापि परस्यान्येन प्रकाशस्तस्याप्यन्येन प्रकाश इत्येवमनवस्थानं स्यात् तत्परिहाराय स्वप्रकाश आस्थेय इति चेत्? न–

'ज्ञानं न परप्रकाश्यम्, अनवस्थापादकत्वात्, यद् यथाऽनवस्थापादकं तत् तथा न भवति, यथा गन्धो न गन्धवान्' इत्येवं परप्रकाश्यत्वबाधे 'ज्ञानं स्वप्रकाशं परप्रकाश्यत्वाभावे सति प्रकाशमानत्वाद्, यन्नैवं तन्नैवं यथा घटः' इत्येवं परिशेषानुमानस्यैव स्वप्रकाशत्वसाधकतया तदनुमितिस्वप्रकाशताया अप्युक्तदिशाऽनुमानान्तरलभ्यतयाऽनवस्थासाम्यात् । विषयान्तरसञ्चारादिना विषयान्तरविषयकज्ञानादिना स्वप्रकाशत्वानुमितिविशेष्यकस्वप्रकाशत्वानुमिति-तद्विशेष्यकस्वप्रकाशत्वानुमित्याद्यनवस्थितिधारायाः प्रतिबन्धकीभूतेनानवस्था-भङ्गो यथा स्वप्रकाशपक्षे तथा परप्रकाशेऽपीति न स्वप्रकाशप्रत्यक्षमप्यात्मन इत्यत आह—

आत्मनाऽऽत्मग्रहोऽप्यत्र, तथानुभवसिद्धितः ।
तस्यैव तत्स्वभावत्वान्न च युक्त्या न युज्यते ॥ ८४ ॥

आत्मनेति-इत्थं चेदं पद्यमवतारितं श्रीमद्भिर्यशोविजयोपाध्यायैः । श्रीमद्भिर्हरिभद्रसूरिभिस्तु "न चास्य स्वसंविदितत्वं विरुध्यत इत्येतदाह-आत्मनेत्यादि" इत्येवमवतारितम् । अत्र **न च युक्त्येति** उपाध्यायसम्मतः पाठः, **न तु युक्त्येति** हरिभद्रसूरिसम्मतः पाठः, अर्थे तु न विशेषः । **आत्मना** ज्ञानस्वरूपेण, **आत्मग्रहोऽपि** ज्ञानस्वरूपग्रहणमपि, **अत्र** प्रकृताहंप्रत्यये, घटमहं जानामीति प्रत्यये कर्तृ-कर्म-क्रियागोचरत्वमपीति पर्यवसितार्थः, अस्य 'न च युक्त्या न युज्यते' इत्यनेनान्वयः, अत्र हेतुः-**तथाऽनुभवसिद्धित** इति-स्वसंविदितत्वानुभवसिद्धेत्यर्थोऽस्योपाध्यायपरिशीलितः, अहंप्रत्ययवेदना-दिति तु हरिभद्रसूरिसम्मतः । कथं ज्ञानस्यैव स्वसंविदितत्वं नान्यस्येत्यपेक्षाया-माह-**तस्यैवेति**-आत्मन एवेत्यर्थः, **तत्स्वभावत्वात्** कर्तृ-कर्म-क्रियाऽवगाहि-ज्ञानजननशक्तिमत्त्वात् । आत्मन उक्तशक्तिमत्त्वं स्वकपोलकल्पितमेव न तु युक्तिसिद्धमित्यत आह-**न चेति**-युक्त्या न युज्यते इति न चेत्येवमन्वयः, **युक्त्या** तर्केण, **न युज्यते** न साध्यते, नञ्द्वयस्य प्रकृतार्थावधारणपरत्वमिति तर्केण साध्यत एवेत्यर्थः । उद्दण्डो नैयायिको वावदूकः स्वयुक्तिजालेन परं पराभवितुमिच्छुः कथायां प्रविशन् परस्य प्रतीक्षां 'किमिदं परो वक्ति यत्खण्ड-नेनाहमेनं निग्रहीष्यामि' इत्यभिप्रायेण भवानेव पूर्वं स्वमतं प्रकटयतु, अनन्तरमहं

स्वमतमभिधास्ये' इत्येवंरूपां कारयति, तथा प्रमाणाग्रगण्यजैनागमबद्धबुद्धिः स्याद्वाद्यपि सर्वहितेच्छुः 'ज्ञानस्य परप्रकाश्यत्वं युक्त्यपेतं स्वकदाग्रहगृहीतं परित्यज्य स्वसंविदितत्वं स्वीकरोतु' इत्येवंरूपां शिक्षां नैयायिकाय दातुमर्हति, तदर्थं युक्तिस्तोमाभिधानं ज्ञानस्य स्वसंविदितत्वे आवश्यकम्, तदुक्तमुपाध्यायैः—

"यथा कथायां प्रविशन् परस्य नैयायिकः कारयति प्रतीक्षाम् ।
तथा यथार्थागमबद्धबुद्धिर्दास्यामि नास्यापि किमेष शिक्षाम् ॥ १ ॥" इति ।

ज्ञानस्य स्वविषयत्वे युक्तिगुम्फनमित्थम्, तथाहि-'घटमहं जानामि, पटमहं जानामि' इति ज्ञानं सर्वलोकानुभवसाक्षिकं नापलपितुं शक्यते, तत्र प्रथमं चक्षुरादीन्द्रियसन्निकर्षाद् 'अयं घटः' इति ज्ञानम्, तस्य मनस्सन्निकर्षाद् 'घटमहं जानामि' इति ज्ञानम्, तस्यापि मनस्सन्निकर्षाद् 'घटज्ञानमहं जानामि' इत्येवमभ्युपगमे पूर्वापरज्ञानकल्पनागौरवं स्याद्, अतश्चक्षुरादीन्द्रियसन्निकर्षादुपजायमानं प्राथमिकज्ञानमेव 'घटमहं जानामि, घटज्ञानमहं जानामि' इत्युभयाकारं कर्तृ-कर्म-क्रियाऽवगाहि सत् स्वविषयत्वे प्रमाणम्, एतेन 'स्वविषयत्वे सिद्धे पूर्वापरज्ञानकल्पनागौरवसहकृतं ज्ञानगोचरताया ग्राहकं प्रत्यक्षं स्वप्रकाशतायां प्रमाणम्, तेन च मानेन तस्य स्वविषयतासिद्धिरित्यन्योऽन्याश्रयः' इत्यपास्तम्, ज्ञानविषयत्वेनानुभूयमानस्य 'इदं ज्ञानं जानामि' इति ज्ञानस्यार्थविषयत्वेनानुभूयमानप्राच्यज्ञानेन समं लाघवादैक्यसिद्धौ स्वप्रकाशतासिद्धेः, घटविषयकज्ञानस्य 'घटमहं जानामि' इत्यनुभवः पूर्वकाले, तदुत्तरकाले च घटविषयकज्ञानविषयकज्ञानस्य 'घटज्ञानमहं जानामि' इत्यनुभव इत्येवं कालभेदेनोभयानुभवस्य शपथप्रत्यायनीयत्वात्, नन्वेवं ज्ञानस्य 'इदं जानामि, इदं ज्ञानं जानामि' इत्युभयाकारत्ववद् 'इदं ज्ञानज्ञानं जानामि, इदं ज्ञानज्ञानज्ञानं जानामि' इत्याद्याकारत्वमपीति घटज्ञानज्ञानाद्यनन्ताकारत्वं प्रसज्येतेति चेत्? न-घटज्ञानज्ञानादिकमपि घटज्ञानं भवत्येव विषयविनिर्मुक्तस्य केवलज्ञानस्य भानासम्भवाद्, अतो घटज्ञानज्ञानादिविषयताया अपि वस्तुतो घटज्ञानविषयताऽनतिरेकात्, एकमेव ज्ञानं घटज्ञानविषयत्वेन विवक्षितं सद् 'घटज्ञानं जानामि' इति व्यपदिश्यते, घटज्ञानज्ञानविषयत्वेन विवक्षितं सद् 'घटज्ञानज्ञानं जानामि' इति व्यपदिश्यते, इत्येवमभिलापभेदस्य विवक्षाधीनत्वात्, तत्र चात्मनो ज्ञानाश्रयत्वरूपं ज्ञानं प्रति कर्तृत्वम्, घटादेर्विषयस्य

विषयत्वरूपं ज्ञानक्रियाकर्मत्वम्, स्वस्य चात्मनि विशेष्ये प्रकारत्वात्मकविशेषणत्वरूपं क्रियात्वं च योग्यत्वाद् भासते, यद्यपि चक्षुषा घटमहं जानामीत्येवमप्यभिलापो भवति तथापि चक्षुरादिकरणस्यायोग्यत्वात् तदंशे तस्य न साक्षात्त्वमिति किमनुपपन्नम्? ज्ञानस्य परेणैव प्रकाश इत्यभ्युपगन्तॄणां नैयायिकादीनां मते च ज्ञानस्य प्रत्यक्षानुपपत्तिः, 'घटमहं जानामि' इत्यनुव्यवसायात्मकतत्प्रत्यक्षक्षणे 'अयं घटः' इति ज्ञानस्वरूपव्यवसायलक्षणविषयस्याभावात्, प्रत्यक्षं प्रति विषयस्य कारणत्वेन व्यवसायरूपविषयात्मककारणाभावे अनुव्यवसायात्मकतत्प्रत्यक्षरूपकार्यासंभवात्, न च प्रथमक्षणे 'अयं घटः' इति व्यवसायस्ततो द्वितीयक्षणे ज्ञानत्वस्य निर्विकल्पकप्रत्यक्षं ततस्तृतीयक्षणे ज्ञानत्वविशिष्टज्ञानप्रत्यक्षं व्यवसायविषयकं भविष्यति तदानीं व्यवसायरूपविषयस्याभावेऽपि तदव्यवहितपूर्वक्षणे सत्त्वात्, कार्यान्यवहितपूर्वक्षणवृत्तित्वादेव तस्य कारणत्वोपपत्तेः, ततो ज्ञानत्वविशिष्टज्ञानात्मकविशेषणज्ञानादात्मविशेष्यकज्ञानत्वविशिष्टज्ञानप्रकारकं 'घटमहं जानामि' इति ज्ञानत्वविशिष्टवैशिष्ट्यावगाहिज्ञानम्, विशेषणं च न विशिष्टप्रत्ययहेतुः, तत्तां विनाऽपि 'सोऽयं घटः' इति प्रत्यभिज्ञानस्य तत्ताविशिष्टबुद्धिरूपस्योत्पादात्, एवं च तदानीं घटविषयकव्यवसायलक्षणविशेषणाभावेऽपि तद्विशिष्टबुद्धेर्नानुपपत्तिरिति वाच्यम्, प्रत्यक्षे विषयस्य स्वसमयवृत्तित्वेनैव हेतुत्वात्, अन्यथा विनश्यदवस्थघटचक्षुस्सन्निकर्षाद् घटनाशक्षणे घटप्रत्यक्षप्रसङ्गात्, तथा च ज्ञानत्वनिर्विकल्पकज्ञानानन्तरक्षणे विषयस्य व्यवसायस्याभावेन तदा तत्प्रत्यक्षानुपपत्तेः, तदानीं ज्ञानस्य व्यवसायलक्षणस्यातीतत्वेन जानामीति वर्तमानत्वज्ञानानुपपत्तेश्च; न च तत्र ज्ञाने विशेषणतया भासमानं वर्तमानत्वं वर्तमानस्थूलकालवृत्तित्वं, न तु वर्तमानक्षणवृत्तित्वं, क्षणस्यातीन्द्रियत्वेन प्रत्यक्षे भानासम्भवादिति वाच्यम्, प्रत्यक्षे प्रकारविधया तस्य भानासम्भवेऽपि संसर्गविधया तद्भानसंभवात्, अत एव सम्बन्धप्रत्यक्षे यावत्सम्बन्धिप्रत्यक्षं कारणमिति समवायसम्बन्धिनोऽतीन्द्रियस्यापि सम्भवेन समवायस्य न प्रत्यक्षमित्यभ्युपगन्तॄवैशेषिकमते प्रत्यक्षे प्रकारतया समवायस्याभानेऽपि 'रूपवान् घटः' इत्यादिविशिष्टबुद्धौ संसर्गतया भानमिति।

किञ्च, यथा घटज्ञानप्रकारकात्मविशेष्यकज्ञानमहं घटज्ञानवानिति भवति तथा समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेनात्मप्रकारकघटज्ञानविशेष्यकज्ञान-

मपि घटज्ञानमिति भवत्येव, नेच्छामात्रेण तस्यापह्नवः शक्यः कर्तुम्, विशिष्टबुद्धौ विशेषणस्याकारणत्वेऽपि विशिष्टप्रत्यक्षे विशेष्यं कारणं सर्वसम्मतमिति मयि घटज्ञानमित्यत्र विशेष्यस्य घटज्ञानरूपव्यवसायस्य ज्ञानत्वनिर्विकल्पकानन्तरक्षणेऽभावात् कथं तत्प्रत्यक्षम्? । एतेन 'ज्ञानत्वनिर्विकल्पकजन्यज्ञाने निर्विकल्पककालवृत्तिव्यवसायलक्षणज्ञानलक्षणप्रत्यासत्त्या घटस्य भानसंभवात् तस्मिन् ज्ञाने तदानीमेवोत्पन्ने वर्तमानत्वस्य सतो भानमतो घटमहं जानामीत्यनुभवोपपत्तिः' इत्युक्तावपि न निस्तारः, ज्ञानत्वनिर्विकल्पानन्तरक्षणे विनष्टस्य व्यवसायस्य प्रत्यक्षानुपपादनात्, तदानीमुत्पन्नज्ञानानन्तरज्ञानमादाय घटमहं जानामीत्यभिलापस्य सम्भवेऽपि तज्ज्ञानस्य घटचक्षुस्सन्निकर्षजन्यत्वेन घटप्रत्यक्षानात्मकतया तद्विषयकज्ञानमादाय घटं पश्यामीति प्रयोगानुपपत्तेश्च, एतेन 'यदि च जात्यतिरिक्तस्य किञ्चिद्धर्मप्रकारेण भानमिति नियमात् 'जानामि' इति ज्ञानं ज्ञानत्वविशिष्टवैशिष्ट्यावगाह्येव, न तु ज्ञानत्वं ज्ञाने विशेषणीयतयाऽनवगाहमानमेव ज्ञानवैशिष्ट्यावगाहि, येन ज्ञान-ज्ञानत्वयोर्निर्विकल्पकमपि ज्ञानात्मकविशेषणस्य ज्ञानं भवत्येव ततो ज्ञानवैशिष्ट्यावगाहि जानामीति ज्ञानं निर्विकल्पकानन्तरं संभवेदपि, विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति च विशेषणतावच्छेदकप्रकारकनिश्चयो हेतुरिति जानामीति ज्ञानत्वविशिष्टज्ञानविशिष्टबुद्धौ ज्ञानत्वप्रकारकज्ञानविशेष्यकज्ञानमेव हेतुः, निर्विकल्पकं च न ज्ञानत्वप्रकारकज्ञानविशेष्यकमिति न ततस्तदनन्तरक्षणे जानामीति बुद्धिः, तदा ज्ञानत्वनिर्विकल्पानन्तरं 'मयि ज्ञानम्' इत्यात्मप्रकारकज्ञानविशेष्यकग्रहे सति तदात्मकज्ञानलक्षणप्रत्यासत्त्या जानामीति ज्ञानांशेऽलौकिकप्रत्यक्षं सूपपादम्' इत्यपास्तम्; घटचाक्षुषरूपव्यवसायस्य नष्टत्वेऽपि तदंशेऽलौकिकाज्जानामीति प्रत्यक्षात् पश्यामीत्यप्रयोगात्, पश्यामीति विलक्षणविषयतयाऽनुव्यवसाये विलक्षणविषयतया चाक्षुषस्य नियामकत्वेन विलक्षणविषयतया चाक्षुषस्याभावे विलक्षणविषयतयाऽनुव्यवसायस्यानुपपत्तेः । न चातीन्द्रियस्याकाशस्य चाक्षुषप्रत्यक्षं भवति तथापि चाक्षुषत्वांशे भ्रमजनकदोषान्निद्रायाम् 'आकाशं पश्यामि' इति ज्ञानमुपजायते, तच्च ज्ञानमाकाशविषयकज्ञाने चाक्षुषानात्मके दोषाच्चाक्षुषत्वावगाहीति तदंशे भ्रमात्मकम्, तथा घटं पश्यामीति ज्ञानमपि घटविषयकज्ञाने चाक्षुषभिन्ने दोषाच्चाक्षुषत्वावगाहीति तदंशे भ्रमात्मकमिति वाच्यम्, घटं पश्यामीत्यत्र सर्वांशे प्रमाया एवानुभवात्; तदिदमुक्तं स्याद्वादरत्नाकरे श्रीदेव-

सूरिभिः-किञ्च, इन्द्रियजं प्रत्यक्षं सन्निकृष्टे विषये प्रवर्तते, अतीतक्षणवर्तिनश्च ज्ञानस्य मनोलक्षणेन्द्रियसन्निकर्षो न युज्यते, ततः कथं प्राचीनज्ञाने मानस-प्रत्यक्षवार्ताऽपि ?' इति । 'व्यवसायनाशक्षणोत्पन्नव्यवसायान्तरे ज्ञानत्वविशिष्ट-बुद्धिः' इत्यप्यत एव निरस्तम्, तद्धेतोश्चक्षुस्सन्निकर्षादेस्तदानीं नियतसन्निधि-कत्वाभावात्, अनुमित्यात्मकज्ञानस्यानुमिनोमीत्यनुव्यवसायः परप्रकाशेनोपपाद-यितुं शक्यते, यतः प्रथमक्षणेऽनुमितिस्तदनन्तरमनुमितित्वनिर्विकल्पकं तदनन्तरं पुनरनुमितिर्न सम्भवति तद्धेतोर्व्याप्तिज्ञानादेस्तदव्यवहितपूर्वक्षणेऽभावात्, अनुमितिभिन्ने तदानीं जायमाने ज्ञाने चानुमितित्वं नास्ति, अनुमिनोमीति ज्ञानं च सर्वांशे प्रमात्मकमेवेत्यतस्तदनुमितित्वांशे भ्रमरूपमित्यपि वक्तुमशक्यम्, पूर्वव्यवसायविशेष्यकज्ञानस्य कथमप्यनुपपत्तेश्च । एतेन 'ज्ञानं ज्ञानत्वं च निर्विकल्पके भासते, ततो ज्ञानत्ववैशिष्ट्यं ज्ञाने, ज्ञानवैशिष्ट्यं चात्मनि भासते इति 'विशेष्ये विशेषणं तत्र च विशेषणम्' इति रीत्या घटमहं जानामीति ज्ञानप्रत्यक्षं ज्ञानत्वोपलक्षितज्ञानवैशिष्ट्यावगाह्येव न तु ज्ञानत्वविशिष्टज्ञानवैशि-ष्ट्यावगाहि, तेन तत्र न ज्ञानत्वप्रकारकज्ञानापेक्षेति तद्विनाऽपि तत्सम्भवति' इति निरस्तम्, एवं सति विशेषणतावच्छेदकप्रकारकनिश्चयानपेक्षस्य तस्य 'ज्ञानं घटीयं नवा' इति संदेहेऽप्यापत्तेश्च ।

यत्तु 'ज्ञानं ज्ञानत्वं च विशिष्टज्ञानविषय एव, अनुव्यवसायस्य विषयरूप-विशेषणविषयकव्यवसायसाध्यत्वेन विशिष्टज्ञानसामग्रीसत्त्वात्, ज्ञानत्वमपि तत्र भासते सामग्रीसत्त्वात्, अंशे तत् सप्रकारकं निष्प्रकारकं चेति नृसिंहा-कारम्, तत्रैव विशिष्टं ज्ञानत्ववैशिष्ट्यं च भासते, अनुमित्यादौ च न तथा, अनु-व्यवसायेऽनुमितित्वाभावात्, इति 'वस्तुतस्तु' इति कृत्वा चिन्तामणिकृतोक्तम्; तदसत्-सर्वत्राभावज्ञानव्यतिरिक्तप्रत्यक्षस्थले निर्विकल्पकप्रत्यक्षानन्तरमेव विशिष्टप्रत्यक्षम्, केवलमभावप्रत्यक्षस्थल एवाभावा-ऽभावत्वयोर्निर्विकल्पकं विनाऽपि विशिष्टप्रत्यक्षम्, ततः सार्वत्रिकप्रकारोपजीवनेन ज्ञानप्रत्यक्षस्थलेऽपि ज्ञान-ज्ञानत्वयोर्निर्विकल्पकानन्तरमेव विशिष्टप्रत्यक्षस्वरूपं ज्ञानज्ञानं न्यायप्राप्तं तत् परित्यजतश्चिन्तामणिकृतः सार्वत्रिकप्रकारं विना क्वचित्कप्रकाराभिधानस्य युक्तिबहिर्भूतत्वेन प्रयासमात्रत्वात्, यथा चाभावप्रत्यक्षस्य घटत्वाद्यन्यतम-विशिष्टविषयकत्वनियमो येन किञ्चिदभावप्रत्यक्षं घटत्वाद्यन्यतमविशिष्टमविषयी-

कृत्य नोत्पद्यतेऽतो नाभावाभावत्वयोर्निर्विकल्पकप्रत्यक्षम्, तथा ज्ञानप्रत्यक्षं विषयितया किञ्चिद्विषयविशिष्टज्ञानविषयकमेव भवतीति नास्ति नियमः, येन ज्ञान-ज्ञानत्वयोर्निर्विकल्पकप्रत्यक्षं विनाऽपि ज्ञानविशिष्टप्रत्यक्षोद्भवो भवेत्, यथा च स्वासाधारणसुखत्वादिधर्मव्यतिरिक्तविशेषणमविषयीकृत्यापि 'अहं सुखी, अहं दुःखी' इत्याद्याकारकं सुखादिप्रत्यक्षं समुद्भवति तथा बाह्यविशेषलक्षणं विषयमविषयीकृत्यापि 'अहं ज्ञानवान्' इति विषयविनिर्मुक्तप्रतीतेः सार्वजनीनत्वात्, यत्किञ्चिद्विषयविशिष्टज्ञानप्रत्यक्षं प्रति मनःसंयुक्तसमवायलक्षणेन्द्रियसन्निकर्षस्य कारणत्वमतो विषयविनिर्मुक्तज्ञानप्रत्यक्षं न भवतीति न वाच्यम्, सन्निकर्षकार्यतायां विषयान्तर्भावे गौरवात्, यच्चोक्तम्—अंशे तत् स्वप्रकारकं निष्प्रकारकं चेति नरसिंहाकारमिति, तत् तदा शोभेत यद्यंशभेदरूपापेक्षाभेदेन सप्रकारकत्व-निष्प्रकारकत्वरूपविरुद्धधर्माध्यासमभ्युपेत्य नरसिंहाकारं ज्ञानमभ्युपेयते, तथा विषयोऽपि अपेक्षाभेदेन विरोधिधर्मद्वयसमन्वितोऽभ्युपेयते, तथा च विषयोऽपि अपेक्षाभेदेन विरोधिधर्मद्वयसमन्वितोऽभ्युपेयेत, कामं तथाऽस्त्वित्येवं वचनामृतमुद्गिरतस्तव स्याद्वादिनो न वादे क्वचिदपि कस्मादपि भयमिति। 'नृसिंहाकारज्ञाने ज्ञानत्व-घटत्वप्रकारकत्वोभयाश्रयज्ञानवैशिष्ट्यधीर्न स्यात्' इति प्रसञ्जनं तु समाहितं मिश्रेण—'विषयनिरूप्यं हि ज्ञानं, न तु विषयपरम्परानिरूप्यम्' इत्यादिना। यत्तूक्तं परप्रकाशवादिना—'अर्थविषयकत्वेनैव ज्ञानस्य प्रवर्तकत्वं, न तु स्वविषयकत्वेनापि गौरवात्' इति, तत्र हि न नो विप्रतिपत्तिः, प्रवृत्त्यविषयस्वस्वरूपात्मकाधिकविषयकत्वेऽपि च व्यवसायस्य प्रवृत्तिजनकत्वमविरुद्धम्, स्वविषयकस्यापि व्यवसायस्य प्रवृत्तिजनकतावच्छेदकं यदिष्टतावच्छेदकधर्मप्रवृत्तिविषयवैशिष्ट्यावगाहिज्ञानत्वं तद्वत्त्वेन प्रवृत्तिहेतुत्वोपपत्तेः, न चात्र प्रमेयमिति ज्ञानमपि प्रवर्तकं स्यात् तस्यापि प्रमेयत्वेन रूपेणेष्टतावच्छेदकधर्ममवगाहमानस्येष्टतावच्छेदकप्रवृत्तिविषयवैशिष्ट्यावगाहित्वादिति वाच्यम्, इष्टतावच्छेदकस्य स्वभिन्ननिष्ठधर्माप्रकारकत्वेन विशेषणीयत्वात्, अत्र प्रमेयमिति ज्ञाने भासमानस्य रजतत्वादिरूपेष्टतावच्छेदकस्य स्वभिन्ननिष्ठप्रमेयत्वधर्मेणैव भासमानतया तत्र स्वभिन्ननिष्ठधर्माप्रकारकत्वासम्भवात्, न चेष्टतावच्छेदकप्रकारकज्ञानस्य मुख्यविशेष्यतया प्रवृत्तिहेतुत्वम्, तथा च स्वप्रकाशे व्यवसायो घटमहं जानामीत्येवंरूपो मुख्यविशेष्यतयाऽऽत्मनि वर्तते,

न तु घटे, अतस्तत आत्मनि प्रवृत्तिः प्रसज्येत, घटे च प्रवृत्त्यनुपपत्तिः स्यादतो न घटज्ञानं स्वप्रकाश इति वाच्यम्, तद्रजतमिदं द्रव्यमिति समूहालम्बनात्मकज्ञानमपि तत्राविशिष्टे रजतत्वप्रकारकं द्रव्यत्वप्रकारकेदन्त्वावच्छिन्नविशेष्यकं चेति तस्य मुख्यविशेष्यतया पुरोवर्तिनि रजते सत्त्वात् ततस्तत्र प्रवृत्तिः स्यात्, तद्वारणाय प्रवृत्तिविषयविशेष्यकत्वावच्छेदेनेष्टतावच्छेदकप्रकारकत्ववज्ज्ञानस्य प्रवृत्तिहेतुत्वं वाच्यम्, निरुक्तसमूहालम्बनज्ञानं च न प्रवृत्तिविषयविशेष्यकत्वावच्छेदेनेष्टतावच्छेदकप्रकारकत्ववदतस्ततो न प्रवृत्त्यापत्तिः, किन्तु यथेदं रजतमिति ज्ञानात् प्रवृत्तिस्तथाऽस्मिन् रजतत्वमिति ज्ञानादपि प्रवृत्तिर्भवतीत्यत इष्टतावच्छेदकविशेष्यकत्वावच्छेदेन प्रवृत्तिविषयकप्रकारकत्ववज्ज्ञानस्यापि प्रवृत्तिहेतुत्वं विनिगमनाविरहाद् वाच्यम्, तयोः पृथग्रूपेण कारणत्वं व्यभिचारान्न संभवतीत्यत इष्टतावच्छेदकप्रवृत्तिविषयवैशिष्ट्यावगाहित्वेनैकरूपेण हेतुत्वस्यौचित्यात्, उक्तरूपस्योभयसाधारणत्वात्, यदा चोक्तरूपेणेष्टतावच्छेदकविशेष्यकप्रवृत्तिविषयप्रकारकज्ञानमपि प्रवृत्तौ हेतुः, तदा तस्य मुख्यविशेष्यतयेष्टतावच्छेदक एव सत्त्वं न प्रवृत्तिविषय इति न मुख्यविशेष्यत्वं कारणतावच्छेदकसम्बन्धः संभवतीत्यात्मनिष्ठप्रत्यासत्त्यैव तयोः कार्यकारणभाव इति स्वप्रकाशेऽपि व्यवसायस्य प्रवृत्तिजनकत्वं नानुपपन्नमिति ।

यत्तु 'वह्निव्याप्यधूमवत्पर्वतवान् देश' इति परामर्शात् पर्वतो वह्निमानित्यनुमितेरनुदयाद् वह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नमुख्यविशेष्यताकनिश्चयत्वेन परामर्शस्यानुमितिहेतुत्वम्, मुख्यत्वं च विशेष्यतायां प्रकारतानात्मकत्वम्, अनन्तराभासमानसमानाधिकरणैकज्ञानीयविषयत्वयोरभेद इति निरुक्तपरामर्शे पर्वतत्वावच्छिन्नविशेष्यता देशत्वावच्छिन्नविशेष्यतानिरूपिता प्रकारतात्मिकेति न मुख्येति नोक्तपरामर्शस्योक्तकारणतावच्छेदकधर्माक्रान्तत्वमिति नातोऽनुमित्यापत्तिः, एवं च स्वप्रकाशनये परामर्शस्य 'वह्निव्याप्यधूमवत्पर्वतमहं जानामि' इत्याकारकस्य या पर्वतत्वावच्छिन्नविशेष्यता स ज्ञानत्वावच्छिन्नविशेष्यतानिरूपितविषयित्वसम्बन्धावच्छिन्नप्रकारतात्मिकैव वह्निव्याप्यधूमवत्पर्वतस्य विषयितासम्बन्धेन ज्ञाने विशेषणत्वादिति निरुक्तकारणतावच्छेदकधर्माक्रान्तादुक्तपरामर्शादनुमितिर्न स्यादतो ज्ञानातिरिक्तनिष्ठविशेष्यता निरूपितप्रकारतानात्मकत्वलक्षणमेव मुख्यत्वं निवेशनीयमिति गौरवम्' इति, तन्न—स्वप्रकाश्यस्य ज्ञानस्य व्यवसायानुव्यवसायोभयाकारत्वेऽप्यविरोधात्,

अनुव्यवसायाकारे तस्मिन् पर्वतत्वावच्छिन्नविशेष्यताया ज्ञानत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतात्मकत्वेऽपि व्यवसायाकारे तत्र पर्वतत्वावच्छिन्नविशेष्यताया निरुक्तप्रकारतानात्मकत्वेन तामुपादाय निरुक्तकारणतावच्छेदकधर्माक्रान्तात् परामर्शादनुमित्युत्पत्तिसम्भवात्, विभिन्नविषयकप्रत्यक्षानुमितिसामग्र्योरेकदा समवधानेऽनुमितिरेवोपजायते, न तु प्रत्यक्षमिति विभिन्नविषयकप्रत्यक्षं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वं युक्तिसिद्धम्, तथा च परप्रकाशवादिनो नैयायिकस्य मते ज्ञानमानसे वह्न्यनुमितिसामग्र्यादेः प्रतिबन्धकत्वकल्पने महागौरवात्, घटचाक्षुषे सति चाक्षुषसाग्र्यां सत्यां घटचाक्षुषस्य मानसप्रत्यक्षस्वरूपस्यानुव्यवसायस्यानुपपत्तेश्च मानसप्रत्यक्षे बहिरिन्द्रियजन्यप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात्, घटचाक्षुषोत्पत्तिकाले चक्षुर्विषयसंयोगस्य सत्त्वेऽपि चक्षुर्मनोयोगलक्षणचाक्षुषप्रत्यक्षकारणं नास्तीति तद्घटितचाक्षुषप्रत्यक्षसामग्र्यभावादेव तदनन्तरं चाक्षुषस्य मानसमिति कल्पनायां मानाभावात्, तदानीं विलक्षण एव बहिरिन्द्रियेण मनोयोगो यस्य बहिरिन्द्रियजन्यप्रत्यक्षजनकत्वं न भवतीत्यपि कल्पयितुमशक्यम्, घटदर्शनोत्तरमाहत्यैव पटदर्शनात्, तथा चक्षुर्मनोयोगान्तरादिकल्पनयाऽतिगौरवात्। न च स्याद्वादिनोऽपि स्वविषयकत्वनियामकहेतुकल्पने गौरवम्, आलोकस्य प्रत्यक्षे आलोकान्तरानपेक्षत्ववत् स्वभावत एव ज्ञानस्य स्वसंविदितत्वात्। अस्तु वा, स्व-परप्रकाशनशक्तिभेदः, तथापि न गौरवम्, फलमुखत्वात्।

यदपि 'ज्ञानस्य पूर्वमनुपस्थितत्वात् कथं प्रकारत्वम्?' इति, तन्न-तस्यात्मवित्तिवेद्यत्वात्, 'अहं सुखी' इत्यत्रात्मभानेऽपि ज्ञानं न भासते इति नात्मवित्तिवेद्यं ज्ञानमिति न वाच्यम्, 'अहं सुखी' इत्यस्यापि 'अहं सुखं साक्षात्करोमि' इत्याकारत्वेन ज्ञानभानस्य तत्र सद्भावात्, अनभ्यासादिदोषेण तत्र 'सुखं साक्षात्करोमि' इत्यनभिलापात्। प्रत्यक्षविषयतानियामकस्येन्द्रियसन्निकर्षस्य ज्ञानोत्पत्तितः प्राक् ज्ञानेऽभावान्न ज्ञानस्य स्वप्रकाशलक्षणप्रत्यक्षसम्भव इति पराभिप्रेतमपि न सम्यक्, अलौकिकप्रत्यक्षविषयत्वस्यापि प्रत्यक्षविषयतासामान्यान्तर्गताया तस्यालौकिकेन्द्रियसन्निकर्षमन्तरेणापि भावेन व्यभिचारेणेन्द्रियसन्निकर्षस्य प्रत्यक्षविषयतासामान्यनियामकत्वासंभवात्। लौकिकप्रत्यक्षविषयतानियामकत्वमपीन्द्रियसन्निकर्षस्य न संभ-

वति, दोषविशेषप्रभवप्रत्यक्षविषयत्वस्यापि 'शङ्खे पीतत्वं साक्षात्करोमि' इत्यनुभवसिद्धविषयतात्वेन लौकिकविषयतारूपतया तस्येन्द्रियसन्निकर्षमन्तरेणापि भावेन व्यभिचारात्, इन्द्रियसन्निकर्षजन्यप्रत्यक्षविषयतैव लौकिकविषयतात्वेन पराभिप्रेता, ज्ञाने स्वविषयता च नेन्द्रियसन्निकर्षजन्यप्रत्यक्षविषयता, स्वप्रकाशप्रत्यक्षस्येन्द्रियसन्निकर्षाजन्यत्वाद्, एवं च लौकिकप्रत्यक्षविषयतायामिन्द्रियसन्निकर्षस्य नियामकत्वेऽपि तदभावाल्लौकिकप्रत्यक्षविषयतैव ज्ञाने न स्यात्, न तु प्रत्यक्षविषयतासामान्यम्, तत्रेष्टापत्तिरेव स्वप्रकाशवादिनः। नन्वेवं ज्ञाने लौकिकविषयत्वस्याभावे तन्नियम्या 'साक्षात्करोमि' इति धीस्तत्र न स्यात्, न चेयमिष्टापत्तिः, 'ज्ञानं साक्षात्करोमि' इत्यनुभवस्य सर्वजनसिद्धत्वादिति चेत्? न—स्पष्टताख्यविषयतायाः एव साक्षात्करोमीति धीनियामकत्वात्, सा च सम्बन्धविशेषेण स्वप्रतियोग्यावृतज्ञानविषयत्वलक्षणेन विषयनिष्ठस्य प्रत्यक्षप्रतिबन्धकज्ञानावरणापगमस्य शक्तिविशेषस्य वा नियम्या सम्भवत्येव ज्ञाने इति न किञ्चिदनुपपन्नम्; अभेदेऽपि घटाभावे यथा घटाभावस्य विशेषणत्वं तथा ज्ञानेऽपि स्वविषयत्वमनिर्वचनीयात् स्वभावविशेषात्, अनिर्वचनीयस्य स्वभावविशेषस्याख्यातुमशक्यस्यापि प्रत्याख्यातुमशक्यत्वात्।

स्वव्यवहारशक्तत्वं स्वविषयत्वमिति तु न युक्तम्, स्वव्यवहारशक्तस्याप्यात्मनः स्वविषयत्वाभावात्, शक्तेः पदार्थान्तरत्वेनात्माश्रयोद्धारेऽपि तस्या अनन्यथासिद्धनियतपूर्ववर्तित्वज्ञानव्यङ्ग्यत्वेन स्वव्यवहारं प्रत्यनन्यथासिद्धनियतपूर्ववर्तित्वस्य ज्ञाने सति स्वव्यवहारशक्तिमत्त्वस्य ज्ञानं, स्वव्यवहारशक्तिमत्त्वलक्षणकारणतावच्छेदकज्ञाने चानन्यथासिद्धनियतपूर्ववर्तित्वलक्षणकारणत्वस्य ज्ञानमित्येवमन्योऽन्याश्रयाच्च। यत्र प्रत्यक्षविषयत्वं तत्र प्रत्यक्षजनकत्वमिति नियमात् स्वप्रकाशात्मकप्रत्यक्षाजनके स्वस्मिन् तद्विषयत्वं न स्यादित्यपि पराभिप्रेतं न युक्तम्, ईश्वरप्रत्यक्षं नित्यमिति न तज्जनकं गगनादिकं, भवति च तद्विषय इति व्यभिचारेणोक्तनियमासंभवात्। यदि लौकिकविषयत्वेनेन्द्रियग्राह्यत्वं भवेत् तदा ज्ञानस्यापि लौकिकविषयत्वेनेन्द्रियग्राह्यत्वप्रसिद्धौ बहिरिन्द्रियग्राह्यत्वबाधात् परिशेषान्मनोग्राह्यत्वसिद्ध्या स्वप्रकाशत्वं न भवेत्, न चैवम्, शक्तिविशेषेणैवेन्द्रियग्राह्यत्वात्, लौकिकविषयत्वेनेन्द्रियग्राह्यत्वाभावात्, अतीन्द्रिये ज्ञानादाविन्द्रियग्राह्यत्वमेवापाद्यम्, तदापादकस्य शक्ति-

विशेषस्य तत्राभावादेव तदापादनं न संभवतीति, शेषस्यैवेन्द्रियग्राह्यत्वनियामकत्वे लौकिकविषयत्वेनान्यथासिद्धेश्च । एतेन 'ज्ञानमानसानभ्युपगमे धर्मादीनामिव तस्यायोग्यत्वाय मानससाक्षात्कारप्रतिबन्धकत्वकल्पने गौरवम्' इति नव्यमतं निरस्तम्, 'अयोग्यत्वस्य प्रतिबन्धकत्वेऽविश्रामात् स्वरूपायोग्यतयैव तत्त्वात्,' इति यौक्तिकाः ।

स्वप्रकाशनये सर्वेषां ज्ञानानां स्वांशे प्रत्यक्षत्वेनानुमित्यादौ साङ्कर्यात् प्रत्यक्षत्वं जातिर्न स्यादिति त्विष्टापादनरूपत्वान्न दोषाय, ज्ञानजन्यतानवच्छेदकतद्विषयताकत्वात्मकोपाधिरूपस्यैव प्रत्यक्षत्वस्याभ्युपगमात्, तद्विषयतायां ज्ञानजन्यतानवच्छेदकत्वं च स्वावच्छिन्नजन्यतानिरूपितजनकताश्रयज्ञानोपहितवृत्तित्वविशिष्टज्ञानजन्यतावच्छेदकभिन्नत्वम्, तेन यज्ज्ञानं सर्वांशे लौकिकं तत्रेन्द्रियसन्निकर्षजन्यज्ञानत्वस्य प्रत्यक्षत्वरूपत्वेऽपि यच्च किञ्चिदंशेऽलौकिकं किञ्चिदंशे च लौकिकं तस्य यदंशेऽलौकिकं तदंशे प्रत्यक्षत्ववारणाय ज्ञानजन्यतावच्छेदकतद्विषयताकत्वस्य यथाश्रुतस्यैव प्रत्यक्षत्वरूपत्वे किञ्चिदंशेऽलौकिकस्य वह्निलौकिकप्रत्यक्षस्य वह्न्यंशेऽपि प्रत्यक्षत्वं न स्यात्, वह्निविषयताया 'वह्निव्याप्यधूमवान् पर्वतः' इति परामर्शजन्यतावच्छेदकतया ज्ञानजन्यतावच्छेदकतद्विषयताकत्वाभावात्, निरुक्तविवक्षायां च वह्निविषयताकत्वावच्छिन्नजन्यतानिरूपितजनकताश्रयपरामर्शोपहितवृत्तित्वविशिष्टा वह्न्यनुमितीयवह्निविषयतैव भवति, न तु प्रत्यक्षीयवह्निविषयतेति तादृशोपहितवृत्तित्वविशिष्टज्ञानजन्यतावच्छेदकभिन्नत्वं तत्रास्तीति भवति वह्न्यंशे तस्य प्रत्यक्षत्वम्, ज्ञानजन्यतावच्छेदकत्वोपलक्षितोद्देश्यताविधेयताद्यात्मकविषयताभिन्नत्वं वा तत्त्वम्, वह्निलौकिकप्रत्यक्षीयवह्निविषयता तु वह्निविषयतात्वेन परामर्शात्मकज्ञानजन्यतावच्छेदिकाऽपि नोद्देश्यता-विधेयताद्यात्मिकेति तद्भिन्नत्वं तत्रास्तीति भवति वह्निलौकिकप्रत्यक्षस्य वह्न्यंशे प्रत्यक्षत्वम्, तेनापूर्वचैत्रत्वादिविशिष्टविषयकप्रत्यक्षेऽपूर्वचैत्रत्वादिविषयकानुमित्यादेः कदाप्यनुत्पादेनापूर्वचैत्रत्वादिविशिष्टविषयकत्वावच्छिन्नजन्यतानिरूपितजनकताश्रयज्ञानाप्रसिद्ध्या तदुपहितवृत्तित्वविशिष्टज्ञानजन्यतावच्छेदकभिन्नत्वस्याप्रसिद्धत्वेन तस्यापूर्वचैत्रत्वादिविशिष्टांशे प्रत्यक्षत्वं न स्यात्, एवमनुमितौ पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपकानुमितित्वं परामर्शजन्यताव-

च्छेदकमिति पक्षतावच्छेदकावच्छिन्नविषयताकत्वमपि परामर्शजन्यतावच्छेदकम्, तथा च 'अहमेतत्क्षणवर्तिज्ञानवान् तत्सामग्रीतः' इत्यनुमितावहंविषयकत्वस्यापि ज्ञानजन्यतावच्छेदकत्वात् स्वावच्छिन्नजन्यतानिरूपितजनकताश्रयज्ञानोपहितवृत्तित्वस्यापि तत्र सत्त्वात् तद्भिन्नत्वाभावेन प्रत्यक्षत्वं तदंशे न स्याद्, अनन्तरनिरुक्तोक्तौ च ज्ञानजन्यतावच्छेदकत्वोपलक्षितोद्देश्यता-विधेयतात्मकविषयताभिन्नत्वस्यापूर्वचैत्रत्वाद्यवच्छिन्नविषयतायां सत्त्वाद् 'अहमेतत्क्षणवर्तिज्ञानवान्' इत्यनुमितिमानहमित्यनुमितिनिष्ठप्रकारतानिरूपितविशेष्यतात्मकाहंविषयतायां सत्त्वात् तदादाय तदंशे प्रत्यक्षत्वमुपपद्यत इति वदन्ति। वस्तुतः स्पष्टताख्यविषयतैव प्रत्यक्षत्वम्, अत एव 'पर्वतो वह्निमान्' इत्यनुमितेः स्वांशे प्रत्यक्षत्ववत् पर्वतांशेऽपि स्पष्टतया प्रत्यक्षत्वम्, इति 'वह्निं न साक्षात्करोमि' इतिवत् 'पर्वतं न साक्षात्करोमि' इति न धीः, किन्तु 'वह्निमनुमिनोमि, पर्वतं साक्षात्करोमि' इत्येव धीः, अत एव च प्रमाणनयतत्त्वालोकालङ्कारे देवसूरिभिः-'स्पष्टं प्रत्यक्षम्' [२. १.] इति प्रत्यक्षलक्षणं सूत्रितम्, ज्ञानार्णवे तु—

"तत्र प्रत्यक्षं परोक्षं च, प्रत्यक्षं त्वक्षमात्रजम्।
यत् त्विन्द्रियोपलब्धिस्तत्, तन्न यत् स्पष्टतैव सा॥"

इति श्लोकव्याख्यायां-"वस्तुत इन्द्रियजन्यज्ञानत्वं न प्रत्यक्षत्वम्, तन्मते ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वात्, न चेन्द्रियत्वेनेन्द्रियजन्यत्वं विवक्षितम्, इन्द्रियत्वस्य प्रत्यक्षघटितत्वेन तेन रूपेणाहेतुत्वात्, पृथिवीत्वादिना साङ्कर्येण तस्याजातित्वात्, ईश्वरज्ञानेऽव्याप्तेश्च; नापि ज्ञानाकरणकज्ञानत्वम्, जन्यप्रत्यक्षस्यादृष्टद्वाराऽस्मदादिज्ञानस्येश्वरज्ञानस्य वा जन्यत्वेनाव्याप्तिवारणायादृष्टाद्वारकत्वविशेषणदानस्याऽऽवश्यकत्वेऽपि निदिध्यासनद्वारा मननजन्ये तत्त्वज्ञानेऽव्याप्तेः, विजातीयादृष्टद्वारा मननस्य तद्धेतुत्वापेक्षया विजातीयनिदिध्यासनद्वारैव तद्धेतुत्वौचित्यात्; नापि जन्यधीजन्यमात्रवृत्तिजातिशून्यज्ञानत्वम्, जन्यधीमात्रस्यादृष्टद्वारा जन्यधीजन्यत्वात्, साक्षात्तज्जन्यत्वविवक्षणे च स्मृतावतिव्याप्तेः, अदृष्टाद्वारकत्वविशेषणे जन्यपदवैयर्थ्यात्, अनुमित्यादेरप्यदृष्टद्वारा हविर्विषयकव्याप्तिज्ञानादिजन्यत्वाच्च, अदृष्टव्यापारानिरूपितजन्यधीजन्यतावन्मात्रवृत्तिजातिशून्यत्वविवक्षणेऽपि जन्यधीमात्रस्य कालिकेन जन्यधी-

जन्यत्वात्, सामानाधिकरण्यप्रत्यासत्त्या जन्यत्वविवक्षाऽऽवश्यकत्वे जन्यपदवैयर्थ्यात्, किञ्चैतानि लक्षणानीतरभेदोपयोगीनि, न तु व्यवहारोपयोगीनि। अथोभयोपयोगि साक्षात्कारित्वमेव तल्लक्षणमस्तु, तच्च साक्षात्करोमीति प्रतीतिसिद्धौ जातिविशेषः, निर्विकल्पकेश्वरज्ञानयोश्च धर्मिग्राहकमानसिद्धं तदिति चेत्? नूनं स्पष्टतैव तत्, 'साक्षात्करोमि, स्पष्टमवैमि' इति प्रतीत्योरेकाकारत्वात्, केवलं कपर्द्यनभ्युपगमात् ज्ञानावरण क्षयोपशमविशेषजन्यतावच्छेदकत्वेन तत्क्षयजन्यतावच्छेदकेन च स्पष्टताद्वयसिद्धिः, स्पष्टतात्वेनानुगतीकृता च स्पष्टता तल्लक्षणमिति; न च प्रत्यभिज्ञायामतिव्याप्तिः, तस्याः केवलेन्द्रियसंस्काराजन्यत्वेन स्मृतिव्यावृत्तपरोक्षधीरूपत्वादिति वाच्यम्, तस्या अस्पष्टत्वात्, इदन्तोल्लेखमात्रे स्पष्टताया अनियामकत्वात्, उक्तं च–"भवति च परोक्षस्यापि साक्षादिवाध्यवसाये प्रत्यक्षसर्वनाम्ना परामर्श इति" स्पष्टत्वेन तत्प्रतीतिस्तु सन्निहितविषयत्वादिकमवगाहते, यत्त्विन्द्रियजन्यत्वेन तस्याः प्रत्यक्षत्वमेव, लाघवादिन्द्रियजन्यत्वस्यैव प्रत्यक्षत्वप्रयोजकत्वात्, न च संस्कारजन्यत्वेन स्मृतित्वापत्तिः, विशिष्टानुभवं प्रत्यव्यवहितविशेषणज्ञानस्य हेतुत्वेन प्रत्यभिज्ञायाः पूर्वं नियमतस्तत्तास्मृतिकल्पनेन तस्याः संस्काराजन्यत्वादिति, तदसत्– तत्र नानास्मृतिकल्पनापेक्षया विशेषणज्ञानजन्यतावच्छेदकप्रत्यक्षत्वाभावस्यैव कल्पयितुमुचितत्वात्, प्रत्यभिजानामीत्यनुगतप्रतीतिसाक्षिकजातिविशेषस्य च चाक्षुषत्व-त्वाचत्वादिना साङ्कर्यभिया प्रत्यक्षव्यावृत्तत्वाच्च, अस्माकं तु तत्तांशे उपनय इतरांशे च सन्निकर्षो हेतुरिति प्रत्यभिज्ञायां न कारणान्तरकल्पनागौरवम्, भवतां तु प्रत्यभिज्ञात्वावच्छेदेन कारणान्तरकल्पनागौरवम्, तत्तासंस्कारस्यैव तत्तोपनायकत्वाच्च नोक्तनानास्मृतिकल्पनागौरवमपि, इन्द्रियनिरपेक्षसंस्कारजन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात्, प्रयोजककल्पनायाः कारणविशेषकल्पनानुपजीव्यत्वेन तद्गौरवस्यादोषत्वादिति चेत्?, न–स्मृति-प्रत्यभिज्ञयोर्विषयतावैलक्षण्यस्य कारणवैलक्षण्याधीनत्वेन तत्र विलक्षणहेतुकल्पनावश्यकत्वात्, अत एवासन्निकृष्टेऽपि विषये 'स वह्निरनुमीयते, स एवार्थः कल्प्यते' इत्यादिप्रत्यभिज्ञानम्, एवं चेन्द्रियार्थसन्निकर्षोऽपि तत्र संस्कारोद्बोधकसदृशदर्शनादिहेतुतयोपक्षीयते, तदिदमभिप्रेत्योक्तम् "अनुभूततया परोक्षमप्येकं साक्षादिवाध्यस्यतः पश्यतश्चापरं प्रत्यभिज्ञैवेयमिति, अन्यथा प्रत्यक्षत्व-परोक्षत्वयोः साङ्कर्यप्रसङ्गाज्जातेरव्याप्यवृत्तित्वे स्पष्टताया विषयताविशेषरूपत्वे वा

किञ्चिदंशे परोक्षत्वं किञ्चिदंशे च तस्याः प्रत्यक्षत्वम्, साक्षादिवेत्यस्य साक्षात्कारसामग्रीसम्पत्ताविवेत्यर्थः; अनुमानादेः सर्वथा परोक्षत्वं चासन्निकृष्टांश एव, एवं च प्रत्यभिज्ञात्वमपि तदेवेति विषयताविशेष एव, मिथोऽन्तर्भावाऽनन्तर्भावौ च विवक्षाधीनाविति वदन्ति । ननु तथापि संशयादीनां लक्ष्यत्वे संशया-ऽनध्यवसाययोरस्पष्टयोरव्याप्तिः; अलक्ष्यत्वे च स्पष्टे भ्रमेऽतिव्याप्तिरिति चेत्? न–प्रतिनियतवर्णसंस्थानाद्याकाराभिव्यङ्ग्यायाः स्पष्टतायास्तत्राभावात् तत्र स्पष्टताप्रतीतेर्भ्रमत्वात्; न च भ्रान्तभ्रान्तिज्ञसाङ्कर्यम्, भ्रान्तिज्ञानस्य तत्स्पष्टतांशे भ्रमत्वेऽपि विषयांशेऽतथात्वात्, न च सांव्यावहारिकावग्रहेऽव्याप्तिः, तत्र प्रतिनियतमनुष्यत्वाद्याकाराभिव्यङ्ग्यास्पष्टताया निरपायत्वात्; नन्वेवं सांव्यावहारिकत्वं यदि व्यवहारनयाभिमतत्वं तदाऽतिप्रसङ्गः, अवध्यादावपि स्पष्टत्वेन तद्व्यवहारात्; अथापारमार्थिकत्वम्, तदपि तथा, कात्स्न्र्येनास्पष्टत्वरूपस्य तस्य विकलप्रत्यक्षेऽभावात्, क्षायोपशमिकत्वरूपस्यापि तस्य तथात्वात्, परजन्यत्वस्यापि तथात्वात्, वस्तुतोऽवध्यादेर्गुणजन्यत्वे च मति-श्रुतयोरपि लब्धीन्द्रियगुणजन्यत्वात्, पारमार्थिकगुणजन्यत्वाभावस्योभयत्र तुल्यत्वात्; अथेन्द्रियव्यवहितात्मजन्यत्वं तदिति चेत्? न–कुड्यादेर्घटस्येवेन्द्रियस्यात्मनोऽव्यवधायकत्वादिति चेत्? न–इन्द्रियजन्यस्य सांव्यवहारिकत्वेनावधि मनःपर्याययोस्तु विकलप्रत्यक्षत्वेन परिभाषणात्; कथमित्थमिति चेत्? न–स्वतन्त्रपरिभाषाया अपर्यनुयोज्यत्वात्, आभोगकरणे परानपेक्षत्वं वाऽपारमार्थिकत्वविवक्षायां तन्त्रमिति दिक्" इति ।

स्मृति-प्रत्यभिज्ञयोर्विषयतावैलक्षण्यस्य विलक्षणक्षयोपशमलक्षणकारणाधीनस्य व्यवस्थितौ तत एव परोक्षे स्मृतिपार्थक्येनाभिधानम्, क्षयोपशमविशेषादेव चासन्निकृष्टेऽपि विषये 'स एव वह्निरनुमीयते' इत्यादिप्रत्यभिज्ञासद्भावतो न प्रत्यक्षेऽन्तर्भाव इति प्रत्यभिज्ञायास्तत्तांशे स्मृतिरूपत्वेनेदन्तांशे च प्रत्यक्षत्वेनोपपत्तौ स्मृतिपार्थक्येन परोक्षमध्ये परिगणनं विरुद्ध्येतेति शङ्काऽनुत्थानोपहतैवेति । नैयायिकादयश्च स्वप्रकाशकत्वसाधकयुक्तिनिकरोपदर्शिकां स्याद्वादिप्रपञ्चितां वाणीं श्रुत्वाऽपि मनसि स्वाग्रहग्रस्ततत्त्वालोकत्वेनाऽऽनन्दोल्लासायास्थापयन्तोऽप्यनुकम्प्या एव, सुचिरं भावनाविशेषतो जिनमतश्रद्धोत्पादसम्भवात्, तदुक्तं श्रीमद्भिर्यशोविजयोपाध्यायैः—

"बोधः स्वार्थावबोधक्षम इह निहताज्ञानदोषेण दृष्ट-
स्तस्मादस्माकमन्तर्विरचयति, चमत्कारसारं विलासम् ।
येषामेषाऽपि वाणी मनसि न रमते स्वाग्रहग्रस्ततत्त्वाऽऽ-
लोकालोकास्त एते प्रकृतिशठधियां हन्त ! हन्तानुकम्प्याः" ॥ ८४ ॥

ननु ज्ञान-ज्ञेययोस्तादात्म्यमेव विषयविषयिभावो लाघवान्नान्यः, तेन स्वस्वरूपाकारविशेषावगाहित्वमेव ज्ञानमात्रस्येति यथा नीलादिबुद्धिविशेषाकारस्तथाऽहमिति प्रतीयमानोऽहङ्कारोऽपि बुद्धिविशेषाकारो बुद्धिविशेषस्वरूप एवेति नाहमिति प्रत्यय आत्मनि साक्षी, यदि नीलादि-तत्संविदोर्भेदः स्यात् तदा नीलादिकमन्तरेणापि तत्संवित् प्रकाशेत, नीलादिकं च संविदमन्तरेणापि भासेत, न चैवमिति नीलादि-संविदोर्विवेकादर्शनेन भेदासिद्धेः, तयोरैक्येऽपि यन्नीलादिकं कर्मतया चकास्ति ज्ञानं च तत्कर्मकक्रियात्मना, तत्र तथाभाने पूर्व-पूर्वभ्रान्तिरेव निमित्तम्; न च बाह्यार्थं विना कथं तदाकारकं ज्ञानमिति वाच्यम्, रजताद्यात्मकबाह्यार्थमन्तरेण दोषविशेषाद् रजताकारस्य भ्रमस्य दर्शनात्, न चार्थः प्राक् पश्चात् तज्ज्ञानमिति पूर्वापरभावस्यैकस्मिन्नसंभवादर्थ-ज्ञानयोर्भेद इति वाच्यम्, प्रागनुपलम्भेनार्थाभावसिद्धेः; न च पूर्वं चैत्रेणावलोकितं घटादिकमर्थं मैत्रः पश्यतीति मैत्रज्ञानात् पूर्वं तद्विषयघटादिरूपार्थस्य चैत्रज्ञानलक्षणोपलम्भोऽस्त्येवेति वाच्यम्, परोपलम्भे मानाभावात्, भावेऽपि यथा चैत्रप्रत्यक्षविषयीकृतात् सुखादितोऽन्यदेव मैत्रप्रत्यक्षविषयीकृतं सुखादिकं तथैव पूर्वं चैत्रोपलम्भविषयीकृताद् घटनीलादितो भिन्न एव पश्चान्मैत्रप्रत्यक्षविषयीभूतो घटनीलादिरिति स्व-परदृष्टनीलयोः स्व-परसुखादिवदेकत्वासिद्धेः, यथा च स्वप्नावस्थायां बाह्यविषयाभावेऽपि प्रतिनियतवासनाप्रबोधात् प्रतिनियताकारं वेदनं तथा जागरावस्थायामपि प्रतिनियतवासनाप्रबोधात् प्रतिनियताकारं संवेदनमुपपद्यत इति न ज्ञानगताकारविशेषनियामकतया बाह्यार्थस्वीकार आवश्यक इत्याशङ्कायामाह–**न चे**ति-इदमवतरणमुपाध्यायकृतावतरणानुरोधि, श्रीहरिभद्रसूरिभिस्तु–"पराभिप्रायमाशङ्क्याह–**न चे**ति–इत्येवावतारितम्, तथापि तयोर्न भेदः, पराभिप्रायस्वरूपस्यानुक्तस्यैवोपाध्यायेन विशदीकरणादिति बोध्यम् ।

न च बुद्धिविशेषोऽयमहङ्कारः प्रकल्प्यते ।
दानादिबुद्धिकालेऽपि, तथाहङ्कारवेदनात् ॥ ८५ ॥

न चेति–अयम् अहमिति बुद्धिविषयः, **अहङ्कारः, बुद्धिविशेषः** अतिरिक्तात्मार्थविनिर्मुक्ताहमितिबुद्ध्याकाररूपः, **न च** नैव, **प्रकल्प्यते** कल्पयितुं शक्यते,नहि नीलादिकमपि बुद्धिविशेषस्वरूपमेव, आलोक-घटयोः सह संवेदनेऽपि भेदवत् नील-संवेदनयोः सह संवेदनेऽपि भेदस्योपपत्तेः, तत्र हेतुः–**दानादिबुद्धिकालेऽपि तथाऽहङ्कारवेदनादिति** । दानादीत्यादिपदेन कृत्यादिपरिग्रहः, दानबुद्धिः–ददामीति, कृतिबुद्धिः–करोमीति, इच्छाबुद्धिः–इच्छामीति, ईदृशदानादिबुद्धिर्यदा प्रवर्तते तदाऽपि, **तथा** प्रतिनियतोल्लेखेन, **अहङ्कारवेदनात्** अहमित्यनुभवात्, दानबुद्धेः प्रतिनियतोल्लेखो ददामीति, कृतिबुद्धेः प्रतिनियतोल्लेखः करोमीति, अहङ्कारबुद्धेः प्रतिनियतोल्लेखोऽहमिति, तत्र विषयवैचित्र्याधीनं न ज्ञानोल्लेखवैचित्र्यं, किन्तु प्रबुद्धवासनाधीनमेव, तदा दानवासनया दानाकारोल्लेखशेखरः कृतिवासनया कृत्याकारोल्लेखशेखरो बोधो भवेत्, न त्वहमित्यहङ्कारबुद्धिः, अन्यवासनाया अन्याकाराजनकत्वात्, तथा च दानवासनाप्रभवो बोधो ददामीति, न त्वहं ददामीति, कृतिवासनाप्रभवो बोधः करोमीति, न त्वहं करोमीति, तथा च 'अहं ददामि, अहं करोमि' इत्यादिबुद्धौ दानादिसामर्थ्यवत्तया 'अहम्' इत्येवं भासमानो न 'ददामि' इत्यादिबुद्धिरूपो दानादिवासनाप्रभवः, किन्तु तद्व्यतिरिक्तोऽर्थः स एवात्मेति । ननु यदा दानवासनाप्रबोधस्तदाऽहंवासनाप्रबोधोऽपि भवति, एवं यदा कृतिवासनाप्रबोधस्तदाप्यहंवासनाप्रबोध इति युगपदुभयवासनाप्रबोधादुभयाकारः 'अहं ददामि' इति 'अहं करोमि' इत्यादिबोध इति चेत्? तर्हि यदा दानादिवासनाप्रबोधस्तदा नीलादिवासनाप्रबोधोऽपि भवतीति कल्पनया 'नीलो ददामि' इत्यादिबोधः किं न स्यात्? दानादिवासनाप्रबोधनियतकालीनोऽहंवासनाप्रबोध एव न तु नीलादिवासनाप्रबोध इति चेत्? अत्र नियामकस्य वक्तव्यत्वात्, स्वभाव एव नियामक इति चेत्? न–तथा सति दानादिप्रतीतिकालस्य 'अहं ददामि' इति प्रतीतिजनकत्वमेव स्वभावो, न तु 'नीलो ददामि' इत्यादिप्रतीतिजनकत्वस्वभाव इत्येतावतोपपत्तिसम्भवेन वासनाया अप्यन्यथासिद्धेः; दानादिप्रतीतिकालस्य नीलादिवासनानुद्बोधकत्वात् 'नीलो ददामि' इति न धीरिति चेत्?

न–यत्काले चैत्रस्य 'अहं ददामि' इति धीजनकज्ञानादिवासनाप्रबोधस्तत्काल एव मैत्रादीनां 'नीलोऽयं, पीतोऽयम्' इत्यादिधीजनकनीलादिवासनाप्रबोधात् तत्कालस्य नीलादिवासनानुद्बोधकत्वमित्यस्य वक्तुमशक्यत्वात्, यत्काले चैत्रस्य 'अहं ददामि' इत्यादिबोधजनकदानादिवासनाप्रबोधश्चैत्रीयनीलादिवासनाप्रबोधे तत्कालो न हेतुरिति चेत्? गतं तर्हि वासनया, तत्कालेनैव तदाकारप्रतिनियमात्, तस्मात् तत्तदर्थसंनिधानेनैव क्षयोपशमरूपा तत्तज्ज्ञानजननी वासना प्रबोध्यते, इत्यहङ्कारस्यार्थविषयकत्वमकामेनापि प्रतिपत्तव्यम्। एतेन यथा बाह्यस्यावयविरूपस्य परमाणुरूपस्य वा विकल्पकवलितस्य सत्त्वायोगाज्ज्ञानाद् भेदे विषयविषयिभावनिबन्धनतादात्म्याभावात् प्रमाणाविषयत्वेनालीकत्वं तथा ज्ञानेऽहन्त्वाद्याकारस्याप्यलीकत्वमेव, तन्नियामकस्य तत्तद्वासनावैलक्षण्यस्यापि विषयमन्तरेणाघटमानत्वात् तदुद्बोधकस्य ज्ञानव्यतिरिक्तस्य कस्यचिदभावात्, नील-पीते इति समूहालम्बनज्ञाने नीलाकार-पीताकारयोरेकज्ञानाभिन्नत्वेन 'तदभिन्नाभिन्नस्य तदभिन्नत्वम्' इति नियमतो नीलाकाराभिन्नज्ञानाभिन्नस्य पीताकारस्य नीलाकाराभिन्नत्वप्रसक्तावेकाकारतैवैकस्य ज्ञानस्य नोभयाकारतेति एकस्य विज्ञानस्य नानाकारभेदायोगात्, तदुक्तम्—

"किं स्यात् सा चित्रतैकस्यां, न स्यात् तस्यां मतावपि।
यदीदं[यं] स्वयमर्थानां, रोचते तत्र के वयम् ॥ १ ॥"

इति शून्यवादिनो माध्यमिकस्य बौद्धविशेषस्य मतमप्यपास्तम्, यतः, अर्थक्रियाकारित्वमेव सत्त्वं बौद्धमते, तच्च यथा ज्ञानस्य स्वरूपानुभवलक्षणार्थक्रियाकारित्वाद् घटते, तथा तदाकारस्याप्यहन्त्वाद्याकारलक्षणस्य ज्ञानाभिन्नस्य स्वानुभवलक्षणार्थक्रियाकारित्वाद् युज्यत एव, 'वह्न्याकारज्ञानाद् वह्नौ प्रवृत्तिः, वह्निना शीतापनोदादिकं क्रियते, जलाकारज्ञानाज्जले प्रवृत्तिः, जलेन तापापनोदादिकं क्रियते' इत्येवं बाह्येष्वपि विलक्षणार्थक्रियाकारित्वमस्त्येवेति कथं बाह्यार्थानां न सत्त्वम्? तथा च विभिन्नार्थलक्षणाया अर्थचित्रताया व्यवस्थितौ तदधीनाया ज्ञानचित्रताया अपि सिद्धिरिति ॥ ८५ ॥

ननु यद्येवं स्वतः प्रकाश एवात्मा, तदा सदा किं न कर्तृ-क्रियाभावेन प्रकाशते? इत्यत आह–आत्मनेति–एवमवतारयन्त्युपाध्यायाः, श्रीहरिभद्रसूरयस्तु–अनिष्टान्तराप्तिं परिहरन्नाह–आत्मनेति–एवमवतारितवन्तः, अनिष्टान्तरापत्तिश्चोपाध्यायोपदर्शितैवेति नावतरणयोर्भेदः।

आत्मनाऽऽत्मग्रहे तस्य, तत्स्वभावत्वयोगतः ।
सदैवाग्रहणं ह्येवं, विज्ञेयं कर्मदोषतः ॥ ८६ ॥

आत्मनेति । **आत्मना** ज्ञानेन, उपयोगलक्षण आत्मेति ज्ञानमप्यात्मनोऽभिन्नत्वादात्मा भवत्येव, एतेन स्वस्य स्वग्रहणे करणत्वमुपदर्शितम् । आत्मग्रहे आत्मनो ग्रह आत्मग्रहस्तस्मिन्, आत्मनो-ज्ञातुः, ग्रहणं-ग्रह इति ग्रहणे-ज्ञप्तिक्रियायाम्, उपपद्यमानायामिति शेषः । कथं स्वस्वरूपेण ज्ञानेन ज्ञातुर्ज्ञप्तिक्रियोपपत्तेत्याकाङ्क्षायामाह-**तस्य तत्स्वभावत्वयोगत** इति-तस्य-आत्मनः, तत्स्वभावत्वयोगतः-आत्मना ग्रहणस्वभावत्वयोगात्, तादृशज्ञानजननशक्तिसमन्वितत्वादिति यावत् । यदि स्वप्रकाश एवात्मा तदा कथं न सर्वदा कर्तृक्रियाभावेन प्रकाशते? इत्याशङ्कानिवृत्तये त्वाह-**सदैवाग्रहणमिति** । **हि** निश्चितम् । **एवम्** 'अहं ज्ञाने' इत्याद्युल्लेखेन । **सदैव** सुषुप्त्यादिकालेऽपि । **अग्रहणम्** आत्मन एव ज्ञप्तिक्रियाविरहः । **कर्मदोषतः** ज्ञप्तिक्रियाप्रतिबन्धकज्ञानावरणीयकर्मणोऽपराधेत, अपराधश्च तस्य स्वसाम्राज्येन स्वविरोधिनो ज्ञानस्य कार्याक्षमतापादनम्, अतः कर्मदोषत इत्यस्य तथाप्रतिबन्धकज्ञानावरणसाम्राज्यादित्यर्थ उपाध्यायेन कृतः । **विज्ञेयं** विशेषेण ज्ञातव्यम् ।

ननु आत्मनः स्वप्रकाशज्ञानग्रहणाभ्युपगम एव सुषुप्त्यादौ तत्सत्त्वेऽपि 'अहं जाने' इत्याद्युल्लेखेन तज्ज्ञप्त्यभावोपपादनाय तथाप्रतिबन्धकज्ञानावरणसाम्राज्याश्रयणं क्रियते, तत्र चावरणादिकल्पनागौरवमापतति, ततो वरं स्वप्रकाशाग्रहं परित्यज्य सव्यापारेन्द्रियाद्यभावादेव सुषुप्तिकाले ज्ञानानुत्पत्त्या तदग्रहणमित्यभ्युपगमः; न च सुषुप्तेः प्राक् तृतीयक्षणे सुषुप्त्यनुकूला मनःक्रिया, तत आत्मना सह मनोविभागः, तत आत्म-मनसोः पूर्वसंयोगस्य नाशः, तत्काल एव च परामर्शः, तदनन्तरक्षणे सुषुप्तिः, तदानीमेव चात्म-मनःसंयोगः, तस्यापि चात्म-मनोयोगत्वलक्षणात्मविशेषगुणासमवायिकारणतावच्छेदकधर्माक्रान्तत्वात् ज्ञानं प्रति कारणत्वमिति तत्सहकृतेन पूर्वक्षणोत्पन्नपरामर्शेन सुषुप्तिद्वितीयक्षणेऽनुमित्यापत्तिरिति वाच्यम्, सुषुप्तिप्राक्क्षणे परामर्शोत्पत्तौ मानाभावात्, यदि परामर्शस्तत्कार्यमनुमितिश्चानुभूयेत तदा तदनुरोधेन कल्पेतापि सुषुप्तिप्राक्-द्वितीयक्षणे परामर्शकारणीभूतव्याप्तिस्मृत्यादिकम्, न चैवम्; अथ सुषुप्तिसमकालोत्पन्नात्ममनोयोगादिलक्षणेन्द्रियसन्निकर्षेण परप्रकाशवादे सुषुप्तिद्वितीयक्षणे

आत्मादिमानसापत्तिः; न च किञ्चिद्योग्यविशेषगुणवत्तयैवात्मनो ग्रहणं भवतीति नियमात् तदानीं योग्यविशेषगुणाभावेन नात्ममानसापत्तिरिति वाच्यम्, उक्तनियमस्य सविषयकप्रकारकात्ममानसत्वावच्छिन्नं प्रति मनोयोगादेः कारणत्वमिति कार्यकारणभावमूलकतया गौरवेण सविषयकप्रकारकात्ममानसत्वस्य मनोयोगादिजन्यतावच्छेदकत्वाभावे उक्तकार्यकारणभावस्यासम्भवेऽभावात्; न चात्ममनोयोगस्य सुषुप्तिकाले सत्त्वेऽपि ज्ञानत्वावच्छिन्नं प्रत्येव कारणस्य त्वङ्मनोयोगस्याभावात् तदा नात्मनो मानसमिति वाच्यम्, त्वङ्मनोयोगस्य त्वाचप्रत्यक्षं प्रत्येव कारणत्वम्, यद्विरहात् त्वगिन्द्रियार्थसन्निकर्षेऽपि चाक्षुषादिप्रत्यक्षकाले न त्वाचप्रत्यक्षम्, जन्यज्ञानत्वावच्छिन्नं प्रति त्वङ्मनोयोगस्य कारणत्वे मानाभावात्; एवमपि यदि जन्यज्ञानसामान्यं प्रति त्वङ्मनोयोगस्य कारणत्वमुपेयते तदा चाक्षुषादिप्रत्यक्षोत्पत्तिकालेऽपि यत्किञ्चिदर्थेन सह त्वगिन्द्रियसन्निकर्षसत्त्वे त्वङ्मनोयोगसहकृतेन तेन त्वाचप्रत्यक्षापत्तेः परिहर्तुमशक्यत्वात्; किञ्च, तत्तदिन्द्रियजन्यप्रत्यक्षत्वावच्छिन्नं प्रति पृथगेव तत्तदिन्द्रियमनोयोगत्वेन कारणत्वं सिद्धान्तितमस्ति, तदपि ज्ञानत्वावच्छिन्नं प्रति त्वङ्मनोयोगत्वेन कारणत्वे त्वङ्मनोयोगाभावे ज्ञानसामग्र्यभावादेव त्वाचप्रत्यक्षानुत्पत्तिसम्भवेन गौरवेण त्वाचत्वावच्छिन्नं प्रति त्वङ्मनोयोगत्वेन कारणत्वासम्भवतो न स्यात्, इति चेत्? न–'सुषुप्तौ जीवनादृष्टबलादेव प्राणसञ्चारो न यत्नादिति जीवनयोनियत्नाभ्युपगमेनात्मादिमानसकारणस्य विजातीयात्ममनस्संयोगस्य सुषुप्तावभावादेवात्मादिमानसोत्पत्त्यापत्त्यसम्भवात्; न च त्वक्क्रियया त्वङ्मनस्संयोगनाशे पुरीतत्क्रियया पुरीतद्-मनस्संयोगरूपसुषुप्त्युत्पत्तौ ज्ञानसामान्यकारणस्य विजातीयात्ममनःसंयोगस्य जाग्रदवस्थाकालीनस्य मनःक्रियाया अभावादेव विनाशात् तद्बलात् तदानीं ज्ञानोत्पत्त्यापत्तिरिति वाच्यम्, सर्वत्र मनःक्रिययैव सुषुप्तिस्वीकारेण सुषुप्तिकाले जाग्रदवस्थाकालीनविजातीयात्ममनःसंयोगावस्थानासम्भवात्, तदुक्तं–"यदा मनस्त्वचं परिहृत्य पुरीतति नाड्यां प्रविशति तदा सुषुप्तिः" इत्यादि, इति चेत्? न–चेष्टात्मकविजातीयक्रियां प्रति प्रयत्नस्य कारणत्वेन सुषुप्तावपि चेष्टाया उत्पादेन तदर्थं जीवनयोनियत्नस्यावश्यमभ्युपेयत्वात्, नाड्यादिक्रिययाऽपि सुषुप्तिसंभवात्, "यदा मनः" इत्याद्यभिधानस्य प्रायिकत्वात्, मनोयोगनिष्ठवैजात्यावच्छिन्नहेतोरदृष्टातिरिक्तस्यादर्शनात्, रसना-मनःसंयोगदशायां त्वङ्मनःसंयोगस्याप्यावश्यकत्वाद्

रासनप्रत्यक्षकाले त्वाचप्रत्यक्षापत्तिवारणाय त्वाचप्रत्यक्षं प्रति प्रतिबन्धकस्यादृष्टस्य स्वीकारे चाक्षुषादिसामग्रीकाले आत्ममानसस्य आत्म-मनोयोगादिलक्षणसामग्रीबलादापत्तिवारणाय तत्प्रतिबन्धकादृष्टकल्पनया सुषुप्तौ तेनैव ज्ञानानुत्पत्त्युपगमौचित्याच्च; किञ्च, इन्द्रियलिङ्गादिजन्यज्ञानोत्पत्तिकालेऽपि मनःसंयुक्तसमवायलक्षणस्य ज्ञानमानसप्रत्यक्षकारणस्य सद्भावाज्ज्ञानज्ञान-तज्ज्ञानादिप्रत्यक्षधारैव स्यात्, न त्विन्द्रियान्तरादिजन्यघट-पटादिप्रत्यक्षादिकमिति विषयान्तरज्ञानोच्छेदभयाद् विषयान्तरसञ्चारस्य ज्ञानज्ञानादौ प्रतिबन्धकत्वकल्पने गौरवाज्ज्ञानस्येन्द्रियाग्राह्यत्वेन प्रकाशमानस्य तस्य स्वसंविदितत्वसिद्धौ स्वसंविदितज्ञानधारयाऽपि विषयान्तरसञ्चारोच्छेदो मा प्रसाङ्क्षीदित्येतदर्थं तत्प्रतिबन्धकदोषकल्पनागौरवमपि फलमुखत्वान्न बाधकमिति ॥ ८६ ॥

इत्थं प्रत्यक्षसिद्धत्वमात्मन उपपादितमुपसंहरति—

अतः प्रत्यक्षसंसिद्धः, सर्वप्राणभृतामयम् ।
स्वयंज्योतिः सदैवात्मा, तथा वेदेऽपि पठ्यते ॥ ८७ ॥

अत इति–अहंप्रत्ययस्याभ्रान्तप्रत्यक्षरूपत्वतः, **अयम्** आत्मा, **सर्वप्राणभृताम्** सर्वजीवानाम्, 'अहम्' इत्यात्मप्रत्यक्षं कस्यचिद् भवति कस्यचिन्नेत्येवं न किन्तु सर्वेषामेव जीवानां तद्भवत्येव, अतः सर्वेषां जीवानामविगानेन प्रत्यक्षसिद्ध एवायमात्मा न केनाप्यपलपितुं शक्य इत्याशयः। **प्रत्यक्षसंसिद्धः** प्रत्यक्षप्रमाणविषयः, न केवलमनुभवसश्रीचीनया युक्त्यैव सिद्ध आत्मा कथ्यते, किन्तु प्रमाणतया परैरुररीकृत आगमोऽप्यस्यात्मनः स्वयंसंविदितज्ञानात्मकप्रत्यक्षसिद्धत्वं स्पष्टं प्रतिपादयतीत्याह—**स्वयंज्योतिरिति** । **तथा** अनुभवानुसारेण, **वेदेऽपि** श्रुतावपि, **आत्मा** शरीरव्यतिरिक्तो जीवः, **सदैव** संसारावस्थायामपि, **स्वयंज्योतिः** स्वसंविदितज्ञानस्वरूपः, **पठ्यते** गीयते, "आत्मज्योतिरेवायं पुरुषः" [ ] इत्यादिवचनेन ।

एतेन वेदप्रामाण्याभ्युपगन्तॄणां ज्ञानपरोक्षत्ववादिनां मीमांसकानां कुमारिलभट्टानुयायिनां मतमप्यपहस्तितम्, मीमांसकास्त्रयो भिन्नप्रस्थानाः, तत्र प्रभाकरो ज्ञानं स्वप्रकाशप्रत्यक्षस्वरूपमभ्युपगच्छति, मुरारिमिश्रस्तु नैयायिकोक्तदिशा स्वव्यतिरिक्तानुव्यवसायात्मकप्रत्यक्षविषयत्वं ज्ञानस्योपैति, कुमारिल-

भट्टस्तु ज्ञानं स्वतः परोक्षमेव किन्तु ज्ञानजन्या विषयगता ज्ञातता प्रत्यक्षा, तया ज्ञानमनुमीयत इत्याह, तत्र प्रभाकरो यदि यथैव स्याद्वादी स्वप्रकाश-स्वरूपं ज्ञानस्य स्वीकरोति तथैवाभ्युपेयात् तदा स्याद्वाददत्तहस्तावलम्बोऽजय्य एव परेषाम्, अन्यथा स्वीकुर्वंश्च नायं स्वप्रकाशवादी नापि परप्रकाशवादीति ताभ्यां पराजीयत एव, अन्यथा स्वीकारश्च तस्य, यथा न सत्ता सत्ताश्रयत्वात् सती, किन्तु स्वयमेव सद्रूपत्वात् सती, तथा ज्ञानमपि परप्रकाशानपेक्षत्वादेव स्वप्रकाशं, न तु स्वविषयत्वादिति । मुरारिमिश्रस्तु नैयायिकवत् पराजीयत एव स्वप्रकाशज्ञानवादिभिः स्याद्वादिभिः । कुमारिलभट्टस्य तु मतं न समीचीनं, परोक्षत्वे ज्ञानस्यैवासिद्धेः, 'इयं घटत्वप्रकारकघटवृत्तिज्ञातता घटत्वप्रकारक-घटविशेष्यकज्ञानजन्या घटत्वप्रकारकघटवृत्तिज्ञाततात्वात्, या यत्प्रकारक-यद्वृत्तिज्ञातता, सा तत्प्रकारकतद्विशेष्यकज्ञानजन्या, यथा पटत्वप्रकारकपट-वृत्तिज्ञातता' इत्येवं ज्ञाततालिङ्गकज्ञानानुमानं तदा स्याद् यदि ज्ञातता प्रत्यक्ष-सिद्धा स्यात्, न च प्रत्यक्षसिद्धा ज्ञाततेति कुतस्तथाऽनुमेयं ज्ञानमिति; न च 'घटं जानामि' इति ज्ञानक्रियाकर्मतया घटो भासते, कर्मत्वं च क्रियाजन्य-फलशालित्वम्, घटे च ज्ञाततान्यतिरिक्तं ज्ञानजन्यं फलं नास्तीति ज्ञानजन्या ज्ञाततोऽपि यदि तत्र न स्यात् तदा क्रियाजन्यफलाश्रयत्वाभावात् कर्मत्वमेव न भवेदतः कर्मत्वान्यथानुपपत्त्या घटादौ ज्ञानजन्या ज्ञाततोऽभ्युपेयेति वाच्यम्, एवं सति 'घटमिच्छामि, घटं करोमि' इत्यादिप्रतीत्येच्छादिक्रियाकर्मत्वस्याप्य-न्यथानुपपत्त्येष्टता-कृतताद्यलक्षणफलस्यापि सिद्ध्यापत्तेः, यथा च 'ज्ञातो घटः' इति प्रतीयते तथा 'इष्टो घटः, कृतो घटः' इत्येवमपीष्टताद्याश्रयत्वेन घटः प्रतीयत एव, किञ्च, अतीतघटादिज्ञाने जाते 'अतीतो घटो ज्ञातः' इत्यादिप्रती-तिरपि समुदेति, न चातीते घटादौ ज्ञानजन्या ज्ञातता संभवति, अतीते घटादौ ज्ञाततोत्पत्त्यसम्भवात्, ज्ञाततायाः भावात्मककार्यस्वरूपत्वेन समवायि-कारणं विना तदुत्पत्त्यसंभवात्, अविध्वग्भावात्मकसमवायसम्बन्धेन भावकार्यं प्रति तादात्म्यसम्बन्धेन द्रव्यस्य कारणत्वात्; न चातीते घटादौ योऽयम् 'अतीतो घटो ज्ञातः' इति प्रत्ययः स भ्रमात्मक एवेति तत्र ज्ञाततालक्षणविषय-स्याभावेऽपि न क्षतिरिति वाच्यम्, बाधकाभावेन तत्र भ्रमत्वकल्पनस्यायुक्त-त्वात्, न चातीते घटे ज्ञानस्य स्वरूपसम्बन्ध एव ज्ञातता, विभिन्नकालीन-

योरपि ज्ञान-ज्ञेययोः स्वरूपसम्बन्धाभ्युपगमादिति वाच्यम्, विद्यमानेऽपि घटे 'घटो ज्ञातः' इत्यादौ घटेन सह ज्ञानस्य स्वरूपसम्बन्धाभ्युपगमस्यैवौचित्यात्, मीमांसकेनापि यत् ज्ञाततां प्रति ज्ञानस्य कारणत्वमुपेयते, तत्र समवायेन ज्ञाततां प्रति विषयात्मकस्वरूपसम्बन्धेन ज्ञानं कारणमित्येव कार्यकारणभाव इति कारणतावच्छेदकसंसर्गतया ज्ञानस्य विषये स्वरूपसम्बन्धस्यावश्यकत्वात्, तथा च 'ज्ञातो घटः' इत्यस्य ज्ञाननिरूपितविषयतावान् घट इत्येवार्थः, अतीते घटे ज्ञानजन्यज्ञाततारूपफलाभावाद् विषयतात्मकस्वरूपसम्बन्धात्मकं गौणमेव कर्मत्वम्, तथा विद्यमानेऽपि घटे गौणमेव ज्ञानकर्मत्वमिति न तदन्यथानुपपत्त्या ज्ञाततासिद्धिः।

उदयनाचार्यास्तु ज्ञान-ज्ञेययोर्विषयविषयिभावो नाम स्वरूपसम्बन्धविशेष एव, न तु ज्ञानेन ज्ञेये किञ्चित् क्रियते येन ज्ञानफलतया ज्ञातता सिद्ध्येदित्युपपादनाय प्रश्नोत्तररूपेणेत्थं व्यावर्णितवन्तः, तथाहि–"स्यादेतत्, अनुपकारकं विषयस्य तदीयमेतदीयं वा न भवितुमर्हति, अविशेषात्; न च तस्येत्यनियतं तत्र प्रमाणम्, अतिप्रसङ्गात्; न च तदभिज्ञमन्तरेण तदुपकारस्योत्पत्तिः, तथाऽनभ्युपगमात्, अभ्युपगमे वा कार्यत्वस्यानैकान्तिकत्वात्; अत्रोच्यते—

"स्वभावनियमाभावादुपकारोऽपि दुर्घटः।
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा॥"

विशेषाभावात् तत्रैव फलं नान्यत्रेत्यस्यापि नियमस्यानुपपत्तेः, स्वभावनियमेन चोपपत्तौ तथैव विषयव्यवस्थोपपत्तेः, अवश्यं चैतदनुमन्तव्यम्, अतीतादेर्विषयत्वानुरोधात्, नहि तत्र ज्ञानेन किञ्चित् क्रियते इति शक्यमवगन्तुम्, असत्त्वात्; न च तद्धर्मसामान्याधारं किञ्चित् क्रियेत इति युक्तम्, तेन तस्यैव विषयत्वप्राप्तेः; तादात्म्याद् विशेषस्यापि सैव ज्ञाततेति चेत्? तत् किं चक्षुषा घटे ज्ञायमाने रसोऽपि ज्ञायते तादात्म्यात्? घटाकारेण ज्ञायत एवासौ रस इति चेत्? अथ रसाकारेण किं न ज्ञायते? तेन रूपेण ज्ञाततेऽनाधारत्वादिति चेत्? न तर्हि वर्तमानस्य सामान्यज्ञानेऽप्यतीतानागतादिज्ञानं, तेनाकारेण प्राकट्यानाधारत्वादिति। ननु 'क्रियया कर्मणि किञ्चित् कर्तव्यम्' इति व्याप्तेरस्त्यनुमानम्, न—

"अनैकान्तादसिद्धेर्वा, न च लिङ्गमिह क्रिया।
तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके॥"

धात्वर्थमात्राभिप्रायेण प्रयोगे संयोगादिभिरनैकान्तात्, नहि शरसंयोगेन गगने किञ्चित् क्रियते, अन्त्यशब्दाभिव्यक्त्या वा, स्पन्दाभिप्रायेणासिद्धेः, व्यापाराभिप्रायेण शब्दलिङ्गेन्द्रियव्यापारैर्व्यभिचारात्, नहि तैः प्रमेये किञ्चित् क्रियते, अपि तु प्रमातर्येव, फलाभिप्रायेणापि तथा, अन्ततस्तेनैवानैकान्तात्, अनवस्थानाच्च, आशुविनाशिधर्माभिप्रायेण द्वित्वादिभिरनियमात्, आशुकारकाभिप्रायेण कर्मण्यसिद्धेः, कर्मण्याशुकारकं ज्ञानमित्येव हि साध्यम्, कर्तर्याशुकारकत्वस्य कर्मोपकारकत्वेनाव्याप्तेः, शब्दादिव्यापारैरेवानैकान्तात्, स्यादेतत्, अनुभवसिद्धमेव प्राकट्यम्, तथाहि–'ज्ञातोऽयमर्थः' इति सामान्यतः, 'साक्षात्कृतोऽयमर्थः' इति विशेषतो विषयविशेषणमेव किञ्चित् परिस्फुरतीति चेत्? तदसत्–यथाहि—

"अर्थेनैव विशेषो हि, निराकारतया धियाम्।
तथाक्रिययैव विशेषो हि, व्यवहारेषु कर्मणाम्॥"

किं न पश्यसि 'घटक्रिया, पटक्रिया' इतिवत् 'कृतो घटः, करिष्यते घटः' इत्यादि, तथैव गृहाण-घटज्ञानं, पटज्ञानमितिवत् 'ज्ञातो घटो, ज्ञास्यते ज्ञायते' इति, कथमसम्बद्धयोर्धर्म-धर्मिभाव इति चेत्? ध्वस्तो घट इति यथा; एतदपि कथमिति चेत्? नूनं ध्वंसेनापि घटे किञ्चित् क्रियते इति वक्तुमध्यवसितोऽसि; तन्निरूपणाधीननिरूपणो ध्वंसः स्वभावादेव तदीय इति किमत्र सम्बन्धान्तरेणेति चेत्? प्रकृतेऽप्येवमेव; एतेन 'फलानाधारत्वादर्थः कथं कर्म?' इति निरस्तम्, विनाश्यवत् करणव्यापारविषयत्वेन तदुपपत्तेः, स्वाभाविकफलनिरूपकत्वं च तुल्यम्, ननु ज्ञानमतीन्द्रियत्वादसाधारणकार्यानुमेयं तदभावे कथमनुमीयेत? अप्रतीतं च कथं व्यवहारपथमवतरेदिति ज्ञानव्यवहारान्यथानुपपत्त्या ज्ञाततानुकल्पनम्, तदप्यसत्–परस्पराश्रयप्रसङ्गात्, ज्ञाततया हि ज्ञानमनुमीयेत, ज्ञाते च तद्व्यवहारान्यथानुपपत्तिस्तां ज्ञापयेत्; कुतश्च ज्ञातमतीन्द्रियम्? इन्द्रियेणानुपलभ्यमानत्वादिति चेत्? न–अनुमानोपन्यासे साध्याविशिष्टत्वात्, अनुपलब्धिमात्रोपन्यासे तु योग्यताऽविशेषिताऽसौ कथमैन्द्रियकोपलम्भाभावं गमयेत्?, तद्विशेषणे तु कथमतीन्द्रियं ज्ञानमिति; तथाविधज्ञाततानाश्रयत्वादिति चेत्? न–आश्रयासिद्धेः व्यवहारान्यथानु पत्त्यैव सिद्ध आश्रय इति चेत्? न–ज्ञानहेतुनैव तदुपपत्तेः; तस्मात्ममनस्संयोगादिरूपस्य सत्त्वेऽपि सुषुप्तिदशायामर्थव्यवहाराभावानैवमिति चेत्? न–तावन्मात्रस्य व्यवहारा-

हेतुत्वात्, अन्यथा ज्ञानस्वीकारेऽपि तुल्यत्वात्; स्मरणान्यथानुपपत्त्येति चेत्? न-तस्याप्यसिद्धेः; अस्ति तावद्व्यवहारनिमित्तं किञ्चिदिति चेत् किमतः?, नह्येतावता ज्ञानं तदिति सिद्ध्यति, तस्यैवासिद्धेः; तथापि नियतस्य कर्तुः प्रवृत्तेः कर्तृधर्मेणैव केनचित् प्रवृत्तिहेतुना भवितव्यमिति चेत्? अस्त्विच्छा प्रत्यक्षसिद्धा, न तु ज्ञानम्; सैव कथं नियताधिकरणे उत्पद्यतामिति चेत्? तत एवेच्छाऽस्तु, किं ज्ञानकल्पनयेति; स्यादेतत्-प्रकाशमाने खल्वर्थे तदुपादित्सादिरुपजायते, न तु सुषुप्त्यवस्थायामप्रकाशमानेऽप्यर्थे इत्यनुभवसिद्धम्, तत इच्छायाः कारणं विलक्षणमेव किञ्चित् परिकल्पनीयम्, यस्मिन् सति सुप्त्वापलक्षणमौदासीन्यमर्थविषयमात्मनो निवर्तते इति चेत्? हन्तैवं सुप्त्वपनिवृत्तिमनुभवसिद्धां प्रतिजानानेन ज्ञानमेवापरोक्षमिष्यते, अचेतयन्नेव हि सुषुप्त इत्युच्यते, अचैतन्यनिवृत्तिरेव हि चैतन्यं ज्ञानमिति, तथा च कालात्ययापदिष्टो हेतुः; एतेन क्षणिकत्वादिति निरस्तम्; अपि च, किमिदं क्षणिकत्वं नाम?, यद्याशुतरविनाशित्वं, तदा अनैकान्तिकम्, अथैकक्षणावस्थायित्वं, तदसिद्धं प्रमाणाभावात्; ननु स्थायिविज्ञानं यादृशमर्थक्षणं गृह्णदुपपद्यते, द्वितीयेऽपि क्षणे किं तादृशमेव गृह्णाति? अन्यादृशं वा?, नवा कमपीति?, न प्रथमः, तस्य क्षणस्यातीतत्वात्, प्रथमज्ञानस्य च वर्तमानाभवत्वात्, न चातीतमेव वर्तमानाभतयोल्लिखति, भ्रान्तत्वप्रसङ्गात्; न द्वितीयः, विरम्य व्यापारायोगात्, प्रथमतोऽपि तथाऽभ्युपगमेऽनागतापेक्षणप्रसङ्गात्; न तृतीयः, ज्ञानत्वहानेरिति महाव्रतीयाः, तदसत्-ज्ञानं गृह्णतीत्यस्यैवार्थस्यानभ्युपगमात्, अपि तु तदेव ग्रहणमित्यभ्युपगमः, तथा च ज्ञानं प्रथमक्षणे यमर्थमवलम्ब्य जातम्, द्वितीयेऽपि क्षणे तदवलम्बनमेव तन्नवेति प्रश्नार्थः, तत्र तदालम्बनमेव तदिति परमार्थः; न चैवं भ्रान्तत्वम्, विपरीतानवगाहनात्; तथापि ज्ञेयनिवृत्तौ कथं ज्ञानानुवृत्तिः, तदनुवृत्तौ वा कथं ज्ञेयनिवृत्तिरिति चेत्? किमस्मिन्ननुपपन्नम्?, न हि ज्ञानमर्थश्चेत्येकं तत्त्वमेकायुष्कं वेति, सत्यपि वा क्षणिकत्वे कथमप्रत्यक्षम्, इत्थं-यथोच्यते न स्वप्रकाशं, वस्तुत्वादितरवस्तुवत्, न च ज्ञानान्तरग्राह्यम्, ज्ञानयौगपद्यनिषेधेन समानकालस्य तस्याभावात्, ग्राहककाले ग्राह्यस्यातीतत्वेन वर्तमानाभत्वानुपपत्तेः, ग्राह्यकाले च ग्राहकस्यानागतत्वादिति चेत्? नन्वेवं ज्ञाततोऽपि न प्रत्यक्षा स्यात् क्षणिकत्वात्, कथम्? इत्थं न स्वप्रकाशा, वस्तुत्वात्, न जनकग्राह्या, अनागतत्वात्, विरम्य व्यापारायोगाच्च, न

समसमयज्ञानग्राह्या, ज्ञानजनकेन्द्रियसम्बन्धाननुभवात्, न च तदुत्तरज्ञानग्राह्या, तदानीमतीतत्वादिति क्षणिकत्वमेव तस्याः कुतः ? इति चेत् ? त्वदुक्तयुक्तेरेव, तथाहि–यं क्षणमाश्रित्य जाता ततः परमपि तमेवाश्रयते, अन्यं वा ? न कमपि ? इति, तत्र न प्रथमः, तस्य तदानीमसत्त्वात् ; न द्वितीयः, अप्रतिसंक्रमात्, एकक्षणावगाहिनि च ज्ञाने तदन्यक्षणाश्रयज्ञानताफलत्वेन भ्रान्तत्वप्रसङ्गात्, रजतावगाहिनि पुरोवर्तिवृत्तिज्ञाततावफल इव, न चान्यमपि क्षणं ज्ञानमवगाहते, तदानीं तस्यासत्त्वात् ; न तृतीयः, निःस्वभावताप्रसङ्गात्, नह्यसौ तदानीं तदीया अन्यदीया वेति; अतीतेनापि तेनैव क्षणेनोपलक्षिताऽनुवर्तते इति चेत् ? एवं तर्हि वर्तमानार्थता प्रकाशस्य न स्यात्, अन्यथा ज्ञानस्यापि तथाऽनुवृत्तेः को दोषः ?, न हि वर्तमानार्थप्रकाशसम्बन्धमन्तरेण ज्ञानस्यान्या वर्तमानावभासता नाम, अर्थनिरपेक्षप्रकाशनानुवृत्तिमात्रेण तथात्वे भूतभाविविषयस्यापि ज्ञानस्य तथा भावप्रसङ्गात् ; अथ मा भूदयं दोष इति स्थूल एव वर्तमानः प्रकाशेनाश्रीयत इत्यभ्युपगमः, तदा तज्ज्ञानस्यापि स एव विषय इति तस्यापि न क्षणिकत्वमिति; न च ज्ञानमैन्द्रियकं चेत् ? विषयसञ्चारो न स्यात्, सज्ञातसम्बन्धत्वात् ; न च जिज्ञासानियमान्नियमः, तस्याः संशयपूर्वकत्वात्, तस्य च धर्मिज्ञानपूर्वकत्वात्, धर्मिणश्च सन्निधिमात्रेण ज्ञाने जिज्ञासापेक्षणे वा उभयथाऽप्यनवस्थानादिति, तन्न–ज्ञाततापक्षेऽपि तुल्यत्वात्, तस्या अपि हि ज्ञेयत्वे तत्परम्पराज्ञानापातात्, जिज्ञासानियमस्य च तद्वदनुपपत्तेः; न चेन्द्रियसम्बन्धविच्छेदाद् विराम इति युक्तम्, आत्मप्राकट्यव्याघातात्, स्वभावत एव काचिदसावजिज्ञासिताऽपि ज्ञायते, न तु सर्वेति चेत् ? तुल्यम् ; प्रागुत्पन्नज्ञाततास्मरणजनितजिज्ञासः समुन्मीलितनयनः संजातज्ञानसमुत्पादितप्राकट्यं जिज्ञासुरेव प्रतिपद्यते इत्यतो नानवस्थेति चेत् ? तुल्यमेतत्" इति ।

ज्ञाततायाः सद्भावेपि तया ज्ञानानुमानं न सम्भवति, ज्ञाततायाः विषयनिष्ठत्वेन ज्ञानस्य चात्मनिष्ठत्वेन तयोर्व्यधिकरणत्वात्; अथ समवायेन घटप्रत्यक्षं यद्यप्यात्मनि वर्तते तथापि विषयतया तद् घटे वर्तते, तत्र च समवायेन ज्ञाततापि अस्ति, भावस्वरूपाया ज्ञाततायाः जन्यायाः जन्येष्वेव भावेष्वन्तर्भावनीयतया समवायेन सत्त्वसम्भवात्, एवं च समानाधिकरणीभूतया ज्ञाततया ज्ञानस्यानुमानं सम्भवति; अथवा यस्य पुरुषस्य घटप्रत्यक्षेण घटप्राकट्यं जन्यते तद्घटप्राकट्यं सम्बन्धविशेषेण तदीयात्मन्येव वर्तते, एवं च सम्बन्धविशेषेण घट-

प्राकट्यं प्रति समवायेन घटप्रत्यक्षं कारणमिति, एवमपि सम्बन्धविशेषेण घटप्राकट्येन घटप्रत्यक्षस्यानुमानं सम्भवति, अत एव तत्पुरुषीयघटप्राकट्यस्य तत्पुरुषेणैव ज्ञानं, यथा तत्पुरुषीयापेक्षाबुद्धिजनितं द्वित्वादिकं तत्पुरुषेणैव गृह्यते इति नैयायिकादीनां सिद्धान्तः, विषयतया तदीयप्राकट्यप्रत्यक्षे तादात्म्येन तदीयप्राकट्यस्य हेतुत्वाच्चैत्रीयघटप्राकट्यप्रत्यक्षं चैत्रस्यैव भवतीति चेत्? न-एवमपि प्राकट्यस्य प्रत्यक्षज्ञानेनैव जन्यतया तेन प्रत्यक्षज्ञानसिद्धावपि परोक्षेणानुमित्यादिना प्राकट्यस्यानुत्पादेनानुमित्यादेरसिद्ध्यापत्तेः, यथा च प्रत्यक्षज्ञानविषयीकृतोऽर्थः प्रकटोऽर्थ इत्येवमनुभूयत इत्येवमनुभवानुरोधेन प्राकट्यं पदार्थान्तरं स्वीक्रियते तथा अनुमित्यादिना विषयीकृतोऽर्थोऽप्रकटोऽर्थ इत्येवमनुभूयत इत्यनुभवानुरोधेन परोक्षज्ञानेऽप्राकट्यस्यापि पदार्थान्तरस्य स्वीकारापत्तेश्च; न च ज्ञानस्यातीन्द्रियत्वेऽपि प्रवृत्त्यादिनाऽनुमानं भविष्यति, लिङ्गाननुगमस्यादोषत्वादिति वाच्यम्, प्रवृत्त्यादेरप्रत्यक्षत्वे तस्याप्यसिद्ध्या ततो ज्ञानानुमानासम्भवात्, यदि च 'अहं करोमि, अहमिच्छामि' इत्यनुभवारोधेन प्रवृत्त्यादेः प्रत्यक्षत्वं, तदा 'अहं साक्षात्करोमि, अहमनुमिनोमि' इत्याद्यनुरोधेन ज्ञानस्यापि प्रत्यक्षत्वं किमिति न स्वीक्रियते, बाधकाभावस्योभयत्र तुल्यत्वात्, यथा च ज्ञानस्य कर्मत्वं तथा क्रियात्वमपि, बाह्यार्थस्य तु कर्मत्वमेव, ततो बाह्यार्थः क्रियात्वानाक्रान्तत्वात् कर्मतयाऽवभासते, क्रियात्वाननुविद्धकर्मत्वस्यैव कर्मत्वावभासप्रयोजकत्वमिति ज्ञानं न कर्मत्वेनावभासत इति।

यद्यपि राग-द्वेषरहितैः स्याद्वादिभिः प्रत्यक्षमात्रप्रमाणवादिनो भूतव्यतिरिक्तात्मापलापिनश्चार्वाकस्य कथायां प्रत्यक्षप्रमाणेनैव भूतव्यतिरिक्तात्मसाधनतो मुखमालिन्यकरणं न युक्तम्, तथापि वस्तुस्थित्यनुरोधेन यादृशं वस्तु तादृशं वस्तु साधनीयमेव लोकोपकृतये, चार्वाकस्याकामतोऽप्यात्मसिद्धिमनुभवतः काले भविष्यत्येव श्रेयःप्राप्तिरिति सोऽप्यनुगृहीत एव स्याद्वादिभिरुक्तयुक्तिभिः प्रत्यक्षप्रमाणत आत्मानं साधयद्भि-, मुखमालिन्यं च तस्य स्वकदाग्रहलक्षणापराधनिमित्तकमेवेत्यमुमर्थमावेदयितु मुपाध्यायैरुक्तम्—

"आत्मसिद्धेः परं शोकाल्लोका लोकायतानन्म्।
समालोकामहे म्लानं, तत्र नो कारणं वयम्॥" इति॥ ८७॥

॥ इति चार्वाकमतखण्डनम्॥

उक्तदिशा शरीरव्यतिरिक्ततया सिद्धोऽप्यात्मा क्लिष्टमनोरूप एवेति बौद्धमतावलम्बिवार्तानन्तरं प्रसङ्गादाह—

अत्रापि वर्णयन्त्येके, सौगताः कृतबुद्धयः।
क्लिष्टं मनोऽस्ति यन्नित्यं, तद् यथोक्तात्मलक्षणम् ॥ ८८ ॥

अत्रापीति—आत्मविचारेऽपीति, आत्मसिद्धावपीति वाऽर्थः। **कृतबुद्धयः** चार्वाकापेक्षया परिष्कृतमतयः। **एके सौगताः**, सौगतानां मध्ये केचित् सौगताः, बौद्धविशेषा इति यावत्। **वर्णयन्ति** प्रतिपादयन्ति। किमित्यपेक्षायामाह—**क्लिष्टमिति**-क्लिष्टं राग-द्वेषादिक्लेशकलुषितम्, न तु बाह्याकारम्, बाह्याकारस्य प्रवृत्तिविज्ञानस्य तत्सन्ततेर्वाऽऽत्मरूपत्वाभावात्। **यन्नित्यं मनोऽस्ति तद्** मनः, **यथोक्तात्मलक्षणम्**, अहंप्रत्ययालम्बनात्मव्यपदेशभाक्, तथा चाहुरित्यालयविज्ञानस्वरूप आत्मेत्यर्थः ॥ ८८ ॥

एतन्मतं नित्यत्वं किं तद्भावेनाव्ययत्वं क्षणविशरारुपरिणामप्रवाहपतितत्वं वेति विकल्प्य दूषयन्नपर आह—

यदि नित्यं तदात्मैव, संज्ञाभेदोऽत्र केवलम्।
अथानित्यं ततश्चेदं, न यथोक्तात्मलक्षणम् ॥ ८९ ॥

यदीति—**यदि** त्वदभ्युपगतं क्लिष्टं मनः, **नित्यं** तद्भावेनाव्ययम्। **तदा आत्मैव** तत्त्वतः। अत्र क्लिष्टं मन आत्मेति वादे। **केवलं संज्ञाभेदः** मन इति आत्मेति नाममात्रभेदः, न त्वर्थभेदः, द्रव्यस्वरूपतया नित्यस्यैवात्मत्वं तवापि सम्मतमिति पर्यवसितं विवादेनेति भावः। **अथानित्यं** द्रव्यरूपतयाऽप्यनित्यं नश्वरं तदिष्यते, तदेत्यस्यानुषङ्गः, द्रव्यरूपतयाऽपि मनसोऽनित्यस्यैवाभ्युपगमे त्विति तदर्थः। **ततश्च** अनित्यत्वाच्च, **इदं** मनः। **न यथोक्तात्मलक्षणं** युक्त्यागमाभ्यामात्मनो यल्लक्षणं निष्टङ्कितं तद्वदनित्यं मनो न भवतीत्यर्थः ॥ ८९ ॥

किं लक्षणमात्मनो निष्टङ्कितम्? यन्मनसि नास्तीत्यपेक्षायामाह—

यः कर्ता कर्मभेदानां, भोक्ता कर्मफलस्य च
संसर्ता परिनिर्वाता, स ह्यात्मा नान्यलक्षणः ॥ ९० ॥

य इति। **कर्मभेदानां** ज्ञानावरणाद्यष्टविधकर्मणाम्, **कर्ता** स्वस्वरूपा-

च्छादकतया निर्माता, **यो** व्यक्तिविशेषः, **च** पुनः, **कर्मफलस्य** सुखदुःखादेः, **भोक्ता** तस्यात्मगततया साक्षात्कर्ता, तथा **संसर्ता** स्वकृतकर्मफलोपभोगार्थं स्वकृतकर्मानुरूपनरकादिगतिगामी, संसरणशील इति यावत्, तथा **परिनिर्वाता** स्वेनैव बद्धस्य कर्मणः स्वप्रदेशतः पृथक्करणलक्षणक्षयकारी, हि निश्चितम्, **स** आत्मा अनन्तरोपवर्णितलक्षणवानात्मा, **नान्यलक्षणः** परोक्तकूटस्थत्वाद्येकान्तनित्यत्वादिलक्षणको न भवति, तथा च कर्तृत्वादिकं नित्यस्यैव घटते, नानित्यस्य मनसः, कार्यसमये नश्यतो हेतोः कार्याजनकत्वात्, कार्यकालावर्तिनोऽपि कारणत्वाभ्युपगमे चिरकालविनष्टादपि कारणात् कालान्तरे कार्योत्पत्त्यापत्तेः, तथा च त्वदुक्तस्यानित्यस्य मनस आत्मरूपत्वं न संभवति, किन्तु तद्व्यतिरिक्त एव विज्ञानघनो नित्य आत्मेति सिद्धम् ॥ ९० ॥

नित्यत्वेऽप्यात्मनो नरादिरूपं वैचित्र्यं यथा संभवति तथोपपाद्य दर्शयति—

आत्मत्वेनाविशिष्टस्य, वैचित्र्यं तस्य यद्वशात् ।
नरादिरूपं तच्चित्रमदृष्टं कर्मसंज्ञितम् ॥ ९१ ॥

आत्मत्वेनेति । **आत्मत्वेन** आत्मत्वसामान्येन, **अविशिष्टस्य** एकरूपस्य एकजातीयस्येति यावत्, **तस्य** आत्मनः, **वैचित्र्यं** नरादिरूपं वैलक्षण्यम्, **नरादीत्यादिपदान्नारकादिपरिग्रहः**, **यद्वशात्** यस्य कारणस्य सामर्थ्यात्, **तत्** कारणम् । **चित्रं** कार्यवैचित्र्यनिर्वाहकशक्त्यपरनामकस्वभाववैचित्र्यशालि, **कर्मसंज्ञितं** कर्मापरनामधेयम्, **अदृष्टं** सिद्ध्यतीति । न च धर्माधर्मलक्षणादृष्टस्वीकारमन्तरेणापि नरगत्याद्यर्जककर्मिययैव प्राग्भवोपार्जितया नरत्वादिवैचित्र्यं भविष्यतीति किमन्तर्गडुनाऽदृष्टेनेति वाच्यम्, अतिचिरविनष्टहेतोः फलाव्यवहितपूर्वक्षणस्थायिव्यापारव्याप्यत्वस्यावधारणात्, तदुक्तं कुसुमाञ्जलौ नैयायिकप्रकाण्डैरुदयनाचार्यैः—

"चिरध्वस्तं फलायालं, न कर्मातिशयं विना ।
सम्भोगो निर्विशेषाणां, न भूतैः संस्कृतैरपि ॥ १-९ ॥" इति ।

अत्रेत्थं तद्ग्रन्थवचनसन्दर्भः—"अस्तु दानाध्ययनादिरेव विचित्रो हेतुर्जगद्वैचित्र्यस्येति चेत् ? न-क्षणिकत्वात्, अपेक्षितस्य कालान्तरभावित्वात्।

"चिरध्वस्तं फलायालं, न कर्मातिशयं विना ।
संभोगो निर्विशेषाणां, न भूतैः संस्कृतैरपि ॥"

तस्मादस्त्यतिशयः कश्चित्, ईदृशान्येवैतानि स्वहेतुबलायातानि, येन नियतभोगसाधननीति चेत्? तदिदममीषामतीन्द्रियं रूपं सहकारिभेदो वा? न तावदैन्द्रियकस्यातीन्द्रियं रूपं, व्याघातात्, द्वितीये त्वपूर्वसिद्धिः" इत्यादि ।

अत्र वर्द्धमानोपाध्यायव्याख्यानमिदम् "अस्त्विति–न तु तज्जन्यमदृष्टमित्येवकारार्थः, तथा चादृष्टाधिष्ठातृत्वेनेश्वरानुमानमाश्रयासिद्धमिति भावः; क्षणिकत्वादिति–आशुतरविनाशित्वादित्यर्थः । चिरध्वस्तमिति–फलस्य स्वर्गादेः कालान्तरभावितया न तत्राशुविनाशिनः साक्षात्साधनत्वमिति प्रतीतसाधनत्वान्यथानुपपत्त्या तज्जन्यापूर्वकल्पनमित्यर्थः, अतिशयं विना चिरध्वस्तं कर्म न फलायालं–समर्थमिति योजना, साक्षात् साधनत्वाभावेऽपि साधनत्वस्य फलसमयपर्यन्तस्थायिव्यापारव्याप्तत्वादिति भावः । ननु चादृष्टसिद्धावपि भूतधर्म एव तदस्त्वित्यत आह–सम्भोग इति–सम्भोगः समीचीनो नियतो भोगः, निर्विशेषाणाम्–अदृष्टरूपविशेषरहितानामात्मनां न स्यात्, संस्कृतानां भूतानां साधारणत्वादित्यर्थः अत्र स्वहेतुबलोत्पन्नस्वरूपविशेषवन्ति शरीरादीनि नियतात्मभोगसाधनानि सन्त्विति शङ्कते–ईदृशानीति । एतद् विकल्प्य व्याघाता-ऽभिमतसिद्धिभ्यां परिहरति–तदिदमिति । रूपं–स्वरूपम्, अतीन्द्रियस्वभावत्वमित्यर्थः । सहकारिभेदोऽतीन्द्रियसहकारी, यद्वा रूपं–धर्मो जातिरूपोऽजातिरूपो वा?, आद्ये न तावदिति–व्यक्तियोग्यतयैव जातेर्योग्यत्वादित्यर्थः" इत्यादि ।

अथ नरादिशरीरवैचित्र्यात् स्वोपादानकारणवैचित्र्यप्रभावाद् भोगवैचित्र्यं भविष्यति, किमदृष्टकल्पनयेति चेत्? न–समवायेन विचित्रभोगं प्रति संयोगसम्बन्धेनैव विचित्रशरीरस्य कारणत्वस्य वाच्यतया संयोगसम्बन्धेन विचित्रशरीरस्याकाशादावपि सत्त्वेन तत्रापि भोगापत्तेः, शरीरोपष्टब्ध आत्मा सुखदुःखादिकं भुङ्क्त इति आत्मना सह शरीरस्य यः संयोगविशेष उपष्टम्भक इत्याख्यायते तेन संयोगेन शरीरस्य भोगं प्रति करणत्वम्, तादृशसंयोगेन चाकाशादौ न शरीरसत्त्वमिति नाकाशादौ भोगापत्तिरिति यद्युच्यते, तदा यत्पुरुषादृष्टेन जनितो यच्छरीरेण सह तत्पुरुषस्य संयोगः स तस्यैव भोगं जनयतीत्यागत्वेन तादृशसंयोगप्रयोजकतयैवादृष्टसिद्धिरिति ॥ ९१ ॥

कर्मवैचित्र्यमेव प्रकारान्तरेणोपपादयति—

तथा तुल्येऽपि चारम्भे, सदुपायेऽपि यो नृणाम् ।
फलभेदः स युक्तो न, युक्त्या हेत्वन्तरं विना ॥ ९२ ॥

तथेति। तुल्येऽपि च समानेऽपि च। **आरम्भे** वाणिज्यादिकर्मणि कृष्यादिप्रयत्ने वा, कृष्यादिप्रयत्ने कृतेऽपि वृष्ट्यादिलक्षणसहकारिणोऽभावाद् धान्यादिसमृद्धिर्न भविष्यतीति दृष्टेनैवोपपत्तौ किं विचित्रादृष्टकल्पनयेत्यत आरम्भं विशिनष्टि— **सदुपायेऽपीति**–अकुण्ठितशक्तिकतदितरसकलकारणसमवहितेऽपीत्यर्थः। **नृणां** मनुष्याणां चैत्र-मैत्रादीनाम्, लोके कार्यारम्भे मनुष्याणां प्राधान्यमिति नृणामित्युक्तम्, पशु-पक्ष्यादीनां स्वस्वोपयोगिकार्यसम्पादनाय प्रवृत्तिर्दृश्यते, तत्तत्कार्यसम्पत्तिस्तु कस्यचिद् भवति कस्यचिन्नेति तेषामप्यदृष्टवैचित्र्यसद्भावाधीने एवारम्भसाफल्य-वैफल्ये इति। **फलभेदः** सम्पदवाप्त्यनवाप्तिरूपः, धान्यसम्पत्त्यसम्पत्तिरूपः, स्वल्पबहुधान्यसंपत्तिरूपो वा यः, उत्तरव्याख्यानादसम्पत्तेः सम्पत्त्यत्यन्ताभावस्याजन्यत्वेऽपि न क्षतिः। **स हेत्वन्तरं विना** दृष्टकारणव्यतिरिक्तकारणमन्तरेण। **युक्त्या** सम्यग्विचारेण **युक्तो** घटमानः, **न** न भवति, स्वभावादेव भविष्यतीति पादप्रसारिका न निस्ताराय, तथा सति सर्वं स्वभावादेव विचित्रं भविष्यतीति कार्यकारणभावमात्रोच्छेदापत्तेः, युक्त्येत्यनन्तरं 'विचार्यमाणः' इति शेषो वा।

अत्रोपपत्तिः प्रकारान्तरेणाशङ्क्य निरस्तोपाध्यायैरित्थम्–"अथाद्यप्रवृत्तावैषम्येऽप्युत्तरकालं सामग्रीवैषम्यादेव कार्यवैषम्यमिति चेत्? न–सामग्रीवैषम्यस्यापि हेत्वन्तराधीनत्वात्" इति।

व्याख्यानान्तरं च तैरेवेत्थमुपदर्शितम्–"अथवा, समानेऽप्यारम्भे एकजातीयदुग्धपानादौ यः फलभेदः-पुरुषभेदेन सुख-दुःखादितारतम्यलक्षणः; स हेत्वन्तरं विना–अतिरिक्तहेतुतारतम्यं विना, न युक्त इत्यर्थः; न चात्रापि क्वचिद् दुग्धादेः कर्कव्यादिवत् पित्तादिरसोद्रेधादुपपत्तिः, सर्वत्र तदापत्तेः; न च भेषजवत् तथा, ततः साक्षात् सुखादितौल्यात्, धातुवैषम्यादेरुत्तरकालत्वात्, पित्तादिरसोद्रेध्यधातुवैषम्यादिविरहितदुग्धपानत्वादिना सुखादिहेतुत्वे गौरवात्, अदृष्टप्रयोज्यजातिव्याप्यजात्यवच्छिन्न प्रत्येव दुग्धपानादेर्हेतुत्वौचित्याच्चेति दिक्" इति ॥ ९२ ॥

अवश्यस्वीकर्तव्यत्वमदृष्टस्योपसंहरन्नाह—

तस्मादवश्यमेष्टव्यमत्र हेत्वन्तरं परैः ।
तदेवादृष्टमित्याहुरन्ये शास्त्रकृतश्रमाः ॥ ९३ ॥

तस्मादिति-यस्मादेवं तस्मात्, तुल्येऽप्यारम्भे फलवैलक्षण्यदर्शनादित्यर्थः । अत्र फलवैलक्षण्ये । हेत्वन्तरं दृष्टकारणव्यतिरिक्तकारणान्तरम् । परैः चार्वाकैः अवश्यं गत्यन्तराभावेन नियमेन । एष्टव्यम् अभ्युपगन्तव्यम् । तदेव हेत्वन्तरमेव । शास्त्रकृतश्रमाः ऊहाऽपोहाभ्यामध्ययनभावनाभ्यां शास्त्रेदम्पर्यावधारणप्रवणाः । अन्ये चार्वाकादिनास्तिकभिन्नाः, आस्तिका इति यावत् । अदृष्टम् अदृष्टसंज्ञितम् । आहुः कथयन्ति, तदुक्तं भगवद्भिर्भाष्यकारैः—

"जो तुल्लसाहणाणं, फले विसेसो न सो विणा हेउं ।
कज्जत्तणओ गोयम ! घडो व्व हेऊ अ से कम्मं ॥" इति ।

[विशेषावश्यके प्रथमगणधरवादे गाथा ८—"यस्तुल्यसाधनानां फले विशेषो न स विना हेतुम् । कार्यत्वतो गौतम ! घट इव हेतुश्च तस्य कर्म ॥१॥" इति संस्कृतम्] ॥ ९३ ॥

अत्र पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

भूतानां तत्स्वभावत्वादयमित्यप्यनुत्तरम् ।
न भूतात्मक एवात्मेत्येतदत्र निदर्शितम् ॥ ९४ ॥

भूतानामिति । भूतानां राजादिपरिणतभूतानाम्, तत्स्वभावत्वात् विचित्रभोगोत्पादनस्वभावत्वात्, अयं फलभेदः, इत्यपि एवं चार्वाकाभिधानमपि, अनुत्तरम् समीचीनोत्तरं न भवति, उत्तराभासमिति यावत्, कुत इत्यपेक्षायामाह—न भूतात्मक एवात्मेतीति-यत इति शेषः । अत्र पूर्वप्रघट्टके, निदर्शितं यस्मान्न भूतात्मक एवात्मेत्येवं प्राक् प्रदर्शितं तस्माद् राजादिपरिणतभूतानां विचित्रभोगजननस्वभावत्वात् फलभेदसमाधानं समाधानाभास इत्यर्थः, आत्मत्वेनैकजातीयानामात्मनां स्वभावभेदोऽदृष्टाधीन इत्यत्रैवंदम्पर्यम् ॥ ९४ ॥

भूतानां भूम्यादीनामित्यनुक्तौ भूतानामित्यस्यादृष्टानामित्यप्यर्थः सम्भवति, स्याद्वादिना पौद्गलिकत्वेनाभ्युपगतेष्वदृष्टेषु भूतविकारत्वेन भूतपदाभिधेयत्वसम्भवात्, तथा च भूतानां तत्स्वभावत्वादयमित्युत्तरं समीचीनमेवेत्याह—

कर्मणो भौतिकत्वेन, यद्वैतदपि साम्प्रतम् ।
आत्मनो व्यतिरिक्तं तच्चित्रभावं यतो मतम् ॥ ९५ ॥

कर्मण इति । **कर्मणः** ज्ञानावरणादेः, अदृष्टस्य वा । **भौतिकत्वेन** पौद्गलिकत्वेन । **एतदपि** चार्वाकोक्तं 'भूतानां तत्स्वभावत्वात् फलभेदः' इत्युत्तरमपि । **यद्वेति** प्रकारान्तरे । **साम्प्रतं** समीचीनम् । ननु कर्मणोऽदृष्टपदाभिधेयस्य भौतिकत्वमयुक्तम्, आत्मगतप्रतिनियतभोगनिर्वाहकस्यात्मधर्मस्यैवादृष्टस्य कल्पनात्, तदुक्तमुदयनाचार्यैः—

"संभोगो निर्विशेषाणां, न भूतैः संस्कृतैरपि ।"

एतदुपदर्शितं प्राक्, एतदभिप्रायेणैवेदमप्यभिहितं तैः—

"तथापि चेतन एवायं संस्क्रियते न भूतानीति कुतो निर्णयः" इति चेत्? उच्यते–भोक्तृणां नित्यविभूनां सर्वदेहप्रासावविशिष्टायां विशिष्टैरपि भूतैर्नियामकाभावात् प्रतिनियतभोगासिद्धेः, नहि तच्छरीरं तन्मनस्तानीन्द्रियाणि विशिष्टान्यपि तस्यैवेति नियमः, नियामकाभावात्, तथा च साधारणविग्रहवत्त्वप्रसङ्गः; न च भूतधर्म एव कश्चिच्चेतनं प्रत्यसाधारणः, विपर्ययदर्शनात्, द्वित्वादिवदिति चेत्? न–तस्यापि शरीरतुल्यतया पक्षत्वात्, नियतचेतनगुणोपग्रहेणैव तस्यापि नियमो न तु तज्जन्यतामात्रेण, स्वयमविशेषात्; तथापि तज्जन्यतयैव नियमोपपत्तौ विपक्षे बाधकं किमिति चेत्? कार्यकारणभावभङ्गप्रसङ्गः, शरीरादीनां चेतनधर्मोपग्रहेणैव तद्धर्मजननोपलब्धेः, तद्यथा–इच्छोपग्रहेण प्रयत्नो ज्ञानोपग्रहेणेच्छादयः, तदुपग्रहेण सुखादय इत्यादि; प्रकृतेऽपि चेतनगता एव बुद्ध्यादयो नियामकाः स्युरिति चेत्? न–शरीरादेः प्राक् तेषामसत्त्वात्, तथा च निरतिशयाश्चेतनाः साधारणानि भूतानीति न मुक्तिनियम उपपद्यते" इति ।

अत्र वर्द्धमानोपाध्यायव्याख्यानं यथा–"भोक्तृणामिति–भोक्तृप्रत्यासत्तेरविशेषात् किञ्चिच्छरीरं कस्यचिदेव भोगं जनयतीति प्रतिनियतभोगान्यथानुपपत्त्या प्रतिनियतभोक्तृकर्मोपार्जितत्वं शरीरादावभ्युपेयमित्यर्थः, विशिष्टैरित्यभ्युपगमवादः । असाधारण इति-प्रतिनियतभोगजनक इत्यर्थः । विपर्ययेति–

भूतधर्मस्य नीलादेस्तथात्वादर्शनादित्यर्थः । द्वित्वादीति–यथा भूतधर्मोऽपि द्वित्वादि यस्यैवापेक्षाबुद्ध्या जनितं तस्यैव भोगजनकं तथाऽपूर्वमपि तद्धर्मः स्यादित्यर्थः । द्वित्वादेरप्यसाधारणत्वं नियतचेतनगुणोपग्रहेणैवेत्याह—तस्यापीति । ननु भूतधर्मान्तरस्य साधारण्येऽप्यपूर्वं तद्धर्मस्तत्कार्यत्वमात्रेवासाधारणं स्यादित्यत आह–तथापीति । कार्यकारणभावमेवाह–शरीरादीनामिति । प्रकृतेऽपीति–यथा शरीरादीनां चेतनगुणबुद्ध्यादिसहितानां नियतभोगजनकत्वं तथा प्रकृतेऽपि तेषां तत्सहितानामेव तज्जनकत्वमस्त्विति कृतमपूर्वेणेत्यर्थः । शरीरादेरिति–न शरीराद्युत्पत्तेः पूर्वं बुद्ध्यादिसम्भव इति तदन्यचेतनगुणापूर्वसिद्धिरित्यर्थः, 'देवदत्ताद्यशरीरं स्वाव्यवहितप्राक्कालवर्तिदेवदत्तसमवेतविशेषगुणजन्यं, कार्यत्वे सति तद्भोगसाधनत्वात्, तन्निर्मितस्रग्वत्' घटादीनां पक्षसमत्वान्न तैर्व्यभिचारः, न च संस्कारेणार्थान्तरम्, तस्य भोगजनकत्वेनाकल्पनात्, संस्काराजन्यत्वेन पक्षविशेषणाद् वेति भावः" इति ।

अदृष्टगतवैजात्ये मानाभावेन तस्य चित्रस्वभावत्वमपि न युज्यते, विजातीयादृष्टं प्रति कर्मणां विशिष्य कारणत्वस्यादृष्टवैजात्यसिद्धौ सत्यां कल्पने गौरवाच्च, न च—

"कर्मनाशाजलस्पर्शात्, करतोयाविलङ्घनात् ।
गण्डकीबाहुतरणाद्, धर्मः क्षरति कीर्तनात् ॥" [ ] इति ।

वचनप्रामाण्यात् कर्मनाशाजलस्पर्शादिनाश्यतावच्छेदकतया अदृष्टगतवैजात्यस्य धर्मत्वाख्यस्य, ब्रह्महत्यादिपापं प्रायश्चित्तादिनाऽपनुदतीति प्रायश्चित्तादिनाश्यतावच्छेदकतयाऽदृष्टगतवैजात्यस्याधर्मत्वस्य च सिद्धिः, अश्वमेधवाजपेययागादेर्ब्रह्महत्यादेश्च क्रियारूपस्य पूर्वमेव विनष्टत्वेन तस्य ततो विनाशासम्भवादिति वाच्यम्, तत्रादृष्टत्वस्य स्वाश्रयजन्यताविशेषसम्बन्धेनाश्वमेधत्वादिघटितस्य वा कर्मनाशाजलस्पर्शादिनाश्यतावच्छेदकत्वात्, अन्यथा "मयाऽश्वमेधवाजपेयौ कृतौ, मया वाजपेय–ज्योतिष्टोमौ कृतौ" इत्यादिकीर्तननाश्यतावच्छेदकजातिसाङ्कर्यस्यापि संभवात्, यतः 'मयाऽश्वमेधवाजपेयौ कृतौ' इत्येवं स्वरूपकीर्तनेनाश्वमेधजन्यमपूर्वं नश्यति तथा वाजपेयजन्यमपूर्वं नश्यतीति तत्कीर्तननाश्यतावच्छेदकवैजात्यमश्वमेधजन्यापूर्वे वाजपेयजन्यापूर्वे च वर्तते, ज्योतिष्टोमजन्यापूर्वे च वर्तते, तथा च तयोर्वैजात्ययोर्वाजपेयजन्यापूर्वे मिथः सामानाधिकरण्यम्, अश्वमेधजन्यापूर्वे ज्योतिष्टोमजन्यापूर्वे च परस्परात्यन्ता-

भावसामानाधिकरण्यमिति, कीर्तननाश्यतावच्छेदकतया वैजात्यस्याकल्पनेऽपि च तत्तत्कीर्तनाभावविशिष्टतत्तत्कर्मत्वेन तत्तत्फलत्वेन कारणत्वम्, अदृष्टाख्यस्य तत्तत्कर्मणः सत्त्वेऽपि तत्तत्कीर्तने सति तदभावविशिष्टस्य तस्याभावादेव तत्फलानुत्पत्तिः, इत्थं च समूहालम्बनात्मकहरिगङ्गास्मरणजन्यापूर्वस्य गङ्गास्मृतिकीर्तनतो नाशे हरिस्मृतेरपि फलानवाप्तिः, तस्यानाशे तु गङ्गास्मृतेरपि फलावाप्तिरित्यस्य प्रसङ्गस्य नावकाशः, गङ्गास्मृतिकीर्तनाभावविशिष्टापूर्वस्याभावाद्, गङ्गास्मृतिजन्यफलस्यानुत्पादेऽपि हरिस्मृतिकीर्तनाभावविशिष्टहरिस्मृतिजन्यापूर्वस्य सद्भावाद् हरिस्मृतिजन्यफलसंभवादिति, नैयायिकमतसाम्राज्यादित्यत आह–

आत्मन इति। **यतः** यस्मात् कारणात्, **तत्** कर्म, **आत्मनो व्यतिरिक्तम्** आत्मनः सकाशाद् भिन्नद्रव्यतया व्यवस्थितम्, तथा **चित्रभावं** फलवैचित्र्यप्रयोजकवैचित्र्यशालि, **मतं** स्वीकृतं, जैनागमरहस्यविद्भिरिति शेषः।

तत्र पौद्गलिकत्वे प्राञ्च इदमनुमानं प्रकटयन्ति–'अदृष्टं पौद्गलिकम्, आत्मानुग्रहोपघातनिमित्तत्वात्, यदात्मनोऽनुग्रहोपघातनिमित्तं तत् पौद्गलिकं यथा शरीरम्' इति, आत्मधर्मत्वासम्भव एवास्याप्रयोजकत्वमपाकरोति, तदसम्भवश्चात्मधर्मत्वेऽस्य समवायसम्बन्धेन सुखं प्रति समवायसम्बन्धेनास्य कारणत्वं वाच्यम्, तथा च कार्यैकार्थप्रत्यासत्ति-कारणैकार्थप्रत्यासत्त्यन्यतरेण कार्यकारणस्य समवायिकारणत्वमिति कार्यैकार्थप्रत्यासत्त्या सुखं प्रति कारणस्यास्य सुखं प्रत्यसमवायिकारणत्वं प्रसज्येतेति, विशिष्यासमवायिकारणत्वलक्षणाभिधानं त्वननुगमदोषकलङ्कितमिति आत्मधर्माणां सुख-दुःखादीनां मनसा प्रत्यक्षं स्वसंयुक्तसमवायसन्निकर्षबलात् परेषामनुमतमिति मनसः स्वसंयुक्तसमवायसन्निकर्षस्य धर्माधर्मयोरात्मधर्मत्वेऽस्त्येवेति तद्बलात् तयोर्मानसप्रत्यक्षापत्तेर्वारणाय विषयतासम्बन्धेन मानसप्रत्यक्षं प्रति तादात्म्यसम्बन्धेन तयोः प्रतिबन्धकत्वकल्पनमपि गौरवकरमतोऽदृष्टस्य पौद्गलिकत्वमेव युक्तं नाऽऽत्मगुणत्वमिति, पौद्गलिकस्यापि कर्मणो वैचित्र्यं बन्धहेतुत्ववैचित्र्येऽपि सति संक्रमकरणादिकृतं प्रवचनतत्त्वविदां सुज्ञानमेवेति चित्रस्वभावत्वमप्यदृष्टस्यानुपपन्नमिति परास्तमाग्रहविजृम्भितमेव, तद्वैजात्यमात्राभाव इति घोषणाऽपि परस्य न युक्ता, कीर्तनादिनाश्यतावच्छेदकतया वैजात्यस्यावश्यकत्वात्। यदपि स्वाश्रयजन्यताविशेषसम्बन्धेनाश्वमेधत्वादिघटितस्यादृष्टत्वस्यैव कीर्तनादिनाश्यतावच्छेदकमिति नादृष्टगतवैजात्यं परिकल्पनीयमिति तदपि न शोभनम्, अश्वमेधत्वादिघटितादृष्ट-

त्वापेक्षया लघुभूतस्यादृष्टगतवैजात्यस्यैव कीर्तनादिनाश्यतावच्छेदकत्वकल्पनस्य युक्तत्वात्, अश्वमेधत्वादिघटितादृष्टत्वस्य कीर्तनादिनाश्यतावच्छेदकत्वं स्वाश्रयजनकत्वविशेषसम्बन्धेन सुखगतवैजात्यघटितादृष्टत्वस्य वा तथात्वमित्यत्र विनिगमकाभावाच्च, मयाऽश्वमेध-वाजपेयौ कृतावित्यादिसमूहालम्बनकीर्तनाच्चोभयोरेव वैजात्यावच्छिन्नयोर्नाशः, तत्र चाश्वमेधकीर्तननाशतावच्छेदकवैजात्यमन्यदन्यच्च वाजपेयकीर्तननाश्यतावच्छेदकवैजात्यमिति, तथा च न परोक्तसाङ्कर्यदोषस्याप्यवकाशः, उभयकीर्तननाश्यतावच्छेदकस्यैकस्य वैजात्यस्याभ्युपगमे तु प्रत्येककीर्तनतो विलक्षणमेव समूहालम्बनकीर्तनमिति तदानीं प्रत्येककीर्तनस्याभावात् प्रत्येककीर्तननाश्यस्यानाशप्रसङ्गात् तत्र प्रत्येककीर्तननाश्यतावच्छेदकवैजात्यस्याभ्युपगमे तु यत्रैकस्यैव कीर्तनं तत्र समूहालम्बनवैजात्यस्यापि भावेन तदवच्छिन्नस्यापि नाशे द्वितीयस्यापि तदवच्छिन्नस्य नाशप्रसक्तौ तत्प्रतिबन्धकान्यकल्पने गौरवं स्यात्। यच्च वैजात्यमनभ्युपगम्य तत्तत्कीर्तनाभावविशिष्टतत्तत्कर्मणस्तत्तत्फलं प्रति हेतुत्वमुपेयते तत्रापि विशिष्टस्य कारणत्वे विशेषणस्यापि कारणत्वमिति न्यायतस्तत्कीर्तनाभावस्यापि तत् तत् फलं प्रति कारणत्वमागतम्, कारणीभूताभावप्रतियोगित्वमेव प्रतिबन्धकत्वमिति तत् तत् फलं प्रति तत्तत्कीर्तनस्य प्रतिबन्धकत्वमिति गौरवं स्यादिति दिक् ॥ ९५ ॥

अदृष्ट एव प्रकारान्तरमाश्रित्यान्येषां वार्तान्तरमुपदर्शयति—

शक्तिरूपं तदन्ये तु, सूरयः संप्रचक्षते ।
अन्ये तु वासनारूपं, विचित्रफलदं तथा ॥ ९६ ॥

शक्तिरूपमिति। **तत्** अदृष्टाख्यं कर्म । **अन्ये तु** दर्शितवादिभिन्नाः पुनः। **सूरयः** पण्डिताः। **शक्तिरूपं** कर्तुस्तत्तत्कार्यकरणसामर्थ्यात्मकशक्तिस्वरूपम्। **संप्रचक्षते** सम्यग् व्यावर्णयन्ति। **तु** पुनः। **अन्ये** तेभ्योऽप्यतिरिक्ताः पण्डिताः। **वासनारूपं** तदित्यनुवर्तते। **विचित्रफलदं** नानाप्रकारकफलजनकम्। **तथा** उक्तवत्, 'संप्रचक्षते' इत्यनुवर्तते ॥ ९६ ॥

एतच्छक्तिपक्षप्रतिक्षेपकदूषणप्रकारमाश्रयतां प्रावचनिकानां वादान्तरमाह—

अन्ये त्वभिदधत्यत्र, स्वरूपनियतस्य वै ।
कर्तुर्विनाऽन्यसम्बन्धं, शक्तिराकस्मिकी कुतः ? ॥ ९७ ॥

अन्ये त्विति—प्रावचनिकाः पुनरित्यर्थः। अत्र शक्त्यात्मककर्माभ्युपगमे।

अभिदधति कथयन्ति । किमित्यपेक्षायामाह-**स्वरूपनियतस्येति** । **वै** निश्चितम् । **स्वरूपनियतस्य** आत्मत्वेनाविशिष्टस्य, **कर्तुः** आत्मनः । **अन्यसम्बन्धं विना** आत्मव्यतिरिक्तकर्मसम्बन्धमन्तरेण । **शक्तिराकस्मिकी कुतः?** अकस्मादुत्पत्तिका सती शक्तिः कस्माद् भवेत्? न कथञ्चिद् भवेदित्यर्थः, अत्रापाद्याऽऽपादकयोर्वैयधिकरण्यपरिहाराय शक्तिर्यद्यात्ममात्राजन्यत्वे सति तदतिरिक्तासाधारणकारणजन्या न स्यादित्येवमापादनमुशन्त्युपाध्यायाः ॥ ९७ ॥

उपदर्शितापादने आपादकस्यात्ममात्राजन्यत्वे सति तदतिरिक्तासाधारणकारणजन्यत्वाभावस्य विशेष्यतया घटको यस्तदतिरिक्तासाधारणकारणजन्यत्वाभावस्तस्यासिद्धिमाशङ्क्य प्रतिक्षिपति—

तत्क्रियायोगतः सा चेत्, तदपुष्टौ न युज्यते ।
तदन्ययोगाभावे च, पुष्टिरस्य कथं भवेत्? ॥ ९८ ॥

तत्क्रियायोगत इति-आत्मनः सुपात्रदानादिक्रियासम्बन्धादित्यर्थः । **सा** शक्तिः, तथा चात्मातिरिक्तासाधारणकारणजन्यत्वमेवास्तीति तदभावोऽसिद्ध इति, **चेत्?** एवं यदि मन्यसे तदा, **तदपुष्टौ** निरुक्तक्रियाजन्यशक्तौ सत्यामपि आत्मनोऽपुष्टौ सत्याम्, अनुपचये सति, यथैव पूर्वमात्मस्वरूपमासीत् तथैव तत्स्वरूपसद्भावे सतीति यावत् । **न युज्यते** सेत्यनुवर्तते, क्रियाजन्या शक्तिर्न घटते, यथा मृदः पुष्टावेव घटादिजनिका शक्तिर्भवति, तथाऽऽत्मनोऽपि पुष्टावेव सुखादिजनिका शक्तिः स्यात्, न त्वन्यथेति भावमुपाध्याया वर्णयन्ति । अथोक्तदोषपरिहारार्थं पुष्टिरिष्यत एवात्मन इत्यत आह-**तदन्ययोगाभावे चेति**-तया क्रियया ऽन्येषां कर्माणूनां योगाभावे, बन्धविरहे चेत्यर्थः । **अस्य** आत्मनः । **पुष्टिः** उपष्टम्भकाणुसम्बन्धरूपा । **कथं** कुतः, **भवेत्** स्यात्, कथमपि नैव भवेत्, तथा च पुष्टिहेतुतया कर्मसिद्धिरावश्यकीत्यभिसन्धिः । अन्यत्र पुष्टेः स्थौल्यरूपत्वेऽप्यात्मनि तदसम्भवादात्मनि शक्त्याधानस्यैव वाच्यत्वेन कर्मण एव नामान्तरमिति ॥ ९८ ॥

अजन्यां शक्तिमदृष्टशब्दसंशब्दितां पराभिप्रेतामाशङ्क्य प्रतिक्षिपति—

अस्त्येव सा सदा किन्तु, क्रियया व्यज्यते परम् ।
आत्ममात्रस्थिताया न, तस्या व्यक्तिः कदाचन ॥ ९९ ॥

अस्त्येवेति । **सा** अदृष्टसंज्ञिता शक्तिः । **सदा** सर्वदा, **अस्त्येव** विद्यत

एव, एतेन तस्या नित्यत्वमावेदितम्, तत् किं दानादिक्रिया व्यर्था? सप्रयोजना चेत्? किमस्याः प्रयोजनमिति पृच्छति–**किन्त्विति** । सदातनव्यवस्थितशक्तिव्यञ्जनलक्षणप्रयोजनवत्त्वेन सुपात्रदानादिक्रिया सफलेत्युत्तरयति–**क्रिययेति**-सुपात्रदानादिक्रिययेत्यर्थः । **परं** केवलम्, **व्यज्यते** फलदानसमर्था भवति । उक्ताशङ्काप्रतिक्षेपहेतुपरमुत्तरार्द्धम्, तेन "नैवं वाच्यम्, यतः" इति शेषः, **आत्ममात्रस्थितायाः** अनावृतैकस्वरूपात्मव्यवस्थितायाः स्वतोऽपि केनचिदनावृतायाः, **तस्याः** शक्तेः, **न** नैव, **व्यक्तिः** आवरणनिवृत्तिलक्षणाऽभिव्यक्तिः, **कदाचन** जातुचित् ॥ ९९ ॥

आवरणाभावादेवाऽऽवरणनिवृत्तिलक्षणाभिव्यक्तिः शक्तिर्न सम्भवतीत्येवं स्पष्टीकरोति–

तदन्यावरणाभावाद्, भावे वाऽस्यैव कर्मता ।
तन्निराकरणाद् व्यक्तिरिति तद्भेदसंस्थितिः ॥ १०० ॥

तदन्येति । **तदन्यावरणाभावात्** अनावृतायाः शक्तेरन्यस्यावरणस्याभावात्, यदि शक्तिरावृता भवेत् स्यात् तदा तदावृतिनिवृत्तिरूपतदभिव्यक्तिफलकत्वेन सुपात्रदानादिक्रियायाः साफल्यम्, न चैवम्, सर्वदाऽसतश्चावरणस्य नित्यनिवृत्तत्वेन नावृतिनिवृत्तिलक्षणाऽभिव्यक्तिः क्रियया तस्याः संभवतीत्याशयः । नित्यायास्तस्याः शक्तेः कार्यान्तरं प्रत्यनावृतत्वेऽपि प्रकृतफलप्रदानाभिमुख्याभावात् प्रकृतफलं प्रत्यावृतत्वमेवेत्यत आह–**भावे** वेति–शक्तेरन्यावरणस्य सद्भावे वेत्यर्थः । **अस्यैव** आवरणत्वेन स्वीकृतस्यैव । **कर्मता** कर्मरूपता प्राप्नोति, तत्र हेतुः–यत इति करणीयः । **तन्निराकरणादिति**–तस्य–आवरणस्य निराकरणादित्यर्थः । **व्यक्तिः** शक्तेरभिव्यक्तिः, **इति** एतस्माद्धेतोः । **तद्भेदसंस्थितिः** तयोः–शक्त्यात्मनोः सकाशात् कर्मणो भेदस्य संस्थितिः–मर्यादा, अस्तीत्यनुषज्यते, यतो विरुद्धधर्माध्यासाद् भेदो भवति, आत्मनश्चाधारत्वमाधेयत्वं च शक्तेः, निरावृतत्वं चात्मनः शक्तेश्चावृतत्वमित्येवमाधारत्वाधेयत्वाभ्यामावृतत्वाऽनावृतत्वाभ्यां च विरुद्धधर्माभ्यामालिङ्गितत्वादात्मशक्त्योः परस्परं भेदः, शक्तिः क्रियया ऽभिव्यज्यते, आवरणं च कर्मक्रियया नश्यतीति क्रियाभिव्यक्तत्व-क्रियानाश्यत्वाभ्यां विरुद्धधर्माभ्यामालिङ्गितत्वाच्छक्ति-कर्मणोर्भेद इत्येवमात्मशक्ति-क्रियात्रयसिद्धावप्यावरणरूपतया कर्मणोऽपि सिद्धिर्भवत्येव ।

अत्र स्वाभिप्राय उपाध्यायैरित्थं दर्शितः—"वस्तुतः सा शक्तिर्यदि तदैव क्रिया-याऽभिव्यज्यते तदा तदैव स्वर्गोत्पत्तिः स्यात्, यदि च क्रियाजन्यावरणध्वंस-सहकृता कालान्तर एव फलजननी स्वीक्रियते तदा किमेतावत्कुसृष्ट्या, तज्जन्य-धर्मस्यैव स्वविपाककाले फलजनकत्वौचित्यादिति स्मर्तव्यम्" इति ॥ १०० ॥

आत्म-शक्त्योः सकाशाद् भिन्नमावरणरूपं कर्म पापस्वरूपमस्तु, न तु पुण्यमिति पराकूतमाशङ्क्य प्रतिक्षिपति—

पापं तद्भिन्नमेवास्तु, क्रियान्तरनिबन्धनम् ।
एवमिष्टक्रियाजन्यं, पुण्यं किमिति नेष्यते ? ॥ १०१ ॥

पापमिति । **तत्** आवरकं कर्म । **क्रियान्तरनिबन्धनं** क्रियान्तरं निबन्धनं निमित्तमस्य तत् क्रियान्तरनिबन्धनमिति व्युत्पत्त्या क्रियान्तरजन्यम्, क्रियान्तरं चाशुभक्रियारूपम्, ईदृशं **पापं, भिन्नमेव** शक्तितो भिन्नमेव, **अस्तु** भवतु, पुण्यं किमिति व्यतिरिक्तमभ्युपेयमिति चेत्? अत्रोत्तरम्—**एवमिति**—अशुभक्रियाजन्यं पापं यथा शक्तितो व्यतिरिक्तं तथेत्यर्थः। **इष्ट-क्रियाजन्यम्** आगमविहितयागादिक्रियानिष्पाद्यम्। **पुण्यं** धर्मापरनामकम्, **किमिति नेष्यते** कुतो हेतोः न स्वीक्रियते, तस्याप्यात्मसम्बन्धिकालान्तर-भाविफलजनकत्वेनाभ्युपगन्तुमुचितत्वात् फलाव्यवहितपूर्वकाले शुभक्रियाया यागादिस्वरूपाया अभावात्, यदि चाशुभक्रियानिमित्तकत्वेन पापस्य क्लृप्तत्वेन तदभाव एव पुण्यं, न तु तद्व्यतिरिक्तं भावस्वरूपं तदिति भवतां मतिः, तर्हि विहितक्रियाजन्यत्वेनातिरिक्तस्य भावरूपस्य पुण्यस्य क्लृप्तत्वेन तदभावस्वरूपमेव पापं, न तु तद्व्यतिरिक्तं भावस्वरूपं तदित्येव किं न रोचयेः? विनिगमकाभाव-स्योभयत्र तुल्यत्वादित्याशयः ॥ १०१ ॥

एतावता कर्मणः शक्तिरूपत्वमपाकृतम्, "अन्ये तु वासनारूपं विचित्र-फलदं तथा" इत्यनेन कर्मणो वासनारूपत्वमित्यन्येषां मतं यदुद्भावितं तदधिकृत्याह—

वासनाऽप्यन्यसम्बन्धं, विना नैवोपपद्यते ।
पुष्पादिगन्धवैकल्ये, तिलादौ नेष्यते यतः ॥ १०२ ॥

वासनाऽपीति । **अन्यसम्बन्धं विना** वास्यात्मज्ञानातिरिक्तवस्तु-सम्बन्धमन्तरेण । **वासनाऽपि नैवोपपद्यते** न कथमपि युक्त्युपपन्ना भवति ।

उक्तार्थे निदर्शनमाह–**पुष्पादिगन्धवैकल्य** इति–पुष्पादिगन्धसम्बन्धाभावे इत्यर्थः । **यतः** यस्मात् कारणात् । **तिलादौ** वासना, **'नेष्यते'** इत्यस्य स्थाने 'नेक्ष्यते' इति पाठो युक्तः, नानुभूयत इत्यर्थः, अनुभवस्य साक्षितयोपदर्शनेन निदर्शनं सुदृढं भवतीति, 'आत्मगतज्ञानवासना आत्मव्यतिरिक्तसम्बन्धजन्या वासनात्वात्, तिलादिगतगन्धवासनावद्' इत्यनुमानमत्र बोध्यम् ॥ १०२ ॥

ततश्च यद् आत्मव्यतिरिक्तं तद्वासकं वस्तु तत् कर्मेति सिध्यतीत्याह—

बोधमात्रातिरिक्तं तद्, वासकं किञ्चिदिष्यताम् ।
मुख्यं तदेव वः कर्म, न युक्ता वासनाऽन्यथा ॥ १०३ ॥

बोधमात्रातिरिक्तमिति—यस्माद् बोधमात्रव्यतिरिक्तं **तत्** तस्मान्नियमात्, **वासकं किञ्चिद् इष्यतां** स्वीक्रियताम्, **तदेव** स्वीक्रियमाणम्, **वः** युष्माकम्, **मुख्यं** वस्तु सत्, अवस्तुना वासनासम्भवात् **कर्म**, अस्तु भवतु, **अन्यथा** निरुक्तस्वरूपकर्माभ्युपगमं विना, **वासना नृ** युक्ता न युक्त्युपपन्ना, वासकमन्तरेणापि वासनाभ्युपगमे तिलादौ पुष्पादिगन्धसम्बन्धमन्तरेणापि वासना प्रसज्येत; न चादृष्टस्यासतोऽपि ख्यातिरसत्ख्यातिवादिभिरस्माभिरुपेयते, तेनासत्ख्यात्योपनीतस्यादृष्टस्य भेदाग्रहाज्ज्ञानवासना भवतीत्येवमभ्युपगमे वासककर्मणोऽभ्युपगमो नावश्यक इति वाच्यम्, असत्ख्यात्युपनीतादृष्टभेदाग्रहाद् वासनाभ्युपगमे प्रमाणाभावात्, अन्यथा तैलादिषु पुष्पादिगन्धसम्बन्धाभावेऽपि पुष्पादिगन्धभेदाग्रहात् तद्वासनापत्तेः; न च तैलादिगतगन्धवासना पुष्पादिगन्धसम्बन्धप्रभवेति न सा पुष्पादिगन्धसम्बन्धमन्तरेण पुष्पादिगन्धभेदाग्रहाद् भवितुमर्हति, ज्ञानवासना तु तद्विलक्षणैवेति साऽसत्ख्यात्युपनीतादृष्टभेदाग्रहाद् भविष्यतीति वाच्यम्, ज्ञानेऽदृष्टभेदाग्रहाद् वासनाभावे ज्ञानेऽदृष्टभेदग्रहाद् वासनानिवृत्तिरित्यस्यापि स्वीकर्तुं शक्यत्वेन यस्य प्रमातुरिदानीं ज्ञानमदृष्टाद् भिन्नमिति ग्रहस्तस्य ज्ञानेऽदृष्टभेदग्रहाद् वासनानिवृत्त्येदानीं मुक्तिप्रसङ्गात्, न चेदानीं भेदग्रहस्याभावेऽप्युत्तरकाले भेदाग्रहो भविष्यतीति तत्प्रयोजकदोषस्येदानीं सत्त्वान्नेदानीं मुक्तिप्रसङ्ग इति वाच्यम्, तथा सति दोषाभावविशिष्टभेदग्रहाभावो वासनेत्यभ्युपगतः स्यात्, दोषश्च तत्र वासनैवेति वासनालक्षणदोषादोषाभावविशिष्टभेदग्रहाभावो वासनेत्यात्माश्रयः, असत्तयाऽप्यदृष्टस्य स्वीकारे सत्येव निरुक्तवासनास्वीकारः संभ-

वति, अदृष्टे चासत्त्वमप्रामाणिकत्वमेवेति प्रामाणिकत्वाभावलक्षणाप्रामाणिकत्वकल्पनापेक्षया प्रामाणिकत्वकल्पन एव लाघवाददृष्टसिद्धौ तस्यैव कर्मत्वमुचितमिति किं वासनां प्रकल्प्य तत्र कर्मत्वकल्पनयेति ॥ १०३ ॥

उक्ताभिप्रेतार्थाश्रयणेनाह—

बोधमात्रस्य तद्भावे, नास्ति ज्ञानमवासितम् ।
ततोऽमुक्तिः सदैव स्याद्, वैशिष्ट्यं केवलस्य न ॥१०४॥

बोधमात्रस्येति–मात्रपदं नाशेषार्थकं, किन्तु अविशिष्टतालक्षणकैवल्यार्थकम्, तद् यत्पदानन्तरं तदर्थे विशेषणतया तदर्थस्यान्वयो व्युत्पत्तिवैचित्र्यादिति बोधमात्रस्य–अविशिष्टबोधस्य, **तद्भावे** वासनात्वे, 'अङ्गीक्रियमाणे' इति शेषः, **नास्ति ज्ञानमवासितं** ज्ञानत्वं ज्ञानमात्रे वर्तत इति सर्वस्य ज्ञानस्य वासनारूपत्वादवासितं ज्ञानं नास्त्येवेति । एवं च वासितज्ञानमेव बन्ध इति सदा बद्ध एवात्मा भवेन्न कदापि मुक्त इत्याह–**ततोऽमुक्तिः सदैव स्यादिति**–ततः–सदैव वासितज्ञानसद्भावात्, सदैव सर्वदैव, अमुक्तिः–मोक्षाभावः, स्यात्–प्रसज्येत । विशिष्टज्ञानस्य वासनारूपत्वे त्वाह–**वैशिष्ट्यं केवलस्य नेति**–केवलस्य अविशेषितज्ञानस्य, वैशिष्ट्यं–किञ्चिद्विशेषणवत्त्वम्, न–न संभवति, विशेषकस्वीकारे तु यदेव विशेषकं तदेवादृष्टमित्याशयः । क्षणिकतत्तज्ज्ञानप्रवाहरूपा वासनेत्यपि न युक्तम्, यतो बुद्धज्ञानमपि क्षणिकमेवेति तज्ज्ञानप्रवाहोऽपि वासना स्यादिति बुद्धोऽपि मुक्तो न भवेत्; अस्मदादिक्षणिकतत्तज्ज्ञानप्रवाहरूपा वासनेत्यपि न युक्तम्, अस्मत्क्षणिकविज्ञानानन्तरबुद्धविज्ञानतदनन्तरतज्ज्ञानप्रवाहरूपाऽपि वासना स्यादिति बुद्धस्यापि वासनापत्तेः; एकसन्तानगाम्यस्मदादिक्षणिकतत्तज्ज्ञानप्रवाहरूपा वासनेत्युक्तिरपि तदा शोभेत यदि बुद्धसन्तानव्यतिरिक्तमस्मदादिसन्तानं क्षणपरम्परातिरिक्तं स्यात्, तथाऽभ्युपगमे च द्रव्याभ्युपगमः प्रसज्येत, अन्यथा तूक्तातिप्रसङ्गो दुर्वार एवेति दिक् ॥ १०४ ॥

उपसंहरति—

एवं शक्त्यादिपक्षोऽयं, घटते नोपपत्तितः ।
बन्धाद्न्यूनातिरिक्तत्वे, तद्भावानुपपत्तितः ॥ १०५ ॥

एवमिति—एवम्–उक्तप्रकारेण, अयम् अनन्तरमुपदर्शितः, शक्त्यादि-

पक्षः शक्तिरदृष्टं वासनाऽदृष्टमिति परप्रवादः, **उपपत्तितः** युक्तितः, **न घटते** न सङ्गच्छते, प्रागुपदर्शितां युक्तिमेवानुगमयय दर्शयति–**बन्धादिति**–बन्धापेक्षयेत्यर्थः । **न्यूनातिरिक्तत्वे** न्यूनत्वे अतिरिक्तत्वे वा, बन्धापेक्षया न्यूनत्वं किञ्चिद्बन्धाधिकरणावृत्तित्वम्, बन्धसमानाधिकरणत्वे सति बन्धसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमिति यावत्, तेन बन्धाधिकरणमात्रावर्तिनोऽपि किञ्चिद्बन्धाधिकरणावृत्तित्वेन न बन्धन्यूनत्वव्यवहारापत्तिः, बन्धापेक्षयाऽतिरिक्तत्वं बन्धापेक्षयाऽधिकदेशवृत्तित्वम्, तच्च बन्धाभाववद्वृत्तित्वं, बन्धसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वे सति बन्धाभाववद्वृत्तित्वमिति यावत्, तेन बन्धविरुद्धस्यापि बन्धाभाववद्वृत्तित्वेन न बन्धाधिकदेशत्वव्यवहारापत्तिः । **तद्भावानुपपत्तितः** बध्य-बन्धनीयभावाऽव्यवस्थाप्रसङ्गात्, यत्र बन्धो भवति तत्र बन्धन्यूनवर्तिनः शक्त्यादेरसत्त्वे बन्धो न स्यादिति बन्धन्यूनत्वे दोषः, यत्र बन्धो न भवति तत्रापि शक्त्यादेः सत्त्वे बन्धः स्यादित्यधिकत्वे दोषः, एवमप्रसङ्गातिप्रसङ्गाभ्यां दोषाभ्यां भङ्ग्यन्तरेण युक्त्या प्राक् प्रदर्शिताभ्यां शक्त्यादिपक्षो न घटत इत्यर्थः ॥ १०५ ॥

एतावता पराभिमतादृष्टनिराकरणेन स्वाभिमतादृष्टं यथाभूतं निरवद्यं सिद्धिपथमेति तद्दर्शयति—

तस्मात्तदात्मनो भिन्नं, सच्चित्रं चात्मयोगि च ।
अदृष्टमवगन्तव्यं, तस्य शक्त्यादिसाधकम् ॥ १०६ ॥

तस्मादिति—यस्मादेवं तस्मादुक्तहेतोरित्यर्थः । **तत्** नरादिवैचित्र्यनिर्वाहकं कर्म, **आत्मनः** आत्मनः सकाशात्, **भिन्नं** पृथग् द्रव्यरूपं पौद्गलिकमेव, न त्वात्मनो गुणस्वरूपं नैयायिकाद्यभिमतम्, **सत्** पारमार्थिकं, न तु काल्पनिकम्, **चित्रं** वैचित्र्यशालि, न त्वेकजातीयम्, **आत्मयोगि** आत्मसम्बन्धि, आत्मप्रदेशेषु क्षीरनीरन्यायेनानुप्रविष्टम्, न तु कूटस्थनित्यादात्मनः सकाशात् पृथगेव विवर्तमानम्, नवा सर्पस्योपर्येव यथा कञ्चुकं तथा आत्मन उपर्येव वर्तमानम् । समुच्चयार्थकेन **च**कारेण प्रवाहतोऽनादित्वादि समुच्चीयते । **तस्य** आत्मनः । **शक्त्यादिसाधकं** पराभिमतशक्त्यादिपक्षनिर्वाहकम्, कर्मात्मकादृष्टाभावे उक्तयुक्त्या शक्त्यादिकल्पनाऽसम्भवात्, **अदृष्टं** कर्म, **अवगन्तव्यं** स्याद्वादैकतानसूक्ष्मदृष्ट्या विभावनीयम् ।

उच्छृङ्खलनैयायिकास्तु–"चिरध्वस्तयागादेर्व्यापारमन्तरेण स्वर्गाद्यव्यवहित-पूर्वक्षणवृत्तित्वाभावेन वेदबोधितस्वर्गजनकत्वासम्भवात् तदन्यथानुपपत्त्या-ऽदृष्टं तद्व्यापारतया कल्प्यते, तथा च स्वजन्यादृष्टलक्षणव्यापारवत्त्वसम्बन्धेन यागादेः स्वर्गाद्यव्यवहितपूर्वक्षणवृत्तित्वतः स्वर्गादिकारणत्वं निर्बाधमित्यदृष्टं कल्प्यत इत्युदयनाचार्याद्यभिमतं न युक्तम्, यागादिक्रियायाः स्वध्वंसद्वारेणैव स्वर्गादिकारणत्वसंभवात्, प्रतियोगितासम्बन्धेन ध्वंसं प्रति तादात्म्यसम्बन्धेन प्रतियोगिनः कारणत्वेन यागादिध्वंसस्य यागादिजन्यत्वेन तद्व्यापारत्वसंभवात्, न च यागादिक्रियाध्वंसस्यापि यागादिव्यापारविधया यागादिफलस्वर्गादिकं प्रति कारणत्वेन स्वर्गादिकारणीभूतयागादिध्वंसलक्षणाभावप्रतियोगित्वेन स्वर्गविशेषं प्रति कारणत्वेनाभिमतस्य यागादेः स्वर्गविशेषं प्रति प्रतिबन्धकत्वमापद्यत इति वाच्यम्, प्रतिबन्धकतावच्छेदकेन सम्बन्धविशेषेण प्रतिबन्धकस्य सत्त्वेऽपि सम्बन्धान्तरेण तदभावस्यापि तत्र सत्त्वमिति सम्बन्धान्तरावच्छिन्नप्रतियोगिताकप्रतिबन्धकाभावतः कार्योत्पत्त्यापत्तिवारणाय यत् कार्यं प्रति येन सम्बन्धेन यस्य प्रतिबन्धकत्वं तत्सम्बन्धावच्छिन्नतन्निष्ठप्रतियोगिताकाभावत्वेनैव प्रतिबन्धकाभावस्य तत्कार्यं प्रति कारणत्वमिति संसर्गाभावत्वेन कारणीभूतस्याभावस्य प्रतियोगित्वमेव प्रतिबन्धकत्वमिति व्यापारविधया कारणस्य यागादिध्वंसस्य न संसर्गाभावत्वेन कारणत्वमित्युक्तप्रतिबन्धकत्वलक्षणाभावाद् यागादेः स्वर्गादिकं प्रति प्रतिबन्धकत्वव्यवहाराप्रसङ्गसम्भवात्; न च समानविषयकस्य पूर्वानुभवस्य समानविषयकोत्तरस्मरणं प्रति कारणत्वान्यथानुपपत्त्या यद् भावनाख्यसंस्कारकल्पनमनुभवस्य व्यापारतया तदपि न स्यात्, तत्राप्यनुभवध्वंसस्यैवानुभवव्यापारत्वसम्भवात्, उद्बोधकानां विशिष्य स्मृतिहेतुत्वेनानतिप्रसङ्गादिति वाच्यम्, इष्टत्वात्; न चाविनाशिनो ब्रह्महत्यादिक्रियाध्वंसलक्षणस्य ब्रह्महत्यादिक्रियाव्यापारस्य प्रायश्चित्तेन नाशासम्भवात् कृतब्रह्महत्यादिप्रायश्चित्तस्यापि ब्रह्महन्तुर्ब्रह्महत्यादिफलं नरकादिकं स्यादेव, अदृष्टवादिनस्तु प्रायश्चित्तादिना ब्रह्महत्याजन्यपापविशेषरूपादृष्टलक्षणव्यापारस्य विनाशान्न ब्रह्महत्यादिजन्यं नरकादिफलमिति वाच्यम्, नरकविशेषादिकं प्रति प्रायश्चित्ताद्यभाववद्ब्रह्महत्यादिकर्मत्वेन ब्रह्महत्यादिकर्मणः कारणत्वात्, कृतप्रायश्चित्तादिकस्य ब्रह्महन्तुः प्रायश्चित्ताद्यभाववद्ब्रह्म-

हत्यादिकर्मणोऽभावान्नरकविशेषादिफलानुत्पत्तिसम्भवात्; न च प्रायश्चित्ताद्यभाववत्कर्मत्वेन नरकादिफलं प्रति ब्रह्महत्यादेः कारणत्वाभ्युपगमे येन ब्रह्महत्यादिकर्मणा नरकादिफलं जातं येन च ब्रह्महत्यादिकर्मणा नरकादिफलं न जातं किन्तु प्रायश्चित्तेऽक्रियमाणे सति फलं स्यात् तदुभयोद्देश्यकप्रायश्चित्ते कृते सति येन कर्मणा फलं जातं तत्प्रत्यकिञ्चित्करमेव तत्प्रायश्चित्तं तत्फलस्य पूर्वमेव वृत्तत्वात्, येन च कर्मणा फलं न जातं तत्फलोत्पत्त्यवरोधकत्वेन भवति तत्प्रायश्चित्तं तत् प्रति किञ्चित्करम्, तत्रायं विमर्शः-यदुत, प्रायश्चित्ताभावविशिष्टकर्मत्वेन कारणत्वे कारणतावच्छेदककोटिप्रविष्टाभावप्रतियोगितया तत् प्रायश्चित्तं निवेश्यते न वा?, यदि निवेश्यते तदा दत्तफलमपि ब्रह्महत्यादि कर्म उद्देश्यतासम्बन्धेन तत्प्रायश्चित्तवदेवेति तत्प्रायश्चित्ताभावविशिष्टकर्मत्वलक्षणकारणतावच्छेदकधर्मानाक्रान्तात् तस्मात् कर्मणो जातमपि फलं जातं न भवेत्, अथ न निवेश्यते तदा तदन्यप्रायश्चित्ताभाववत्कर्मत्वमेव कारणतावच्छेदकं, तदाक्रान्तं यथा दत्तफलं कर्म तथाऽदत्तफलमपि कर्मेत्यदत्तफलादपि कर्मणः फलं स्यादिति वाच्यम्, दत्ता-ऽदत्तफलोद्देश्यकप्रायश्चित्तस्यापि निरुक्ताभावप्रतियोगितया निवेशस्यावश्यम्भावेऽपि अदत्तफलनिष्ठोद्देश्यत्वसम्बन्धावच्छिन्नप्रायश्चित्तनिष्ठप्रतियोगिताकाभावत्वेनैव प्रायश्चित्ताभावस्य कारणतावच्छेदककोटौ निवेशनीयतया दत्तफले कर्मणि दत्तादत्तफलोद्देश्यकप्रायश्चित्तस्यादत्तफलनिष्ठोद्देश्यतासम्बन्धेनाभावेन तत्सम्बन्धावच्छिन्नतन्निष्ठप्रतियोगिताकाभावस्य तत्र सत्तया निरुक्तकारणतावच्छेदकधर्माक्रान्तात् तस्मात् फलं सम्भवति, अदत्तफले तु कर्मणि तत्प्रायश्चित्तस्यादत्तफलनिष्ठोद्देश्यतासम्बन्धेन सद्भावेन तत्सम्बन्धावच्छिन्नतन्निष्ठप्रतियोगिताकाभावस्य तत्रासत्त्वेन निरुक्तकारणतावच्छेदकधर्मानाक्रान्तात् तस्मात् फलोत्पत्त्यापत्त्यसम्भवात्। यदपि "आशुविनाशिनः क्रियारूपस्य प्रायश्चित्तस्य कालान्तरभाविनरकाद्युत्पत्तिकालाव्यवहितपूर्वकालतया सम्भावितकालेऽसतो नरकानुत्पादाप्रयोजकत्वेन भवन्मते न नरकादिप्रतिबन्धकत्वं सम्भवति, व्यापारद्वारा प्रतिबन्धकत्वमदृष्टमनभ्युपगच्छतो मते न सम्भवत्येव; प्रायश्चित्तध्वंसस्य नरकाद्युत्पत्तिप्रतिबन्धकत्वाभ्युपगमे तु प्रायश्चित्तानन्तरकृतगोवधादितोऽपि नरकोत्पत्तिर्न स्यात्, नरकोत्पत्तिप्रतिबन्धकस्य प्रायश्चित्तध्वंसस्य सद्भावात्; न च तत्तत्प्रायश्चित्तप्राग्वर्तिगोवधादिजन्यनरके तत्तत्प्रायश्चित्तध्वंसः प्रतिबन्धक इति वाच्यम्, एतज्जन्मकृतगोव-

धादिप्रायश्चित्तस्यैतत्पूर्वजन्मकृतगोवधादिरपि प्राग्वृत्तिर्भवतीति तज्जन्यनरकस्यापि निरुक्तप्रतिबध्यतावच्छेदकधर्माक्रान्तत्वेनैतज्जन्मकृतगोवधादिप्रायश्चित्तध्वंसादेतत्पूर्वजन्मकृतगोवधादिजन्यनरकाद्युत्पत्तिप्रसङ्गात्, तत्तत्प्रायश्चित्तप्राग्वर्तितज्जन्मकृतगोवधादिजन्यनरके तत्तत्प्रायश्चित्तध्वंसः प्रतिबन्धक इत्येवं विशिष्य प्रतिबध्यप्रतिबन्धकभावकल्पना तु न सम्भवत्येव, तथाभूतस्य प्रतिबध्यस्यैवाप्रसिद्धेः, सामान्यतः प्रतिबध्यप्रतिबन्धकभावे तु यत्र प्रतिबन्धकं नास्ति तत्र सामान्यतः प्रतिबध्यतावच्छेदकधर्माक्रान्तं भवतीति तस्य नाप्रसिद्धिः, प्रकृते तु विशिष्य प्रतिबध्यप्रतिबन्धकभावे निरुक्तप्रतिबध्यतावच्छेदकाक्रान्ता तद्व्यक्तिरेव, सा तु न जायत एवेत्यप्रसिद्धिः" इति, तदप्येतेन निरस्तम्, अदत्तफलनिष्ठोद्देश्यतासम्बन्धावच्छिन्नप्रायश्चित्तनिष्ठप्रतियोगिताकाभाववत्कर्मत्वेन नरकादिफलं प्रति कारणत्वे दोषाभावात्; न च तत्कर्मजन्यापूर्वजनकापूर्वजनकं कर्म तत्कर्मणोऽङ्गं, तत्कर्मजन्यापूर्वजन्यापूर्वजनकं कर्म तत्कर्मणोऽङ्गीति प्रधानमित्येवमपूर्वाभ्युपगमेऽङ्गप्रधानकर्मव्यवस्था भवति, अपूर्वानभ्युपगमे तु सा न स्यादिति वाच्यम्, कर्मणो हि त्रिविधाकाङ्क्षा भवति–किं भावयेत्?, केन भावयेत्?, कथं भावयेत्? इति, तत्र किं भावयेदिति कर्माकाङ्क्षा साध्याकाङ्क्षाऽपरनाम्नी फलाकाङ्क्षा, सा स्वर्गं भावयेदिति फलान्वयेन निवर्तत इति साध्याकाङ्क्षया फलान्वय इति, केन भावयेदिति करणाकाङ्क्षा विधेयाकाङ्क्षाऽपरनाम्नी साधनाकाङ्क्षा, सा यागेन भावयेदिति साधनान्वयेन निवर्तत इति तया साधनान्वयः, कथं भावयेदितीतिकर्तव्यताकाङ्क्षा प्रकाराकाङ्क्षा येन येन प्रकारेण यागस्वरूपं सम्पद्यते, यद् यत् कर्म यागस्य सहकारि च तत् सर्वं तयाऽऽकाङ्क्षयाऽन्वेति, तथा च प्रधानकर्मणः कथम्भावाकाङ्क्षानिवर्तनाय प्रवृत्तो यो विधिस्तेन विधेयं यत् कर्म भवति तदङ्गं, तत्सहकारेण यत् कर्मफलप्रदानप्रत्यलं तत् प्रधानमित्येवमदृष्टास्वीकारेऽपि प्रधानाङ्गव्यवस्थोपपत्तेः" इत्याहुः।

तदसत्—गोवधादिक्रियोद्देशेन यत्रान्यपापनिवर्तकमेव प्रायश्चित्तं कृतं तत्प्रायश्चित्तस्यादत्तफलगोवधादिनिष्ठोद्देश्यतासम्बन्धेनादत्तफलगोवधादावपि सत्त्वेनादत्तफलगोवधस्यादत्तफलनिष्ठोद्देश्यत्वसम्बन्धावच्छिन्नप्रायश्चित्तनिष्ठप्रतियोगिताकाभाववत्कर्मत्वलक्षणफलजनकतावच्छेदकधर्माक्रान्ततया तस्मान्नरकादिफलानुत्पत्त्यापत्तेः; ननूक्तकारणतावच्छेदककोटिप्रविष्टाभावप्रतियोगितया

तत्तत्प्रायश्चित्तस्यैव निवेशादन्यप्रायश्चित्तस्य तत्रानिवेशेन तस्य सत्त्वेऽपि नानुपपत्तिः, अथवा तत्तत्प्रायश्चित्तविशिष्टादृत्तफलध्वंसातिरिक्तध्वंसस्य व्यापारत्वमिति नानुपपत्तिरिति चेत्? तथापि तत्त्वज्ञानिक्रियायास्तत्तत्प्रायश्चित्ताभावविशिष्टकर्मत्वलक्षणकारणतावच्छेदकधर्माक्रान्तत्वेन तत्क्रियाध्वंसस्य वा तत्तत्प्रायश्चित्तविशिष्टादृत्तफलध्वंसातिरिक्तध्वंसरूपस्य व्यापारत्वसम्भवेन तत्त्वज्ञानिक्रियया भोगापत्तिः स्यात्; तत्तत्प्रायश्चित्ताभावविशिष्टकर्मत्वस्य कारणतावच्छेदकत्वपक्षे कर्मणि तत्त्वज्ञानिक्रियाभिन्नत्वं तत्तत्प्रायश्चित्तविशिष्टादृत्तफलध्वंसातिरिक्तध्वंसस्य व्यापारत्वपक्षे तादृशध्वंसे तत्त्वज्ञानिक्रियाध्वंसातिरिक्तत्वं वा निवेशनीयमिति तत्त्वज्ञानिक्रियाया निरुक्तकारणतावच्छेदकधर्मानाक्रान्तत्वात् तत्त्वज्ञानिक्रियाध्वंसस्य वा व्यापारत्वाभावान्न ततो भोगापत्तिरिति चेत्? तथापि तत्तत्क्रियाध्वंसरूपव्यापारस्यानन्तत्वापत्तिः; अदृष्टरूपव्यापाराभ्युपगन्तृपक्षे तु चरमभोगेनादृष्टस्य नाशाद् व्यापाराभावादेव भोगानन्तरं न पुनर्भोग इति न भोगानन्त्यम्, चरमभोगानन्तरं व्यापारसत्त्वेऽपि भोगं प्रति भोगप्रागभावस्यापि कारणत्वेन तदभावादेव न भोगापत्तिरितिचेत्? तर्हि प्रायश्चित्तस्थलेऽपि प्रागभावाभावादेव भोगानुत्पत्तिरिति कर्मत्वमात्रस्य कारणतावच्छेदकत्वस्वीकारेऽपि न प्रायश्चित्तस्थले फलोत्पत्तिप्रसङ्ग इति प्रायश्चित्ताभावस्य कारणतावच्छेदककोटौ निवेशनं किमिति क्रियत इति; ननु प्रायश्चित्तविधायकविधिवैयर्थ्यं मा प्रसाङ्क्षीदित्येतदर्थं प्रायश्चित्ताभावविशिष्टकर्मत्वेन कारणत्वमभ्युपगम्यत इति चेत्? तर्हि प्रायश्चित्तविधिसामर्थ्यादेरे एतत्पापनिवृत्त्यर्थमिदं प्रायश्चित्तं कर्तव्यमित्यवबोधकप्रायश्चित्तविधिबलाद् विजातीयप्रायश्चित्तानां विजातीयादृष्टनाशकत्वमेवोचितम्, तथा सत्येवासङ्कुचितार्थकत्वं विधेः, गोवधादिकर्मणां केवलानामेव नरकादिसाधनत्वं विधितः प्रतीयमानं सुरक्षितं भवति, तत्तत्प्रायश्चित्तस्य तत्तत्पापनिवर्तकत्वमपि विधिबोधितमनाकुलं भवति, लाघवं चात्र सहकारीति, गौरवादेव च चरमभोगप्रागभावविशिष्टतत्तत्प्रायश्चित्तविशिष्टादृत्तफलध्वंसातिरिक्ततत्त्वज्ञानिक्रियातिरिक्तध्वंसाधारतासम्बन्धेन गोवधादिक्रियायाः फलसाधनत्वमप्यपाकृतं भवति, विशेष्यविशेषणभावे विनिगमनाविरहादपि कारणतावच्छेदकसम्बन्धस्यानेकत्वेनानेककार्यकारणभावापत्तिनिबन्धनगौरवान्तरतस्तथाहेतुत्वं न सम्भवतीति; किञ्च, तत्तत्क्रियाणां तत्तत्प्रायश्चित्तोद्देश्यत्वमपि तत्तत्क्रियाजन्यकर्मनाशेच्छाविषयतयैव सुष्ठु निर्वहति, नान्यथा, इत्यतोऽप्यदृष्टसिद्धिः; किञ्च, योगे कृते

योगिनां प्राग्जन्मकृतानामपि नानाकर्मणां न फलदातृत्वं भवति, न च प्राग्जन्मकृतनानाकर्मोद्देशेन योगो विधीयत इति योगरूपप्रायश्चित्तस्यादत्तफलनिष्ठोद्देश्यतासम्बन्धेन प्राग्जन्मकृतकर्मसु न सत्त्वमिति तदभावविशिष्टकर्मत्वलक्षणकारणतावच्छेदकाक्रान्तेभ्यः प्राग्जन्मकृतनानाविधकर्मभ्यः स्वस्वविलक्षणफलोत्पत्तियोगिष्वपि प्रसज्यत इति योगरूपप्रायश्चित्तस्यादृष्टनाशकत्वं विना न निर्वाहः; न च योगात् कायव्यूहद्वारा भोग एवेति साम्प्रतम्, नानाविधानन्तशरीराणामेकदाऽसम्भवात् ।

यथा च योगिनस्तत्त्वज्ञानिनः कायव्यूहद्वाराऽशेषकर्मोपभोगो न सम्भवति तथोपपादितं श्रीमद्भिर्यशोविजयोपाध्यायैर्महावीरस्तवप्रकरणे न्यायखण्डखाद्याख्यवृत्तिसमलङ्कृते, तथा च तत्संदर्भः–"अथ क्षायोपशमिके ज्ञाने यथा तथाऽस्तु, केवलज्ञानं तु कृत्स्नकारणभोगद्वारैव कर्मक्षयजनकं स्यात्, तत्राह—

"ज्ञानं न केवलमशेषमुदीर्य भोगं, कर्मक्षयक्षममबोद्धृदशाप्रसङ्गात् ।
वैजात्यमेव किल नाशकनाश्यतादौ, तत्रं नयान्तरवशादनुपक्षयश्च ॥७९॥"

केवलज्ञानमशेषं भागमुदीर्य कायव्यूहमहिम्नोपस्थाप्य कर्मक्षयक्षममिति न वाच्यम्, कस्मात्? अबोद्धृदशाप्रसङ्गात्–अबोद्धृतापत्तेः, एवं हि शूकरादिभोग्यं कर्म क्षपयितुं शूकरादिशरीरमिवैकेन्द्रियादिशरीरभोग्यं ज्ञानावरणं क्षपयितुमेकेन्द्रियादिशरीरमपि परस्य तत्त्वज्ञानी परिगृह्णीयात्, तथा च तद्वदेवाबोद्धृतापप्रसङ्गः; अज्ञानं न भोग्यं सुखदुःखानन्यतरत्वादिति न प्रसङ्ग इति चेत्? न–"जात्यायुर्भोगास्तद्विपाकः" [ ] इति सूत्रयता योगाचार्येण कर्मफलमात्रस्य भोग्यत्वातिदेशात्; तत्त्वज्ञानप्रतिबन्धककर्मनाशादेव कैवल्योत्पत्तेर्नायं प्रसङ्ग इति चेत्? स एव कुतो जातः?, विविदिषा-शम-दमादिसहकृतयत्याश्रमोचिताचारादिति चेत्? यथा पूर्वं शरीरापेक्षभोगं विनैव ततोऽदृष्टविशेषनाशस्तथा तत्त्वज्ञानोत्पत्त्यनन्तरमपि तत एव स किमिति नाद्रियते, किं कायव्यूहादिकल्पनाक्लेशेन?, नाश्यनाशकतावच्छेदकवैजात्यकल्पनं त्वदृष्टे ज्ञान-क्रियादौ चावश्यकमेवेति न व्यभिचारादिदोषः, यथा च विविदिषादिनाऽदृष्टविशेषक्षयो न भोगद्वारा तत्त्वज्ञानेनापि, भोगेन त्वितरे क्षपयित्वेति वाक्यशेषे च तृतीया न भोगस्य कारणत्वं व्यवस्थापयति, किन्तु निर्जरानान्तरीयकप्रदेशानुभवस्य नियतपूर्वसत्त्वमात्रमिति स्पष्टीभविष्यत्यनुपदमेव; न च तत्त्वज्ञानादनन्तरमेव भवोपग्राहिकर्मक्षयः, चिरोपदेशश्रुतिविरोधात्, किन्तु समाधिविशेषाच्चारित्रपरि-

पाकात्; तथापि तत्त्वज्ञानद्वारत्वाच्चारित्रमुपक्षीणमिति चेत्? न–व्यापारताग्राहकतयान्तरवशादेव तस्यानुपक्षयात्, "तेण दासेण मे" [ ] इत्यादिनयात् तदुपक्षयेऽपि न क्षतिः, एवं हि व्यवहितं न कारणमिति शुद्धर्जुसूत्रनये ज्ञानस्यापि चारित्रेणोपक्षयस्य सुवचत्वात्, उभयानुग्रहस्तु नैगमयुक्तिपर्यालोचनया तदुपजीविस्याद्वादेन चेत्यादिविवेचितमध्यात्ममतपरीक्षायामस्माभिरिति तत एवावधार्यमिति" इति ।

न्यायालोकेऽपि कायव्यूहद्वाराऽशेषकर्मभोगादेव तत्त्वज्ञानिनः कर्मक्षय इत्यस्यापाकरणमुपाध्यायैरित्थं कृतम्–"न च भोगादेव कर्मक्षयः, तत्त्वज्ञानादपि कायव्यूहद्वारा तत्तच्छरीरोपभोग्यकर्मोपभोगेनैवादृष्टक्षयाभ्युपगमादिति वाच्यम्, दृष्टविपरीतकल्पनप्रसङ्गात्, मनुजादिशरीरसत्त्वे शूकरादिशरीरानुत्पत्तेः भोग–तत्त्वज्ञानादीनामेकशक्तिमत्त्वेन कर्मनाशकत्वौचित्यात्, उपभोगादेव कर्मक्षयेऽपरकर्मनिमित्तव्यापारात् प्रचुरतरकर्मार्जनेऽनिर्मोक्षप्रसङ्गाच्च, तत्त्वज्ञानस्य त्वागामिकर्मानुत्पाद इव सञ्चितकर्मनाशेऽपि सामर्थ्यम्, यथा भाविशीतस्पर्शानुत्पाद समर्थस्योष्णस्पर्शस्य पूर्वशीतस्पर्शनाशेऽपीति नानिर्मोक्षः" इति ।

एतद्ग्रन्थमस्मद्गुरुचरणा इत्थमवतरणपुरस्सरं व्याख्यातवन्तः, तथाहि–"ननु "नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि ॥" [ ] इति स्मृतेर्भोगमन्तरेण कथं कर्मणां नाशः? न च–

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि, तस्मिन् दृष्टे परावरे ॥ १ ॥" [ ] इति श्रुतेः,

"ज्ञानाग्निः सर्वकर्माणि, भस्मसात् कुरुतेऽर्जुन! ॥" [ ] इत्यादिस्मृतेश्च तत्त्वज्ञानस्य निखिलकर्मक्षयहेतुत्वं प्रतीयत एव भवन्मतेऽपीति वाच्यम्, वामदेव-सौभरिप्रभृतीनां कायव्यूहश्रवणात् तत्त्वज्ञानेन तत्तत्फलोपभोगक्षमकायव्यूहमुत्पाद्य भोगद्वारा कर्मक्षयादिति न तत्त्वज्ञानसहितशैलेशीकरणप्रयत्नसाध्यत्वं कर्मक्षयस्येति परमतमाशङ्क्य निषेधयति–न चेति–वाच्यमित्युत्तरेण योगः, विभ्वात्मवादिनो नैयायिकस्य मते निष्क्रियस्यात्मनो न देहान्तरसञ्चारलक्षणो जन्मपदार्थः सम्भवति, परं देहान्तरसम्बन्धः, एवं च योगिनामेकदा नानाकर्मफलोपभोगार्थं तुरङ्ग-कुरङ्ग-विहङ्ग-मतङ्गज-शम्बर-घूक-शूकर-शृगाल-बिडालादिशरीरपरिग्रहोपगमे एकस्मिन्नेव भवे भवसहस्रसाङ्कर्य

स्यात्, तथा नरकादिदुःखजनकब्रह्महत्यादिप्रयोजकादृष्टभावे नारक-ब्रह्मघातक-शरीरपरिग्रहोऽपि भवेदिति सूपपादितं तेषु तत्त्वज्ञानफलम्, न च नरकादिदुःखजनकब्रह्महत्यादिप्रयोजकादृष्टाभावे एव तत्त्वज्ञानोत्पत्तिरिति न तत्त्वज्ञानिनां नारक-ब्रह्मघातकशरीरपरिग्रहप्रसङ्ग इति वाच्यम्, एवं सति शूकरादिशरीरोत्पादकादृष्टाभाव एव तत्त्वज्ञानोत्पत्तिरित्यस्यापि कल्पययितुं शक्यतया कायव्यूहस्यैवापलापापत्तेः, किञ्च, तत्त्वज्ञानेन कायव्यूहोत्पादेऽपि अनन्तकालपरिसमाप्यक्रमिकशूकरादिशरीरोपभोग्यनानाफलजननं न सम्भवति, न च तदन्तरेण तादृशफलनाश्यादृष्टनाशसम्भवः, न चोक्तादृष्टनाशमन्तरेण मुक्तिः; न च शूकरादिशरीरोपभोग्यमप्यदृष्टफलं योगिनां स्वायुर्नियतमेव कल्प्यत इति वाच्यम्, लाघवात् तादृशकर्मणामनुपभोग्यत्वकल्पनस्यैव न्याय्यत्वात्, तच्च भवोपग्राह्यदृष्टचतुष्टयाख्यम्, तत्राप्यायुषः कर्मत्रयस्याधिकस्थितिकत्वे तत्समीकरणार्थं भगवतः केवलिसमुद्घातारम्भः, आयुस्तु कर्मत्रयादधिकस्थितिकं स्वभावादेव न सम्भवति, केवलिसमुद्घात एव च परेषां कायव्यूहभ्रमः, तदालम्बनेनैव चेश्वरस्य सर्वावेशप्रतिपादिका श्रुतिरिति न्यायखण्डखाद्ये व्यक्तीकृतं स्वाशयमवलम्ब्याह–दृष्टविपरीतकल्पनप्रसङ्गादिति–दृष्टं ह्येकदैकस्य जीवस्यैकमेवौदारिकं शरीरं, तद्विपरीतमेकदैव खर-तुरग-मनुजादिनानाशरीरं तस्य कल्पनप्रसङ्गादित्यर्थः; ननु यद्युक्तप्रसङ्गभयान्न तत्त्वज्ञानेन कायव्यूहद्वारा भोगेन कर्मणो नाशः, तर्हि साक्षादेव शैलेशीकरणरूपप्रयत्नसहकृतात् तत्त्वज्ञानात् कर्मनाशो वाच्यः, स तु व्यतिरेकव्यभिचारेणैव न सम्भवति, तत्त्वज्ञानाभावेऽप्यन्यत्र भोगेन कर्मणो नाशात्, एवं भोगस्यापि व्यभिचारेण न कर्मनाशकत्वमित्यत आह–भोग-तत्त्वज्ञानादीनामेकशक्तिमत्त्वेनेति–न भोगत्वं नवा तत्त्वज्ञानत्वं कर्मनाशकतावच्छेदकं, किन्तु भोगानुकूलशक्तिमत्त्वमेवेति कुतो व्यभिचारावकाशः,

"नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥"

इत्यादिवचनादुपभोगस्यैव कर्मनाशकत्वमिति पक्षो यस्तु न जहाति तं प्रत्याह–उपभोगादेवेति, "मा हिंस्यात् सर्वभूतानि" इति श्रुत्या भवन्मान्ययाऽपि प्राणिमात्रवधस्यानिष्टसाधनत्वं बोध्यते, 'नानुपमृद्य भोगः' इत्युपभोगे भूतानामुपमर्दनमावश्यकमिति तत्कर्मफलोपभोगाय जन्मान्तरमावश्यकम्, तत्रापि क्रमिकनानाशरीरोपभोग्यनानाकर्मोपार्जनस्य नानाभूतोपमर्दनादुपभोगा-

र्थमुपनिपतितादावश्यकत्वमित्यनिर्मोक्षप्रसङ्गान्न मोक्षो वादिन इत्यर्थः। ननु तत्त्वज्ञानेन मिथ्याज्ञानोन्मूलने तन्मूलकदोषाद्यभावान्नवीनकर्मबन्धनं मा जन्यताम्, नहि कारणाभावे कार्योत्पत्तिः कस्याप्यभिमता, परं त्वनादौ संसारे सञ्चितानां कर्मणां भावात् तत्तज्जन्मावश्यम्भावे कथं तत्त्वज्ञानिनस्तद्भवोपरम एव मुक्तिरित्यत आह–तत्त्वज्ञानस्येति—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि, तस्मिन् दृष्टे परावरे" [ ] इत्यादिश्रुतितः "ज्ञानाग्निः सर्वकर्माणि, भस्मसात् कुरुतेऽर्जुन!" [ ] इत्यादिस्मृतेश्च तत्त्वज्ञानस्य प्रारब्धेतरसकलकर्मनाशकत्वं भवतोऽपि मान्यमेव, अत एव "नाभुक्तं क्षीयते कर्म" इत्यादि वचनं च कर्मपदस्य प्रारब्धकर्मपरत्वमाश्रित्य प्रारब्धकर्मणां भोगादेव नाश इत्यभिप्रायकतया "अवश्यमेव भोक्तव्यम्" इत्यादिवचनं च भुज्धातोः कर्मनाशोपभोगतत्त्वज्ञानान्यतरपरत्वमाश्रित्य कस्यचित् कर्मणः सुख-दुःखरूपफलोपभोगेन कस्यचिच्च तत्त्वज्ञानात्मकोपभोगेन नाश इत्यभिप्रायकतयोपपादितमन्यत्रेति बोध्यम्, न चैकस्यैवैकजातीयानुत्पादविनाशजनकत्वमदृष्टचरमित्यावेदयितुं दृष्टान्तमुद्दङ्कयति–यथेतीति"।

न च योगरूपप्रायश्चित्तस्यादत्तफलनिष्ठोद्देश्यतासम्बन्धेन प्राग्जन्मकृतकर्मस्वभावान्निरुक्तसम्बन्धेन प्रायश्चित्ताभाववत्कर्मत्वलक्षणकारणतावच्छेदकधर्माक्रान्तेभ्यस्तेभ्यः फलोत्पत्त्यापत्तिरिति न युक्तं, योगस्य हि प्रायश्चित्तत्वस्वीकारे भवतामपसिद्धान्तः स्यादिति वाच्यम्, "सव्वा वि य पव्वज्जा पायच्छित्तं भवंतरकडाणं पावाणं कम्माणं" [ ] इति ग्रन्थकृतैवान्यत्रोक्तत्वात्, ["सर्वाऽपि च प्रव्रज्या प्रायश्चित्तं भवान्तरकृतानां पापानां कर्मणाम्"] इति संस्कृतम्, अपि च, मोक्षोपाये कर्मक्षयार्थितयैव मुमुक्षूणां प्रवृत्तिः, न तु दुःखध्वंसार्थितया, पुरुषप्रयत्नं विनैव जायमाने दुःखध्वंसे पुरुषप्रयत्नस्याकिञ्चित्करत्वादित्यतोऽपि कर्मसिद्धिः, अपि च, ज्योतिश्चक्रादेर्गुरुत्वादिना पातापत्तिभिया लोकस्थितेः कर्माधीनत्वस्य स्वीकरणीयत्वेन ततोऽपि कर्मसिद्धिरनिवार्यैव,

एतेन धृत्येश्वरसाधनं नैयायिकानामपास्तं, कर्मणैव धृतेरुपपत्तेः, धृत्या चेश्वरसाधनं चेत्थमुपदर्शितमुदयनाचार्येण, तथाहि–"क्षित्यादिब्रह्माण्डपर्यन्तं हि जगत् साक्षात् परम्परया वा विधारकप्रयत्नाधिष्ठितं गुरुत्वे सत्यपतनधर्मत्वात्,

वियति विहङ्गमशरीरवत्, तत्संयुक्तद्रव्यवच्च, एतेनेन्द्रा-ऽग्नि-यमादिलोकपाल-प्रतिपादका आगमा व्याख्याताः, सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः—आत्मैवेदं सर्वमिति, यथा—एक एव मायावी अश्वो वराहो व्याघ्रो वानरः किन्नरो भिक्षुस्तापसो विप्र इत्यादि; अदृष्टादेव तदुपपत्तेरन्यथासिद्धमिदमिति चेत्? तद्भावेऽपि प्रयत्नान्वय-व्यतिरेकानुविधानेन तस्यापि स्थितिं प्रति कारणत्वात्, कारणैकदेशस्य च कारणान्तरं प्रत्यनुपाधित्वात्, उपाधित्वे वा सर्वेषामकारण-त्वप्रसङ्गात्; शरीरस्थितिरेवं न त्वन्यस्थितिरिति चेत्? न—प्राणेन्द्रिययोः स्थितेरव्यापनात्, प्राङ्न्यायेनापास्तत्वाच्च; अत्राप्यागमः—"एतस्य वा अक्षरस्य प्रशासने द्यावापृथिव्यौ विधृते तिष्ठतः" इति, प्रशासनं दण्डभूतः प्रयत्न इति", कार्यमात्रं प्रत्यदृष्टाख्यकर्मणः कारणत्वं नैयायिकेनापि स्वीक्रियते, तत एव लोकस्थितेरुपपत्तेः, कस्याश्चिद् दृष्टकर्तृकायाः स्थितेः प्रयत्नसाध्यत्वेऽपि अदृष्ट-कर्तृकायाः स्थितेः प्रयत्नसाध्यत्वे मानाभावात्, उपदर्शितानुमानं च धृतित्वेन प्रयत्नत्वेन कार्यकारणभावसिद्धौ सत्यां सम्भवति, प्रमाणाभावात् तदसिद्धावनु-कूलतर्काभावान्न प्रवर्तितुमुत्सहते, अन्वय-व्यतिरेकौ च स्थितिविशेष-प्रयत्न-विशेषयोरेव, न तु तत्सामान्ययोरित्येवं लोकस्थितेरीश्वराधीनत्वासम्भवात्। अदृष्टसिद्ध्युपसंहृतावुपाध्यायस्येत्थमुक्तिः—

"मरीचिरुच्चैः समुदञ्चतीयं, जैनोक्तभानोर्यददृष्टसिद्धिः।
निमील्य नेत्रे तदसौ, वराकश्चार्वाकधूकः श्रयतां दिगन्तम्॥" इति, १०६ ॥

इत्थं सिद्धस्यादृष्टस्य विभिन्नदर्शनपरिभाषितान् व्यञ्जनपर्यायानुपदर्शयति—

अदृष्टं कर्म संस्कारः, पुण्यापुण्ये शुभाशुभे।
धर्माधर्मौ तथा पाशः, पर्यायास्तस्य कीर्तिताः॥ १०७॥

अदृष्टमिति। अदृष्टमिति वैशेषिका नैयायिकाश्च, कर्म इति जैनाः, संस्कारः इति सौगताः, पुण्यापुण्ये इति वेदवादिनः, शुभाशुभे इति गणकाः, धर्माधर्मौ इति साङ्ख्याः, तथा एवं पाश इति शैवाः, तस्य अदृष्टस्य, पर्यायाः व्यञ्जनपर्यायाः, कीर्तिताः कथिताः, एकस्मिन्नर्थे वाचक-तया परिभाषितत्वात् पर्याया इति कथ्यन्ते, न त्वेषां समानप्रवृत्तिनिमित्तकत्वे सत्येकार्थवाचकत्वं पर्यायत्वम्, प्रवृत्तिनिमित्तभेदादिति बोध्यम्। एकस्यैवा-दृष्टस्य मतभेदेन नामभेद इत्यत्र उदयनाचार्यवचनमपि—

"इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो,
मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता ।
देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः,
साक्षात् साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥"

इति ॥ १०७ ॥

अदृष्टस्य हेतूपदर्शनपूर्वकमात्मसंयोजनप्रकारमुपदर्शयति—

हेतवोऽस्य समाख्याताः, पूर्वं हिंसानृतादयः ।
तद्वान् संयुज्यते तेन, विचित्रफलदायिना ॥ १०८ ॥

हेतवोऽस्येति । **अस्य** अदृष्टाख्यस्य कर्मणः, **पूर्वं** "हिंसाऽनृतादयः पञ्च" इत्यादिनिरूपणात्मकप्रारम्भकाले, **हिंसानृतादयः** आदिशब्दात् स्तेया-ऽब्रह्मपरिग्रहाणां ग्रहणम्, **हेतवः** कारणानि, **समाख्याताः** सम्यगुक्ताः, **तद्वान्** हिंसादिमान्, हिंसादिक्रियाऽध्यवसायपरिणत इति यावत्,-**तेन** अदृष्टाख्यकर्मणा, किंविशिष्टेनेत्याकाङ्क्षायामाह-**विचित्रफलदायिनेति**-विचित्रा-शुभफलदेनेत्यर्थः, **संयुज्यते** अन्योऽन्यसम्बन्धेन बध्यते ॥ १०८ ॥

उक्तेषु वादेषु सद्वादत्वाज्जैनाभ्युपगतपौद्गलिकादृष्टवाद एव ज्यायानित्युपदर्शयति—

नैवं दृष्टेष्टबाधा यत्, सिद्धिश्चास्यानिवारिता ।
तदेनमेव विद्वांसस्तत्त्ववादं प्रचक्षते ॥ १०९ ॥

नैवमिति । **एवम्** उक्तेन प्रकारेणात्मनः कर्मसंयोगे स्वीक्रियमाणे । **दृष्टेष्टबाधा न** दृष्टविरुद्धकल्पने यादृशं क्वचिदपि न दृश्यते तादृशस्य परिकल्पने वा दृष्टबाधा भवति, प्रकृते तु यथाऽमूर्ते आकाशादौ मूर्तस्य घटादौ संयोगो दृश्यते तथा मूर्तस्य पौद्गलिकादृष्टस्यामूर्तेनात्मना संयोग इति दृष्टबाधा न भवति, एवं शुभकर्मजनितेनादृष्टेन संयोगादात्मनः सुखानुभवलक्षणोऽनुग्रहः, अशुभकर्मजनितेनादृष्टेन संयोगादात्मनो दुःखानुभवलक्षण उपघातश्चेष्ट एव, यथा अमूर्तस्यापि ज्ञानस्य ब्राह्मीघृतोपभोगतोऽधिकविषयावगाहित्वस्पष्टप्रकाशकत्वादिलक्षणोऽनुग्रहः, मद्यपानादिना च यथावद्विषयाग्रहणादिलक्षण उपघातश्च भवतामपीष्ट इतीष्टबाधा न भवति । **यत्** यस्मात्, **सिद्धिश्च अस्य** कर्मणः, **अनिवारिता** प्रतिकूलपराहता न भवति, **तत्** तस्मात् कार-

णात्, **एनमेव** आत्माद्दष्टसंयोगवादलक्षणप्रकृतवादमेव, **विद्वांसः** पण्डिताः, मध्यस्थगीतार्था इति यावत्, **तत्त्ववादं** परमार्थवादं पारमार्थिकाभ्युपगमिति यावत्, **प्रचक्षते** कथयन्ति, एतद्विपरीतवादस्यापारमार्थिकत्वात् ॥ १०९ ॥

'एनमेव' इत्यनेनैवकारेण यद्व्यवच्छेद्यं तदुपदर्शयति—

लोकायतमतं प्राज्ञैर्ज्ञेयं पापौघकारणम् ।
इत्थं तत्त्वविलोमं यत्, तन्न ज्ञानविवर्धनम् ॥ ११० ॥

लोकायतमतमिति–नास्तिकदर्शनमित्यर्थः । **प्राज्ञैः** सूक्ष्मदर्शिभिः । **पापौघकारणं** पापौघस्य–पापसमुदायस्य, क्लिष्टकर्मसमूहस्येति यावत्, कारणं–निमित्तम् । **ज्ञेयं** ज्ञातव्यम् । पापसमूहनिमित्तत्वे हेतुमाह–**यदिति**–यस्मात् कारणादित्यर्थः । **इत्थम्** उक्तेन प्रकारेण । **तत्त्वविलोमं** परमार्थप्रतिकूलं, यथार्थपदार्थज्ञानप्रतिकूलमिति यावत् । **"तन्न ज्ञानविवर्द्धनम्"** इत्यस्य स्थाने "तथाऽज्ञानविवर्द्धनम्" इत्युपाध्यायसम्मतः पाठः, 'तथा, अज्ञानविवर्धनम्–क्लिष्टवासनासंततिहेतुः' इत्येवं व्याख्यानात्, "तथा ज्ञानविवर्धनं न–न तत्त्वसंवेदनोपकार्येव, अपि तु प्रतिपक्षवृद्धिकारकमित्यर्थः" इत्येवं व्याख्यानतः श्रीहरिभद्रसूरिसम्मतः "तथा न ज्ञानविवर्द्धनम्" इति पाठो नादरणीयः, अनुष्टुभो नवाक्षरचरणकत्वाभावात्, किन्तु "तथा ज्ञानाविवर्द्धनम्" इति पाठे युक्तः, ज्ञानाविवर्द्धनमिति तु ज्ञानविवर्द्धनं नेत्येवमुल्लिखितुं शक्यत्वात्, तच्छब्दस्य तथेत्यर्थकतामाश्रित्य "तन्न ज्ञानविवर्द्धनम्" इति पाठोऽपि श्रीहरिभद्रसूरिसम्मतो भवितुमर्हतीति बोध्यम् ॥ ११० ॥

चार्वाकदर्शनस्य विषयापरिशुद्ध्यैदम्पर्याशुद्ध्या च न द्रव्यसत्यत्वं नापि भावसत्यत्वमित्येतत् परोक्तैतदुत्पत्तिप्रकारदूषणव्याजेन दर्शयति—

इन्द्रप्रतारणायेदं, चक्रे किल बृहस्पतिः ।
अदोऽपि युक्तिशून्यं यन्नेत्थमिन्द्रः प्रतार्यते ॥ १११ ॥

इन्द्रप्रतारणायेति । उपाध्यायास्तु "अत्र द्रव्यासत्यत्वमपि नास्ति, इति परोक्तैतदुत्पत्तिप्रकारदूषणच्छलेनाह–"इत्येवमवतारितवन्तः, श्रीहरिभद्रसूरयस्तु–"अस्य मूढजनविकल्पितविषयविभागनिराकरणायाह–" इत्यवतरणिकामाहुः, अस्य दर्शनस्य पदार्थतत्त्वनिरूपणे न तात्पर्यमतः एतदुपदर्शितपदार्थ-

तत्त्वस्य युक्त्यानुपपन्नत्वलक्षणं यद् द्रव्यासत्यत्वं तदिष्टमेव चार्वाकस्य, यदिन्द्रप्रतारणप्रयोजनार्थमिदं दर्शनं विनिर्मितं तदिन्द्रप्रतारणमतो जातं, येन प्रतारित इन्द्रो हिंसायां न दोष इति मत्वा वृत्राख्यदानवं व्यापादितवानिति वृत्रव्यापादने न दोष इत्यैदम्पर्यभावस्य स्वरूपतश्चार्वाके दर्शनप्रवर्तके सत्त्वाद् भावसत्यत्वमस्त्येवेति, तदपि न समीचीनं–दिव्यदृष्टेरिन्द्रस्य प्रतारणासम्भवान्न तत्कारणकमिदं ततो नोक्तदिशा द्रव्यासत्यत्वं तस्य सम्भवति, इन्द्रप्रतारणासम्भवात् तद्विषयकाभिप्रायलक्षणभावस्तु नासीदेवेति कथं तस्य स्वरूपतः सत्यत्वमपीत्युपाध्यायाभिप्रायः; तदर्शनं न तत्त्वावबोधाय प्रवृत्तमतो निरूपितं तत्त्वं नास्य वस्तुनो विषय इति तस्य दूषणगणकलितत्वं न क्षतिकरं, किन्तु इन्द्रप्रतारणमेवास्य विषयः, स चातो जात एवेत्येवं मूढजनैर्विकल्पितः स्वकपोलकल्पनयोपनीतो यो विषयस्यान्यदर्शनविषयाद् विभागस्तस्य दिव्यबुद्धेरिन्द्रस्य प्रतारणासम्भवान्निराकरणं तदर्थमाहेत्येवमभिप्रायः श्रीहरिभद्रसूरीणामिति बोध्यम् । **इन्द्रप्रतारणाय** वृत्रो ब्राह्मणस्तस्य हनने "न ब्राह्मणं हन्याद्" इति निषिद्धाद् ब्रह्महननादधर्मो मे भविष्यति, ततो नरकयातना महती स्यादित्येवं हिंसादिभीत्या वृत्रवधेऽप्रवर्तमानस्येन्द्रस्य 'परलोको नास्ति, परलोकगामी आत्माऽपि नास्ति, धर्माधर्मौ न स्तः' इति वृत्रवधे कृते भवतोऽधर्माद्यभावो वृत्रादुपद्रुतस्य लोकस्य सुखं भविष्यतीत्येवं वृत्रदानवव्यापादनार्थं हिंसादिभीतस्येन्द्रस्याधर्माद्यभावभ्रममाधाय लोकसुखार्थं प्रेरणाय । इदं लोकायतमतम् । **किल** इति सत्यार्थकं, न तु वृद्धपरम्परायातस्वरूपैतिह्यार्थकम् । **बृहस्पतिः** सुराचार्यः । **चक्रे** कृतवान् । अदोऽपि एतदपि परस्य वचनम् । **युक्तिशून्यं** युक्तिरहितम्, अविचारितरमणीयमिति यावत् । अत्र हेतुः–**यत्** यस्मात् । इत्थं भूतचतुष्टयमात्रतत्त्वप्रत्यक्षमात्रप्रमाणादिप्रदर्शनपरदर्शनात्मकबृहस्पत्युक्तप्रकारेण, **इन्द्रः** सुरलोकाधिपतिः । **न प्रतार्यते** न प्रतारयितुं शक्यते, दिव्यदृष्टित्वात् तस्येति ॥ १११ ॥

उपसंहरति—

तस्माद् दुष्टाशयकरं, क्लिष्टसत्त्वविचिन्तितम् ।
पापश्रुतं सदा धीरैर्वर्ज्यं नास्तिकदर्शनम् ॥ ११२ ॥

तस्मादिति। यस्मात् तदुपदर्शितविषयस्य विचार्यमाणस्य युक्त्यनुपपन्नत्वात्,

तदुत्पत्तिकारणप्रतिपादकस्यापि परवचनस्याविचारितरमणीयत्वाच्च परदर्शनस्य सर्वथैवासत्यत्वादित्यर्थः । दुष्टाशयकरमित्यादि 'नास्तिकदर्शनम्' इत्यस्य विशेषणत्रितयं तस्य परिहरणीयत्वे निमित्तम्, परलोकाद्यभावसाधनप्रवणत्वेन

"यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य, पुनरागमनं कुतः ? ॥" [ ]

इत्यादिवचनोद्गारतो यथेष्टाचरणफलकविषयेच्छामात्रपरिणतचित्ताध्यवसायस्वरूपदुष्टाशयनिबन्धनमिति दुष्टाशयकरमित्यस्यार्थः, क्लिष्टसत्त्वविचिन्तितं क्लिष्टवासनासन्ततिमत्त्वेन क्लिष्टसत्त्वैरामुष्मिकापायचिन्तनविकलैरैहिकवैषयिकसुख एवात्यन्तलोलुपैरज्ञानवृद्धिमद्भिर्विचिन्तितं–स्वेच्छया प्रकटीकृतं, न तु सुराचार्योपदिष्टम्, अस्मादेव कारणात् पापश्रुतम् असमञ्जसत्वेन श्रूयमाणमप्यनुषङ्गतः पापनिबन्धनम्, उपादेयबुद्ध्या श्रूयमाणं तत् पापनिबन्धनं भविष्यतीत्यत्र किमु वक्तव्यम्, यतश्चैवमतः धीरैः महासत्त्वैः, ज्ञानवृद्धैरिति यावत्, सदा यदा यदा कथमपि ज्ञानपथमुपयाति तदा, वर्ज्यं परिहरणीयम्, नास्तिकदर्शनम् अतिरिक्तात्मानभ्युपगन्तृचार्वाकदर्शनम् ।

भावार्थस्तूपाध्यायैरित्थमत्र दर्शितः–"न त्वत्राग्रे वक्ष्यमाणेषु वार्तान्तरेष्विव द्रव्यासत्यत्वाशङ्काऽपि विधेया, अन्यथा तामेव च्छलमुपलभ्य प्रकृतिदुष्टा विषयपिशाची छलयेदिति भावः" इति ॥ ११२ ॥

यद्यपि नास्तिकानामखर्वगर्वपरीतानां न काचिदीदृशी युक्तिर्यया मुक्तिप्रसरहरणं न क्रियते, एकैकाऽपि युक्तिर्नास्तिकैर्मुक्तिप्रचारापहारचतुरैरुद्भाविता, तथाऽप्यनुकूलतर्कसचिवप्रमाणापेता यथा तथा बाह्यदृष्टान्तादिपरिकरा स्वमतकदाग्रहप्रवृत्ता सर्वाऽपि सा आस्तिकानां नयैः प्रमाणतर्कसश्रीचीनैः कामं खण्डितैव भवति, यथा जगति अमारजनीसमुद्गतध्वान्तधारा आलोकनिकरापहारैकप्रवणा स्वसत्तां घूक-रजनिचरानुकूलामासाद्य विजृम्भमाणाऽपि स्वात्यन्तापहारप्रयाणाप्रधृष्यसूर्यकरनिकरैरत्यन्तमेवोन्मूलिता भवति, एतद्वार्तासम्यक्श्रयणतो नास्तिकदर्शनास्थां परित्यज्य बुधाः स्याद्वादिनां वादं पौद्गलिकादृष्टसहकृतातिरिक्तात्मप्रसिद्धिप्रवणमशेषावरणविलयसमुत्थपरमानन्दस्वरूपावाप्तिलक्षणमुक्त्यङ्गनालिङ्गितात्मोद्बोधदक्षमत एवैकान्तिकात्यन्तिकशर्महेतुं श्रयत्वित्येवैतत्प्रकरणप्रयोजनमाकलयन्त्युपाध्यायाः, तदुक्तम्—

"युक्तिर्मुक्तिप्रसरहरणी नास्ति का नास्तिकानां,
सर्वां गर्वात् किमु न दलिता सा नयैरास्तिकानाम् ? ।
ध्वस्तालोका किमु न जगति ध्वान्तधारा बत स्यात्,
किं नोच्छेत्री रविकरततिर्दुःसहोदेति तस्याः ? ॥ १ ॥

वार्तामिमामत्र निशम्य सम्यक्, त्यक्त्वा रसं नास्तिकदर्शनेषु ।
ऐकान्तिकाऽऽत्यन्तिकशर्महेतुं, श्रयन्तु वादं परमार्हतानाम् ॥ २ ॥ इति,

इति श्रीतपोगच्छाधिपति-शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-जगद्गुरुश्रीविजय-नेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन विजयलावण्यसूरिणा विरचितायां स्याद्वादवाटिकाभिधानायां शास्त्रवार्तासमुच्चयटीकायां प्रथमः स्तबकः ॥

एतन्नास्तिकदर्शन-खण्डनप्रथिताऽऽत्मसत्त्वधीस्थिरता ॥
मुक्त्यङ्गनावलोकन-निरता जनताऽऽश्रिताऽऽस्तिकता ॥ १ ॥

यस्यास्था जिनदर्शितात्ममनने स्याद्वादराद्धान्तगा,
भक्तिर्यस्य गुरौ स्वकार्यनिपुणाऽत्यन्तप्रकृष्टोदया ।
प्राचीनोक्तिसमष्टिसङ्घटनया नव्योक्तिकान्ताऽनघा,
वाणी यस्य सतर्कमानकलिता सन्नीतिमार्गाश्रिता ॥ २ ॥

व्याख्यानद्वयमात्रतत्त्वमननैकान्तोदया नास्तिको-
क्तिव्रातोत्थकुनीतिनाशनिपुणा सच्छास्त्रवार्ताश्रिता ।
व्याख्या सूरिवरेण तेन रचिता लावण्यनाम्ना त्वियं,
विज्ञानां मुदमादधातु प्रथमे खण्डेऽपि लब्धोदया ॥ ३ ॥

शास्त्रवार्तासमुच्चयस्य प्रथमस्तबके स्याद्वादवाटिकायां टीकायां समुपन्यस्तपद्यादी-नामकाराद्यनुक्रमणिका—

पद्यादि–		पत्र–पङ्क्ती–
[१]	"अणु-दुअणुएहिं दव्वे०" [सम्मतौ गा० १३६]	११६–२०
[२]	"अनित्या-ऽशुचि-दुःखाऽनात्मसु०" [पात० २. ५.]	२८—४
[३]	"अनुमानव्यवस्थानात्०" [जैमि० १. ३. १५]	७–२८
[४]	"अनैकान्तादसिद्धेर्वा०" [ ]	१७७–२८
[५]	"अन्नेन सौम्य शुङ्गेनापो०" [श्रुति]	११९–२९
[६]	"अन्योऽन्तरात्मा प्राणमयश्च" [तैत्ति० २. २. ३]	१११–२०
[७]	"अब्भत्थेऽवाओ०" [विशेषा० भाष्यगाथा–२९८]	५५—८
[८]	"अभावप्रत्ययालम्बना०" [पात० १. १०]	२८–१०
[९]	"अभ्यस्ते निर्णयस्मृत्यो०" [ ]	५५–१३
[१०]	"अभ्यास-वैराग्याभ्यां तन्निरोधः" [पात० १. १२.]	२८—१
[११]	"अर्थेनैव विशेषो हि०" [ ]	१७८–११
[१२]	"अवयविनाऽवष्टब्धेष्ववयवेषु०" [मुक्तावली-का०]	१०३–२७
[१३]	"अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" [छान्दो० ८.१२.१]	१४–१२
[१४]	"असदकरणादुपादानग्रहणात्०" [साङ्ख्यकारिका]	६९–१६
[१५]	"अहिंसया क्षमया क्रोधस्य०" [ ]	१७—३
[१६]	"आगमेनानुमानेन०" [ ]	३०–१३
[१७]	"आत्मज्योतिरेवायं पुरुषः०" [ ]	१७५–२२
[१८]	"आत्मसिद्धेः परं शोका०" [ ]	१८१–२६
[१९]	"आद्ये परोक्षम्" [तत्त्वार्थ० १. ११]	१६—८
[२०]	"आनन्दं ब्रह्मणो रूपं०" [ ]	१२—२
[२१]	"आम्नायस्य क्रियार्थं०" [ ]	१२–१८
[२२]	"आलोकसंसर्गाभावसमुदाय०" [ ]	१४१–२९
[२३]	"इत्येषा सहकारिशक्तिरसमा० [ ]	२०६—१
[२४]	"ईहिज्जइ णाऽगहियं णज्जइ [विशेषा० भाष्यगाथा– २९६]	५४–२१

पद्यादि-	पत्र-पङ्क्तीः-
[२५] "उक्रमओऽइक्रमओ०" [विशेषा० भाष्यगाथा- २९५]	५४-१६
[२६] "उप्पलदलसयवेहे व्व०" [विशेषा० भाष्यगाथा- २९९]	५३-२६
[२७] "ऋतम्भरा तत्र प्रज्ञा" [पात० १. ४८]	३०-१०
[२८] "एतदात्म्यमिदं सर्वं०" [ ]	११९-२५
[२९] "एत्तोचिय ते सव्वे०" [विशेषा० भाष्यगाथा- २९७]	५४-२६
[३०] "कर्मनाशाजलस्पर्शात्०" [ ]	१८८-१६
[३१] "किं स्यात् सा चित्रतैकस्यां०" [ ]	१७२-१६
[३२] "कृदभिहितो भावो द्रव्यवत्०" [ ]	९-११
[३३] "कोष्ठान्तःसंचारी वायुः प्राणः" [ ]	१०८-२०
[३४] "क्षणिकाः सर्वसंस्काराः" [ ]	७३-२६
[३५] "क्षीणवृत्तेरभिजातस्येव०" [पात० १. ४१]	३०—५
[३६] "गिरिदरीविवरवर्तिनो०" [ ]	१२९-२३
[३७] "गुणे शुक्लादयः पुंसि०" [अम० को० १. ५. १७]	१४६-२७
[३८] "चतुर्विधा हि ग्राह्यसमापत्तिः" [ ]	३०—४
[३९] "चिरध्वस्तं फलायालं०" [कुसुमाञ्जलौ-१. ९]	१८३-२३
[४०] "चैतन्यविशिष्टः कायः पुरुषः" [ ]	४०—१
[४१] "जत्तो चिय पच्चकं सोम्म०" [विशेषा० एकादशे गणधरवादे गाथा- ३३]	२४—१
[४२] "जाणिज्जइ चिंतिज्जइ०" [ ]	२२—४
[४३] "जातस्य हि ध्रुवो०" [भ० गी० २. २७]	२३-१५
[४४] "जात्यायुर्भोगा०" [ ]	२०१-१९
[४५] "जे संतवायदोसे सक्को०" [संम० गाथा- १४७]	७०-२७
[४६] "जो तुल्लसाहणाणं [विशेषा० प्रथमगणधरवादे गाथा- ८]	१७६-११
[४७] "ज्ञानाग्निः सर्वकर्माणि०" [भ० गी० ४. ३७]	२०२-२०
[४८] "ज्ञानं न केवलमशेष०" [न्यायखण्डखाद्ये०]	२०१-१२
[४९] "तत् परं पुरुषख्यातैः०" [पात० १. १६]	२९—७
[५०] "तत् प्रत्यक्षं परोक्षं च०" [ ]	१६७-१५
[५१] "तत्रात्मा तावत् प्रत्यक्षतो०" [न्यायभाष्य०]	१४८-२५

पद्यादि–	पत्र–पङ्क्तीः–
[५२] "तत्र स्थितौ यत्नोऽभ्यासः" [पात० १. १३]	२८–१६
[५३] "तमः खलु चलं नीलं०" [ ]	१४४–२४
[५४] "तस्यापि निरोधे सर्वनिरोधा०" [पात० १. ५१]	३०–१९
[५५] "तिण्णिवि उप्पायाई०" [सम्मतौ गा० १३२]	११५–१७
[५६] "तेजसोऽतिविनिवृत्तिरूपता०" [ ]	१२२—१
[५७] "तेण दासेण मे०" [ ]	२०२—२
[५८] "तेषामयमाशयः०" [मुक्तावली-का०]	१०४–२५
[५९] "तेषां मोहः पापीयान्०" [न्यायसू० ४. १.]	९–१८
[६०] "दव्वंतरसंजोगाहि०" [सम्मतौ-गा० १३५]	११६–१८
[६१] "दुःखानुशयी द्वेषः" [पात० २. ८.]	२८—७
[६२] "दुःखाभावोऽपि०" [ ]	१३–२६
[६३] "दृग्-दर्शन-शक्त्योः०" [पात० २. ६.]	२८—५
[६४] 'दृष्टाऽनुश्रविकविषय०" [पात० १. १५.]	२९—४
[६५] "दृश्यदृष्टयोर्न संदेहो०" [ ]	१४९–२६
[६६] "द्वित्वादयः परार्द्धान्ता०" [कारिकावली–१०७]	१४२–११
[६७] "धर्मस्य फलमिच्छन्ति०" [ ]	१६–२५
[६८] "नाभुक्तं क्षीयते कर्म०" [ ]	२०२–१६
[६९] "नित्यसत्त्वा भवन्त्येके०" [ ]	३६—३
[७०] "नित्यं विज्ञानमानन्दं ब्रह्म" [ ]	११–१६
[७१] "निमित्तभेदसंसर्गा०" [कुसुमाञ्जलि]	१२३—४
[७२] "निर्विचारवैशारद्ये०" [पात० १. ४७]	३०—९
[७३] "नो इहलोगट्ठाए०" [ ]	२७–२४
[७४] "पच्चुप्पन्नं भावं विगय०" [सम्मतौ गाथा– १००]	७७–१४
[७५] "परिणाम-ताप-सं" [ ]	३८—२
[७६] "पाको न संभवति०" [दिनकरी–]	१०४—४
[७७] "पुण्णफलं दुक्खं चिय०" [विशेषा० एकादशो गणधरवादे गाथा– ३३]	२३–२६
[७८] "प्रत्ययानां प्रकृत्यर्थो०" [ ]	९—१६

पद्यादि-	पत्र-पङ्क्तीः-
[७९] "प्राणादिस्तु महावायु०" [कारिकावली-श्लो० ४४]	१०८-१६
[८०] "प्राणोऽपानः समान०" [ ]	१०८-१७
[८१] "बोधः स्वार्थावबोधक्षम०" [ ]	१७०—१
[८२] "ब्रह्मैवेदं सर्वम्" [नृसिंहो० ७. ३]	१२-१७
[८३] "भग्नोऽप्येतद्य०" [ ]	१९-२५
[८४] "भिद्यते हृदयग्रन्थि०" [यो० शि० ६.४०]	२०२-१८
[८५] "मरीचिरुच्चैः समुदञ्चतीयं०" [ ]	२०५-१७
[८६] "मोक्षः कर्मक्षयादेव०" [ ]	२९-१५
[८७] "यत्रैव जनयेदेनां०" [ ]	७६-२२
[८८] "यथा कथायां प्रविशन्०" [ ]	१५८—५
[८९] "यावज्जीवेत् सुखं०" [ ]	२०९—५
[९०] "युक्तिर्मुक्तिप्रसरहरणी०" [ ]	२१०—१
[९१] "येषामेषाऽपि वाणी मनसि०" [ ]	१७०—३
[९२] "लोभमूलानि पापानि०" [ ]	१८-२०
[९३] "वह्निरुष्णो जलं शीतं०" [ ]	३६—५
[९४] "वाचारम्भणं विकारो०" [छान्दो० ६.१.६]	११९-२७
[९५] "वार्ताभिमामत्र निशम्य सम्यक्०" [ ]	२१०-५
[९६] "विकल्पयोनयः शब्दाः०" [ ]	४३-१८
[९७] "विशेष्ये बाधे सति०" [ ]	५—७
[९८] "विसयसुहं दुक्खं चिय०" [विशेषा० एकादशे गणधर०गा० ३५]	२४—३
[९९] "वीतरागजन्मादर्शनात्" [ ]	५६-२५
[१००] "वेदान्तानामशेषाणामादि०" [ ]	१०-१७
[१०१] "व्यक्तेरभेदस्तुल्यत्वं०" [ ]	१२-११
[१०२] "व्यतिक्रमोत्क्रमौ नैतै०" [ ]	५४—६
[१०३] "शरीरे प्राणसञ्चारे०" [ ]	११०-२०
[१०४] "श्रेयांसि बहुविघ्नानि०" [ ]	२-१७
[१०५] "सङ्ख्यातः परिमाणाच्च०" [कारिकावलि-१११]	८४-२१
[१०६] "संस्कारः पुंस एवेष्टः०" [कुसुमाञ्जलि स्तबक १ का० ११]	५९—१

पद्यादि–	पत्र–पङ्क्तीः–
[१०७] "संस्कारशेषोऽन्यः" [पात० १. १८]	३०–२१
[१०८] "संभोगो निर्विशेषाणां०" [भ० गी० ६.२१]	१८७–११
[१०९] "स तु दीर्घकाल०" [पात० १. १४]	२८–१९
[११०] "सत्तातोऽपि न भेदः स्याद्०" [वार्तिककार]	१२०–१४
[१११] "सद्दुज्जुसुआणं पुण०" [ ]	३२–२७
[११२] "सदेव सौम्येदमग्र०" [श्रुति]	११९–२४
[११३] "सर्वत्र पर्यनुयोगपराणि सूत्राणि० [ ]	४३–२८
[११४] "सर्वं ब्रह्ममयं जगत्" [ते० बि० ६. २८.]	१२–१६
[११५] "सर्वेभ्यो दर्श-पूर्णमासौ" [ ]	८—६
[११६] "सव्वा वि य पव्वज्जा०" [ ]	२०४–१९
[११७] "सीसमइमंगलपरिग्गहत्थ०" [विशेषा० भाष्यगाथा– ३०]	८–१५
[११८] "सुखमात्यन्तिकं यत्र०" [भ० गी० ६–२१]	१४–२६
[११९] "सुखानुशयी रागः" [पात० २. ७.]	२८—६
[१२०] "सूक्ष्मविषयत्वं०" [पात० १. ४५]	३०—३
[१२१] "स्पष्टं प्रत्यक्षम्" [प्रमाणनयतत्त्वालोकालङ्कारे २. १]	१६७–१३
[१२२] "स्वगृहान्निर्गतो भूयो [ ]	१४९–१६
[१२३] "स्वभावनियमाभावादुपकारो०" [ ]	१७७–१६
[१२४] "स्वरसवाही विदुषोऽपि०" [पात० २. ९.]	२८—७

स्याद्वादवाटिकाटीकासहितस्य शास्त्रवार्तासमुच्चयस्य शुद्धिपत्रकम्।

शुद्धम्	अशुद्धम्	पत्र-पङ्क्ती
°जन्यत्वेन	°जन्यत्वं°	५–२४
परमात्मानमिति	परमात्मेति	८–२३
°दद्दष्टा°	°ददुष्टा°	११–१३
°निवृत्तिस्ततो°	°निवृत्तिततो	१३—७
दुःखाभावोऽपि	दुःखभावोऽपि	१३–२६
°वच्छिन्नसुख-त्वावच्छिन्नप्र०	°वच्छिन्नप्र°	१४–१४
सुखैषिणा	सुखषिणा	१५–२४
°सकलकारणसम°	°सकलसम°	२१—८
भवोपग्राहि°	भावोपग्राहि°	३१—७
°धातोत्तर°	°धातोरुत्तर°	३१–२३
°दीनां घ-टादीनाञ्च°	°दीनां क°	३६—१
एतन्मते	एतमन्ते	४०–२१
°चारः; ननु	°चारः ननुः,	४२—२
निर्विकल्पकं	विर्विकल्पकं	४३—६
°प्युपोद्बलकम्,	°प्युद्बलकम्,	४३–२०
°दकं शरीर°	°दकशरीर°	४४–१२
शरीरपरिमाण°	शरीरपरिणाम°	४४–१३
°तुल्यपरिमाण°	तुल्यकपरिणाम°	
भूलक्षणो°	मूलक्षणो°	४४–२०
भावत्वव्याप्तमिति	भावत्वमिति	४९—८
भूतातिरिक्तः।	भूतारिक्तः।	४९–२२
धर्मिवाचक°	धार्मिवाचक°	५०–१८
°बोधकत्वस्यैवा°	°बोधकस्यैवा°	५०–२५
°दकावच्छि°	°दकवच्छि°	५१–१४
जातिस्मरण°	जात्यस्मरण°	५३–११
मैत्रेणापि	मैत्रेणादि°	५७—१
°परिमाण°	°परिणाम°	५७—४
°विषयकत्वे न ग्रहणं न	°विषयकत्वेन ग्रहणं यद्यपि न	६०—३ ६५–२३
'कोपश्चार्वाकस्य	'कोपो यथा चार्वाकस्य	६८–१२
कश्चिद्	कृश्चिद्	७७–११
°दात्मनो	°दावात्मनो	७८–१०
यद्येकरू°	यद्यप्येकरू°	८०—६
°वच्छेदकत्वेन	°वच्छेदकत्वे	८१–१९
°संयोगे,	°संयोगः,	८२–२०
°दवयवावच्छे°	°दवयावच्छे°	८५–१२
सन्निकर्षाभा°	सन्निकर्षभा°	८५–१४
सकम्पं,	सकम्प,	८५–१५
पाणावेव	पाणावेद	८५–१७
शरीरेऽव°	शरीरऽव°	८५–२१
महत्त्वोपादानत्वेन	महत्त्वोत्पा-दनत्वेन	८७—३
°दकत्वास°	°दत्वास°	८७—९
सन्मात्रं द्रव्य	सन्मात्र द्रव्य	८७–१३
भेदे नैकत्व°	भेदेनैकत्व°	८७–२७
तादृश°	तादृश°	८८—८
स्यात्, अपि	स्यात्, पि	८८–१३
इत्यवयविनो	इत्यवयवनो	८८–१५
तद्भिन्ने च	तद्भिन्न च	८९–१२

शुद्धम्	अशुद्धम्	पत्र-पङ्क्ती
व्यक्तेतिवि°	व्यक्ति वि°	८९–१३
सुखस्य	सुखस्य	९३—५
विनिगमना°	विनि मना°	९३–१३
प्रागुमयोग्यस्या°	प्रागुमयोगस्या°	९३–१५
चैतन्यात्मोपा°	चैतन्या-त्मापा°	९३–२२
°त्मनोऽदृष्टा°	°त्मनोदृष्टा°	९४—३
भोगप्रति°	भोग प्रति°	९४—४
°यां भिन्नस्वभाव°	°यां स्वभाव°	९५—३
रसवीर्याद्युत्त°	रसत्वाद्युत्त°	९५—४
कार्यो–	कायो–	९५—६
तथाशरीरस्य	तथाशरी-रस्य तथा	९६—८
घटादिलक्षण°	घटादिक्षण°	९७–२४
°स्यात्मत्वे तु	°स्यात्म-त्वेऽपि	१०१–१२
सर्वथा	सर्वदा	१०२–१७
°मप्यपगच्छ°	°मप्यगच्छ°	१०६–१९
°दभावश्चेदिति	°दभावश्चेति	१०७—६
तच्छरीरचैतन्य-नाश	तच्छरीरनाश	११०—८
किमपि वाच्यं	किमपि बोध्यं	११०–११
नेष्टमेव	नेष्टमेव,	१११–१०
°र्यमजयो	°र्यमजयो–	११२–२८
°भिज्ञमधु°	°भिज्ञैर्मधु°	११८–१०
°श्रयत्वस°	°श्रययस°	११९–१६
तु–	तु	११९–२२
°सम्बन्धेन	°सम्बधेन	१२४–१०
°परिमाण°	°परिणाम°	१२५–२७
°न्यच्च	°मन्यच्च	१२६–११
°कारणतावच्छे°	°कारणावच्छे°	१२७—६
°श्वश्रुःसंयोगस्त्व°	°श्वश्रुस्त्व°	१२७—७
न–आलोकंविना	न–अलोकंना°	१२८–१७
शरीरप्रविष्टस्य	शरीराविष्टस्य	१२९—२
°न्द्रियसम्बद्धविशे°	°न्द्रियविशे°	१३१–२६
प्रत्यक्षं प्रति	प्रत्यक्ष प्रति	१३१–२७
°रत्वानिरू°	°रतानिरू°	१३३–१८
°रत्वानिरू°	°रतानिरू°	१३३–२६
न इति–	न इति ।	१३४—७
°रत्वानिरू°	°रतानिरू°	१३४–१९
°णतासन्नि°	°णतासन्निकर्ष–तासन्नि°	१३४–२९
°वेन	°नेन	१३५–१३
भावत्वनिर्वि-	भावत्वं निर्वि-	१३५–२९
°भावस्यारोप°	°भावस्यारो-पस्यारोप°	१३६–२०
°रूपवद्याव°	°रूपवद् याव°	१४१—४
किञ्चित्—	किञ्चित्	१४१–२९
°भावत्वाभावात्,	°भाक्त्वात्,	१४५–१९
पुंलिङ्गक°	पुलिङ्गक°	१४६–२९
°मपि मयि घट°	°मपि घट°	१६०—१

शुद्धम्	अशुद्धम्	पत्र-पङ्क्ती
विशेषणतया	विशेषणीय-तया	१६०–१२
न भवति	भवति	१६०–२५
परप्रकाशेनो°	परप्रकाशे नो°	१६१—५
	ऽभ्युपेयते, तथा च विषयोऽपि अपेक्षामेदेन विरोधिधर्मद्वयसमन्वितो	१६२–१३
तत्ताविशिष्टे	तत्राविशिष्टे	१६३—३
°पित–	°पिता	१६३–२१
सा ज्ञानत्वा-	सज्ञानत्वा	१६३–२४
°विशेष्यता-	°विशेषता	१६३–२७
सामम्यां°	साम्यां°	१६४—८
°न्तर्गततया	°न्तर्गताया	१६४–२६
°ति, शक्तिविशेष°	°ति, शेष°	१६६—१
वह्निलौकिक°	वह्निलाकिक°	१६६–१४
°जन्यतानव-	°जन्यताव-	१६६–१५
°दकत्वेन	°दकेन	१६८—७
°ध्यवस्यतः	°ध्यस्यतः	१६८–२८
°व्यङ्ग्यायाः स्पष्ट°	°व्यङ्ग्यास्पष्ट°	१६९—९
'अहं जाने'	'अहं ज्ञाने'	१७३–११
°पराधेन,	°पराधेत,	१७३–१३
°घटवि°	°घटव°	१७६–१०
तथा क्रियय्यैव	तथाक्रियय्यैव	१७८–१२
ज्ञाने च	ज्ञाते च	१७८–२३
ज्ञानम°	ज्ञातम°	१७८–२३
°नुपपत्त्यैव	°नु पत्त्यैव	१७८–२७
°भावाज्ञैव°	°भावानैव°	१७८–२९
सुष्वाप°	सुष्वप°	१७९—९
°तावेक्षण°	°तापेक्षण°	१७९–१८
°दिति–क्ष°	°दितिक्ष°	१८०—२
°ज्ञातता°	°ज्ञानता°	१८०—५
ननु ज्ञान°	नच ज्ञान°	१८०–१४
वार्त्तान्तरं°	वार्त्तानन्तरं°	१८२—२
°साधनानीति	°साधननीति	१८४—४
°त्यागतत्वेन	°त्यागत्वेन	१८४–२९
°दम्पर्याव°	°दम्पर्यायाव°	१८६—८
°मात्रेणैवा-	°मात्रैवा-	१८८—४
°णस्यासम°	°णस्यसम°	१८९–१७
°दकत्वमिति	°दकमिति	१८९–२८
°नाश्यता°	°नाशता°	१९०—५
°त्वमागतम्,	°वमागतम्,	१९०–१५
°स्यावरणस्या-	°स्यावरणस्यां	१९२–१३
कर्म क्रियया	कर्मक्रियया	१९२–२६
°ग्रहस्यभावे	°ग्रहस्याभावे	१९४–२४
°ग्राहकनया°	°ग्राहकतया°	२०२—२
वस्तुतो विषय	वस्तुनो विषय	२०८—९
निबन्धनम्,	निबन्धम्,	२०९–११

स्याद्वादवाटिकाटीकोपेतशास्त्रवार्त्तासमुच्चय-प्रथमस्तबकशुद्धिपत्रकम्॥

॥ ॐ अर्हं नमः ॥

ચૌદશોને ચુમ્માલીશ ગ્રંથના પ્રણેતા-યાકિનીમહત્તરાધર્મસૂનુ-
સૂરિપુરન્દર-શ્રીહરિભદ્રસૂરીશ્વરવિરચિત 'શાસ્ત્રવાર્તા સમુચ્ચય'નો

સંક્ષિપ્ત ભાવાર્થ :—

કર્તા :—પન્યાસજી મહારાજ શ્રીસુશીલવિજય ગણિવર્ય.

[હરિગીત - છંદમાં.]

વંદી વિભુ શ્રી વીરને, હરિભદ્રસૂરીશ્વર અને,
શ્રી નેમિ-લાવણ્યસૂરિને, પન્યાસ ગુરુવર દક્ષને;
શાસ્ત્રવાર્તાના સમુચ્ચયને કહું સંક્ષેપથી,
ભાવાર્થ રૂપે અબુધજીવના, બોધ અર્થે હર્ષથી. [૧]

प्रणम्य परमात्मानं, वक्ष्यामि हितकाम्यया।
सत्त्वानामल्पबुद्धीनां, शास्त्रवार्तासमुच्चयम् ॥ १ ॥ [અનુષ્ટુપ્]

ઇષ્ટદેવને નમસ્કારરૂપ મંગલાચરણાદિ—

પરમાત્માને મન વચન અને કાયાની એકાગ્રતાપૂર્વક નમન કરીને, અલ્પબુદ્ધિવાળા પ્રાણીઓના હિતને અર્થે 'શાસ્ત્રવાર્તાસમુચ્ચય' નામના ગ્રંથને હું [હરિભદ્રસૂરિ] કહીશ.

[**શાસ્ત્ર**-બૌદ્ધ વૈશેષિક આદિ દર્શનો, તેની **વાર્તા**-સિદ્ધાન્તના પ્રકૃષ્ટ-વાદો, તેનો **સમુચ્ચય**-એકત્ર સંકલન. અર્થાત્—બૌદ્ધવૈશેષિકાદિ દર્શનોના સિદ્ધાન્તવાદોની સંકલના જેમાં હોય તેનું નામ 'શાસ્ત્રવાર્તાસમુચ્ચય' કહેવામાં આવે છે.] (૧)

શાસ્ત્રવાર્તાસમુચ્ચયનું પ્રયોજન—

यं श्रुत्वा सर्वशास्त्रेषु, प्रायस्तत्त्वविनिश्चयः।
जायते द्वेषशमनः, स्वर्ग-सिद्धिसुखावहः ॥ २ ॥

જે શાસ્ત્રવાર્તાસમુચ્ચય નામના ગ્રંથના શ્રવણથી–તે તે નયની ઘટના-વાળી વિચારણાથી, ઘણું કરીને બૌદ્ધાદિ દર્શનોને વિષે તત્ત્વનો–અર્થાત્ આ બૌદ્ધદર્શનની હકીકત પર્યાય નયની દૃષ્ટિએ અને વૈશેષિકની હકીકત દ્રવ્યાર્થિક નયની દૃષ્ટિએ યોજાએલી છે, ઇત્યાદિ સુંદર નિશ્ચય થાય છે; અને આવા પ્રકારનો નિશ્ચય થવાથી તે તે દર્શન પ્રત્યેનો જે દ્વેષ તે શમી જાય છે, અને દ્વેષ શમનથી સ્વર્ગના અને મોક્ષના સુખની પ્રાપ્તિ થાય છે. (૨)

સર્વમાન્ય વિચાર—

दुःखं पापात् सुखं धर्मात्, सर्वशास्त्रेषु संस्थितिः ।
न कर्तव्यमतः पापं, कर्तव्यो धर्मसंचयः ॥ ३ ॥

અધર્મથી દુઃખ અને ધર્મથી સુખ થાય છે, એવી સકલ દર્શનમાં વ્યવસ્થા છે; માટે કોઈએ અધર્મ–પાપ કરવું નહીં અને ધર્મનો–પુણ્યનો સંચય કરવો. (૩)

પાપના હેતુઓ—

हिंसाऽनृतादयः पञ्च, तत्त्वाश्रद्धानमेव च ।
क्रोधादयश्च चत्वार इति पापस्य हेतवः ॥ ४ ॥

હિંસા અસત્ય સ્તેય (ચોરી) મૈથુન અને પરિગ્રહ એ પાંચ, તથા તત્ત્વનું અશ્રદ્ધાન–મિથ્યા અભિનિવેશ, અને ક્રોધ માન માયા અને લોભ એ ચારે કષાયો, આ સર્વે પાપ કર્મના કારણો છે. (૪)

પુણ્યના હેતુઓ—

विपरीतास्तु धर्मस्य, एत एवोदिता बुधैः ।
एतेषु सततं यत्नः, सम्यक् कार्यः सुखैषिणा ॥ ५ ॥

હિંસાની પ્રતિપક્ષી અહિંસા, અસત્યનો પ્રતિપક્ષી–સત્ય,સ્તેયનો પ્રતિપક્ષી અસ્તેય, મૈથુનનો પ્રતિપક્ષી બ્રહ્મચર્ય, પરિગ્રહનો પ્રતિપક્ષી અપરિગ્રહ, મિથ્યાત્વનો પ્રતિપક્ષી સમ્યગ્દર્શન, ક્રોધનો પ્રતિપક્ષી ક્ષમા, માનનો પ્રતિપક્ષી મૃદુતા, માયાનો પ્રતિપક્ષી ઋજુતા, અને લોભનો પ્રતિપક્ષી નિસ્પૃહતા, આ રીતે પૂર્વે જણાવેલા પાપના કારણોથી વિપરીત એવા આ ધર્મના–પુણ્યકર્મના કારણો જિનવચનાનુરાગી ગીતાર્થ મહાપુરુષોએ કહેલા છે; સુખના અભિલાષી પ્રાણીઓએ આને વિષે સતત સુપ્રયત્ન કરવો જોઇએ. (૫)

ધર્મહેતુના કારણો—

साधुसेवा सदा भक्त्या, मैत्री सत्त्वेषु भावतः ।
आत्मीयग्रहमोक्षश्च, धर्महेतुप्रसाधनम् ॥ ६ ॥

સર્વદા બહુમાન પૂર્વક સાધુસેવા–જ્ઞાનાદિ ગુણોના નિધાન એવા મુનિવરની ઉપાસના, નિખિલ જન્તુ પ્રત્યે હાર્દિક મૈત્રી, અને મમત્વનો ત્યાગ; આ ત્રિપુટી ધર્મના હેતુ જે અહિંસાદિ તેનું અદ્વિતીય સાધન છે. (૬)

સાધુસેવાનું ફળ—

उपदेशः शुभो नित्यं, दर्शनं धर्मचारिणाम् ।
स्थाने विनय इत्येतत्, साधुसेवाफलं महत् ॥ ७ ॥

પ્રતિદિન ઉત્તમ ઉપદેશ મળે, પવિત્ર મુનિવરોનું દર્શન થાય, અને ઉચિત સ્થાને વિનય થાય; આ બધું સાધુસેવાનું મહાન્ ફળ છે. (૭)

મૈત્રીનું ફળ—

मैत्रीं भावयतो नित्यं, शुभो भावः प्रजायते ।
ततो भावोदकाक्षान्तो–द्वेषाग्निरुपशाम्यति ॥ ८ ॥

મૈત્રીભાવને ધારણ કરતા જીવને સર્વદા શુભ ભાવ પેદા થાય છે, અને તે શુભ ભાવરૂપી જળથી જીવનો દ્વેષરૂપી અગ્નિ શાન્ત થાય છે. (૮)

મમત્વત્યાગનું ફળ—

अशेषदोषजननी, निःशेषगुणघातिनी ।
आत्मीयग्रहमोक्षेण, तृष्णाऽपि विनिवर्तते ॥ ९ ॥

મમત્વનો ત્યાગ કરવાથી, સકલ દોષની ઉત્પાદક અને સકલ ગુણની ઘાતક એવી તૃષ્ણા પણ નિવૃત્ત થાય છે. (૯)

સદ્ધર્મનો સાધક—

एवं गुणगणोपेतो, विशुद्धात्मा स्थिराशयः ।
तत्त्वविद्भिः समाख्यातः, सम्यग्धर्मस्य साधकः ॥ १० ॥

ઉપર જણાવ્યા પ્રમાણે ગુણગણથી સહિત, વિશુદ્ધચિત્તવાળો, અને સ્થિરાશયવાળો જે પ્રાણી, તેને તત્ત્વજ્ઞ પુરુષોએ સદ્ધર્મનો સાધક કહ્યો છે. (૧૦)

ધર્મની પ્રેરણા, અને ધર્માધર્મનું ફળ—

उपादेयश्च संसारे, धर्म एव बुधैः सदा ।
विशुद्धो मुक्तये सर्वं, यतोऽन्यद् दुःखकारणम् ॥ ११ ॥

સંસારમાં સુજ્ઞ જીવોએ અહનિશ ધર્મજ કરવો જોઇએ, કારણ કે— નિર્મળ એવો આ ધર્મ પ્રાંતે શિવસુખનો દાયક બને છે; અને ધર્મ સિવાયની સકલ વસ્તુ [માળા–ચન્દનવિલેપન–અંગના આલિઙ્ગનાદિ] પ્રાંતે નરકાદિ-દુઃખનું જ કારણ બને છે. (૧૧)

'ધર્મસિવાયની સકલ વસ્તુ દુઃખનું કારણ છે.' એ વાતનું સ્પષ્ટીકરણ—

अनित्यः प्रियसंयोगः, इहेर्ष्या-शोकवत्सलः ।
अनित्यं यौवनं चापि, कुत्सिताचरणास्पदम् ॥ १२ ॥

આ સંસારમાં અનિત્ય એવો પ્રિયવસ્તુનો સંયોગ ઈર્ષ્યા અને શોકથી ભરેલો છે, તથા અનિત્ય એવી યૌવન અવસ્થા પણ ઉદ્દામ પ્રવૃત્તિનું ધામ છે. (૧૨)

अनित्याः सम्पदस्तीव्र-क्लेशवर्गसमुद्भवाः ।
अनित्यं जीवितं चेह, सर्वभावनिबन्धनम् ॥ १३ ॥

આ સંસારમાં તીવ્ર કલેશની પરંપરાથી ઉત્પન્ન થયેલી ધન-ધાન્યાદિની સંપત્તિઓ અનિત્ય છે, અને સકલ વ્યવહારનું કારણ જીવિત પણ વીજળીના ચમકારની જેમ અનિત્ય છે. (૧૩)

પારલૌકિક દુઃખ—

पुनर्जन्म पुनर्मृत्युर्हीनादिस्थानसंश्रयः ।
पुनः पुनश्च यदतः, सुखमत्र न विद्यते ॥ १४ ॥

આ સંસારમાં આ જીવન પૂર્ણ થયા બાદ ફરી જન્મ, અને એ જન્મ મળ્યા બાદ પ્રાંતે મૃત્યુ, એમ જન્મ મરણની પરંપરા ચાલી રહી છે; તેમાં પણ વારંવાર હીન હીનતર અને હીનતમ જાતિનું આશ્રયણ કરવું પડે છે, આજ કારણથી સંસારમાં સુખ છે જ નહીં, વ્યાવહારિક સુખ પણ અનેક દુઃખ મિશ્રિત હોવાથી વસ્તુતઃ દુઃખરૂપ જ છે. (૧૪)

ઉપસંહાર—

प्रकृत्याऽसुन्दरं ह्येवं, संसारे सर्वमेव यत् ।
अतोऽत्र वद किं युक्ता, क्वचिदास्था विवेकिनाम् ? ॥ १५ ॥

ખરેખર આ સંસારની અંદર સકલ વસ્તુ સ્વભાવથીજ અસુંદર છે. આ કારણથી [હે ચેતન ?–] બોલ કે, વિવેકીજનને કોઈપણ સ્થળમાં આસ્થા–શ્રદ્ધા કે પ્રવૃત્તિ કરવી તે શું ઉચિત છે ? [અર્થાત્ જરાપણ ઉચિત નથી.] (૧૫)

ધર્મ સિવાયમાં પ્રવૃત્તિ યુક્ત નથી, અને ધર્મમાં તો પ્રવૃત્તિ યુક્ત જ છે; એ જ વાત જણાવે છે—

मुक्त्वा धर्मं जगद्वन्द्यमकलङ्कं सनातनम् ।
परार्थसाधकं धीरैः, सेवितं शीलशालिभिः ॥ १६ ॥

વિશ્વને વંદનીય, કલંકરહિત, અનાદિ, મોક્ષનો સાધક, અને જેને સર્વોત્તમ શીલનાધારી એવા સ્થિર આશય વાળા તીર્થંકરાદિ મહા પુરુષોએ સેવેલ છે એવો જે ધર્મ, તે સિવાયની વસ્તુમાં શ્રદ્ધા કે પ્રવૃત્તિ કરવી તે ઉચિત નથી. અર્થાત્ આવા ધર્મમાં આસ્થા કરવી તે ઉચિત છે, પણ અન્યમાં કરવી તે ઉચિત નથી. (૧૬)

વાદીની શંકા—

आह तत्रापि नो युक्ता, यदि सम्यग् निरूप्यते ।
धर्मस्यापि शुभो यस्माद् , बन्ध एव फलं मतम् ॥ १७ ॥
न चायसस्य बन्धस्य, तथा हेममयस्य च ।
फले कश्चिद् विशेषोऽस्ति, पारतन्त्र्याविशेषतः ॥ १८ ॥
तस्मादधर्मवत् त्याज्यो, धर्मोऽप्येवं मुमुक्षुभिः ।
धर्मा–ऽधर्मक्षयान्मुक्तिर्मुनिभिर्वर्णिता यतः १९ ॥

વાદીશંકા કરે છે કે–જો રૂડી રીતે વિચારણા કરાય તો ધર્મને વિષે આસ્થા કરવી તે પણ યુક્ત–વ્યાજબી નથી; કારણ કે–ધર્મનું ફળ શુભ કર્મનો બંધ માનેલ છે. (૧૭)

પાપકર્મનો બંધ ભલે લોઢાની બેડી હોય, અને પુણ્યકર્મનો બંધ ભલે સોનાની બેડી હોય, છતાં પણ ફળમાં ફેર પડતો નથી; કારણ કે-બન્ને સ્થળમાં સ્વાધીનતાનો વિનાશ થઈ રહેલ છે. (૧૮)

ઉપરોક્ત કારણથી મુમુક્ષુ પ્રાણીઓએ અધર્મની જેમ ધર્મને પણ છોડવો જોઇએ; કારણ કે-ધર્મ અને અધર્મનો-પુણ્ય અને પાપનો સર્વથા ક્ષય થવાથી જ મુનિવરોએ મુક્તિને વર્ણવેલી છે. (૧૯)

શાસ્ત્રકારનું સમાધાન, અને અંતર્ગત ધર્મના બે ભેદ—

उच्यत एवमेवैतत्, किन्तु धर्मो द्विधा मतः।
संज्ञानयोग एवैकस्तथाऽन्यः पुण्यलक्षणः ॥ २० ॥

હે વાદી ? સાંભળ–પુણ્ય અને પાપનો સર્વથા ક્ષય થવાથી મોક્ષ થાય છે, એ હકીકત તારી બરાબર છે; પરંતુ સંજ્ઞાનયોગ અને પુણ્યલક્ષણ એમ ધર્મ બે રીતે માનેલો છે. (૨૦)

સંજ્ઞાનયોગ ધર્મનું સ્વરૂપ, અને તેની શક્તિ—

ज्ञानयोगस्तपः शुद्धमाशंसादोषवर्जितम्।
अभ्यासातिशयादुक्तं, तद्विमुक्तेः प्रसाधकम् ॥ २१ ॥

શુદ્ધ–અવિધિરુપ મળથી રહિત, અને જ્ઞાન તથા સંયમથી પુષ્ટ, આશંસા દોષરહિત–લૌકિક ફળની અભિલાષાથી રહિત, જે તપ તે સંજ્ઞાન યોગ લક્ષણ ધર્મ કહેવાય છે. આ તાપનો શુભશુભ અભ્યાસ પાડવાથી તે મોક્ષનું કારણ બને છે. [જેનાથી પુણ્યકર્મનો બંધ થાય એવો જે ધર્મ તે પુણ્યલક્ષણ ધર્મ કહેવાય છે. આ વાત પ્રસિદ્ધ હોવાથી ગ્રંથકાર મૂળમાં જણાવતા નથી.] (૨૧)

શંકા-સમાધાન—

धर्मस्तदपि चेत्? सत्यं, किं न बन्धफलः स?यत्।
आशंसावर्जितोऽन्येऽपि, किं नैवं चेन्न [चेद्?न] यत् तथा ॥२२॥

વાદી–તપ એ શું ધર્મ છે ? **સિદ્ધાન્તકાર**–હા, **વાદી**–તપોલક્ષણધર્મ એ પુણ્યકર્મના બંધનો હેતુ કેમ નથી થતો ? **સિદ્ધા૦** આશંસાદોષથી રહિત છે માટે, **વાદી**–દાનાદિ જે ધર્મો છે તે પણ તપની જેમ કર્મબન્ધનના અકારણ કેમ નથી ? **સિદ્ધા૦** દાનાદિ ધર્મો આશંસાવર્જિત નથી (અર્થાત્ તેમાં કાંઇક ફળાદિકની ઇચ્છા રહે છે.) (૨૨)

અન્યદર્શનમાં પણ ધર્મના બે ભેદ—

भोग-मुक्तिफलो धर्मः, स प्रवृत्तीतरात्मकः ।
सम्यक्त्वमिथ्यादिरूपश्च, गीतस्तन्त्रान्तरेष्वपि ॥ २३ ॥

ઇતર દર્શનમાં પણ તે ધર્મ બે પ્રકારે કહેલ છે. ભોગફલક ધર્મ અને મુક્તિફલક ધર્મ, પ્રવૃત્તિરૂપ ધર્મ અને નિવૃત્તિરૂપ ધર્મ, સમ્યગ્ ધર્મ અને મિથ્યા ધર્મ, હેય ધર્મ અને ઉપાદેય ધર્મ, અભ્યુદય ધર્મ અને નિઃશ્રેયસ ધર્મ, એમ બબ્બે રીતે ધર્મ ઇતરદર્શનમાં પણ કહેલ છે.

[જૈન દર્શન જેને 'પુણ્યલક્ષણ ધર્મ' કહે છે, તેને ઇતર દર્શન 'ભોગ-ફલક ધર્મ' કહે છે. અને જૈન દર્શન જેને 'સંજ્ઞાનયોગ ધર્મ' કહે છે, તેને ઇતરદર્શન 'મુક્તિ ફલક ધર્મ' કહે છે.] (૨૩)

સંજ્ઞાનયોગની સાબીતિ—

तमन्तरेण तु तयोः, क्षयः केन प्रसाध्यते ? ।
सदा स्यान्न कदाचिद् वा, यद्यहेतुक एव सः ॥ २४ ॥

સંજ્ઞાનયોગલક્ષણ ધર્મ સિવાય પુણ્ય અને પાપનો અત્યંત વિનાશ કઈ રીતે થઈ શકે ? અર્થાત્ ન થઈ શકે, માટે સંજ્ઞાનયોગ નામનો ધર્મ માનવો જોઈએ.

'પુણ્ય અને પાપના અત્યંતક્ષયનો હેતુ કોઈ જગતમાં નથી' એવી બૌદ્ધની જે શંકા તેનું નિરાકરણ કરવા માટે કહે છે કે—

ધર્મ અને અધર્મનો ક્ષય જો નિરહેતુક હોય તો આકાશની જેમ તે કાયમ હોવો જોઇએ; અથવા આકાશકુસુમની જેમ કદાપિ તે હોઈ શકે નહીં. (૨૪)

ઉપસંહાર—

तस्मादवश्यमेष्टव्यः, कश्चिद्धेतुस्तयोः क्षये ।
स एव धर्मो विज्ञेयः, शुद्धो मुक्तिफलप्रदः ॥ २५ ॥

ઉપરોક્ત કારણથી પુણ્ય અને પાપના અત્યંત ક્ષયનો હેતુ મુક્તિને આપનાર શુદ્ધ સંજ્ઞાનયોગ નામનો ધર્મ માનવો જોઈએ. (૨૫)

બૌદ્ધની શંકાનું સમાધાન—

धर्माधर्मक्षयान्मुक्तिर्यदुक्तं पुण्यलक्षणम् ।
हेयं धर्मं तदाश्रित्य, न तु संज्ञानयोगकम् ॥ २६ ॥

પુણ્ય અને પાપના ક્ષયથી [ધર્મ અને અધર્મના ક્ષયથી] મોક્ષ થાય છે, એવું જે કથન છે તે હેય એવા પુણ્ય ધર્મને આશ્રીને છે; પરંતુ સંજ્ઞાન-યોગ ધર્મને આશ્રીને નથી. (૨૬)

ઉપસંહાર—

अतस्त्रैव युक्तास्था, यदि सम्यङ् निरूप्यते ।
संसारे सर्वमेवान्यद्, दर्शितं दुःखकारणम् ॥ २७ ॥

ઉપરોક્ત કારણથી સંજ્ઞાનયોગલક્ષણ ધર્મમાં આસ્થા કરવી તે યુક્ત છે. ખરી રીતે જો વિચાર કરીએ તો સંસારમાં બાકીની સમસ્ત વસ્તુઓ દુઃખનું જ કારણ છે. (૨૭)

तस्माच्च जायते मुक्तिर्यथा मृत्यादिवर्जिता ।
तथोपरिष्टाद् वक्ष्यामः, सम्यक् शास्त्रानुसारतः ॥ २८ ॥

સંજ્ઞાનયોગ લક્ષણ ધર્મથી મરણાદિરહિત મોક્ષ કઈ રીતે થાય છે, તે વાત અમો ૩ડી રીતે શાસ્ત્રાનુસારે આગળ કહીશું. (૨૮)

શાસ્ત્રપરીક્ષા—

इदानीं तु समासेन, शास्त्रसम्यक्त्वमुच्यते ।
कुवादियुक्त्यपव्याख्यानिरासेनाविरोधतः ॥ २९ ॥

હમણાં તો નાસ્તિક આદિ કુવાદીઓની યુક્તિઓ અને અપવ્યાખ્યાનોનું નિરસન-પ્રમાણબાધ્યત્વ અને ભ્રાન્તિમૂલકત્વ જણાવવા દ્વારા કોઈ પણ શાસ્ત્રનો વિરોધ ન આવે તે રીતે શાસ્ત્રનું યથાર્થપણું સંક્ષેપથી કહીએ છીએ. (૨૯)

ચાર્વાકની માન્યતા—

पृथिव्यादिमहाभूतमात्रकार्यमिदं जगत् ।
न चात्मा-ऽदृष्टसद्भावं, मन्यन्ते भूतवादिनः ॥ ३० ॥

પૃથિવી પાણી અગ્નિ અને વાયુ એ ચાર મહાભૂત કહેવાય છે, આ મહાભૂતમાંથી જગત્ ઉત્પન્ન થયેલ છે; આવી માન્યતા ધરાવતો નાસ્તિક આત્મા પુણ્ય અને પાપ આ ત્રણ વસ્તુને માનતો નથી. (૩૦)

આસ્તિકની માન્યતા—

अचेतनानि भूतानि, न तद्धर्मो न तत्फलम् ।
चेतनाऽस्ति च यस्येयं स एवात्मेति चापरे ॥ ३१ ॥

